
# शाण्डिल्यसंहिता



कुल[illegible] डॉ० मण्डनमिश्रस्य '[illegible]'-पुरोवाचा
पुरस्कृता

फडकेकुलजेनानन्तशास्त्रिणा संशोधिता च

सम्पादकः

म.म. गोपीनाथकविराजः


सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

1.3

Second Copy

SARASVATĪ BHAVANA - GRANTHAMĀLĀ

[ Vol. 60 ]

# ŚĀṆḌILYA - SAṀHITĀ

## [ BHAKTI - KHAṆḌA ]
## OF
## MAHARṢI ŚĀṆḌILYA

FOREWORD BY

**DR. MANDAN MISHRA**

VICE - CHANCELLOR

EDITED BY

**M. M. GOPĪNĀTHA KAVIRĀJA**

Introduction by

**ŚRĪ ANANTA ŚĀSTRĪ PHAḌAKE**

Professor, Sanskrit College, Banares

VARANASI

1996

*Research Publication Supervisor —*

**Director, Research Institute,**
Sampurnanand Sanskrit University
Varanasi-221 002.

❑

*Published by —*

**Dr. Harish Chandra Mani Tripathi**
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

❑

*Available at —*

**Sales Department,**
Sampurnanand Sanskrit University
Varanasi-221 002.

❑

**Second Edition, 1000 Copies**
**Price Rs. 132.00**

❑

*Printed by —*

**Anand Printing Press**
C 27/170-A, Jagatganj

सरस्वतीभवन - ग्रन्थमाला

[ ६० ]

महर्षिश्रीशाण्डिल्यकृता

# शाण्डिल्यसंहिता

[ भक्तिखण्डः ]

कुलपतेः डॉ० मण्डनमिश्रस्य 'शिवसङ्कल्प' - पुरोवाचा
पुरस्कृता

काशिकराजकीयपाठशालीयपुराणेतिहासाध्यापकेन
व्याकरणाचार्यमीमांसातीर्थफडकेकुलजेनानन्तशास्त्रिणा
संशोधिता च

सम्पादकः
म. म. गोपीनाथकविराजः

वाराणस्याम्

२०५२ तमे वैक्रमाब्दे   १९१७ तमे शकाब्दे   १९९६ तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः —
**निदेशकः, अनुसन्धानसंस्थानस्य**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी ।

❑

प्रकाशकः —
**डॉ. हरिश्चन्द्रमणित्रिपाठी**
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी - २२१ ००२

❑

प्राप्तिस्थानम् —
**विक्रय-विभागः**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी - २२१ ००२

❑

**द्वितीयं संस्करणम्**, १००० प्रतिरूपाणि
**मूल्यम्** – १३२.०० रूप्यकाणि

❑

मुद्रकः —
**आनन्द प्रिंटिंग प्रेस**
सी २७/१७०-ए, जगतगंज
वाराणसी - २२१ ००२

# शिवसङ्कल्पः

संस्कृतवाङ्मयस्य शाखाद्वयं निगम आगमश्च। निगमागमयोर्विपुलो ग्रन्थराशिः समुपलभ्यते। कदाचिन्निगमग्रन्थापेक्षया आगमग्रन्थराशिर्विपुलतरो भवेत्। निगमे केवलं वेदास्तथा वेदोपबृंहणरूपा एव ग्रन्थाः परिगण्यन्ते; किन्त्वागमे तु वैदिकेतरजैनबौद्धादिसम्बद्धा अपि बहवः पारम्पर्यानुगता ग्रन्थाः सिद्धान्ता उपलभ्यन्ते। आगमे आगमस्यैवापरनामधेयभूतं तन्त्रमथवा आगमस्यैव किञ्चिद्भेदरूपं तन्त्रमपि परिचीयते। मुख्यतया पञ्चागमा व्यवह्रियन्ते– **शैवागमः, शाक्तागमः, वैष्णवागमः, सौरागमः, गाणपत्यागमश्च**। एतेभ्योऽन्येऽपि आगमाः श्रूयन्ते– **स्वायम्भुवः, चान्द्रः, पाशुपतः, चैनः, जैनः, बौद्ध** इत्यादि। ब्रह्मसूत्रस्य (१।२।३७) भामत्यां शैवागमस्यापरेऽपि भेदा उल्लिखिताः सन्ति– **कारुणिकः, कापालिकः, पाशुपतः**। एतेषु वैष्णवागमग्रन्थानां सङ्ख्या शताधिकाऽस्ति। वैष्णवाश्च सात्त्वतशब्देन, भागवतशब्देन, ऐकान्तिकशब्देनाभिधीयन्ते। पुनश्च वैष्णवानां भेदद्वयं भवति– पाञ्चरात्रिको वैखानसश्च। एतयोर्द्वयोराचारे पूजापद्धतौ भगवद्विग्रहसङ्ख्यायामुत्सवादिक्रमे च परस्परं वैशिष्ट्यं प्राप्यते।

एतेष्वागमेषु पाञ्चरात्रागमस्य महर्षिशाण्डिल्यप्रोक्ता **'शाण्डिल्यसंहिता'** लघुकायाऽपि वैष्णवरहस्यप्रतिपादकसर्वविषयसंयुता वैष्णवागमशास्त्रेषु विशिष्टं स्थानं बिभर्ति, अत एवागमशास्त्रस्य विश्वविश्रुतकोविदैर्महामहोपाध्यायैर्विद्वद्वरैः **श्रीगोपीनाथकविराज**महाभागैः पञ्चाशद्वर्षेभ्यः पूर्वमेवास्य शाण्डिल्यसंहिताग्रन्थस्य सम्पादनं विद्वद्वरेण्य**श्रीमदनन्तशास्त्रिफडके**महोदयसाहाय्येन कृतम्। श्रीफडकेशास्त्रिभिश्च महता श्रमेणाध्ययनेन च प्रास्ताविके पाञ्चरात्रविषये महर्षिशाण्डिल्यविषये प्रस्तुतसंहितोक्तविषयसन्दर्भे च पाण्डित्यपूर्णं विवेचनं व्यधायि।

उपासनस्यैवापरं नाम भक्तिः। सा च भक्तिर्भगवतोऽतीव प्रिया। यथोक्तम् –

**"व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का**
**कुब्जायाः किमु नामरूपमधिकं किं तत्सुदाम्नो धनम्।**
**को वंशो विदुरस्य किं यदुपतेरुग्रस्य किं पौरुषं**
**भक्त्या तुष्यति माधवो न च गुणैर्भावप्रियो माधवः"॥**

भक्तिवाङ्मये महर्षिशाण्डिल्यविरचितं भक्तिसूत्रं प्रमुखं स्थानं धारयति। संहिताकारः शाण्डिल्यो भक्तिसूत्रकारश्चैक एव भिन्नो भिन्नो वेत्यन्या कथा।

सेयं संहिता पूर्वं खण्डद्वये प्रकाशिता सम्प्रति दुर्लभा संवृत्ता, अतस्तस्या इदमभिनवं पूर्णं संस्करणमेकत्र प्रकाश्यते। श्रद्धेया **महामहोपाध्याया गोपीनाथकविराजमहोदया** विश्वविद्यालयस्यास्य मूलस्वरूपस्य राजकीयसंस्कृत-महाविद्यालयस्य प्राचार्याः, तत्सम्बद्धस्य च वर्तमानेऽपि युगे सरस्वतीभवनत्वेन राराज्यमानस्य विश्वविख्यातपुस्तकालयस्याध्यक्षा आसन्। भारतीयविद्यायाः साधनायाश्च साक्षात् प्रतिमूर्त्तयः सर्वस्मिन्नपि जगति सुप्रतिष्ठिता महान्तः साधका आसन्। विश्वस्मिन् जगति भारतीयविद्यायाः काश्याश्च योऽयं विभवो, गतशतके तस्य प्रतिष्ठापने कविराजमहोदयानां कृतित्वमतुलनीयम्। ते चात्र भगवतो विश्वनाथस्य अनुग्रहमूर्त्तयो राष्ट्रस्य साधकानामुच्चकोटिकानां विदुषाञ्च गुरुत्वेन विराजिता आसन्। तन्त्रविद्यायाः समुद्धरणेऽध्ययना-ध्यापन-लेखन-भाषणदीक्षादिभिः कविराजमहोदयैः सुमहानुपकारः कृतः। इदमासीदस्य विश्वविद्यालयस्य सौभाग्यं यत्सर्वथा निःस्पृहैर्मनीषिप्रवरैरेतै-र्विश्वविद्यालयस्य संस्थापकानां **डॉ० सम्पूर्णानन्दमहोदयानां** प्रथमकुलपतीनां संस्कृतसंस्कृतिसंरक्षकानां **श्री-आदित्यनाथझा**महोदयानाञ्चानुरोधेन तैरस्य विश्वविद्यालयस्य योगतन्त्रागमविभागस्य सम्मानिताचार्यपदं संशोभितम्। भारतीयसंस्कृति-दर्शनागमादिविषयेषु तेषां ग्रन्थाः सर्वत्र सम्मान्यन्ते। महान्तो महामहोपाध्याया अपि तेषां शिष्यत्वं प्राप्यात्मानं गौरवान्वितमनुभवन्ति।

सा चैतेषां महती समृद्धा उत्कृष्टतमा च शिष्यपरम्परा भारतीयविद्यायाः साधनायाश्च संवर्द्धनं कृतवती करोति चेति समग्रस्य राष्ट्रस्य कृते गौरवस्य विषयः।

तेषां मार्गदर्शने सम्पादिताया अस्याः शाण्डिल्यसंहिताया इदं प्रकाशनं सम्प्रति सम्पाद्यत इत्यहं प्रसङ्गेऽस्मिन् श्रद्धेयानां महामहोपाध्यायानां **श्रीगोपीनाथकविराज**महोदयानां स्मृतौ स्वकीयं श्रद्धापुष्पाञ्जलिं समर्पयामि।

आगमसिद्धान्तजिज्ञासूनां पाञ्चरात्रप्रियाणां विशेषतो वैष्णवागम-भक्तानां कृत एष ग्रन्थस्तेषां शाश्वताशीर्वादरूपेण महानुपकारको भविष्यतीति धिया विश्वविद्यालयस्यास्य प्रकाशनाधिकारिणे **डॉ० हरिश्चन्द्रमणित्रिपाठिने**, आनन्दमुद्रणालयाधिकारिणे **श्रीदिवाकरत्रिपाठिने** च स्वकीयान् धन्यवादान् विज्ञापयन् विदुषां पुरस्तादिमं ग्रन्थमुपहरामि।

**वाराणसी**
वसन्तपञ्चमी,
वि० सं० २०५२
(२५-१-१९९६ खैस्ताब्दः)

**मण्डनमिश्रः**
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

॥ श्री १०८ भैरवाय नमः॥

# अथ प्रास्ताविकम्

## [प्रथमसंस्करणस्य]

अथोपक्रम्यते नारदपाञ्चरात्रसंहितास्वन्यतमा श्रीशाण्डिल्यर्षिप्रणीता शाण्डिल्यसंहिता प्रकाशयितुम्। जानन्त्येव हि सर्वे विद्वांसो यत्किञ्चिदल्पादल्पमपि पूजादि धार्मिकं कार्यं प्रत्यहमस्माभिरनुष्ठीयते तत् सम्यक् पाञ्चरात्रशास्त्रज्ञानं विना न सुसम्पादयितुं शक्यत इति। धर्मशास्त्रनिबन्धेष्वनेकत्र स्थलेषु पाञ्चरात्रग्रन्थस्थितवचनजालं स्वीकृत्य संदिग्धस्थलीयनिर्णयः कृत इति न तिरोहितं तच्छास्त्रविदाम्। तत्र तावत् शाण्डिल्यसंहिताविषयविचारात्पूर्वं पाञ्चरात्रं कुत्र, केन, किमर्थं, कदा प्रकाशितमित्यादिविचार आवश्यकः, विना तेन शाण्डिल्यसंहिता-विचारो विसङ्गतः स्यादतः स एव प्रारभ्यते। तत्र पाञ्चरात्रमूलभूत-श्रुत्यादिविचारादपि प्राक् पञ्चरात्रशब्दनिर्वचनं ग्रन्थकारैः कथं कृतं ततः किं च लभ्यत इति विचार्यते। ईश्वरसंहितास्थैकविंशत्यध्याय-दर्शनेनेदं ज्ञायते पञ्चमहर्षिभ्यः शाण्डिल्यप्रभृतिभ्यो वासुदेवेनैककरात्रेणोप-दिष्टतया पञ्चरात्रपदप्रवृत्तिरिति[1]। पाद्मसंहितालोचने त्वेतच्छास्त्रे-

---

१. पञ्चायुधांशास्ते पञ्च शाण्डिल्यश्चौपगायनः।
मौञ्ज्यायनः कौशिकश्च भारद्वाजश्च योगिनः॥
..................................................
तेषां तु तपसा तुष्टो वासुदेवो जगत्पतिः।
..................................................
पञ्चापि पृथगेकैकदिवारात्रं जगत्प्रभुः।
अध्यापयामास यतस्तदेतन्मुनिपुङ्गवाः।
शास्त्रं सर्वजनैर्लोके पञ्चरात्रमितीर्यते॥ इति। (ईश्व० अ० २१)

तरसाङ्ख्यादीनि पञ्च शास्त्राणि यतो रात्रिवदाचरन्ति व्यर्थत्वात्तस्मादेतत्पञ्चरात्रमितीति[१]। विष्णुसंहितायां तु शब्दादिविषयात्मिका महाभूतात्मिका वा पञ्च गोचरा रात्रयः परमं तेज आसाद्य नश्यन्त्यत एतत्पञ्चरात्रमित्युक्तम्[२]। नारदपाञ्चरात्रसंज्ञके ज्येष्ठाराममुकुन्दजीमुद्रिते पुस्तके तु रात्रशब्दस्य ज्ञानवाचित्वेन ज्ञानस्य पञ्चविधत्वेन पञ्चरात्रपदप्रवृत्तिर्बोधिता[३]। भारततोऽपि साङ्ख्ययोगवेदारण्यमिलितानां पञ्चरात्रसंज्ञेति ज्ञायते[४]। प्रकृतशाण्डिल्यसंहितायां तु साङ्ख्यादिशास्त्राणामात्मानन्दसमर्पणाद्रात्रिशब्दवाच्यत्वम्, अस्य शास्त्रस्य सम्पूर्णसाङ्ख्यादिशास्त्रीयानन्दसमर्पणात् पञ्चरात्रत्वमिति[५]। केचन शतपथब्राह्मणे (१३।६।१) पञ्चरात्रसंज्ञकमेकं सत्रमस्ति यस्मिन् विष्णुरिज्यते तत इदं रूढं नाम विष्णुयजनसमानधर्मत्वादत्रापि प्रवृत्तमिति वदन्ति। भवतु कथमपि पञ्चरात्रशब्दस्य प्रवृत्तिः; परन्तु सर्वनिर्वचनालोचनेनेदमवश्यं प्रसिद्ध्यति यदिदं सर्वशास्त्रापेक्षयोत्कृष्टं परमश्रेयःसाधकं चेति।

---

१. पञ्चेतराणि शास्त्राणि रात्रीयन्ते महान्त्यपि।
तत्सन्निधौ समाख्यासौ तेन लोके प्रवर्तते ॥इति। (पा० ज्ञा० अ० १)

२. रात्रयो गोचराः पञ्च शब्दादिविषयात्मिकाः।
महाभूतात्मिका वात्र पञ्चरात्रमिदं ततः॥
अवाप्य तु परं तेजो यत्रैताः पञ्चरात्रयः।
नश्यन्ति पञ्चरात्रं तत् सर्वाज्ञानविनाशनम् ॥ इति। (वि० सं०)

३. रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्।
तेनेदं पञ्चरात्रं च प्रवदन्ति मनीषिणः॥ इति। (रा०१, अ० १)

४. एवमेकं साङ्ख्ययोगं वेदारण्यकमेव च।
परस्पराङ्गान्येतानि पाञ्चरात्रं च कथ्यते ॥ इति। (शां० २३९।८२)

५. साङ्ख्यं योगस्तथा शैवं वेदारण्यं च पञ्चकम्।
प्रोच्यन्ते रात्रयः कान्ते आत्मानन्दसमर्पणात् ॥
पञ्चानामीप्सितो योऽर्थः स यत्र समवाप्यते।
परमानन्दमेतेन प्राप्नोति परमात्मनः॥
प्रमाणपञ्चकैः पूर्णं पञ्चकार्थोपदेशनम्।
प्रपञ्चातीतसद्धर्मं पञ्चरात्रमुदाहृतम् ॥इति। (शा. सं. १।४।७७)

पञ्चरात्रमिदं शास्त्रं पितृमातृभूतेन सर्वस्य जगतो गुरुणा त्वया नारायणेन कस्य यजनं क्रियत इति नारदशङ्कया निवर्तकोत्तरप्रदानानन्तरं स्वीयाराध्यदेवताप्रशंसकेन बदर्याश्रमस्थेन तेन श्वेतद्वीपगमनार्थं प्रेरिताय तत्र च गतवते नारदाय श्वेतदीपस्थेन नारायणेन वेदतुल्यमुपदिष्टमिति शान्तिपर्वस्थ-नारायणीयाख्यानतो लभ्यते[1] ।

यस्यैव पञ्चरात्रविधेर्नामान्तरं सात्वतविधिरिति तन्त्रस्य सात्वतमिति च । यतो नारदोपदिष्टपाञ्चरात्रविधिश्रवणतत्परपुरुषपरम्परासु[2] श्रुतस्य सूर्यस्य

---

१. पिता माता च सर्वस्य जगतः शाश्वतो गुरुः ।
कस्त्वं यजसे देवं पितरं कं न विद्महे ।। इति । (तत्रैव– अ० ३३४)
गच्छेति तं नारदमुक्तवान्स संपूजयित्वाऽऽत्मविधिक्रियाभिः ।। इति ।
(तत्रैव– अ० ३३५।६)
क्षीरोदधेर्योत्तरतो हि द्वीपः श्वेतः स नाम्ना प्रथितो विशालः ।। इति ।
(तत्रैव– अ० ३३५।८)
प्राप्य श्वेतं महाद्वीपं नारदो भगवानृषिः । इति । (तत्रैव– अ० ३३८)
..........................................
नारदोऽपि महातेजाः प्राप्यानुग्रहमीप्सितम् ।
नरनारायणौ द्रष्टुं बदर्याश्रममाद्रवत् ।।
इदं महोपनिषदं चतुर्वेदसमन्वितम् ।
साङ्ख्ययोगकृतं तेन पञ्चरात्रानुशब्दितम् ।।
..............................................
——————— पुराणं वेदसंमितम् ।। इति । (तत्रैव– अ० ३३९)

२. नारायणमुखोद्गीतं नारदोऽश्रावयत्पुनः ।
ब्रह्मणः सदने तात यथादृष्टं यथाश्रुतम् ।।
ये त्वन्ये ब्रह्मसदने सिद्धसङ्घाः समागताः ।
तेभ्यस्तच्छ्रावयामास पुराणं वेदसंमितम् ।।
तेषां सकाशात्सूर्यस्तु श्रुत्वा वै भावितात्मनाम् ।
आत्मानुगामिनां राजन् श्रावयामास वै ततः ।।
षट्षष्टिर्हि सहस्राणि ऋषीणां भावितात्मनाम् ।
सूर्यस्य तपतो लोकान्निर्मिता ये पुरःसराः ।।
तेषामकथयत्सूर्यः सर्वेषां भावितात्मनाम् ।। इति । (तत्रैव– अ० ३३९)

पञ्चरात्रोपदेष्टुरुपदिष्टविधेः सात्वतमिति स्पष्टतयोल्लेखः शान्तिपर्वणि नारायणीयोपाख्यानेऽवलोक्यते[१]। तथा पाञ्चरात्रशास्त्रप्रवर्तकपरम्परायां[२] श्रुतस्य भीष्मस्याचारकथनप्रसङ्गे भीष्मपर्वणि स्पष्टतया सात्वतपदस्योल्लेखो विद्यते[३]। एवञ्च सात्वतपाञ्चरात्रशब्दौ न भिन्नार्थाविति सिद्धम्। एवं भागवतपदमपि किञ्चिदंशेन तदर्थबोधकमित्यपि महाभारतसाहाय्येन वक्तुं शक्यते, यत उपरिचरवसुचरित्र आत्मनो धनादिकस्य च भगवते समर्पणनिमित्तकत्वेन भागवतपदं प्रयुक्तम्[४]। तेन सात्वतविधिना – पाञ्चरात्रविधिना भगवते सर्वं समर्पणीयमिति बोधकं शास्त्रं भागवतपदवाच्यमित्यायाति। यद्यपि श्रीमच्छङ्कराचार्यभाष्यग्रन्थेऽन्यसर्वमतनिराकरणप्रकरणे "उत्पत्त्यसंभवात्" इति सूत्रीयविचारप्रसङ्गे 'यदपि भागवता मन्यन्ते' इत्याद्युक्त्वा पाञ्चरात्रमतप्रदर्शनेन तथा चागमप्रामाण्ये श्रीमद्यामुनाचार्यैः 'तदिह भागवतं गतमत्सरा मतमिदं विमृशन्तु विपश्चितः' इत्यादिलेखेन च भागवत-पाञ्चरात्रशब्दावभिन्नार्थाविति लभ्यते, तथापि श्रीमच्छङ्कराचार्यादिसमये भागवतशब्दः पाञ्चरात्रबोधकः स्यादिति स्वीकर्तुं शक्यं न तु ततः प्रागिति शङ्कानिवारणार्थमयं प्रयासः।

---

१. सात्वतं विधिमास्थाय प्राक्सूर्यमुखनिःसृतम्।
पूजयामास देवेशं तच्छेषेण पितामहान्॥इति। (शां० अ० ३३५।१९)

२. सूर्यानुगामिभिस्तात ऋषिभिस्तैर्महात्मभिः॥
मेरौ समागता देवाः श्राविताश्चेदमुत्तमम्।
देवानां तु सकाशाद्वै ततः श्रुत्वाऽसितो द्विजः॥
श्रावयामास राजेन्द्र पितॄणां मुनिसत्तमः।
मम चापि पिता तात कथयामास शान्तनुः॥
ततो मयाऽपि श्रुत्वा च कीर्तितं तव भारत॥ इति। (तत्रैव– अ० ३३९)

३. सात्वतं विधिमास्थाय गीतः संकर्षणेन यः॥इति। (भी० अ० ६४०)

४. आत्मराज्यं धनं चैव कलत्रं वाहनं तथा।
एतद्भागवतं सर्वमिति तत्प्रोक्षितं सदा॥इति। (शां० ३३५।२३)

सात्वत-पाञ्चरात्र-भागवतपदवाच्यमतस्य कालो यः प्रकृतमहाभारतस्य कालः, ततः कालात्पूर्वतन इति निर्णयार्थं महाभारतकालनिर्णयसंसाधक-सिद्धान्तप्रदर्शनमावश्यकम् । ऐतिहासिकैर्लोकमान्यतिलकादिमहोदयैर्गीता-कालनिर्णयप्रसङ्गे महाभारतकालनिर्णयोऽनेकैः प्रमाणैः संपादितः। तथा हि ३६७ वर्षमितशालिवाहनशकस्थेनैकेन गुप्तराजीयशिलालेखेन स्पष्टतया तत्समये महाभारतं लक्षश्लोकात्मकमासीदिति निश्चीयते। किञ्च, शालिवाहनशकप्रारम्भकालीनबौद्धाश्वघोषकृतवज्रसूचिकोपनिषद्-व्याख्याने हरिवंशस्थितः **"सप्तव्याधा दशार्णेषु मृगाः कालाञ्जने गिरौ"** (२४।२०।२१) इत्यादिश्लोक उद्धृतः, तथा महाभारतस्थशान्तिपर्वगता अपि श्लोका उद्धृता दृश्यन्ते (शां० २६१।१७)। तेनैतज्ज्ञायतेऽश्वघोषसमये, शकप्रारम्भसमये, हरिवंशसहितं भारतम्, अर्थात् लक्षश्लोकात्मकं प्रसिद्धमासीदिति ।

किञ्चाश्वलायनगृह्यसूत्रे **"भारतमहाभारतधर्माचार्याः"** इत्याकारकः स्पष्टतयोल्लेखो दृश्यते। तथा बौधायनधर्मसूत्रे ययात्याख्यानस्थितश्लोक उपलभ्यते । एवं बौधायनगृह्यसूत्रशेषे विष्णुसहस्रनामोल्लेखस्तथा तत्रैव **"पत्रं पुष्पं फलं तोयम्"** अयं श्लोको गीतास्थ उल्लिखितस्तेन स्पष्टतया ज्ञायते ब्राह्मणकालानन्तरं सूत्रकालसमकालो महाभारतकाल इति ।

किञ्च, महाभारते नक्षत्रगणना वर्तते न राशिगणना तन्नामानि च । राश्यादिनामानि ग्रीकसम्बन्धत आगतानीति विदुषां मतम्, एवं ग्रीकजनसम्बन्धतः पूर्वं महाभारतं स्थितम्, ग्रीकजनसम्बन्धश्च अलेक्ज़ंडरागमनकाल एव जात इति ।

किञ्च, महाभारते श्रवणादिनक्षत्रगणनाऽऽसीदित्यनुगीतातः (आश्व० ४४।२) आदिपर्वतश्च (अ० ७१। ३४) ज्ञायते । तेनेदं सिद्ध्यति, तस्मिन्नक्षत्र उदगयनं तदासीदिति । वेदाङ्गज्योतिषकाले धनिष्ठानक्षत्र उदगयनमासीत् ।तत्कालः शालिवाहनशकाब्दतः पूर्वं १५०० वर्षपरिमितो भवति । श्रवणोदगयनकालश्च शालिवाहनशकतः पूर्वं ५०० वर्षपरिमितो गणितरीत्या सिद्ध्यति । एवं च शालिवाहनशकाब्दप्रारम्भात्प्राग् ५०० वर्षमितो महाभारतस्य कालः पर्यवस्यति । एवञ्च ततः पूर्वं पाञ्चरात्र-सम्प्रदायास्तित्वमवश्यं स्वीकार्यमापतति ।

केचन नारायणीयोपाख्याने स्थितस्यापि चतुर्व्यूहबोधकपाञ्चरात्रधर्मस्य भगवद्गीतायां व्यूहस्यानुल्लेखाद् गीतातो नवीनत्वं कथयन्ति ; परन्तु नैतद्रोचते विद्वद्भ्यः। यतो गीता न चतुर्व्यूहवर्णनार्थं प्रवृत्ता, अतो गीतायां निर्देशाभावो न पाञ्चरात्रधर्मास्तित्वाभावं साधयति। किञ्च, शान्तिपर्वस्थनारायणीयधर्मालोचने सुतरां निश्चेतुं शक्यते, गीतायां पाञ्चरात्रस्था एव धर्माः श्रीकृष्णेनार्जुनं प्रत्युक्ता इति। तथा हि जनमेजयप्रश्नोत्तरप्रसङ्गे वैशंपायनेन नारायणतोऽयं धर्मो नारदेन प्राप्तः, स एव हरिगीतासु भगवद्गीतासूक्त इति कथितम्[1]। तथा पुनस्तत्रैवैकान्तधर्मस्य पाञ्चरात्रधर्मस्य श्रेष्ठतां प्रदर्श्य जनमेजयेन केनायं धर्मः कथित इति प्रश्नस्योत्तरसमये वैशंपायनेनोक्तं युद्धेष्वर्जुने विमनस्के जाते श्रीभगवता स्वयं गीत इति[2]। तथा गीतायां धर्मप्रवर्तकपुरुषपरम्परोक्तिप्रसङ्गे यथा विवस्वदादिपरम्परोक्तिर्दृश्यते, तथैव तां परम्परां विस्तीर्यात्राप्युक्तिरस्ति। तथा यतिधर्म एकान्तधर्मश्च पूर्वं हरिगीतायामुक्त इति च स्पष्टं कथितम्[3]। एतेनेदं स्पष्टं भवति चतुर्व्यूहादिविचारयुक्तो नैष्कर्म्यलक्षणो भागवतधर्मो गीतायां प्रोक्त इति महाभारतसमये कल्पना सिद्धान्तरूपा प्रचलिताऽऽसीदिति।

---

१. कथितो हरिगीतासु समासविधिकल्पतः॥इति। (शां० ३४६।१०)

२. नूनमेकान्तधर्मोऽयं श्रेष्ठो नारायणप्रियः।

..................................................

केनैष धर्मः कथितो देवेन ऋषिणापि वा।
एकान्तिनां च का चर्या कदा चोत्पादिता विभो॥

..................................................

समुपोढेष्वनीकेषु कुरुपाण्डवयोर्मृधे।
अर्जुने विमनस्के च गीता भगवता स्वयम्॥इति। (तत्रैव– ३४८।८)

३. आदित्ये सवितुर्ज्येष्ठे विवस्वान् जगृहे ततः।
त्रेतायुगादौ च ततो विवस्वान् मनवे ददौ।
मनुश्च लोकभूत्यर्थं सुतायेक्ष्वाकवे ददौ।
इक्ष्वाकुणा च कथितो व्याप्य लोकानवस्थितः॥

..................................................

यतीनां च यो धर्मः स ते पूर्वं नृपोत्तम।
कथितो हरिगीतासु समासविधिकल्पितः॥इति। (तत्रैव– अ० ३४८)

किञ्चैकान्तधर्मे चतुर्व्यूहकल्पनावदेकव्यूह-द्विर्व्यूह-त्रिर्व्यूहादिकल्पनाप्यासीदिति महाभारतस्थनारायणीयोपाख्यानतो लभ्यते[१]। गीतायां चतुर्व्यूहकल्पनायाः प्राप्त्यभावेऽप्येकव्यूहकल्पनाऽवश्यं प्रतीयत एव[२]। तथा एकान्तधर्मस्यात्र सामान्यतः प्रदर्शितं स्वरूपं[३] संक्षेपतो गीतायामुपलभ्यत एव[४]।

अन्यतोऽप्ययं समयो निर्धारयितुं शक्यंते। तथा हि शिलालेखविचारचतुरैः श्रीमद्भाण्डारकरमहोदयैः सिद्धान्तिता वासुदेवादिपूजाविषये विचारा एते। राजपुतानाख्ये देशविभागे घेसुण्डिनामके ग्रामे समुपलब्धे शिलालेखे सङ्कर्षणवासुदेवयोर्मन्दिरस्य परितः प्राकारो निर्मित इति लेखः परिदृश्यतेऽयं च लेखः क्रिस्ततः शतद्वयवर्षतः प्राक्तनः। नानाघाटसंज्ञके ग्रामे गुहायां दृश्यमाने शिलालेखे सङ्कर्षणवासुदेवशब्दघटितः

---

१. एकव्यूहविभागो वा क्वचिद्द्विर्व्यूहसंज्ञितः।
त्रिर्व्यूहश्चापि सङ्ख्यातश्चतुर्व्यूहश्च दृश्यते॥ (शां० ३४८।५७)

२. बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥इति। (भ० गी० ७।८१)
अत्र शाङ्करभाष्यम्——
'मां वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः प्रतिपद्यते'॥ इति।

३. हरिरेव हि क्षेत्रज्ञो निर्ममो निष्कलस्तथा।
.........................................
जीवश्च सर्वभूतेषु पञ्चभूतगुणातिगः॥
एष लोकविधिर्धीमानेष लोकविसर्गकृत्॥
अकर्ता चैव कर्ता च कार्यं कारणमेव च।
यथेच्छति तथा राजन् क्रीडते पुरुषोऽव्ययः॥
एष एकान्तधर्मस्ते कीर्तितो नृपसत्तम॥इति। (शां० ३४८।५८-६१)

४. 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रषु भारत'। (गी० १३।१)
'सर्वभूतस्थितं यो माम्'। (तत्रैव- ६।३१)
'कुर्वन्नपि न लिप्यते'। (तत्रैव- ५।७)
'जगतः प्रभवः प्रलयस्तथा'। इत्यादिकम्। (तत्रैव -७।६)

मङ्गलश्लोकः समुपलभ्यते। अयं च लेखः क्रिस्ततोऽव्यवहितपूर्वशतक उट्टङ्कितः। बेसनगरसंज्ञके ग्रामे समुपलब्धे शिलालेखे वासुदेवस्य तृप्तये गरुडध्वजस्तम्भो हेलियोदारा इत्यनेन भागवतेन प्रतिष्ठापित इति लिखितमस्ति।अयं च क्रिस्ततः पूर्वं द्वितीयशतकस्य प्रथमभागे भारतदेशे समागत इति। अनेन विज्ञायते वासुदेवपूजा तत्पूजकानां भागवतेति संज्ञा च तदानीमासीदिति। किञ्च, पाणिनेः कालात्पूर्वकालेऽपि वासुदेवादिकस्य देवतावत्पूज्यत्वं महापुरुषत्वं च प्रसिद्धमासीदिति **'वासुदेवार्जुनाभ्यां वुञ्'** इति सूत्रादेतत्सूत्रभाष्याच्च ज्ञायते। एवं च क्रिस्ततः पूर्वं प्रायः वर्षशतकचतुष्टयकालतः प्रमितवासुदेवादिव्यूहस्य पूजादिप्रकारबोधकानां केषाञ्चित् पाञ्चरात्राणां समयः स्यादिति निश्चये न काचिदप्यापत्तिः संभवति।

अधुनेदं विचार्यते– अयं पाञ्चरात्रपदवाच्यः संहितासमूहः किं श्रुतिमूलक उत श्रुतिवदयमपि स्वतन्त्र एव इति। श्रुतिमूलकत्वमेवास्य पाञ्चरात्रसंहितान्तर्गतेश्वरसंहितावलोकनतो निश्चीयते[१]। सा च श्रुतिरेकायनसंज्ञिका शुक्लयजुर्वेदवच्चतुर्वेदबहिर्भूता काण्वशाखान्तर्गता वा[२] शाण्डिल्यादिना संकर्षणादितो याज्ञवल्क्येन सूर्यत इव लब्धेति[३]। एकायनं नाम तस्य शाण्डिल्यलब्धवेदस्य मोक्षगमनायान्य-

---

१. मूलवेदानुसारेण च्छन्दसानुष्टुभेन च।
सात्वतं पौष्करं चैव जयाख्येत्येवमादिकम्॥इति। (ई० सं० अ० १)

२. एतन्नागेशकृतकाण्वशाखामहिमसंग्रहसंज्ञकमद्रासपुस्तकालयस्थग्रन्थतो ज्ञायते।
अत्र जयासंहिता–(इंग्लिश) भूमिकाटिप्पणी द्रष्टव्या।

३. पुरा तोताद्रिशिखरे शाण्डिल्योऽपि महामुनिः।
समाहितमना भूत्वा तपस्तप्त्वा सुदारुणम्॥
द्वापरस्य युगस्यान्त आदौ कलियुगस्य च।
साक्षात् सङ्कर्षणाल्लब्ध्वा वेदमेकायनाभिधम्॥इति। (ई० सं० अ० १)

मार्गासिद्धत्वादेव संजातमित्यपि तत एव ज्ञायते[1]। अस्यैकायनवेदस्योल्लेखः छान्दोग्योपनिषदि भूमविद्यायां नारदसनत्कुमारसंवादे दरीदृश्यते[2]। यद्यपि तत्रैकायनशब्दस्यार्थः श्रीमच्छङ्कराचार्यैर्नीतिविद्येति कृतः **'वाकोवाक्यं तर्कशास्त्रम्, एकायनं नीतिशास्त्रम्'** इति, तथापि सोऽर्थो वाकोवाक्यपदस्य तर्कशास्त्रार्थकरणवदन्येषां न मान्यः। वाकोवाक्यपदं पातञ्जलमहाभाष्ये पस्पशाह्निक आगतं तत्र तस्यार्थः कैयटेन उक्तिप्रत्युक्तिरूपो ग्रन्थविशेष इति निर्णीतः[3]। एवञ्चैकायनपदस्य श्रीव्यासादिवचनप्रामाण्याद्[4] नीतिविद्याभिन्नो वेदरूपार्थोऽप्यन्यग्रन्थकारोक्तः[5] संभवत्येव। एवं

---

१. शृणुध्वं मुनयः सर्वे वेदमेकायनाभिधम्॥

..........................................

मोक्षायनाय वै पन्था एतदन्यो न विद्यते॥

तस्मादेकायनं नाम प्रवदन्ति मनीषिणः।

था–

एष एकायनो वेदः प्रख्यातः सर्वतो भुवि॥इति। (ईश्व० अ० १)

२. ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदं ......

दैवं निधिं वाकोवाक्यमेकायनं देवविद्यामिति। (छां० ७।१।२)

३. सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः ..... नवधा आथर्वणो वेदः, वाकोवाक्यमितिहासः पुराणमिति। इति। (व्या० भा० आ० १)

अत्र कैयटः– वाकोवाक्यशब्देनोक्तिप्रत्युक्तिरूपो ग्रन्थ उच्यते ........।

यथा किंस्विदावपनं महत्, भूमिरावपनं महदिति।

४. यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च।

गृणन्ति सत्यधर्माणः सत्यं सत्येषु सामसु॥इति। (श्रीमन्महाभारते)

अत्रोपनिषदादिसाहचर्यान्नीतिविद्याभिन्नोऽर्थोऽभिप्रेतः।

५. ऋग्वेदं पूर्वदिग्भागे यजुर्वेदं तु दक्षिणे।

पश्चिमे सामवेदं स्यादाथर्वं चोत्तरे भवेत्॥

एकायनीयशाखोत्थमन्त्रान्सर्वासु दिक्षु च॥इति।

तथा–

ततः प्रीतमना नाथ साक्षात्स ब्रह्मसंज्ञकम्।

वेदमेकायनं ब्रह्म व्याकर्तुमकुतोभयम्॥इति। (महाकालसंहितायाम्)

वेदमेकायनं नाम वेदानां शिरसि स्थितम्।

तदर्थकं पाञ्चरात्रं मोक्षदं तत्क्रियावताम्॥इति। (श्रीप्रश्नसंहितायाम्)

स्पन्दप्रदीपिकायामस्य पाञ्चरात्रश्रुति-पाञ्चरात्रोपनिषद्रूपेणोल्लेखोऽपि सम्यगुपपद्यते[१] । तमेकायनं वेदं मूलतया स्वीकृत्य सर्ववर्णानामनुग्रहार्थं सङ्कर्षण-शाण्डिल्यप्रभृतिभिरानुष्टुभेन च्छन्दसा युक्तं[२] सङ्ख्यया द्वादशसहस्रतो नाधिकं संहितास्वरूपं[३] जनाभीष्टसंपादकमुक्तम् । स संहितासमुदायः सात्वतादिकः पाञ्चरात्रपदेन जेगीयते लोके ।

अत्रायं विचार आवश्यकः, पाञ्चरात्रं प्रमाणं न वेति । अत्र प्रामाण्यविचारस्योपेक्षणे पाञ्चरात्रशास्त्रस्योपादेयता न संभवत्येव । श्रीमद्बादरायणसूत्रेषु केषाञ्चिन्मतेन पाञ्चरात्रमतखण्डनेनाप्रामाण्यम्[४] ।

---

१. पाञ्चरात्रश्रुतावपि—यद्वत्सोपानेन प्रासादमारुहेत् प्लवेन नदीं तरेत् तद्वच्छास्त्रेण हि भगवान् शास्त्रादवगन्तव्य इति । (स्पं० प्र० प० २)
पञ्चरात्रोपनिषदि चं—ज्ञाता च ज्ञेयं च वक्ता च वाच्यं च भोक्ता च भोग्यं च । इत्यादि । (स्पं० प्र० प० ४०)

२. अनुग्रहार्थं वर्णानां योग्यतापादनाय च ।
तथा जनानां सर्वेषामभीष्टफलसिद्धये ॥
मूलवेदानुसारेण च्छन्दसानुष्टुभेन च ।
सात्वतं पौष्करं चैव जयाख्येत्येवमादिकम् ॥
दिव्यं सच्छास्त्रजालं तदुक्त्वा सङ्कर्षणादिभिः ।
प्रवर्तयामास भुवि सर्वलोकहितैषिभिः ॥इति । (ईश्व० अ० १)

३. द्विषट्सहस्रपर्यन्तं संहिताख्यं सदागमम् ।
ये चान्ये चान्तराला वै शास्त्रार्थेनाधिकाः शतैः ॥
सर्वेषां संहिता संज्ञा बोद्धव्या कमलोद्भव ॥इति । (पौ० सं०)

४. श्रीशङ्कराचार्यमते "उत्पत्त्यसंभवात्" इत्यधिकरणे (वे० सू० २।२।४२) 'तत्र भागवता मन्यन्ते भगवानेको वासुदेवो निरञ्जनज्ञानस्वरूपः परमार्थतत्त्वम्, स चतुर्धात्मानं प्रविभज्य प्रतिष्ठितो वासुदेवव्यूहरूपेण सङ्कर्षणव्यूहरूपेण .... इति । अत्र ब्रूमः– न वासुदेवसंज्ञकात्परमात्मनः सङ्कर्षणसंज्ञकस्य जीवस्योत्पत्तिः संभवति । अनित्यत्वादिदोषप्रसङ्गात् । ...... विप्रतिषेधश्चास्मिन् शास्त्रे बहुविध उपलभ्यते गुणगुणित्वकल्पनादिलक्षणः । ......... वेदविप्रतिषेधश्च भवति । चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवानित्यादिवेदनिन्दादर्शनात् । तस्मादसङ्गतैषा कल्पनेति सिद्धम्" इति ।

केषाञ्चिन्मतेन पाञ्चरात्रमतमण्डनेन प्रामाण्यमिति[1]। प्रकारद्वयदर्शनेन भवति सामान्यजनानां सन्देहस्तदर्थमयं विचार आवश्यकः। श्रीमदाचार्यशङ्करमतालोचन इदं सुस्पष्टं ज्ञायते— सङ्कर्षणादिजीवस्योत्पत्त्यादिः सूत्रप्रतिषिद्धा, अनेकेश्वरकल्पना च। तत्र जीवस्योत्पत्तिर्यासु पाञ्चरात्रसंहितासु न प्रतिपादिता न चानेकेश्वरकल्पना तासां प्रामाण्यस्य स्वीकारोऽभिप्रेत एव। सन्ति च कानिचित्पाञ्चरात्राणि विरुद्धार्थबोधकानि तेषामप्रामाण्यं पाञ्चरात्रसंहितायामेव प्रतिपादितमुपलभ्यते—

**'पञ्चरात्रं बहुविधं बहुधा भाषितं परैः।**
**प्रमाणानां विरोधेन तद्यथार्थं न चेदृशम्'** ॥ (शां० सं० १।४।७९)

यद्यप्युपसंहारे 'चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधिगतवान्' इति वाक्यदर्शनेन शाण्डिल्यप्रोक्तशास्त्रमेवाभिप्रेतमिति संज्ञायते, तथापि श्रीमदाचार्याः 'चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा' इत्यादिकथनमेव कटाक्षयन्ति, न तु तच्छास्त्रमिति ज्ञेयम्। एवञ्च [illegible] वा कियताप्यंशेन वा प्रामाण्यं पाञ्चरात्रस्य सुप्रतिष्ठितमेव। अत एव जमदग्न्यादिस्मृतिकारैः[2], व्यासवाल्मीकिप्रभृतिभिरैतिहासिकैः[3], वराहादिपुराणकर्तृभिर्व्यासचरणैश्च[4] वेदेन सह पाञ्चरात्रस्य प्रमाणग्रन्थेषूल्लेखः कृतः सङ्गच्छते।

---

१. अत्राधिकरणे श्रीरामानुजाचार्यमते "जीवस्योत्पत्तिस्तत्राप्यसिद्धैवेति जीवोत्पत्तिवादनिमित्ताप्रामाण्यशङ्का दूरोत्सारिता। यश्चैष केषाञ्चिदुद्घोषः साङ्गेषु वेदेषु निष्ठामलभमानः शाण्डिल्यः पञ्चरात्रशास्त्रमधीतवानिति। साङ्गेषु वेदेषु पुरुषार्थनिष्ठा न लब्धेति वचनाद् वेदविरुद्धं तन्त्रमिति, सोऽप्यनाघ्रातवेदवचसामनाकलिततदुपबृंहणन्यायकलापानां श्रद्धामात्रविजृम्भित इति। (वे० सू० २।२।३९)

२. वैदिकेन विधानेन पूजां कुर्याद्धरेस्ततः।
अलाभे वेदमन्त्राणां पाञ्चरात्रोदितेन वा॥ (जमदग्निस्मृतिः)

३. पुराणैश्चैव वेदैश्च पाञ्चरात्रैस्तथैव च॥इति। (उत्तररामायणम्)
इदं महोपनिषदं चतुर्वेदसमन्वितम्।
साङ्ख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम्॥इति। (म० भा० शां०)

४. आचार्ये पाञ्चरात्राणां सहस्रगुणितं भवेत्।इति। (वरा० पु०)
ऋगाद्या भारतं शास्त्रं पञ्चरात्रमथाखिलम्॥इति। (ब्रह्म-पु०)
वेदेन पाञ्चरात्रेण भक्त्या यज्ञेन च द्विज॥इति। (कूर्म-पु०)
शास्त्रं च वेदाः स्मृतयः पुराणं च तदात्मकम्।
इतिहासः पाञ्चरात्रं भारतं च महामते॥इति। (स्कन्द-पु०)

पाञ्चरात्रविचारप्रसङ्गे कति पाञ्चरात्राणि विद्यन्त इति विचारोऽसङ्गतो नैव भवेदित्यभिप्रायेण तदुपलब्धवर्णनं प्रदर्श्यते। **'पञ्चरात्रं बहुविधं बहुधा भाषितं परैः'** (शां० सं० १।४।७९) इत्यादिवचनदर्शनेन सामान्यतः पाञ्चरात्रशास्त्राणामनेकप्रकारकत्वमिति ज्ञायते; परन्तु नारदपञ्चरात्रनाम्ना प्रसिद्धे ज्येष्ठाराममुकुन्दजीमुद्रितग्रन्थे स्पष्टमिदमुपलभ्यते –

**'पञ्चरात्रं सप्तविधं ज्ञानिनां ज्ञानदं परम्।**
**ब्राह्मं शैवं च कौमारं वासिष्ठं कापिलं परम्॥**
**गौतमीयं नारदीयमिदं सप्तविधं स्मृतम्'**॥इति॥ (अ० १।५७)

एतद्दर्शनेन नारदेन यथा नारायणतो ज्ञानमुपलभ्य पाञ्चरात्रशास्त्रप्रवर्तनं कृतं तथा ब्रह्मादिभिरपि ततो ज्ञानमुपलभ्य शास्त्रप्रवर्तनं कृतमिति ज्ञायते[1]। अस्यां शाण्डिल्यसंहितायां प्रथमांशे चतुर्थाध्याये भक्तिशास्त्रपरम्परा-प्रवर्तकेषु ब्रह्मादीनां नामान्युपलभ्यन्ते तद्दर्शनेनाप्येतत्कल्पनं सम्यगिति ज्ञातुं शक्यम्।

अग्निपुराणतः पञ्चरात्राणि सप्तरात्राणि च पूर्वं सर्वाण्यपि हयग्रीवेणोक्तानि, तानि मुनिभिः पञ्चविंशतिसङ्ख्यया हयशीर्षप्रभृतीनि व्यस्तानीति ज्ञायते[2]। एतल्लेखेनेदमपि ज्ञायते– हयग्रीवेण प्रथम-तत्तन्त्रमुक्तं तद् व्यस्य नारदेनान्यमुनिभिरिव स्वकीयं तन्त्रमुक्तमिति।

---

१. परन्तु पूर्वोक्तज्येष्ठाराममुकुन्दजीप्रभृतिभिर्मुद्रितनारदपञ्चरात्रावलोकनतो नारदकृत-पञ्चरात्रतः पूर्वं षट् पञ्चरात्राण्यासन्, तानि दृष्ट्वा शङ्करतो ज्ञानं संप्राप्य च नारदेन स्वकीयं पञ्चरात्रं प्रणीतमिति प्रत्युत विपरीतं ज्ञायते –
षट्पञ्चरात्रं वेदाश्च पुराणानि च सर्वशः।
इतिहासं धर्मशास्त्रं शास्त्रं च सिद्धियोगजम्॥
दृष्ट्वा सर्वं समालोक्य ज्ञानं संप्राप्य शङ्करात्।
ज्ञानामृतं पञ्चरात्रं चकार नारदो मुनिः॥ (रात्र १, अ० १।५८,६९)
प्रकृतशाण्डिल्यसंहितातोऽप्येतद् ज्ञातुं सुशकम्। अत्र तृतीयपरिशिष्टं द्रष्टव्यम्।

२. प्रोक्तानि पञ्चरात्राणि सप्तरात्राणि वै मया।
व्यस्तानि मुनिभिर्लोके पञ्चविंशतिसङ्ख्यया॥
हयशीर्षं तन्त्रमाद्यं तन्त्रं त्रैलोक्यमोहनम्।
वैभवं पौष्करं तन्त्रं प्रह्लादं गार्ग्यगालवम्॥
नारदीयं च सप्रश्नं शाण्डिल्यं वैश्वकं तथा।
सत्योक्तं शैवकं तन्त्रं वासिष्ठं ज्ञानसागरम्॥
स्वायम्भुवं कापिलञ्च तार्क्ष्यं नारायणीयकम्।
आत्रेयं नारसिंहाख्यमानन्दाख्यं तथारुणम्॥
बौधायनं तथार्षन्तु विश्वोक्तं ........॥इति। (अ० पु० ३९।१-५)

एतन्नारदपाञ्चरात्रसंज्ञकमुद्रितग्रन्थस्थेन पूर्वप्रदर्शितलेखेन सह प्रायः संवाद्येव। अत्रेयं शङ्का प्रादुर्भवति श्वेतद्वीपस्थेन नारायणेन नारदायोपदिष्टं यत् पाञ्चरात्रविधानं तदेव नारदेन ग्रन्थरूपेणोपनिबद्धमुत हयग्रीवादिप्रोक्तं पाञ्चरात्रं दृष्ट्वा स्वकीयं रचितमथवा तदेव विभज्य निर्मितमिति। अत्रेदं समाधानं प्रतिभाति– श्वेतद्वीपगतेन नारदेन नारायणत उपलब्धमपि विधानं शास्त्ररूपेण नोपनिबद्धम्, पूर्वमनेकैः श्वेतद्वीपे नारायणतो ज्ञानं लब्ध्वा[1] तदनुसारीणि पाञ्चरात्राणि प्रणीतानि, तानि दृष्ट्वा नारदेन स्वकीयं पाञ्चरात्रं निर्मितमिति कल्पने सर्वं समञ्जसं भवति। नारदतोऽपि पूर्वं चित्रशिखण्डिभिर्नारायणप्रसादत उपासनाप्रकारः प्राप्तः शास्त्ररूपेण प्रणीत इति च श्रीमन्महाभारतीयशान्तिपर्वतः सुस्पष्टं ज्ञायते[2]। एवञ्च काश्चित्पाञ्चरात्रसंहिता ज्ञानसारभारद्वाजसंहिताप्रभृतयः साक्षाद् नारदेनोपदिष्टतया नारदपाञ्चरात्रान्तर्गता एव, काश्चन नारदेनानुपूर्वीरूपेणानुक्ता अपि नारदप्रतिपादिततत्त्वप्रतिपादकतया नारदपाञ्चरात्रपदबोध्या इति। यथा शाण्डिल्यसंहिताप्रभृतयः।

---

१. श्वेतद्वीपे पुरा विष्णुं क्षीरसागरशायिनम्।
ब्रह्माद्या देवताःसर्वे मुनयश्च तपोधनाः॥
समाराध्य महात्मानो भक्त्या परमया विभुम्।
ऋचां च यजुषां चापि साम्नामाङ्गिरसामपि॥
साङ्ख्यानामपि योगानां सर्वोपनिषदां गिराम्।
सर्वेषामपि शास्त्राणां सारभूतं हरेः प्रियम्।
रहस्यं पञ्चरात्राख्यं काले कालेऽभिलेभिरे॥ (शा० सं० १।४।५४-५७)

२. ये हि ते ऋषयः ख्याताः सप्त चित्रशिखण्डिनः।
तैरेकमतिभिर्भूत्वा यत्प्रोक्तं शास्त्रमुत्तमम्।
.........................................
आराध्य तपसा देवं हरिं नारायणं प्रभुम्॥इति। (शां० अ० ३३५)

पाञ्चरात्रसंहिता विष्णुतिलकादिग्रन्थावलोकनतः सार्धकोटिश्लोकपरिमिता आसन्निति ज्ञायते। अधुना तु नैतत्परिमिता उपलभ्यन्ते। पाञ्चरात्रसंहितानां नामत उल्लेखोऽग्निपुराण-हयशीर्षसंहिताकापिञ्जलसंहिता– विष्णुसंहितादिषूपलभ्यते। एताः सर्वा अपि पाञ्चरात्रसंहिता मूलवेदानुसारेण हरिणा स्वयं सङ्कर्षणप्रभृतिभ्य उपदिष्टाः[१]। अष्टोत्तरशतसङ्ख्यापरिमितासु पाञ्चरात्रसंहितासु सात्वतादयस्तिस्रः संहिताः प्रधानाः। एतासामेव संहितानां व्याख्याभूता सर्वा अपि संहिता इति जयासंहितास्थलेखनतो ज्ञायते[२]। सर्वोऽप्ययं संहितादिसमुदाय आगमपदवाच्यः[३]। स चागमसिद्धान्त-मन्त्रसंज्ञित-तन्त्र – तन्त्रान्तरभेदेन चतुष्प्रकारः[४]। अस्य लक्षणं भेदादिकं चेश्वरसंहितायामेकविंशत्यध्याये सुस्पष्टं तत्तत एव ज्ञेयम्। दिव्यसात्त्विकादिरूपेणाप्यस्य

---

१. सात्वतं पौष्करं चैव जयाख्यं च तथैव च।
एवंमादीनि दिव्यानि शास्त्राणि हरिणा स्वयम्॥
मूलवेदानुसारेण प्रोक्तानि हितकाम्यया॥इति। (ई० स० १।६५)

२. तन्त्रेऽप्यष्टोत्तरशते पारमेश्वरसंहिता।
पौष्करार्थविवृत्यर्था व्याख्यारूपावतारिता॥
सात्वतस्य विवृत्यर्थमीश्वरं तन्त्रमुत्तमम्।
जयाख्यस्य तन्त्रस्य व्याख्यानं पाद्ममुच्यते॥इति। (जयासं० १।६-७)
तथा–
सात्वतं पौष्करं चैव जयाख्यं तन्त्रमुत्तमम्।
..........................................
सारं सात्वतशास्त्रस्य रहस्यं प्राज्ञसंमतम्॥
..........................................
अन्यानि तु तन्त्राणि भगवन्मुखनिर्गतम्।
सारं समुपजीव्यैव समासव्यासधारणैः॥
व्याख्योपबृंहणन्यायाद् व्यापितानि तथा तथा॥इति। (जया० प० १)

३. चतुर्धा भेदभिन्नोऽयं पाञ्चरात्राख्य आगमः॥इति। (ई० अ० २१।५६०)

४. पूर्वमागमसिद्धान्तं द्वितीयं मन्त्रसंज्ञितम्।
तृतीयं तन्त्रमित्युक्तमन्यत्तन्त्रान्तरं भवेत्॥इति। (तत्रैव– २१।५६१)

भेद ईश्वरसंहितायां प्रथमाध्यायें दृश्यते[१]। अस्यैकायनशाखामूलकस्य पाञ्चरात्रस्य श्रुति – उपनिषद्-तन्त्र-संहितास्वरूपेणापि भेद आसीदित्युत्पलाचार्यरचितस्पन्दप्रदीपिकावलोकनतः सुस्पष्टं ज्ञायते[२]।

अस्त्वधुना शाण्डिल्यसंहिताविषयको विचार आरभ्यते। शाण्डिल्यसंहिताया उल्लेखो यामुनाचार्येण स्वकीय आगमप्रामाण्यसंज्ञके ग्रन्थे कृतः। ततोऽपि पूर्वं विद्यमानाग्निपुराणीयलेखतः शाण्डिल्येन हयग्रीवप्रणीतं तन्त्रं दृष्ट्वा स्वकीयं तन्त्रं प्रणीतमिति ज्ञायते[३]। संहितातो भिन्नस्य तन्त्रस्यानुपलब्धेस्तत्र तन्त्रपदेन संहितैव विवक्षिता

---

१. वासुदेवेन यत्प्रोक्तं शास्त्रं भगवता स्वयम्।
अनुष्टुप्छन्दोबन्धेन समासव्यासभेदतः॥
तथैव ब्रह्मरुद्रेन्द्रप्रमुखैश्च प्रवर्तितम्।
लोकेष्वपि च दिव्येषु तद्दिव्यं मुनिसत्तमाः॥
स्वयं प्रणीतं यच्छास्त्रं तज्ज्ञेयं मुनिभाषितम्।
एतत्तु त्रिविधं विद्धि सात्त्विकादिविभेदतः॥ इति।
(ई० अ० १।५४,५५,५७)

२. पाञ्चरात्रश्रुतावपि यद्वत्सोपानेन प्रासादमारुहेत्० । इत्यादि। (स्पं० प्र० प० २)
पाञ्चरात्रोपनिषदि च – ज्ञाता च ज्ञेयं च वक्ता च वाच्यं च०। इत्यादि।
(स्पं० प्र० प० ४०)
तथा च पाञ्चरात्रे – यदात्मनि सर्वभूतानि पश्यति आत्मानं च०। इत्यादि।
(स्पं० प्र० प० २९)
संहितावचनानि तु बहुत्र सात्वतायां जयायामिति तत्तन्नामकीर्तनपूर्वकं निर्दिष्टान्युपलभ्यन्ते।

३. प्रोक्तानि पञ्चरात्राणि सप्तरात्राणि वै मया।
व्यस्तानि मुनिभिर्लोके पञ्चविंशतिसङ्ख्यया॥
..........................................................
नारदीयञ्च सम्प्रश्नं शाण्डिल्यं वैश्वकं तथा॥ (अ० पु० अ० ३९)

स्यात्[1]। एवञ्चास्याः शाण्डिल्यप्रणीतसंहितायाः कालोऽग्निपुराणस्य कालतः पूर्वं वर्षशतकपरिमित आयाति। अग्निपुराणस्य कालस्त्वीशवीयषष्ठशतक इति निर्धारयितुं शक्यते। तथा हि– अग्निपुराणे धर्मशास्त्रसारबोधके १६२ अध्याये यानि धर्मशास्त्राणि दृष्ट्वा धर्मशास्त्रसारं तत्र संगृहीतं तेषां नामान्यागतान्यतो ज्ञायतेऽग्निना तत्तुल्यधर्मनियमकथनं कृतमिति। अतोऽग्निपुराणस्य वह्निधर्मशास्त्ररूपेणापि प्रसिद्धिरासीत्। एतादृश उल्लेखो वृद्धशातातपस्मृतिग्रन्थे स्पष्टतया दृश्यते[2]। अतो वृद्धशातातपस्मृतिकालात्पूर्वमेकशतकपरिमितं कालमतीत्याग्निपुराणस्य स्थितिरासीदिति कल्पने नासङ्गतिदोषः। वृद्धशातातपस्मृतिवचनानामुल्लेखः श्रीशङ्कराचार्यैर्विष्णुसहस्रनामभाष्ये कृतः समुपलभ्यते। श्रीशङ्कराचार्याणां स्थितिरीशवीयाष्टमशतकपरिमिते काल आसीदिति विदुषां मतम्। एवञ्च श्रीशङ्कराचार्याणां पूर्वमेकशतकमतीत्य स्थितवृद्धशातातपस्मृतेः कालः सप्तमशतकपरिमितः पर्यवस्यति। अनयैव पद्धत्याग्निपुराणस्य कालः षष्ठशतकपरिमितः शाण्डिल्यतन्त्रस्य संहितास्वरूपस्य पञ्चमशतकपरिमितश्च पर्यवस्यति। एवं स एवान्येषामप्यग्निपुराणोल्लिखिततन्त्रसंहिताग्रन्थानामिति निश्चीयते।

अस्त्वेवं शाल्डिल्यसंहितायाः काले निश्चिते शाण्डिल्यसंहितापदेन जयासंहितायाः ग्रहणं प्रकृतसंहिताया वेति शङ्का मनसि प्रादुर्भवति, यतः शाण्डिल्यसंहितापदं सामान्यतः शाण्डिल्येन प्रोक्तायाः

---

१. संहिताया अपि तन्त्रपदेनोल्लेखो दरीदृश्यते, यथा—
सात्वतं पौष्करं चैव जयाख्यं तन्त्रमुत्तमम्।
तथा–
अन्यानि तु तन्त्राणि ......................
तथा–
तन्त्रेऽप्यष्टोत्तरशते परमेश्वरसंहिता।
..........................................
सात्वतस्य विवृत्यर्थमीश्वरं तन्त्रमुत्तमम्।
जयाख्यस्य तन्त्रस्य ......................॥ इति। (जयासं० प० १)

२. पितुः सा भजते गोत्रमूर्ध्वं तु पतिपितृकम्।
इति प्रोक्तं पुरा वह्नि-धर्मशास्त्रानुसारतः ॥४३॥ इति। (वृ० शा० स्मृ०)

संहिताया नाम संभवति । शाण्डिल्येन जयासंहिता प्रोक्ता [१], प्रकृतसंहिता च [२] । किञ्च, प्रत्युत प्रकृतशाण्डिल्यसंहितायां श्रीशङ्कराचार्यप्रभृतिवल्लभाचार्यान्तानामग्निपुराणात्पश्चाद्भवानां नामोपलब्धेर्जयासंहितैव शाण्डिल्यप्रोक्तत्वादग्निपुराणनिर्दिष्टशाण्डिल्यतन्त्रपदेन ग्राह्येति प्रतिभाति । तथापि जयासंहितायाः शाण्डिल्यप्रोक्तत्वेऽपि तत्र जयेति नामदर्शनात् [३] कुत्रापि तस्याः शाण्डिल्यसंहितानाम्ना व्यवहाराभावाच्च जयासंहितायाः शाण्डिल्यसंहितापदेन ग्रहणं न संभवति । तर्हि प्रकृतशाण्डिल्यसंहितैव परिशेषात्स्वीकर्तव्येति स्थितम् ; परन्त्वस्यां श्रीशङ्कराचार्यप्रभृतीनां नामनिर्देशात् पूर्वोक्तो निश्चितः कालः स्वीकर्तुं न शक्यत इति शङ्का समुद्भवति, सा प्राचीनमते सर्वावरणमलापेते शाण्डिल्यचेतसि सार्वकालिकविषयस्फुरणस्य स्वीकारेण तादृशभविष्यत्कालिकश्रीशङ्कराचार्यप्रभृतीनां नामनिर्देशस्योपपन्नत्वेन समाधीयते । आधुनिकानां तु मते तस्याध्यायस्य प्रक्षिप्तत्वमथवान्यस्य शाण्डिल्यतन्त्रस्याग्निपुराणकाले स्थितस्य परन्त्वधुना लुप्तस्याग्निपुराणे निर्देशः, इयं तु

---

१. कृतकृत्यो जगत्यस्मिन् शाण्डिल्यः श्रूयते भुवि ।
.......................................................
तच्छृणुध्वं मुनिश्रेष्ठाः धर्मं संसारतारकम् ।
यादृक् प्राप्तं मया पूर्वं परितुष्टाच्च नारदात् ॥इति। (जयासं० प० १)

२. अयं महर्षिः शाण्डिल्य आचार्यः सांप्रतं किल ।
.......................................................
शिष्यः श्रीललितादेव्या व्यासस्य च महात्मनः ॥
संहिता कथिता तेन सारभूतागमाम्बुधेः ॥ (शां० सं० ४।१६।३५-३६)

३. सात्वतं पौष्करं चैव जयाख्यं तन्त्रमुत्तमम् ।
तथा –
जयाख्यस्य तन्त्रस्य व्याख्यानं पाद्ममुच्यते ॥
तथा –
प्रोक्ता त्रैलोक्यगुरुणा पृच्छते नारदाय तु ।
सारभूतं समुद्धृत्य संहितामृतगर्भिणी ॥
..........................................
जयाख्यं निषदं तन्त्रम् ...............॥
तथा –
जयेति विमलं नाम प्रणीतं विश्वकर्मणा ॥इति। (जयासं० प० १)

संहिता सर्वथैवात्रनिर्दिष्टश्रीवल्लभाचार्यसमयानन्तरं प्रादुर्भूतेति तस्याः समाधानं संभवेत्। विद्वद्वरैरत्र विषये विनिर्णेयम्।

अधुना पाञ्चरात्र-शाण्डिल्यसंहितासिद्धान्तप्रदर्शनात्प्रागस्याः संहितायाः प्रणेता शाण्डिल्यः क इति विचारणमावश्यकम्, यतः शाण्डिल्यानामनेकेषामुपलब्धेः। प्रकृतशाण्डिल्यसंहितायां शाण्डिल्यविषय एतादृशो निर्णय उपलभ्यते। प्रथमः शाण्डिल्यो ब्रह्मशाण्डिल्यनाम्ना प्रसिद्धः, यस्य सामवेदे विद्यास्ति,[१] स च मन्त्ररूपो मन्त्राभिमानिदेवतावत्, न तु शरीरधारी मनुष्यः[२]। द्वितीयो वेदत्रयस्य भक्तिविद्यायाश्चाध्येता वेदशाण्डिल्यनाम्ना प्रसिद्धो वंशाध्यायवर्णितोऽस्ति[३]। तृतीयो महर्षिः शाण्डिल्यः प्रकृतसंहिताकर्ता।

अस्येदमितिवृत्तमुपलभ्यते – पूर्वस्मिन् जन्मनि गार्धभिसंज्ञकोऽयं वीरवैष्णवशासनस्य कर्ताऽवैदिकमार्गेण विष्णुपूजनतत्परो वैदिक-मार्गनिन्दानिपुण आसीत्। श्रीविष्णुना तस्य वेदमार्गविमुखत्वं दृष्ट्वा नरके निपातनं कृतम्[४]; परन्तु ततो दयालुना तेन नारायणेन भक्तोऽयमिति मत्वोद्धृतः। तदा विप्रकुल उत्पन्नो वर्णाश्रमधर्मपरायणो जगन्नाथप्रसादान्नमत्तुं साधु न मेने। तदा तत्रापि तिरस्कारं प्राप्तो माहात्म्यं

१. अधुना त्वियं शाण्डिल्यविद्या वाजसनेयिशाखायामग्निरहस्ये श्रूयते। स्पष्टं चैतत् 'समान एवं चाभेदात्' (व्यास० ३।३।१०) इत्येतत्सूत्रीयशाङ्करभाष्ये।

२. आद्योऽसौ ब्रह्मशाण्डिल्यो विद्या यस्यास्ति सामसु।
स च मन्त्रात्मको ज्ञेयोऽभिमानीदेवता यथा॥ (शां० सं० ४।१६।२६)

३. द्वितीयो वेदशाण्डिल्यो वंशाध्याये निरूपितः।
येनाधीता त्रयी विद्या भक्तिविद्या ह्यनुत्तमा॥ (तत्रैव– ४।१६।२७)
एतद्बृहदारण्यके चतुर्थाध्याये पञ्चमब्राह्मणे 'कौण्डिन्यात्कौण्डिन्यः शाण्डिल्यात् शाण्डिल्यः' इति। तथा तत्रैव षष्ठाध्याये पञ्चमब्राह्मणे 'वामकक्षायणः शाण्डिल्याच्छाण्डिल्यो वात्स्यात्' इत्यादिना स्पष्टम्।

४. वृद्धहारीतस्मृतावपि प्रायश्चरित्रमस्यैतादृशमुपलभ्यते। (श्लो० १८०-१९३)

बुद्ध्वा प्रसादं भुक्त्वा वैदिको वैष्णवो महर्षिरभूत्[१]। स एकदा नवीन-नीरदश्यामं पीतवाससं शङ्खचक्रगदापद्माङ्कितं गोवर्धनधारिणं परमात्मानं ध्यातवान्, तदा स गोपालबालकैः सार्धं क्रीडमानः प्रादुरास। तदा प्रणमन्तं शाण्डिल्यं भगवानुवाच – त्वं वाञ्छितं वृण्विति। शाण्डिल्येन किमप्यनुक्ते भगवान् स्वयं शाण्डिल्याय स्वकीयस्वरूपस्य ज्ञानमन्यच्च प्रकाशयितुमाह – अहं निर्गुणो निष्क्रियो निरञ्जनोऽस्मि। आत्मरूपा ज्योतीरूपा मम लीलानाम्नी सख्यस्ति सा ममेष्टं सर्वं साध्नोति, त्वं निर्गुणां भक्तिमातिष्ठ, मम लीलादर्शनेच्छा तवास्ति चेन्मम योगमायेति काचिल्लीलप्रतिहारिण्यस्ति सा त्वां भ्रामयेदत एतां मद्दतां मालां स्वीकुरु, तेन तव लीलायां प्रवेशो भवेदिति। ततः शाण्डिल्यप्रार्थनया परमात्मना ललितादेव्युपदेशयोग्यस्थानं निर्दिश्य ललिता त्वामुपदेक्ष्यतीत्युक्त्वा तस्मै मन्त्रं प्रदायान्तर्हितम्। ततः शाण्डिल्यो हरिणा प्रदर्शितां दिशं नत्वा

---

१. तृतीयो गार्धभिः प्रोक्तो वीरवैष्णवशासनम्।
येन प्रोक्तं तामसानां सर्वेषां मुक्तयेऽपि च॥
विष्णोः समाश्रयं कृत्वा त्याज्यमन्याश्रयं ततः।
शिखासूत्रादिभिः किं स्यात्किं स्याद्वर्णाश्रमाश्रमैः॥
त्यक्त्वा विधिं निषेधं च हरिमेकं दृढाश्रितः।
...................................................
धिक्कृतः स च देवेन पातितो निरयेऽशुचौ॥
पुनः समुद्धृतः सद्यो भक्तोऽयमिति विष्णुना॥
स च विप्रकुले जातो हरिभक्तिसमाश्रितः।
...................................................
जगदीशप्रसादान्नं साधु मेने न चाशितुम्।
पुनश्च धिक्कृतस्तत्र माहात्म्यानवबोधतः॥
श्रुत्वैवं तस्य माहात्म्यं कृत्वात्यन्तं समादरम्।
प्रसादान्नं वै जग्राह वैदिको वैष्णवोऽभवत्।
अयं महर्षिः शाण्डिल्य आचार्यः साम्प्रतं किल॥ इति। (शां०४।१६।२८-३४)

स्थितस्ततो ललितादेवी स्वयमागत्य तं लीलाशतनामस्तोत्रं भक्ताचारं चोक्त्वान्तर्हिता। शाण्डिल्योऽपि तत आरभ्य ललिताप्रदर्शिताचारमाचरितवान्[१]। ततः सूर्यात्सहस्रनामस्तोत्रमधीत्य ऋषिप्रार्थनया[२] तान् प्रति धर्म-अर्थ-काम-मोक्ष-भक्तिरूपपञ्चखण्डयुक्तां नारदमुखश्रुतां शाण्डिल्यसंहितामुक्त्वा कौण्डिन्यमृषिभ्य उपदेष्टारं प्रदर्श्य ब्रह्मशृङ्गमगादिति[३]।

अत्रास्याः संहितायाः पाञ्चरात्रान्तर्गतत्वेन सामान्यतः पाञ्चरात्रशास्त्रीयसिद्धान्तप्रदर्शनानन्तरमेतत्संहिताप्रतिपादिताः सिद्धान्ताः प्रदर्श्यन्ते, येन पाठकानामुभयोर्विशेषज्ञानं सुलभं भवेदिति।

तत्र सामान्यतः प्रायः पाञ्चरात्रमते चिदचिदीश्वरभेदेन भोक्तृभोग्यनियामकभेदेन वा जगति व्यवस्थितास्त्रयः पदार्थाः। तत्रेश्वरो नियामकः। जीवो भोक्ता चिद्रूपः, दृश्यं भोग्यमचित्। अस्य जगतः कर्ता तथोपादानकारणमीश्वरोऽस्ति। स च सकलकल्याणगुणसम्पन्नः परमकारुणिको भक्तवत्सलो ब्रह्मस्वरूपो जीवनियन्ता पुरुषोत्तमवासुदेवशब्दवाच्य उपासकानां योग्यतानुसारं फलदानाय स्वलीलया अर्चा-विभव-व्यूह-सूक्ष्म-अन्तर्यामीति पञ्चस्वरूपेणावतरति। प्रतिमादिदेवतास्वरूपमर्चारूपम्। रामादयोऽवतारा विभवसंज्ञकाः। वासुदेवः (परं ब्रह्म), ततः सङ्कर्षणः (जीवः), ततः प्रद्युम्नः (मनः), ततोऽनिरुद्धः (अहङ्कारः) प्रादुर्भवत्येवं वासुदेवस्य चतुर्विधो व्यूहोऽस्ति। सूक्ष्मं नाम सम्पूर्णं षड्गुणं परब्रह्मैव। सर्वेषां जीवानामन्तः स्थित्वा प्रेरकोऽन्तर्यामीत्युच्यते। यथाक्रमं पञ्चस्वरूपाणामुपासनानामनन्तरं परं स्थितानां पञ्चविधोपासनानां स्वीकारः कर्तव्यः। ता उपासनाः – अभिगमन-उपादान-इज्या-स्वाध्याय-योगरूपाः। तत्राभिगमनं प्रातर्भगवन्मन्त्रस्तुतिनमस्कारादिकम्। तदनन्तरं पूजार्थं पुष्पादिसम्पादनमुपादानम्। ततः पूजनमिज्या। ततो भगवच्छास्त्रतदनुगुणपुराणागमश्रवणचिन्तनादिकं स्वाध्यायः। ततः सायंसन्ध्याया अनन्तरं भगवति चित्तसमाधानं योगः।

---

१. शां० सं० १।६।३२-८१; २. तत्रैव–१।१।१-७; ३. तत्रैव– ४।१६।२१।

एवं प्रकारेण पञ्चविधोपासनानामनन्तरं विज्ञानोत्पत्त्या बाह्यविषयासक्ति-निवृत्तिः, ततो वासुदेवः स्वभक्तं स्वस्थाने नयति। सर्वकर्तृत्वव्यतिरिक्ताः परमात्मनः सर्वे गुणास्तस्मिन् प्रादुर्भवन्ति, न तस्य पुनरावृत्तिः।

अथ शाण्डिल्यसंहितायाः सामान्यतस्तत्त्वसंग्रहः। पुरुषोत्तमहर्यादिपद-वाच्यो नारायण एक एवास्ति। स च निर्गुणो निराश्रयो निर्विकारो निजानन्दपूर्णोऽस्ति।जीवास्तदंशाः।पूर्णानन्दैकविग्रहोऽपि स रन्तुमनसा लीलाशक्तिमुत्पादितवान्। ततोऽसौ गोकुलादिस्थानेषु दिव्येषु सच्चिदानन्द-मन्दिरे द्विधा भूत्वा पुम्भाव-लीलाद्याश्रितो लीलां करोति। स एव वासुदेव-सङ्कर्षण-प्रद्युम्न-अनिरुद्धरूपेण विराजते। तस्य नित्यविग्रहा अपि सर्वदा क्रीडामहोत्सवै रमन्ते। विष्ण्वादयस्तस्य स्वयंसिद्धाः कलाभूताः। स च पुरुषोत्तमो विष्ण्वादिद्वारा सकलं विश्वमुत्पाद्य सम्पूर्णं तद् व्याप्तवान्। स चार्चादिरूपेण मूर्त्तिप्रभृतिष्वस्ति। हरिप्राप्तये वैष्णवं गुरुं कृत्वा ततो दीक्षां स्वीकृत्य पञ्चधा शुद्धिं सम्पाद्य दीक्षोक्तवर्त्मना सकलं तान्त्रिकपूजनं वैदिककर्माविरुद्धं प्रत्यहं नवधार्चाप्रकारेणानुष्ठाय नवधा भक्तिं च कृत्वा मनुजो निष्पापो भवति। तत्र पञ्चधा शुद्धिस्तु जन्मना विद्यया तपसा हरिसेवया सत्सङ्गेन च भवति। नवधार्चा तु– अर्चन-मन्त्र-पठन-याग-योग-नामसंकीर्तन-सेवा-तच्चिह्नधारण-तदीयाराधनरूपा।एवं सर्वदा कुर्वन् योगेन तपसाचारैश्च विरक्तो भूत्वा तं ज्ञात्वा भक्त्या च तत्परो भवन् तं प्रविशति। अनन्यास्तत्परा भक्त्या तदात्मका भूत्वा शङ्खचक्रादिलाञ्छिताः सन्तो हरिपार्श्वस्था भवन्ति।

सात्त्विका भक्ताः सारूप्यसार्ष्टिसायुज्यभागिनः। राजसाः सालोक्य-भागिनः।सारूप्यं श्रीवत्सकौस्तुभादिरहितं शङ्खचक्राद्युक्तं भवति।सार्ष्टित्वं जगद्व्यापाररहितं भवति। पराभक्तिस्त्वीश्वरानुग्रहादेव भवति, तद्युक्ता निर्गुणात्मानः किञ्चिदपि मोक्षादिकं न वाञ्छन्ति। ते सर्वानन्दानुभूति-कारणमेकत्वं प्राप्नुवन्ति। तेषां चैतन्यरूपिण्यां सर्वानन्दमय्यां परमात्मनो नित्यलीलायां प्रवेशोऽस्ति। ते दिव्येन्द्रियैर्दिव्यानन्दं सर्वदाऽनुभवन्ति, न तेषां पुनरावृत्तिर्भवतीति।

अधुनाऽयं प्रसक्तानुप्रसक्तो विचारो मनसि प्रादुर्भवति यद्यज्ञादिनिरूपण-परादृग्वेदादेः कथं भक्तिसम्प्रदायः सर्वथा भिन्नः प्रवृत्त इति। यद्यपि ऋग्वेदादिषु बहुषु स्थलेषु मन्त्रद्रष्टॄणामृषीणां वृत्तिर्देवतास्तुतिप्रसङ्गे सर्वथा बाह्यविषयपरित्यागपूर्वकप्रार्थनाविषयदेवतापरा जाता स्यादिति

निर्णेतुं शक्यते[१]; परन्त्वधुना भक्तिविषयस्य यादृशं स्वरूपं सुविशालं दरीदृश्यते शास्त्रेषु, तादृशं नोपलभ्यते। यद्यपि ऋग्वेदस्य केचन मन्त्रा नवविधायाः श्रवणादिभक्तेर्बोधकाः सन्तीति प्रदर्श्यते ग्रन्थकारैः[२]; परन्तु तदुभयवादिसम्मतं नैव भवति। भारतागमग्रन्थाद्यवलोकने तु सामवेदेन[३], यजुर्वेदीयकाण्वशाखया च[४] भक्तेः सम्बन्धोऽस्तीति ज्ञायते। स कथं संजात इति विचारकरणे कदाचिद्भक्तेरङ्गमेकं कीर्तनं गानप्रधानमस्ति, सामवेदपाठस्य गानयुक्ततया सामवेदगानात्स्तोतव्यदेवतायां छन्दोगानामृषीणां चित्तस्य नितरां स्थित्या सामवेदात्कीर्तनभक्तिः साध्यरूपपरभक्त्या श्रवणाद्यन्यसाधनादिना च सह संसिद्धा स्यादिति। काण्वशाखान्तर्गतोऽयं

---

१. ऋग्वेदसंहितायाः १।१६४। ३३, ८९, १० एतानि स्थलानि द्रष्टव्यानि।

२. अस्मिन्विषये 'भगवन्नामकौमुदी', 'भगवन्नाममाहात्म्यसंग्रहः' प्रभृतयो ग्रन्था द्रष्टव्याः। विशेषतो 'भक्तिः प्रमेया श्रुतिभ्यः' इति शाण्डिल्यसूत्रीयश्रीनारायणतीर्थरचितभक्तिचन्द्रिका द्रष्टव्या।

३. समुपोढेष्वनीकेषु कुरुपाण्डवयोर्मृधे।
अर्जुने विमनस्के च गीता भगवता स्वयम्॥

..............................................

गहनो ह्येष धर्मो वै दुर्विज्ञेयोऽकृतात्मभिः।
संमितः सामवेदेन पुरैवादियुगे कृतः॥ (शां० अ० ३४८)
महर्षिभिश्च संप्राप्तः सामवेदान्तगं द्विजम्।
ज्येष्ठं नामाभिविख्यातं ज्येष्ठसामव्रतो हरिः॥ (तत्रैव– अ० ३४८)
प्रणिपत्य मुदा देवः सामगानादतोषयत्।
जगतो हि समुद्धर्तुं संप्रदायस्य लब्धये॥ (शां० सं०१।५।८-९)
कदाचिच्छ्रुतयः साम्नां सिद्धाः कीर्तनभक्तितः।
मदनुग्रहमायाता एवंभूतं समीक्ष्य ताः॥ (तत्रैव– १।६।४७)

४. काण्वीं शाखामधीयानावौपगायनकौशिकौ।
प्रपत्तिशास्त्रनिष्णातौ स्वनिष्ठानिष्ठितावुभौ॥ (जया-सं० १)
शाण्डिल्यश्च भरद्वाजो मुनिर्मौञ्जायनस्तथा।
इमौ च पञ्च गोत्रस्था मुख्या काण्वीमुपाश्रिताः॥इति। (तत्रैव, प० १)

पाञ्चरात्रमूलभूत एकायनवेदः[1]। भक्तिशास्त्रस्य काण्वशाखया सह सम्बन्धस्य कारणं तु काण्वशाखायां भक्तेर्मूलभूततत्त्वयुक्तानि भक्तानां चरित्राणि सूत्ररूपेण सन्निति ब्रह्मवैवर्तपुराणादितो ज्ञायते[2]। प्रकृतसंहितायां तु आथर्वण-तैत्तिरीय-बौधायन-ऋक्-सामादिश्रुतिषु विष्णुप्रियपदार्थानां महिमाऽस्तीति वर्णितम्[3]। एवञ्च ऋग्वेदादिषु संक्षेपरूपेण स्थितं तत्काले केषाञ्चिदृषीणामाचारविषयभूतं भक्तितत्त्वमुत्तरोत्तरं विशदत्वं विस्तीर्णत्वं च प्राप्तं सदधुना सर्वतत्त्वान्यतिशेते। अस्तु, अस्याः संहिताया विषयसूच्यादिदर्शनेनात्रत्यपदार्थज्ञानं सुलभं भवेत्; परन्त्ववश्यद्रष्टव्यानां ध्यातव्यानां च दार्शनिकपदार्थानामत्र संक्षेपतः सूचनं पाठकानामुपकारकं भवेत्। प्रथमांशे प्रथमद्वितीयाध्याययोर्जगतः प्रादुर्भावो विशदो वर्णितः। चतुर्थपञ्चमाध्याययोर्भक्तिसम्प्रदाया अत्यन्तं विशदतया वर्णिताः। षष्ठाध्याये ललितया शाण्डिल्याय प्रोक्त आचरणीयाचारः प्रदर्शितः। सप्तमाध्याये निर्गुणभक्तेः प्रसङ्गतस्तदुपकारिपदार्थस्य च विशदं वर्णनमुपलभ्यते।

द्वितीयतृतीयचतुर्थाध्यायाः सर्वेऽप्याचारप्रतिपादका अवश्यं द्रष्टव्याः। तृतीयांशे प्रथमाध्यायो दार्शनिकविचारपरिपूरितः। चतुर्थांशस्य प्रथमोऽध्यायो जगदुत्पत्तिक्रमविषयेऽवश्यं द्रष्टव्यः। तथा चतुर्थांशस्य त्रयोदश-चतुर्दश-पञ्चदश-षोडशाध्याया युगपरिमाणादिकलिकर्तव्याकर्तव्य-धर्माधर्मादिक-भविष्यदाचार्यादि-शाण्डिल्यवर्णनादिकप्रतिपादकाः सन्ति। तृतीयांशस्य षष्ठाध्यायस्थो मुद्राधारणशास्त्रार्थस्तथा चतुर्थांश-दशमाध्यायस्थो देवस्वग्रहणाग्रहणशास्त्रार्थोऽवश्यं द्रष्टव्यः। अस्तु।

---

१. नागेशकृतकाण्वशाखामहिमसङ्ग्रहसंज्ञकग्रन्थे (मद्रासपुस्तकालयस्थे) वर्णितमस्ति। अत्र विषये जयासंहिताङ्गलभूमिका द्रष्टव्या।

२. तत्र राधिकाया आख्यानं काण्वशाखायामस्तीति प्रतिपादितम्। (२।४८)

३. तैत्तिरीया जगुश्चोर्ध्वपुण्ड्रं वै श्रौतभस्मना। (शां० सं० ३।७।३)
वर्णाश्रमाचारवता धार्या तुलसिमालिका।
शिखोपवीतवन्नित्या जगावाथर्वणश्रुतिः॥ (तत्रैव–३।४।५)
पादोदकं हरेः पेयं पूजान्तेऽपि दिने दिने।
सर्वतीर्थसमं तद्धि प्राह बौधायनश्रुतिः॥ (तत्रैव–३।८।१)
उरुक्रमस्य पादाब्जपायो यो न पिबेन्नरः।
विष्णोर्लोकं स न वसेदिति ऋक् शाश्वती श्रुता॥ (तत्रैव–३।८।१४)

शाण्डिल्यसंहिताया लिखितायाः कलिवर्ज्यावर्ज्यप्रकरणस्य पत्रत्रयं तथा प्रथमांशप्रथमाध्यायस्य च पत्रत्रयं लिखितं कार्यवशादिन्दुरपत्तने गतवता मयैकस्य ब्राह्मणस्य गृहे जीर्णपुस्तकसंग्रहादधःपतितेषु ग्रन्थपत्रेषु दृष्टम् । सम्पूर्णपुस्तकान्वेषणे कृतप्रयत्नेनापि वैफल्यमेवासादितम् । ततः काश्यामागत्य श्रीयुतपण्डितप्रवरपद्मनाभकेशरिमहोदयनिकटे पञ्चाशद्वर्षतः पूर्वं मुम्बईनगरे ज्येष्ठाराममुकुन्देन जगदीश्वरशिलाप्रेसमुद्रितं तत्पुस्तकं दृष्टम् । तत्पुस्तकप्राप्त्यर्थं सर्वत्र पुस्तकापणे प्रयत्ने कृतेऽपि न प्राप्तिः संजाता । ततः प्रसङ्गवशान्महामहोपाध्यायैः काशिकराजकीयपाठशाला-ध्यक्षमहोदयैस्तत्पुस्तकं दृष्ट्वा संशोधनेऽनुमतिःप्रदत्ता । ततः श्रीयुतपण्डित-पद्मनाभकेसरिमहोदयस्यैकं शिलाप्रेसमुद्रितं पुस्तकं स्वीकृत्य संशोधनाय प्रयत्नोऽनुष्ठितः। संशोधनसमय एकस्यैव प्रतिश्लोकमशुद्धिबहुलस्य पुस्तकस्य सहायेन कार्यं कर्तव्यमापतितमतोऽशुद्धयो बह्व्यः संजाताः, ताः शुद्धिपत्राधारेण संशोध्य पुस्तकं पठनीयमिति पाठकानां पुरतः सविनयं प्रार्थना ।

सम्प्रति काशिकराजकीयसंस्कृतपाठशालाप्रधानाध्यक्षैरार्जवौदार्य-विद्वत्तमत्वब्रह्मवर्चसादिसकलऋषिगुणगणभूषितैरस्माकं पूज्यतमैः प्रभुवर-महामहोपाध्याय**श्रीगोपीनाथकविराज**महोदयैर्ग्रन्थस्यास्य सम्पादनार्थं प्रवर्त्य तत्र तत्रात्यन्तोपयोगिनोऽन्यत्र दुर्लभान् दार्शनिकविचारान्स्वीयानन्य-साधारणया प्रतिभया सम्प्रबोध्य बहूपकृतमिति तान् कैः शब्दैरभिनन्दामि । सर्वथा तेषामानृण्यं सम्पादयितुमसमर्थस्तेषां दययैवाहमेतत्कार्यं सम्पादयितुं समर्थो जात इति सर्वदास्थितसत्यहार्दभावनिवेदनमेव सुयोग्यमिति मन्ये । तथास्य ग्रन्थस्यादर्शरूपं पुस्तकं स्वकीयं दत्तवतां पण्डितवराणां **पद्मनाभकेशरि-**महोदयानामुपकारान् सधन्यवादं प्रकाश्य येषां कृपाकटाक्षेण विना पदात्पदमपि चलितुं न शक्नोति मानवस्तान् **काशीपुरपालकान् श्री१०८ भैरवनाथान्** प्रणम्य विद्यारसिका विद्वांसः सफलयन्तु मामकीनं परिश्रममिति निवेदयते –

**गवर्नमेण्टसंस्कृतकालेज,**
**वैक्रमे १९९३मिते वर्षे चैत्रशुद्धदशम्याम्,**
**काशी।**

विदुषामनुचरः
**अनन्तशास्त्री फडके**
**व्याकरणाचार्यो मीमांसातीर्थश्च**

# विषयानुक्रमणिका

## प्रथमांशस्य


| विषयाः | पृष्ठाङ्काः |
|---|---|
| भक्तिस्वरूपादिलीलासृष्ट्यादि-प्रादुर्भावववर्णनम् | १ |
| पूर्ववृत्तवर्णनम् | १ |
| सर्वाधिकसिद्धिविषये ऋषिप्रश्नः | १ |
| हरिभजनमेवात्यन्तिकं श्रेय इत्युत्तरम् | २ |
| हरिर्देहभृतां सिद्ध आत्मा | २ |
| धर्मादिपुरुषार्थैस्तस्यैव सिद्धिः क्रियते | २ |
| संदिग्धे सतामाचारोऽपि वेदवत्प्रमाणम् | २ |
| शुकादयश्चतुर्विधमोक्षं हित्वा तं भजन्ति | २ |
| सर्वेष्वर्थेषु भक्तिः श्रेष्ठा | ३ |
| वैराग्यविज्ञाने भक्त्यधीने | ३ |
| माहात्म्यबोधभक्तेर्लक्षणम् | ३ |
| अनभिज्ञानामपि तत्सिद्धिर्भवति | ३ |
| अनेकजन्मसुकृतसाध्या प्रपत्तिः | ३ |
| पराभक्तिरीश्वरानुग्रहादेव भवति | ३ |
| ईश्वरस्य कः प्रेरक इति प्रश्नस्य तस्य लीलैवेत्युत्तरम् | ३ |
| ईश्वरशक्तिः सर्वाविरोधाविरोधिन्यस्ति | ३ |
| ज्ञानेच्छाकृतिभिस्तस्य स्वरूपावस्थितिर्भिद्यते | ३ |
| तत्र वामांशतो लीलासृष्टिर्भवति | ३ |
| सृष्टकार्यभवा द्वितीया सृष्टिः | ३ |
| तृतीया छायामायामयी | ४ |
| पुरुषस्वरूपम् | ४ |
| तस्य वामांशतो नित्यविग्रहाः | ४ |
| अध्यात्मरूपेणान्या सृष्टिर्भवति | ४ |
| तत्रात्मसंभवजीवक्रीडनक्रिया भवति | ४ |
| तत्रानुगृहीतजीवभेदाद्भक्तिमार्गो भिद्यते | ४ |
| विष्ण्वादिप्रादुर्भाववर्णनम् | ५ |
| अक्षराद्विष्णुब्रह्माद्युत्पत्तिः | ५ |
| एते स्वयंसिद्धाः पुरुषस्य कलाः | ५ |
| महालक्ष्मीप्रमुखाभिः सकलं विश्वमुत्पादितम् | ५ |
| अजो विवर्तपरिणामिन्या प्रकृत्या विश्वं निर्ममे | ५ |
| आकाशादिषट्त्रिंशत्तत्त्वोत्पत्तिः | ५ |
| शब्द-रूपात्मिकास्य मूर्तिः | ५ |
| नादात्प्रणवस्ततो वेदत्रयाद्युत्पत्तिः | ५ |
| सत्त्वं वासुदेवप्रकाशकमस्ति | ६ |
| मन्त्रादिसर्वं विष्णुरूपतया ज्ञात्वार्चने विष्णुप्रीतिः | ६ |
| सोमान्तकर्मणा हरिमात्मभावेन भजन् तरति | ६ |
| स्ववर्णाश्रमधर्मपरस्य चित्तं हरौ विशति | ६ |
| आश्रमधर्मेणान्तरो मलो नश्यति | ७ |
| विज्ञानभक्तिविरक्तिभिरात्मा प्रकाशते | ७ |

भक्तियुक्तं कर्म कर्मनाशाय प्रभवति ७
स्वायम्भुवादिभिः कर्मणैव सिद्धिः प्राप्ता ७
सालोक्यप्राप्तेरुपायः ७
केनापि प्रकारेण कृतं कृष्णभजनं हितकारकम् ७
वैदिकागमोक्तमन्त्रैर्यजतामात्यन्तिकसुखप्राप्तिः ८
न्यासैः सर्वात्मभावना भवति ८
नित्यनैमित्तिककर्मभिः सारूप्यप्राप्तिर्भवति ८
अर्चावसथनिरूपणम् ९
अर्चनाधिकारिविशेषणकीर्तनम् ९
शिलादिभिर्हरेः प्रतिकृतिं कुर्यात् ९
शालग्रामादौ सन्निहितः सर्वदा देवः ९
चिरन्तनार्चायामर्चावताररूपेण देवोऽस्ति ९
तत्र पूजाप्रवाहः परम्परानुगतः कर्तव्योऽन्यथा पातित्यम् ९
तीर्थ-देव-क्षेत्र-काल-देश-धातुषु प्राक्तनरीतिरनुसर्तव्या ९
अर्चावताररूपेणेश्वरः परमानन्दं धत्ते १०
कलापादिषु स्वयं हरिर्व्यक्तो भवति १०
चक्रे नैवागमविसर्गे स्तः १०
अर्चनादिनवविधचर्याकथनम् १०
जन्मादिना मनुष्यस्य पञ्चधा शुद्धिः १०
वन्दनसेवनादिकं शूद्राणाम् १०
दूराद् देवालयनत्यादिकमवरजन्मनाम् १०-११
श्रुत्याद्याचारत्यागे पाखण्डता ११
विष्णोर्नामस्मरणान्नरको न भवति ११
प्रीतियुक्तं तुलसीपत्रादिकं विष्णुर्गृह्णाति तद्रहितं रत्नादिकं नैव गृह्णाति ११
गृहे शालग्रामः पूज्यः ११
शालग्रामादिरहितं गृहं श्मशानवत् ११-१२
शालग्रामपूजनाभावे नरकगामित्वम् १२
मन्त्रादिरहितमप्यस्य पूजनं सारूप्यमुक्तिदम् १२
चुलुकेन तीर्थं पिबेत् १२
तीर्थपाने पूजापराधदोषनाशः १२
तीर्थच्युतौ पातकम्, तस्मात्पात्रादिना पेयम् १२
शालग्रामपूजने सङ्ख्याविचारः १२
सूक्ष्मशिलापूजने महत्पुण्यम् १२
गोमतीचक्रयुक्ता गण्डकीशिला यत्र तद्वाराणसीसमम् १२
प्रवासे शालग्रामं शीर्ष्णा वहेत् १३
मरणप्राप्तौ शालग्रामं हृदि निधाय तीर्थपाने वैकुण्ठगमनम् १३
आह्निककृत्यविधानम् १३-१४
वैखानसादिभिः श्रौताद्युक्तम् १४
यथालब्धोपचारैः पूजनम् १४
पाञ्चरात्रविधानतो होमः १४
वैष्णवेन विष्णुतुष्ट्यर्थं नित्यकर्म कर्त्तव्यम् १४-१५
गुरुपूजनविधानम् १५
भक्तिशास्त्रसम्प्रदायत्रयनिरूपणम् १६

ब्रह्मादिभ्यः प्रोक्तभक्तिशास्त्रसंप्रदाय-
ज्ञानार्थमृषिप्रश्नः १६
पूर्वं तमोमयं विश्वमासीत् तदा
स्वात्मना हरिर्लीलासृष्टिं कृतवान् १६
तदा नारायणः प्रादुर्भूतः १६
ततस्त्रिगुणा माया महेश्वरी प्रादुर्भूता १६
नित्यात्मानः समुद्भूताः १६
नवविंशतितत्त्वानि विष्णुः सूतवान् १६
मायया तत्त्वैर्जगदाविर्बभौ १६-१७
नारायणः क्षीरसिन्धुं शेषं च कृत्वा
निद्रां ययौ १७
तन्नाभिकमलतो रजोगुणयुक्तः
स्वयम्भूरभूत् १७
विष्णोर्वामदक्षिणभागाभ्यां वामदेव-
महादेवौ जातौ १७
नारायणो वामदेवं सङ्कर्षणो भवेत्युक्तवान् १७
महादेवमनिरुद्धो भवेत्युक्तवान् १७
हंसरूपी भूत्वाहमुपदेक्ष्यामीति
ब्रह्माणं प्रति नारायणकथनम् १८
ब्रह्माणं प्रति विष्णुना स्वरूपकीर्तनम् १८
ब्रह्मणस्तारकमन्त्रजपकरणे प्रेरणम् १८
ब्रह्मशरीरतः प्रादुर्भूतसृष्टिनिरूपणम् १८
ब्रह्मणा कृतो वशिष्ठाय भक्त्युपदेशः १८
वशिष्ठेन शक्तय उपदेशः कृतः १९
शक्तिना कुरुक्षेत्रे पराशरायो-
पदेशः कृतः १९
तस्य मुकुन्दभजनतो व्यासरूपः
पुत्रो जातः १९
व्यासतो भक्तेरुत्तमसरणिः प्रादुर्भूता १९
व्यासतो मधुनामप्रभञ्जन उपदेशं
गृहीतवान् १९
अतो मधुविद्येति नाम, तां च
दधीचिरुक्तवान् १९
प्रभञ्जनाल्लोके कर्णाटकादिदेशे
सा प्रसृता १९
यस्यां भक्तौ ब्रह्माद्या दासाः १९-२०
ब्रह्मस्मरणादागतो हंसरूपी विष्णुः
सनकादिभ्यो भक्तिमुक्तवान् २०
सनकादिसंप्रदायविस्तारः २०
विष्णुसंप्रदायकीर्तनम् २०
श्वेतद्वीपस्थं विष्णुं स्तुत्वा
ब्रह्मादिभिः पाञ्चरात्रं प्राप्तम् २०
उपरिचरेण सह तन्नष्टम् २१
पुनश्च नारदेन विष्णोः प्राप्तम् २१
कर्दमात्कपिलादिभिः प्राप्तम् २१
एतद्विषये लक्ष्म्या विष्णुं प्रति प्रश्नः २१
समोऽप्यहं भक्ताधीन इति तदुत्तरम् २१
सूर्यादिवन्मदीयव्यापार इति तदुक्तिः २१
राजकुमारवद्विष्णोर्लीला प्रचलति २२
पञ्चरात्रपदव्याख्यानम् २२
पञ्चरात्रमनेकप्रकारकमस्ति २२
एतद्भिन्नं यथार्थं पञ्चरात्रं नास्ति २२
विष्णोर्मन्त्रजपाल्लक्ष्म्या वक्षसि वासः २३
लक्ष्म्या विष्वक्सेनायोपदेशः कृतः २३
तेनागस्तिप्रभृतिभ्यः कृतः २३
द्राविडादिदेशेषु रमाभक्तिप्रचारः २३

अत्र शेषशेषिभावेनात्मा प्रकटी-
भवति २३-२४
शङ्करतो भक्तिमार्गप्रचारः २४
कृतयुगे नारायणीभक्तिरस्ति २४
त्रेतायुगे ब्राह्मीभक्तिरस्ति २४
द्वापरे शाङ्करीभक्तिर्वर्तते २४
सात्त्विकाचारतः कृतयुगे सात्त्विकी २४
फलमुद्दिश्य यज्ञादिभिस्त्रेतायां
राजसी भवति २४
मूढात्मजनैराग्रहवादतस्तामसी
भक्तिर्द्वापरे कृता २४
दक्षिणदेशे सात्त्विकी-भक्तिः २४
मध्यदेशे राजसी २४
अन्यत्र तामसी-भक्तिः २४
त्रिपुरारिसम्प्रदायनिरूपणम् २५
तार्तीयसम्प्रदायनिरूपणे प्रश्नः २५
शङ्करस्य गोकुलगमनम् २५
तत्र सामगायनसन्तुष्टात्परमात्मन
उपदेशप्राप्तिः २५
ततो नारदादिभ्यः प्राप्तिः २६
कलौ नष्टप्रायं भगवान् वदिष्यति २६-२७
ततः कालदोषेण स पन्था नश्यति २७
शाण्डिल्योक्तमार्गो वेणुगृहीत-
वेदैराविर्बभौ २७
शाण्डिल्यायोपदेशनिरूपणम् २८
पश्वादीनामपि कृष्णभक्तावधिकारः २८
सात्त्विकी भक्तिः २८
राजसा भक्ताः २८-२९
तामसा भक्ताः २९
निर्गुणभक्तिलक्षणम् २९-३०
सात्त्विकादिभक्तप्राप्यमोक्षस्वरूपम् ३०
निर्गुणात्मनां लीलाप्रवेशः ३०
विश्वस्वरूपवर्णनम् ३०
कृष्णस्वरूपम् ३०-३१
शाण्डिल्यस्योपरि प्रसादः ३१-३२
व्रजशब्दनिर्वचनम् ३२
शाण्डिल्याय लीलादर्शनार्थं
मालाप्रदानम् ३२-३३
तव चरणयोरविच्छिन्ना प्रीतिर्भ-
वत्विति शाण्डिल्यकथनम् ३३
शाण्डिल्याय मन्त्रार्पणपूर्वकं
ललितासमीपे गच्छेति कथनम् ३३
ललितादर्शनं तत्कर्तृकः
शाण्डिल्यायोपदेशश्च ३४
भक्तस्वरूपबोधकविशेषणानि ३४
भज्यगुरुस्वरूपम् ३४
सगुणभक्तिकरणेऽवधिप्रदर्शनम् ३५
भक्तिस्वरूपनिरूपणम् ३६
भक्तेर्निर्गुणः कर्त्ता संभवति ३६
जीवस्वरूपम् ३६
अप्राकृतस्वरूपम् ३६
परमेश्वरे वैरादिभिर्वृत्तैरैक्यं भवति ३६
आत्यन्तिकवृत्तिलक्षणम् ३६
ब्रह्मैव पुत्रादिरूपेण जातम् ३६
भक्तस्य निर्गुणत्वम् ३७
विष्णुभक्तसङ्गेन नारका मुच्यन्ते ३७

| | |
|---|---|
| अहैतुकी प्रेमस्फूर्तिः | ३७ |
| आत्यन्तिकभक्तौ क्षणमात्रवियोगे जीवनं नैव तिष्ठति | ३७ |
| कृष्णकान्तभक्तस्य स्थितिवर्णनम् | ३८ |
| सगुणा भक्तिः साधनरूपा, निर्गुणा भक्तिः सिद्धावस्था | ३९ |
| भक्तिचातुर्विध्यवर्णनम् | ३९ |
| दीक्षाविशेषनिरूपणम् | ४० |
| त्रिधा शौचकथनपूर्वकाचार्यप्रार्थनम् | ४० |
| गुरुसमीपे भागवतधर्मशिक्षार्थं वासः | ४१ |
| आह्निकवर्णनम् | ४१-४२ |
| एवं तपःकरणानन्तरं गुरूक्त-शिक्षोपदेशः | ४२ |
| गुरुकृतकृष्णस्वरूपवर्णनम् | ४२-४४ |
| गुरवे सर्वस्वसमर्पणपूर्वकं स्वस्वाम्यं त्यजेत् | ४४ |
| द्विविधस्वाम्यवर्णनम् | ४४ |
| भक्ताचरणवर्णनम् | ४४-४५ |
| फलसाधनरक्तस्याचारवर्णनम् | ४५-४६ |
| मखपूर्वाङ्गनिरूपणम् (काम्यप्रयोगाः) | ४७ |
| काम्यप्रयोगार्थं दिनशुद्धिः | ४७ |
| मण्डपरचनाप्रकारः | ४७-४८ |
| मण्डपशब्दनिर्वचनम् | ४८ |
| कुण्डस्वरूपम् | ४८ |
| गुरुवरणप्रकारः | ४८ |
| द्वारपूजादिविधानप्रकारः | ४८-४९ |
| वह्नौ होमादिविधानप्रकारः | ४९ |
| बलिदानाद्युत्तरं कर्म | ४९-५० |
| होमावशिष्टप्रसादग्रहणम् | ५० |
| दीक्षाप्राप्तिनिरूपणम् | ५१ |
| गुरुणा होमादि विधेयम् | ५१ |
| तज्जीवस्यात्मनि योजनादिकम् | ५१ |
| द्वात्रिंशत्तत्त्वभावनम् | ५१ |
| मणिपूरेऽतलादिन्यसनम् | ५१ |
| अनाहते मातृकान्यसनम् | ५२ |
| सहस्रारे देवतास्थापनम् | ५२ |
| मन्त्रमये देहे स्वस्थिततच्चैतन्यस्थ-ब्रह्मरन्ध्रे निवेशनम् | ५२ |
| ब्रह्मार्पणादिकम् | ५२ |
| पूर्णाहुत्यादिकम् | ५२ |
| शिष्यस्य देवतासमीपनयनप्रकारः | ५२ |
| तस्य सुगुरुस्तुतिपाठनादिकम् | ५२ |
| शिष्यस्याभिषेकादिकम् | ५३ |
| मन्त्रोपदेशादिप्रकारः | ५३ |
| शिष्येण सर्वस्वं गुरवे प्रदेयम् | ५३ |
| महापूजादिकरणम् | ५३ |
| नित्यार्चनादिकम् | ५३ |
| षड्विधं नित्यपूजनादिकम् | ५३ |
| तस्याधिकारिनिरूपणम् | ५४ |
| स्नानादिविधिनिरूपणम् | ५५ |
| स्वापोत्थानादिप्रकारनिरूपणम् | ५५ |
| हृदयाब्जे गोकुलादिस्मरणम् | ५५ |
| ततो मानसिकपूजनादिकम् | ५६ |
| नित्यजपसमर्पणादिकम् | ५६ |
| अर्चायां सुतादियोजनम् | ५६ |
| दन्तमार्जनादिकृत्यम् | ५६ |

वैदिकस्नानतत्स्तुतिमन्त्रोदीरणम् ५६-५७
गोपालादितर्पणम् ५७
तीर्थरज आदिधारणम् ५७
ऊर्ध्वपुण्ड्रधारणप्रकारः ५८
आदर्शं जलं वा वीक्ष्य पुण्ड्रधारणम् ५८
मुद्राधारणम् ५८-५९
क्षत्रियादिभेदेन पुण्ड्रमुद्राभेदः ५९
मन्त्रमुद्रानाममुद्रे ५९
तिलकाद्यधृत्वा कृतं कर्म निष्फलं भवति ५९
ब्राह्मणेनोर्ध्वपुण्ड्रं धृत्वा कर्म कर्त्तव्यम् ५९
ऊर्ध्वपुण्ड्रादिमाहात्म्यम् ५९-६०
वैष्णवधर्ममाहात्म्यम् ६०
सन्ध्यादिकर्मप्रकरणम् ६०
मन्त्रराजन्यासनिरूपणम् ६१
शङ्खादिवादनपूर्वकं हरिस्तुतिः ६१
विष्णुमन्दिरे लेपादिकरणम् ६१-६२
पूजाद्रव्यादिस्थापनम् ६२
दीपप्रज्वालनाचमनादिकरणम् ६२-६३
श्रीनन्दनन्दनध्यानम् ६३
मन्त्रे हरिध्यानपूर्वकपूरकादिविधानम् ६३
जीवकलाध्यानादिकम् ६३
सङ्कर्षणादिध्यानम् ६३-६४
आसनन्यासादिकरणम् ६४
चक्रपञ्चकतो रक्षणम् ६४
अङ्गुष्ठादिषु न्यसनम् ६४-६५
मुकुन्दध्यानादिकम् ६५
गोपीजनवल्लभेति मन्त्रार्थनिर्वचनम् ६५
नमोऽन्तादिमन्त्राय योग्यं कर्म ६६
मन्त्रार्णतो न्यासः ६६
दशधान्यासप्रकारः ६६-६७
स्वमूर्तिपञ्जरादिन्यासः ६७-६८
घनश्यामध्यानम् ६८
अस्य भावनादिफलम् ६८
न्यासाध्यायः ६९
सिद्धगोपालमन्त्रराजविधानम् ६९
कृष्णशब्दनिर्वचनम् ६९
दासीभावेन भजनम् ६९
न्यासादिकम् ६९-७०
न्यासकथनम् ७०
सुषुम्णादिध्यानादिकम् ७०-७१
मूलार्णादिन्यासः ७१
तत्त्वादिन्यासः ७१-७२
न्यासे षड्विंशादितत्त्वविचारः ७२
अस्पर्शादिवर्णादिन्यासः ७२
लोकन्यासादिकम् ७३
न्यासे षोडशकलानिरूपणम् ७३
भगषट्कम् ७४
लीलाविग्रहादिन्यासः ७४
स्वरूपन्यासः ७४
परमात्मनः स्वरूपध्यानम् ७४-७७
न्यासफलम् ७७
कुलदीक्षाधिकारी ७७
पूजापद्धतिपटलवर्णनम् ७८
पूजार्थं देवानयनादिकम् ७८
यन्त्रमन्दिरस्थापनम् ७८
महायन्त्रविन्यासादिकम् ७९

| | |
|---|---|
| महायन्त्रंफलम् | ७९ |
| पाञ्चजन्यपूजनादिकम् | ७९-८० |
| चन्द्रसरादिस्थापनम् | ८० |
| शेषादिपूजनम् | ८० |
| अम्बुजादिध्यानम् | ८१ |
| मधुसरस्वत्यादिध्यानम् | ८१ |
| ललितादियजनम् | ८१-८२ |
| शङ्खघण्टादिस्थापनम् | ८२ |
| आचार्यपादुकादिपूजनम् | ८२ |
| गुरुपादाम्बुजादिनमस्कारकरणम् | ८३ |
| शेषादेः स्तुतिपूर्वकं नमस्करणम् | ८३ |
| विघ्ननाशार्थं प्रार्थनम् | ८३-८४ |
| गुरुपरम्परास्तुतिकरणम् | ८४ |
| वराहादिपूजनम् | ८४-८५ |
| वृन्दावनादिपूजनम् | ८५ |
| व्रजे स्थितपुष्करादिकुण्डादिपूजनम् | ८५-८६ |
| स्नातादिरप्यशुचिर्भवत्यत्र कारणम् | ८६ |
| प्रार्थनादिकम् | ८६-८७ |
| पादार्चनेजनादिदानम् | ८७-८९ |
| हरेः पीठान्तरादिनयनम् | ८९ |
| रुक्मिण्यादिस्नानादिकरणम् | ८९-९० |
| शृङ्गारादिसमर्पणम् | ९०-९२ |
| पुष्ट्यादिसहितगोपालादेः पूर्वादिषु पूजनम् | ९२ |
| लीलादिपूजनम् | ९२-९४ |
| आचमनवीटकादिदानम् | ९४-९५ |
| श्रीराजमण्डपे नयनम् | ९५ |
| तत्र पीठादिस्थापनम् | ९५-९६ |
| पात्रे पक्वान्नादिस्थापनम् | ९६-९७ |
| न नन्दनो भोजनं करोतीति भावनम् | ९७ |
| ततो वैश्वदेवादिकरणम् | ९७ |
| देवपाणिशोधनादिकम् | ९७-१०० |
| प्रसादवीटकग्रहणपूर्वकं स्वस्थानयानम् | १०० |
| मध्याह्नकृत्यं गुरुभोजनादिकं च | १००-१०१ |
| भोजनविधिप्रकारः | १०१ |
| भोजनानन्तरं कृत्यम् | १०१ |
| सायंकालकृत्यम् | १०१ |
| ग्रीष्मर्तौ पूजनादिप्रकारः | १०१ |
| सायंकालपूजनादिकम् | १०२ |
| त्रिकालपूजादौ कल्पान्तरम् | १०२ |
| सायंपूजनमापत्तौ न कुर्यात् | १०२ |
| विशेषपूजापद्धतिवर्णनम् | १०३ |
| वत्सरारम्भादौ विशेषपूजनम् | १०३ |
| चैत्रमासादौ पुष्पाद्युत्सवः | १०३-१०८ |
| संवत्सरान्तरे पुरश्चर्यां कुर्यात् | १०८ |
| तत्प्रकारः | १०८-१०९ |
| ग्रीष्मादौ पञ्चतप आदि कुर्यात् | १०९-११३ |
| स्तोत्रनिरूपणम् | ११४ |
| महत्समयोऽपि वेदवत्प्रमाणम् | ११४ |
| गुरुस्तोत्रम् | ११४-११५ |
| गुरुस्तोत्रफलम् | ११५ |
| हरिस्तोत्रम् | ११५-११७ |
| श्रीमङ्गलाष्टकम् | ११७-११८ |
| आरार्त्रिकं स्तोत्रम् | ११८-१२० |
| पीठस्तोत्रम् | १२०-१२३ |

| | |
|---|---|
| गोपालस्तवराजकः | १२३-१२६ |
| कवचनिरूपणम् | १२७ |
| कवचप्रादुर्भावनिरूपणादिकम् | १२७ |
| श्रीमङ्गलं नाम कवचम् | १२८-१३३ |
| मङ्गलकवचफलादिकम् | १३३ |
| लीलाशतनामस्तोत्रम् | १३४-१३६ |
| तत्फलम् | १३६-१३७ |
| गोपीपतिगायत्र्यादिनिरूपणम् | १३८ |
| चतुराद्याश्रमाधिकार्यादिनिरूपणम् | १३८ |
| व्रात्यताकारणम् | १३८ |
| वैदिकसंस्काराधिकारी | १३८ |
| तदनधिकारी | १३८ |
| विप्रादेर्ब्रह्मगायत्र्यादिकथनम् | १३८-१३९ |
| वैष्णवाद्याश्रमत्रयकीर्तनम् | १३९ |
| भागवतं विप्रं गुरुं कुर्यात् | १३९ |
| भूमिपतेर्गोपालाराधनयोग्यतोपायवर्णनम् | १३९-१४० |
| उपदेशानन्तरं क्षत्रियस्य कर्त्तव्यम् | १४०-१४२ |
| व्रात्यधर्मविनिर्णयः | १४२ |
| दीनतरस्योपायकीर्तनम् | १४३ |
| गोकुलेशनामसहस्रम् | १४४ |
| सहस्रनामस्तोत्रप्राप्तिप्रकारः | १४४-१४५ |
| सहस्रनामस्तोत्रफलम् | १४५-१४६ |
| कवचजपपूर्वकृत्यम् | १४६ |
| अथैतत्कवचम् | १४६-१४७ |
| सहस्रनामस्तोत्रप्रारम्भः | १४७ -१५८ |
| एतत्फलम् | १५८-१५९ |


### द्वितीयांशस्य


| | |
|---|---|
| दीक्षाप्रशंसाविधिनिरूपणम् | १६० |
| गुरुः कीदृशः कार्यः | १६० |
| गुरुकरणप्रयोजनम् | १६०-१६१ |
| अत्राधिकारिनिरूपणम् | १६१ |
| गर्भाधानादिसंस्काराः | १६१ |
| उपनयनसंस्कारानन्तरं कर्तव्यम् | १६२ |
| वैष्णवदीक्षाधारणे कालादिः | १६२ |
| सात्त्विकानां मनौ श्रद्धोत्पद्यते | १६२ |
| मनुदानेऽनधिकारी | १६२ |
| दीक्षायाः फलम् | १६२-१६३ |
| अधिकारसिद्ध्यर्थं द्वादशाब्दव्रतं कार्यम् | १६३ |
| सितासितादितीर्थस्नानादिकम् | १६३ |
| आचारनिरूपणम् | १६४ |
| आचारपम्पराकथनम् | १६४ |
| पाकस्थानादिशोधनादिकम् | १६४ |
| सौवर्णादिपात्रशोधनप्रकारः | १६४ |
| विभजनपूर्वकं प्रसादो ग्राह्यः | १६४ |
| करशुद्धिरवश्यं कार्या | १६४ |
| पात्रादिक्षालनादिकम् | १६४ |
| पक्वान्नग्रहणविचारः | १६५ |
| संकटे ग्रहणादिविचारः | १६५ |
| सम्बन्धकरणवर्जनविचारः | १६५ |
| क्व वासः कर्त्तव्य इति विचारः | १६५ |
| गुर्वादीनां माननाप्रकारः | १६५ |
| सच्छूद्रः | १६५ |

| | |
|---|---|
| शूद्रकर्म | १६५ |
| शूद्रानीतजलादिवर्जनम् | १६६ |
| शूद्रस्य स्पर्शयोग्यो भागः | १६६ |
| कर्मणि शूद्रादया वर्ज्याः | १६६ |
| रजस्वलाविषयक आचारः | १६६ |
| उत्कृष्टादिशुद्धिः | १६६ |
| ताम्रपात्रादिकं व्यवहारादौ शुचि | १६६ |
| रक्तं वस्त्रमशुचि | १६६ |
| शरीरस्याशुचिभागस्य कीर्तनम् | १६६ |
| स्वर्णादियोजनादिविचारः | १६६ |
| मार्गगमनादिप्रकारवर्णनम् | १६६ |
| सर्वदावश्यकवस्तु धारणादिविचारः | १६६ |
| मौनेन कर्माणि कार्याणि | १६६ |
| मौनाभावे मुखबन्धादिकम् | १६७ |
| वस्त्रवर्ज्यावर्ज्यविचारः | १६७ |
| शिरस्त्राणकञ्चुकादिधारणविचारः | १६७ |
| स्वयंपाकादिकरणविचारः | १६७ |
| वस्त्रशुचित्वादिविचारः | १६७ |
| भूम्यादिशोधनविचारः | १६७ |
| शूद्रगृहे वासनिषेधः | १६७ |
| हीनजातिकूपादेर्जलग्रहणनिषेधः | १६७ |
| अग्निग्रहणाग्रहणविचारः | १६८ |
| दीपोच्छिष्टादिस्पर्शननिषेधः | १६८ |
| सुरालशुनादिसम्बन्धवर्जनादिकम् | १६८ |
| हिक्कादौ शुद्धिकर्तव्यप्रकारः | १६८ |
| सूतकादौ सन्ध्यादिवर्जनम् | १६८ |
| सूतकादौ जलादिवर्जनम् | १६८ |
| वर्ज्यशाकादिनिरूपणम् | १६८ |
| छायाविषयको विचारः | १६८ |
| म्लेच्छदेशोत्पन्नग्राह्याग्राह्यविचारः | १६८ |
| दीपविषयको विचारः | १६९ |
| गात्रपात्रादिविषयको विचारः | १६९ |
| कार्पासादिशुचित्वविचारः | १६९ |
| भोजनादिकं गोप्यम् | १६९ |
| आचारवर्णनम् | १७० |
| गुर्वादिनाम पर्यायेण ग्राह्यम् | १७० |
| तन्निन्दाश्रवणादि न कार्यम् | १७० |
| गुरौ तत्पुत्रादिषु च व्यवहारविचारः | १७० |
| उच्छिष्टादिविचारः | १७० |
| गुरुपुत्रसम्भाषणविचारः | १७० |
| गुरुसम्बन्धिविचारः | १७०-१७१ |
| भयतो निवृत्तेरुपायः | १७१ |
| हर्युदासीनताकारणम् | १७१ |
| दोषवर्जनप्रयोजनम् | १७१ |
| दोषादिलक्षणम् | १७१ |
| धर्मादिषु पुरुषार्थेषु धर्मः कारणम् | १७१ |
| क्षालनादिविचारः | १७१ |
| तीर्थादिः शुद्धिविचारः | १७२ |
| पात्रसम्बन्धी विचारः | १७२ |
| अशुचिकर्तव्याकर्तव्यविचारः | १७२ |
| महानसादिशोधनादिविचारः | १७२ |
| नखादिनिकृत्त्यादिविचारः | १७२ |
| केशश्मश्रुवापविचारः | १७२ |
| विधवाचारः | १७२-१७३ |
| क्षौरादिविचारः | १७३ |
| पात्रादिशुचित्वाशुचित्वविचारः | १७३ |

मार्जारादिभुक्तान्नादिविचारः १७३
शुद्धिद्वैविध्यादिकम् १७४
विशेषाचारवर्णनम् १७५
दीक्षितादिकृतपीताम्बरादिधारणविचारः १७५
विद्धादिव्रतादिविचारः १७५
महोत्सवादिकर्त्तव्याङ्गविचारः १७५-१७६
चित्रमूर्त्यादिभजनविचारः १७६
मूर्त्यादिशुद्ध्यादिविचारः १७६-१७७
देवस्वग्रहणादिविचारः १७७
अवैदिकादिदेवभजननिषेधः १७७
कुलदेवादिसम्मानविचारः १७७
जपयोग्यकालः १७७
जपफलम् १७७
परिचर्यादिवर्णनम् १७८
आह्निकप्रशंसा १७८
ब्रह्मरात्रिलक्षणम् १७८
तत्र कर्तव्यम् १७८
हरिस्तवनानन्तरं कर्तव्यम् १७८
मुखमार्जनादिकम् १७८
गुरुस्मरणादिकम् १७९
वृन्दावनस्थनन्दनन्दनादि-
स्मरणम् १७९-१८१
अथवा बाललीलास्थहरिध्यानम् १८१
चतुर्भद्रपुरादिध्यानम् १८१-१८३
मलोत्सर्गादिकर्तव्यविचारः १८३-१८४
अनेकस्नानप्रकारः १८४
दन्तकाष्ठादिविचारः १८४-१८५
स्नानादिप्रकारः १८५
ऊर्ध्वपुण्ड्रादिधारणम् १८५-१८६
स्नानादितो जातशुद्धेर्विचारः १८६
ततः सन्ध्यादिकरणम् १८६
भगवत्सेवावर्णनम् १८७
मन्दिरगमनादिप्रकारः १८७
नन्दालयादिभावनपूर्विका प्रार्थना १८७
हरेस्तत्तत्पीठनयनपूर्वकं
पूजनादिकम् १८७-१८८
स्त्रीकर्तृकपाकप्रकारः १८८
हरयेऽर्पणपूर्वकमलङ्कार-
समर्पणम् १८८-१९०
श्रीभोगमूर्तिस्नानादिकम् १९०
ततो मण्डलादिकरणम् १९०-१९१
स्वभोजनादिप्रकारः १९१
परिवेषकादिविचारः १९१-१९२
पात्रादिशोधनविचारः १९२
भोजनानन्तरं कृत्यम् १९२-१९३
सायंशौचादिकम् १९३
स्त्रीसाधारणधर्मवर्णनम् १९४
स्त्रियाः प्रात प्रभृत्याचारः १९४-१९५
विधवास्त्रीकृत्यविचारः १९५-१९६
तत्कृततत्तद्धरिकृत्यफलम् १९६-१९८
श्रीमद्भागवतशास्त्रपाठनफलम् १९८
स्त्रीणां गुरुविचारः १९८
देवालयादिदर्शने कर्तव्यविचारः १९८-१९९
अर्चावतारादिषु कर्तव्यविचारः १९९
हरिनामग्रहणादिकम् १९९
वैष्णवाश्रमधर्मवर्णनम् २००

प्रवासे कर्त्तव्यविचारः २००
निवासे योग्यदेशविचारः २००
व्रात्य-शूद्रकर्त्तव्यकृत्यम् २००-२०१
वासयोग्यो देशः २०१
अन्यद्वैष्णवाश्रमकृत्यम् २०१-२०२
ब्राह्मणादिकानां जीविका २०२
नृपकृत्यम् २०२-२०३
प्रायश्चित्तधर्मवर्णनम् २०४
वैष्णवधर्मप्रशंसा २०४
जीवादीनामासुरत्वम् २०४
तन्मोक्षामोक्षविचारः २०४
हर्यादिसेवाधकरणे पशुत्वादिप्राप्तिः २०४
तन्मोक्षोपायः २०४-२०५
क्षुद्रापराधे प्रायश्चित्तम् २०५
वर्ज्यपदार्थकीर्तनम् २०५
प्रायश्चित्तकरणाभावेऽसुरादिभावप्राप्तिः २०५
तत्तदपराधे प्रायश्चित्तविधानम् २०५-२०७

## तृतीयांशस्य

विष्णोः प्रियविभूतिमाहात्म्यम् २०८
नारायणस्वरूपनिरूपणम् २०८
स लीलाशक्तिमुत्पादितवान् २०८
स द्विधा बभूव २०८
वासुदेवादिव्यूहकीर्तनम् २०८
सगुणः स मायाक्षरं सृष्टवान् २०८
तत उत्पन्नजगद्वर्णनम् २०९
अन्यदेवानां तत्स्वरूपत्वम् २०९-२१०
शैवशास्त्रादौ नारायणी शक्तिरेव भिन्नभिन्नरूपेण प्रतिपादिता २१०
पुरुषोत्तमस्य सर्वतो वरत्वम् २१०
अक्षरशब्दनिर्वचनम् २१०
अक्षरता नारायणस्यैव २१०
विष्ण्वादेर्विशुद्धसत्त्वादिकत्वम् २१०
सात्त्विकादिशास्त्रस्थितदेवताकीर्तनम् २१०
सात्त्विकादिकल्पादौ ब्रह्मादिवर्णनम् २११
शिवादितः सृष्ट्यादिप्रादुर्भाववर्णनम् २११
मुक्तेर्यथार्थस्वरूपवर्णनम् २११
मुक्तेः कारणम् २११
विष्णुमाहात्म्यवर्णनम् २१२
हरितोषणे वैष्णवधर्मः कारणम् २१२
हरिरेवाश्रयणीयः २१२
जीवानां स्वाभाविकस्वरूपम् २१२
शङ्करादयोऽपि नारायणमाश्रयन्ति २१२
शङ्करेण सर्वमपि श्रेष्ठत्वं नारायणतः प्राप्तम् २१२-२१४
हरेरन्यमाहात्म्यवर्णनम् २१४
सर्वफलावाप्तये वैष्णवधर्म एवोपायभूतः २१४
हरिरेव जीवानामात्मादिकम् २१४
श्रुत्युक्तो धर्मः श्रेयस्कृत् २१४
वैष्णवधर्मप्रशंसा २१४-२१५
विष्णुप्रियवस्तुधारणवर्णनम् २१६
तत्र मालासम्बन्धिविचारः २१६
मालाधारणमन्त्रः २१६
पादावनेजनग्रहणम् २१६

| | |
|---|---|
| तन्मन्त्रः | २१६-२१७ |
| पुण्ड्रधारणम् | २१७ |
| गोपीचन्दनधारणमन्त्रः | २१७ |
| प्रसादग्रहणम् | २१७ |
| वैष्णवनामादिधारणम् | २१७ |
| वैष्णवदीक्षाप्रशंसा | २१७ |
| तद्धारणकालः | २१७ |
| सद्गुरोः प्रपत्तितः परम्परया जीवन्मुक्तिलाभकीर्तनम् | २१७-२१८ |
| तुलसीकाष्ठमालामाहात्म्यम् | २१९ |
| तुलसीमाला नित्यं धार्येत्याथर्वणश्रुतिः | २१९ |
| स्नानादौ तुलसीमाला-धारिणोऽधिकारः | २१९-२२० |
| श्राद्धे तुलसीमालाधारिभोजने फलम् | २२० |
| श्राद्धे वैष्णवब्राह्मणप्रशंसा | २२० |
| पितृस्थाने वैष्णवविप्रस्थापनम् | २२० |
| देवादीनां हर्यादिभक्तिरस्तीति वर्णनम् | २२० |
| देवादौ सात्त्विक्यादिभक्तेः स्थितिः | २२१ |
| हरिभजनाद् दैवमतिप्राप्तिः | २२१ |
| पुरुषादिभिः पुरुषादिः पूज्यः | २२१ |
| पुरुषादिशब्दार्थः | २२१ |
| तुलसीमालाधारणात् सर्व-पातकनिवृत्तिः | २२१ |
| तुलसीनामानि | २२१ |
| गोलोकादौ तस्या वृन्दादिनाम्ना स्थितिः | २२१ |
| तुलसीनामनिर्वचनम् | २२१ |
| मालाशब्दनिर्वचनम् | २२१ |
| तुलस्युत्पत्तिकालबोधनम् | २२२ |
| विशेषतस्तुलसीमाहात्म्यम् | २२२ |
| तुलस्या अल्पप्रचारकारणम् | २२२ |
| तुलसीधारणमाहात्म्यम् | २२२-२२३ |
| शैवादिभी रुद्राक्षादियुता धार्या | २२३-२२४ |
| मुन्यादिभिर्मञ्जर्यादिमाला धार्या | २२४ |
| कृतादिभेदेन तुलसीमञ्जर्यादि-मालाभेदः | २२४ |
| मञ्जरीदामादिधारणदेशः | २२४ |
| मञ्जरीदामादिधारणकालः | २२४ |
| सूर्याद्यर्चनादावपि तुलसीमाला धार्या | २२४ |
| मालाधारणमात्रतः सर्वं संभवति | २२४-२२५ |
| तुलसीकाष्ठधारणे सर्वेषामधिकारः | २२५ |
| तुलसीमालातिरिक्ता माला न धार्या | २२५ |
| अत्र विषये कुतार्किकाणां नरके गतिः | २२६ |
| तुलसीमालात्रोटनादौ दोषः | २२६ |
| तुलसीधारणस्थानादिबोधनपूर्वकं तन्माहात्म्यम् | २२७ |
| कण्ठादिषु तुलसीधारणे विष्णुतुल्यत्वम् | २२७ |
| सहस्रैकमणिकधारणे विष्णुतुल्यत्वम् | २२७ |
| तुलसीस्रग्धारणस्यान्यः प्रकारः | २२७ |
| मालासु तुलसीमाला श्रेष्ठा | २२८ |
| मालानां पञ्चविधत्वम् | २२८ |
| तासामुत्पादकपदार्थाः | २२८ |
| का माला कदा कुत्र धार्येति विचारः | २२८ |

मालादानफलम् २२८-२२९
कार्तिके विशेषतस्तुलसी पूज्या २२९
अज्ञानादितस्तदधारणे संप्रार्थ्य सा धार्या २२९
फलजा मालास्तासां फलञ्च २२९
प्राणिजा माला २२९
करमालैव वैदिकी सहजा च २२९
तुलसीमालामाहात्म्यम् २२९
वटुप्रभृतीनां ब्रह्मद्रुजादिदण्डादिकम् २२९
पुनश्च तुलसीमाहात्म्यम् २२९-२३०
तुलस्यास्त्रैविध्यम् २३०
तासां धारणयोग्यकर्मवर्णनम् २३०
मालत्यादयो विष्णुप्रियाः २३०
कृष्णतुलसीप्रादुर्भाववर्णनम् २३०
तत्प्रशंसनम् २३१
अन्याया धारणनिमित्तम् २३१
मृत्युकालादाववश्यधारणविधान-पूर्वकतत्प्रशंसनम् २३१
मूत्रोत्सर्गादौ तत्स्थापनप्रकारः २३१
तुलसीकाष्ठसंसर्गात्पुण्डरीको व्याधो वैकुण्ठं गतः २३१-२३२
तद्धारणादिफलानि २३२
सुवर्णयुक्ततुलसीधारणे मुक्तिः २३२
एतद्धारणे फलान्तराणि २३३
वैष्णवमुद्राधारणगौरवम् २३४
मुद्रापञ्चकम् २३४
शीतलातापिताभेदेन मुद्राद्वैविध्यम् २३४
श्रौतनिष्ठवैष्णवेन शीतला धार्या २३४
श्रौततन्त्रनिष्ठस्य तापिता २३४
शीतलमुद्राद्वैविध्यम् २३४
माथुरमण्डलमृत्स्नामाहात्म्यम् २३४
स्थानशास्त्रभेदेन तापो द्विविधः २३४-२३५
निषेधकवचनानां गतिः २३५
शङ्खचक्राङ्कने फलानि २३५
गृहोपकरणं शङ्खचक्राभ्यां मुद्रयेत् २३५-२३६
ऊर्ध्वपुण्ड्रमाहात्म्यवर्णनम् २३७
श्रौतभस्मनोर्ध्वपुण्ड्रः कर्तव्य इति तैत्तिरीया आहुः २३७
श्रौतक्रियाङ्गमूर्ध्वपुण्ड्रः २३७
ब्राह्मणादेरूर्ध्वपुण्ड्रः २३७
पञ्चवर्षतो गर्भतो वोर्ध्वपुण्ड्रो धार्यः २३७
स पितृस्थानस्थितब्राह्मणैर्धार्यः २३७
ऊर्ध्वपुण्ड्रत्यागिनं राजा राष्ट्रतो बहिः कुर्यात् २३८
पुण्ड्रादेः सात्त्विकादिना भेदः २३८
ऊर्ध्वपुण्ड्रधरमाहात्म्यम् २३८
ऊर्ध्वपुण्ड्रस्त्रिपुण्ड्रैः सह न धार्यः २३८
एक एव पुण्ड्रो धार्यः २३८
ऊर्ध्वपुण्ड्रधारणप्रकारः २३९
सर्वकर्मण्यूर्ध्वपुण्ड्रो धार्यः २३९
चरणोदकमाहात्म्यम् २४०
पादोदकमाहात्म्यम् २४०
पात्रेण तीर्थं पिबेत् २४०
पुनः पादोदकमाहात्म्यम् २४०-२४१
पादोदकालाभे न भोक्तव्यम् २४१

विधवादिभिरपि पादोदकं पेयम् २४१
श्राद्धादिषु पादोदकं प्रयोक्तव्यम् २४२
विष्णुतीर्थाभावे तीर्थमृत्स्ना प्रशस्ता २४२
प्रसादमाहात्म्यम् २४३
प्रसादादिनिरूपणम् २४३
प्रसादग्रहणकालः २४३
विभज्यैव नैवेद्यो ग्राह्यः २४३
देवस्वत्वावधिः २४३
तुलसीमिश्रं प्रसादं नियुञ्जीत २४३
प्रसादसम्बन्धिविचारः २४३-२४४
अवैदिकदेवप्रसादो मद्यादितुल्यः २४४
विष्णोरनर्पितभोजने प्रायश्चित्तम् २४५
हरिभुक्तप्रसादेन श्राद्धादि कुर्यात् २४५
अविभज्य प्रसादग्रहणे नारदेन
शापः प्राप्तः २४५
शुद्ध्यपराधवर्णनाध्यायः २४६
गुरोः कृपया शुद्धिः २४६
पादशुद्धेः कारणानि २४६
करादिशुद्धेः कारणम् २४६-२४७
हरेः सेवया बाह्या शुद्धिर्भावनाभि-
श्चान्तरा शुद्धिः २४७
भावनासम्बन्धिविचारः २४७
अपराधवर्णनम् २४७-२५१
दोषेषु सकृदासक्तत्वे प्रतिकृतिं कुर्यात् २५१
केशवतोषवर्णनाध्यायः २५२
केशवप्रसादः श्रूयतामिति प्रतिज्ञा २५२
स्वधर्माचरणादिभिः केशवस्तुष्यतीति
विस्तरेण प्रतिपादनम् २५२-२५६
केशवसन्तोषकारणम् २५६
हरेः प्रीणनाधिकारिविशेषणानि २५६
तत्तोषणं भक्तेः सर्वस्वम् २५६
संहिताभ्यसने फलम् २५७
तीर्थादिषु संहितापठने फलम् २५७
संहिताप्रशंसा २५७
श्रीकृष्णनाममाहात्म्यबोधनपूर्वकं
शास्त्रप्रादुर्भावबोधनम् २५७
शास्त्रमाहात्म्यम् २५७
अनन्तदययैवात्र रुचिर्भवेत् २५७
सदा शास्त्रमभ्यसनीयमिति कथनम् २५८
अत्र निरूपितविषयकीर्तनम् २५८

## चतुर्थांशस्य

गुरुप्रभावनिरूपणाध्यायः २५९
आहारशुद्ध्यादितः परमात्मनः
प्राप्तौ परम्परा २५९
आचार्यसद्भक्तिकथने प्रश्नः २५९
आचार्येण विना किमपि न लभ्यते २५९
परमात्मनो द्वैविध्यमादेशिकः २५९
शब्दमूर्त्तिरर्थमूर्त्तिः परमात्मा २५९
ऋषिप्रशंसापूर्वकमात्मस्वरूपस्य
विस्तरेण वर्णनम् २५९-२६०
स रमणेच्छया भागान्कृतवान् २६०
लीलासृष्टिः प्रथमतो जाता २६०
छाया मायास्वरूपेण जाता २६०
कालादिप्रादुर्भावः २६०
कालादेः स्वरूपम् २६०

जगदुत्पत्तिकारणम् २६०
इच्छादेः स्वरूपम् २६१
प्रधानादितो महदादेरुत्पत्तिः २६१
ब्रह्माण्डस्वरूपम् २६१
अनन्तब्रह्माण्डानामुत्पत्त्यादिकम् २६१-२६२
शेषवैकुण्ठादिकं पातालादिकेषु वर्तते २६२
देवदेवा उत्तरं न जानन्ति २६२
देवादयः श्रेयःप्राप्त्यै तपोऽकुर्वन् २६२
ततो ब्रह्मादयो वरं दातुमागताः २६२
दानवादिभिः शङ्करादितो वराःप्राप्ताः २६२
दर्शनकाङ्क्षिभिर्न वराः स्वीकृताः २६२
परमात्मना दर्शनं प्रतिज्ञातम् २६२
सर्वश्रेयसे हरिराचार्यरूपं जगृहे २६२
जनानुग्रहार्थमाचार्यो बहुधा जातः २६३
हरिराचार्यादिरूपेण चतुर्धा जातः २६३
आचार्यादीनां स्वरूपवर्णनम् २६३
आचार्यादिष्वेकतममाश्रयेत् २६३
गुरुविशेषनिरूपणाध्यायः २६४
गुरुपूजनेऽधिकारिनिरूपणम् २६४
गर्भाधानादिसंस्कारप्रयोजनम् २६४
हर्यादिभक्तितः सद्यः शुद्धिः २६४
दीक्षायाश्चातुर्विध्यम् २६४
संक्षेपतस्तत्स्वरूपम् २६४
हरिभावनादिभिः कर्तव्यम् २६४-२६५
साम्प्रदायिकाचार्यलक्षणम् २६५
दैवताचार्य-ऋष्याचार्यवर्णनम् २६५
गुरुस्वरूपम् २६५
गुरूणामनेकस्वरूपत्वम् २६५
तेषां माननाप्रकारः २६५
स्त्र्यादिभिः पत्यादिरेव माननीयः २६५
गुर्वपमाने पातकित्वम् २६६
गुरोरप्यवलिप्तस्य त्यागः २६६
गुरुद्रोहे दोषः २६६
गुरुमाहात्म्यम् २६६
गुरुभक्तितः प्रारब्धनाशे प्रह्लाद
उदाहरणम् २६६
धर्मश्रद्धातो हुताशनभक्तिपरम्परया
हरौ भक्तिर्भवति २६६-२६७
भक्तिमार्गादीनां मूलं नारायण एव २६७
गुणसामान्यभक्तिनिरूपणम् २६८
आचार्यादिर्ब्रह्मादेर्मूर्तिः २६८
कर्तव्यगुरुवर्णनम् २६८
आचार्यादिस्वरूपम् २६८
आचार्यादिदर्शने कर्तव्यम् २६८
अष्टाङ्गप्रणामलक्षणम् २६८
ब्राह्मणादिभिर्नमस्करणे वक्तव्यं बीजम् २६९
गुरुप्रार्थनम् २६९
शास्त्रभेदात्प्रणामभेदः २६९
अर्होऽनर्हं न नमेत् २६९
देवतासन्निधौ गुरुरपि न प्रणम्यः २६९
गुरुपूजनाभाव इन्द्रद्युम्नो
जन्तुत्वं प्राप्तः २६९
गुरुसमीपे कर्तव्यप्रकारः २६९-२७०
गुर्वादिसमीपे पञ्चकच्छादिर्भवेत् २७०
गुरुसम्बन्ध्याचारः २७०-२७१
दम्पत्योरेकगुरुता न दोषावहा २७१

अस्या अनेकप्रकारैः समर्थनम् २७१-२७२
गुरोर्नवधाभक्तिनिरूपणम् २७३
तत्र नवधाभक्तिस्वरूपम् २७३
न तस्य प्रतिमेति वचनस्याभि-
प्रायवर्णनम् २७३
एतत्समर्थनम् २७३
पादसेवनादिस्वरूपम् २७४
सिद्ध्यर्थं मन्त्रद्वयप्रदानम् २७४
मन्त्रस्वरूपम् २७४
तत्प्रयोजनञ्च २७४
अनेकमन्त्रपदोच्चारण-
रीत्यादिकम् २७४-२७५
आचार्यभक्तेः फलम् २७५
ब्राह्मणादिभिरप्याचार्यसेवनं विधेयम् २७५
गुरुसकुल्यादयोऽपि माननीयाः २७५
राजापि पूज्यः २७६
तद्भिन्नभिन्नस्वरूपम् २७६
गुरोरनेकरूपत्वम् २७६
सामन्तादितो गुरुश्रेष्ठत्व-
प्रतिपादनम् २७६
गुरुमाहात्म्यवर्णनम् २७६
गुरुद्रोहादिकरणे प्राप्यस्वरूप-
कथनम् २७६-२७७
गुरुमाहात्म्यवर्णनम् २७७
सम्प्रदायः सर्वत्रानुसर्तव्यः २७७
मन्त्रादेर्न्यासादिराहित्येऽपि सफलत्वम् २७७
स्त्रियोऽपि मन्त्रदानेऽधिकारिण्यः २७७
मन्त्रप्रशंसा २७८
आनुलोम्येन गुरुशिष्यताद्यस्ति २७८
गुरुपूजापदनिरूपणम् २७९
आचार्यभक्तेःश्रवणादिप्रकारकीर्तनम् २७९
आचार्यषोडशपूजापदकीर्तनम् २७९
भक्तेनाचार्य एव पूज्यः २७९
एकलव्य आचार्यमूर्तिं संपूज्य
सिद्धिं प्राप्तः २७९
षोडशपूजापदकीर्तनम् २७९
आचार्यस्वरूपध्यानम् २८०
गुरुध्यानम् २८०
स्वकर्मलोपभीत्या तत्पादुकापूजनम् २८०
गुरुभक्तिप्रशंसा २८०
पादुकास्वरूपवर्णनम् २८०
गृहिप्रभृतीनां शयनादीनां पूजनम् २८०
आदेशिकस्य पीठस्य
चातुर्विध्यम् २८०
राजपीठलक्षणम् २८०
विशां राजपीठम् २८०-२८१
देवपीठलक्षणम् २८१
यन्त्रपीठस्वरूपम् २८१
मन्त्रपीठलक्षणादिकम् २८१
आसनभेदास्तदधिकारिणश्च २८१
स्वदारादिभिः शयनादि पूज्यम् २८१
आगमनपूजाधिकारी २८२
पूज्यापूज्यशिष्यादिविचारः २८२
प्रातिलोम्ये शिष्यता नास्ति २८२
वैदिके मन्त्रे ब्राह्मण एव गुरुः २८२
भागवते धर्मेऽन्योऽपि २८२

मोक्षभागवतशास्त्रकर्तृकीर्तनम् २८२

पूजोपदेशनिरूपणाध्यायः २८३

गुरुः शिष्यश्रद्धानुरूपं फलं ददाति २८३

गुरुवत्तत्पत्न्यादिषु पूजनं कुर्यात् २८३

गुर्वादीनां पादुकादिकं पूजनीयम् २८३

असंपूज्य न भुञ्जीत २८३

गुरुचरणस्वरूपम् २८३-२८४

गुरुपादुकापूजनकारणम् २८४

गुरुभक्तिरतस्तुतिः २८४

भृतकाध्यापने गुरुशिष्यता नास्ति २८४

दक्षिणया विद्यार्पणे दृष्टान्तः २८४

देवस्य दक्षिणभागे पादुकापूजनम् २८४

आत्मपात्रादिकानां सङ्करं न कुर्यात् २८४

चित्रादिपूजने विशेषः २८४-२८५

वाहनादिपूजने विशेषः २८५

गुरुपूजाकालादिकम् २८५

तत्पूजाफलम् २८५-२८६

गुरुकृपातः मन्त्रादिः सिद्ध्यति २८६

पूजापटलाध्यायः २८७

पूजारम्भकालादिकम् २८७

पञ्च गुरवः २८७

तेषां स्वरूपम् २८७

गुरुपूजाप्रकारे मन्त्रादिकञ्च २८७-२८८

गन्धादिभिस्तत्पूजा २८८-२८९

पञ्चधाप्रपत्तिस्वरूपम् २८९

परिकरस्वरूपनिरूपणम् २९०

राज्ञः पूज्यस्वरूपवर्णनम् २९०

राजकर्तव्यविचारः २९०

सम्राजासनस्थगुरुमाननादिकम् २९०

राजपदार्हगुरुस्वरूपादिकम् २९०-२९१

कामादयो महादोषाः २९१

पीठस्य स्वरूपं वेदादिभिर्भावयेत् २९१-२९२

तप आद्येव पञ्चपर्वाविद्या २९२

चार्वाकादयो मौढ्यविद्याध्वरूपिणः २९२

पाखण्डशब्दनिर्वचनम् २९२

धर्मिष्ठादिलक्षणलक्षितमाचार्यं
राजा मानयेत् २९२

तथा पाषण्डनिवारणं कुर्यात् २९२

बर्ज्यशिष्यलक्षणम् २९२

छात्रादिशब्दनिर्वचनम् २९३

शिष्यादेः कर्तव्यम् २९३

शिष्यादेरधरारण्यादिरूपकम् २९३

उपदेशेऽधिकारिवर्णनम् २९३

उपनीतोपदेशनाध्यायः २९४

अतीतसंस्कारकथनप्रतिज्ञा २९४

आचार्येण गर्भाधानादिसंस्काराः
कर्तव्याः २९४

विप्रादीनां गायत्र्यादिकम् २९४

अत्र शाण्डिल्यस्य स्वकीयं मतम् २९४-२९५

ब्राह्मणादीनां ब्रह्मगायत्र्यादिकम् २९५

एतत्संस्कारादिविषये विशेषः २९५

विष्वक्सेनादिपूजनादिकम् २९५-२९६

गुर्वादिभक्त्या द्वितीया जातिः २९६

मन्त्रग्रहणकालादिकम् २९६

मन्त्रोपदेशाध्यायः २९७

मन्त्रादौ भावनाय सिद्धयः २९७

| | |
|---|---|
| भेदो वास्तवो नास्ति | २९७ |
| अस्यैवोपपादनम् | २९७-२९८ |
| भ्रमकारणम् | २९८ |
| अत्र वास्तविकं मतम् | २९८ |
| तवास्मीति महामन्त्रो दासभावनया सख्यं तादात्म्यं च प्रयच्छति | २९८ |
| अस्मिन् मन्त्रे ऋष्यादिनियमो नास्ति | २९८ |
| गोपालमन्त्रसम्बन्धी विचारः | २९९ |
| सर्वापेक्षयायं मन्त्रराजः श्रेष्ठः | २९९-३०० |
| वैदिकागममन्त्रयोर्लक्षणम् | ३०० |
| अनेकमन्त्रस्वरूपादिकम् | ३०० |
| न्यासपुष्कलत्वे फलपौष्कल्यम् | ३०१ |
| जपप्रशंसा | ३०१ |
| देवस्वग्रहणविचारः | ३०१-३०२ |
| सांप्रदायिकस्तोत्रनिरूपणाध्यायः | ३०३ |
| श्रीपुरुषोत्तमस्तोत्रम् | ३०३ |
| श्रीनारायणस्तोत्रम् | ३०४ |
| श्रीशेषस्तोत्रम् | ३०४-३०६ |
| श्रीत्रिपुरारिस्तोत्रम् | ३०६-३०७ |
| श्रीनारदस्तोत्रम् | ३०८ |
| श्रीव्यासस्तोत्रम् | ३०८-३१० |
| पीठस्तोत्रं पीठविचारश्च | ३१०-३१३ |
| आचार्याभिषेकनिरूपणम् | ३१४ |
| कलशसंस्कारादिकम् | ३१४ |
| तत्र स्थानादिविचारः | ३१४-३१५ |
| तत्र मण्डपप्रकारः | ३१५ |
| तत्र कर्तव्यविधिप्रकारः | ३१५ |
| अभिषेकप्रकारः | ३१५-३१६ |
| तदनन्तरं कर्तव्यम् | ३१६-३१७ |
| अत्र किञ्चिद्वैकल्पिककृत्यम् | ३१७ |
| आचार्यस्वरूपादिकम् | ३१७-३१८ |
| पूर्वयुगव्यवस्थावर्णनम् | ३१९ |
| ब्रह्मैव जगद्रूपेण जातम् | ३१९ |
| सच्चिदानन्दस्यासदादिरूपेण परिणामे शङ्का | ३१९ |
| अस्याः खण्डनम् | ३१९ |
| परिणामस्य द्वैविध्यम् | ३१९ |
| एतस्योपपादनम् | ३२० |
| विवर्तविचारः | ३२० |
| ब्रह्मण उत्पत्त्यादिकम् | ३२० |
| हर्यवतारैस्तस्य द्वादश मासाः | ३२० |
| अवतारनामानि | ३२० |
| ब्रह्मणो मासादिवर्णनम् | ३२०-३२१ |
| ब्रह्मकल्पादिवर्णनम् | ३२१ |
| प्रकृतः श्वेतः कल्पः | ३२१ |
| सात्त्विकादिकल्पादिकम् | ३२१ |
| तेषां स्वरूपादिकम् | ३२१-३२२ |
| मन्वन्तरस्वरूपम् | ३२२ |
| आदिसृष्टिस्थजनादिस्वरूपम् | ३२२ |
| अपरकृतयुगस्वरूपादिकम् | ३२२ |
| पूर्वत्रेतावर्णनम् | ३२२ |
| अपरत्रेतायुगवर्णनम् | ३२३ |
| प्रथमद्वापरस्वरूपम् | ३२३ |
| अन्यद्वापरयुगस्वरूपादिकम् | ३२३ |
| प्रथमतिष्यवर्णनम् | ३२३-३२४ |
| अपरतिष्यवर्णनम् | ३२४ |

| | |
|---|---|
| आदिकल्पस्थसत्यादिस्वरूपम् | ३२४ |
| कलिप्रादुर्भावकालवर्णनम् | ३२४ |
| भारतयुद्धकालः | ३२४ |
| यादवसंहारकालः | ३२४ |
| कलिप्रारम्भतिथ्यादिकम् | ३२५ |
| कलिवर्ज्यावर्ज्यधर्मनिरूपणम् | ३२६ |
| कलौ हर्यादिस्थितिकालः | ३२६ |
| ग्रामदेवतास्थितिकालः | ३२६-३२७ |
| बुद्धावतारकार्यस्वरूपम् | ३२७ |
| विष्णुस्वाम्यवतार-कार्यस्वरूपम् | ३२७-३२८ |
| जनमेजययज्ञान्ते मिलितर्षिभिः कलिधर्मो निरूपितः | ३२८ |
| कलौ वर्ज्यावर्ज्यविचारः | ३२८-३२९ |
| सगोत्राविवाहविचारः | ३२९ |
| दुर्बलात्मनां गङ्गादिकं दूरात्पापशोधकम् | ३३० |
| आचारः कुत्र कःपालनीय इत्यादिनिरूपणम् | ३३० |
| वपनादिपदार्थनिर्वचनम् | ३३० |
| केशादिस्वरूपम् | ३३० |
| ब्राह्मणादेः कच्छसङ्ख्यादिकम् | ३३० |
| तस्य पुण्ड्रादिसङ्ख्या | ३३०-३३१ |
| कुटीचकादिसंन्यासविचारः | ३३१ |
| शिखासूत्रादिरहितसंन्यासाद्यधिकारी | ३३१ |
| वैदिकमन्त्राधिकारी | ३३१ |
| ब्रह्मचर्यादिकालविचारः | ३३१ |
| सहगमनादिविचारः | ३३१ |
| भविष्यदाचार्यनिरूपणम् | ३३२ |
| शाक्यसिंहवर्णनम् | ३३२ |
| तस्यैव महाबुद्धत्वम् | ३३२ |
| अशोकादिप्रभावः | ३३२-३३३ |
| व्यासशिष्यशुकस्वाम्यादिवर्णनम् | ३३३ |
| कुण्यादिभिः स्वातन्त्र्येणागमाः प्रकटिताः | ३३३ |
| पातञ्जलादिमिश्रं वेदान्तदर्शनं तदा जातम् | ३३३ |
| गौडपादादिर्व्यासदर्शनप्रवक्ता | ३३३ |
| विष्णुशिष्यवर्णनम् | ३३३ |
| देवदर्शनशिष्यान्वये जातो राजस्वामी बौद्धान् निष्कासयिष्यति | ३३४ |
| कुमारावतारः | ३३४ |
| शाक्यपराभवकालः | ३३४ |
| शङ्करावतारस्तत्कार्यं च | ३३४ |
| विष्णुमहामुन्यवतारस्तत्कार्यं च | ३३४ |
| कलिकृतधर्मनाशस्तत्स्वरूपं च | ३३५ |
| वल्लभाचार्यावतारस्तत्कार्यं च | ३३५ |
| संहितामाहात्म्यवर्णनम् | ३३६ |
| संहिताविषयकोपसंहारः | ३३६ |
| हर्यनुगृहीतमाहात्म्यम् | ३३६ |
| हर्याद्यनुग्रहेण भक्तिर्लभ्यते तत्स्वरूपञ्च | ३३६-३३७ |
| आलम्बनमाहात्म्यम् | ३३७ |
| शाण्डिल्यकृतोपसंहारः | ३३७ |
| ऋषिकृतप्रशंसनं शाण्डिल्यगमनञ्च | ३३७ |

कौण्डिन्यस्य पीठे स्थापनम् ३३७
संहितापाठादिविषय ऋषिप्रश्नः ३३८
मन्त्ररूपशाण्डिल्यवर्णनम् ३३८
वेदशाण्डिल्यवर्णनम् ३३८
गार्धभिशाण्डिल्यवर्णनम् ३३८
प्रकृतमहर्षिशाण्डिल्यवर्णनम् ३३८
संहितास्वरूपम् ३३८-३३९
संहितायाः संक्षेपतो विषयप्रदर्शनम् ३३९
अस्याः खण्डादिवर्णनम् ३३९
संहितामाहात्म्यम् ३३९
संहिताश्रवणादिप्रकारः ३३९
संहितापूजनमाहात्म्यम् ३४०
कृष्णस्तवनपूर्वकसंहितामाहात्म्य-
कीर्तनसमापनम् ३४०

॥श्री १०८ भैरवाय नमः॥

महर्षिश्रीशाण्डिल्यकृता

# शाण्डिल्यसंहिता

❁ ❁ ❁

## (तत्र पञ्चमे हरिभक्तिखण्डे)

## ॥अथ प्रथमोऽध्यायः॥

ऋषय ऊचुः —

भगवन् भवताऽस्मभ्यं पुरुषार्थचतुष्टयम्।
धर्मार्थकाममोक्षाख्यैः खण्डैरुक्तं विभागशः॥ १ ॥
धर्मोऽत्र त्रिविधः प्रोक्त आचारन्यायनिष्कृतैः।
कालतो देशतः शक्त्या भेदस्तत्राप्यनेकधा॥ २ ॥
ततोऽर्थेन यथार्थेन सिद्धेर्द्वितयमीरितम्।
वैदिकी लौकिकी तत्र नीतिर्मन्त्रास्त्वनेकशः॥ ३ ॥
लौकिकैर्वैदिकैश्चापि नामोपासनकर्मभिः।
कामोऽपि कामं गदितो यत्रासक्तिः स्वतो नृणाम्॥ ४ ॥
वैराग्यं साङ्ख्ययोगाद्यैर्ज्ञानकाण्डं समीरितम्।
ब्रह्मात्मभावना येन जीवः स्वाराज्यमृच्छति॥ ५ ॥
अथ केनाप्युपायेन देशकालानपेक्षया।
सिद्धिः सर्वाधिका येन तन्नः शंसितुमर्हसि॥ ६ ॥
सर्वज्ञोऽसि तपोमूर्तिर्वेदवेदान्ततत्परः।
प्रियोऽसि देवदेवस्य ततः पृच्छामहे प्रभो॥ ७ ॥

श्रीशाण्डिल्य उवाच —

सम्यग्व्यवसिता बुद्धिर्भवतामृषिसत्तमाः।
जगतामुपकारार्थं विज्ञानामपि सर्वतः॥ ८॥
क्षेममात्यन्तिकं विप्रा हरेर्भजनमेव हि।
देशकालानपेक्षात्र साधनाभावमप्युत॥ ९॥
हरिर्देहभृतामात्मा सिद्धः कण्ठमणेरिव।
कः प्रयासो भवेत्तस्य प्रीणने करुणानिधेः॥ १०॥
धर्मार्थकाममोक्षार्थैरेष एवाभिसाध्यते।
यथैव सरितः सर्वाः पर्यासन्नाः सरित्पतिम्॥ ११॥
न जातिर्न तपः शीलं नालं साधनपद्धतिः।
प्रीणनाय मुकुन्दस्य पूर्णकामस्य नित्यशः॥ १२॥
अशक्यो हि कथं धर्मः श्रेयसे प्राणिनां भवेत्।
ततो यतेत धर्मस्यादानायैव च सर्वतः॥ १३॥
बहुकालेन भ्रमतां ब्रह्मादिस्तम्बयोनिषु।
सर्वसम्पत्तिसम्बन्धसम्भवेनाभवत्सुखम्॥ १४॥
ततः पुनः कथं साध्यं पद्भ्यां संरोहणं दिवः।
पराधीनात्मनां तस्माद्धरेश्शरणमाश्रय॥ १५॥
इत्येवं सनकादीनां शासनास्ति महात्मनाम्।
आचारोऽपि सतां मानं सन्दिग्धे वेदवद्भवेत्॥ १६॥
क्रियमाणेऽपि यत्रास्ति परमानन्दसंभृतिः।
को न सेवेत तं धर्मं मतिमान्भक्तिलक्षणम्॥ १७॥
हित्वा चतुर्विधं मोक्षं प्रसादोपचितं हरेः।
शुकादयो महात्मानस्तत एव भजन्ति तम्॥ १८॥

भक्तिः श्रीकृष्णदेवस्य सर्वार्थानामनुत्तमा।
एषा वै चेतसः शुद्धिर्यतः शान्तिर्यतोऽभयम् ॥ १९ ॥
वैराग्यं चापि विज्ञानं यस्या एव वशानुगे।
अत्र प्रसन्नमनसां स्खलनं क्वापि न श्रुतम् ॥ २० ॥
सर्वात्मनाऽनिमित्तैव स्नेहधारानुकारिणी।
वृत्तिः प्रेमपरिष्वक्ता भक्तिर्माहात्म्यबोधजा ॥ २१ ॥
प्रेमप्रमेयतः सिद्धा अनभिज्ञात्मनां क्वचित्।
तथापि तत्स्वरूपेण स्वरूपाविष्कृतिर्मता ॥ २२ ॥
अनेकजन्मसुकृतैर्दैवाधीनैव दृश्यते।
प्रपत्तिश्चरणाम्भोजे केषाञ्चिन्मुरवैरिणः ॥ २३ ॥
वस्तुतस्तु परा भक्तिर्जायते तदनुग्रहात्।
समानकृतिकर्तॄणां कल्प्यः कोऽपि नियामकः ॥ २४ ॥
स्वेच्छस्य कर्तुः कोऽप्यस्ति प्रेरकः किमनुग्रहे।
इत्यादिसंशये प्राज्ञा लीलामेव समूचिरे ॥ २५ ॥
तदर्थमेव सकलमाप्तकामोऽप्यकामयत्।
सैषा भगवतः शक्तिर्विरोधेऽप्यविरोधिनी ॥ २६ ॥
कूटस्थस्याप्यधिष्ठातुर्निर्गुणस्य परात्मनः।
अनन्तस्य स्वतन्त्रस्य स्वरूपावस्थितिः प्रभोः ॥ २७ ॥
ज्ञानेच्छाकृतिभिस्तस्य स्वरूपानन्दजा कृतिः।
द्विविधा रन्तुमनसः सर्वादौ प्रादुरास ह ॥ २८ ॥
वामांशसम्भवा तत्र लीलासृष्टिरनुत्तमा।
क्वाचित्काभवा सृष्टिः सृष्टकार्यभवा परा ॥ २९ ॥

छायामायामयी चान्या त्रेधा भिन्नाप्यनेकधा।
सृष्टीनामेव बाहुल्यात्कृतीनां च फले भिदा॥ ३०॥
तत्राद्या तु कृतार्थैव प्रकटानन्दविग्रहा।
अन्तजा संगता नैव मध्या नियतलक्षणा॥ ३१॥
तस्या विशेषतः प्रोक्तो विधिश्चापि फलोदयः।
आद्यैवाभवदुक्तीनां विषयतां वदाम्यहम् (?)॥ ३२॥
उत्तमः पुरुषः पूर्णो भगवान् भक्तवत्सलः।
आनन्दचिद्घनाकारः श्रीपतिः परमो हरिः॥ ३३॥
ब्रह्मानन्दमये लोके लीलासृष्टौ विराजते।
तस्य वामांशसम्भूताः प्रियाः स्युर्नित्यविग्रहाः॥ ३४॥
रमन्ते नित्यदा लोके स्वेच्छक्रीडामहोत्सवैः।
आधिदैविकरूपैषा मायासम्बन्धवर्जिता॥ ३५॥
अस्य वाध्यात्मरूपेण सृष्टिरन्यापि सम्मता।
तत्रात्मसम्भवानां तु जीवानां क्रीडनक्रिया॥ ३६॥
तेषु सम्भवकालेन येऽस्यानुग्रहमागताः।
प्रपन्नाः शरणं विष्णोः कृत्या ज्ञानेन वा स्वयम्॥ ३७॥
तेषां विस्तारमायातं भक्तिमार्गमनेकधा।
अभियोगेन भवतां वर्णयिष्ये यथामति॥ ३८॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे हरिभक्तिखण्डे प्रथमोऽध्यायः॥१॥

## ॥ अथ द्वितीयोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

ततोऽक्षरात्समुत्पन्ना विष्णुब्रह्ममहेश्वराः ।
स्वयंसिद्धाः कला तस्य पुरुषस्य महात्मनः ॥ १ ॥
तासां प्रकृतयस्तत्र महालक्ष्मीमुखाः श्रियः ।
ससृजुः सकलं विश्वं सुरमानुषराक्षसम् ॥ २ ॥
प्रकृतिर्याऽक्षरब्रह्मविवर्तपरिणामिनी ।
तयाऽसौ स्वात्मकं विश्वं निर्ममे निर्गुणोऽह्यजः ॥ ३ ॥
आकाशादिरभूत्तस्मात्षट्त्रिंशत्तत्त्वसंचयम् ।
आधिदैविकमाध्यात्ममाधिभौतिकमप्युत ॥ ४ ॥
शब्दात्मिका परा मूर्तिरेका रूपात्मिकाऽस्य च ।
नामरूपात्मकं जातं प्रपञ्चब्रह्मसम्मितम् ॥ ५ ॥
नादात्तु प्रणवव्यक्तिस्ततो वेदत्रयी स्फुटा ।
ततो देवत्रयी लोकत्रयी कालत्रयी तथा ॥ ६ ॥
काण्डत्रयं वेदतरोः कृष्णं शोणं सितं श्रुतम् ।
गृध्राश्चापि कपोताश्च हंसास्तेषु समाश्रिताः ॥ ७ ॥
भ्रान्तिः कृतिरवस्थानं तेषामाचरणं स्वतः ।
तादृशं तु फलं तेषां स्वस्वप्रकृतिसम्भवम् ॥ ८ ॥
आदिसृष्टौ समुत्पन्ना विस्फुलिङ्गसमार्चिताः ।
तेषां संसर्गतश्चित्रा सुराणामपि धीरभूत् ॥ ९ ॥
गुणत्रयानुरूपेण वेदभागेन भासुराः ।
दानवा मानवा यस्माद्गीर्वाणा जातयः पृथक् ॥ १० ॥

तत्र सत्त्वं निर्मलत्वाद्वासुदेवप्रकाशकम्।
वैराग्यं च यतो भक्तिर्यतो ज्ञानमनुत्तमम्॥ ११॥
केचित्सत्त्वानुरूपेण कर्मणा जगदीश्वरम्।
भावयन्तो दृढं भक्त्या तोषयन्ति निजं गुरुम्॥ १२॥
मन्त्राश्च ब्राह्मणाश्चापि ऋत्विगाहुतिदेवताः।
सर्वे तदात्मकं ज्ञात्वा कृतं यत्तद्धि वैष्णवम्॥ १३॥
एवं हि क्रियमाणानां ब्राह्मणानां महात्मनाम्।
भगवान्प्रीयते विष्णुः सर्वं विश्वं तदात्मकम्॥ १४॥
अच्युतानन्त गोविन्द नारायण जनार्दन।
विकलं कर्म सकलं स्यादेवं स्मरणाद्धरेः॥ १५॥
अग्निहोत्रादि सोमान्तं हरेरवयवैर्यजन्।
हरिमेवात्मभावेन गृहमेधी तरत्यसौ॥ १६॥
यज्ञो हि भगवान्विष्णुर्यज्ञभुग्यज्ञकृद्धरिः।
यज्ञेन यज्ञमयजन्देवाश्च ऋषयः पुरा॥ १७॥
त्रेतामुखे संप्रवृत्ता त्रयी त्रेताग्निना सह।
तया वै भगवान्यज्ञः श्रेयो लोकस्य निर्ममे॥ १८॥
वर्णाश्रमविभागेन कर्मणां बहुधा गतिः।
सर्वास्ता हरिसात्कृत्वा भवपारं सुरा ययुः॥ १९॥
अहिंसयाप्यदम्भेन सर्वेषां हितकारिणा।
स्ववर्णाश्रमधर्मेण शुद्धं चित्तं विशेद्धरौ॥ २०॥
अथवा निजशक्त्यापि महतामनुकम्पया।
स्वल्पमप्याचरन्धर्मं भवेद्भगवतः प्रियः॥ २१॥
संस्कारैः संस्कृतो देहो भवेत्क्षेत्रीकृतो नृणाम्।
तत्र यत्क्रियते कर्म तत्फलाय प्ररोहति॥ २२॥

पुण्येनाश्रमधर्मेण आन्तरं क्षीयते मलम्।
श्रौतेन शुध्यते तद्धि स्मार्तैर्याति स दिव्यताम् ॥ २३ ॥
तीर्थस्नानैस्तथा दानैः पितृमेधैः सुरार्चनैः।
सर्वेन्द्रियाणां संशुद्धिर्हर्यविशस्तदर्पितैः ॥ २४ ॥
आत्मा विज्ञानभक्तिभ्यां विरक्त्या संप्रकाशते।
एवं जन्मशतैरस्य ब्रह्मभावेत संहृतिः ॥ २५ ॥
न वियन्ति पथं धूमं यदि तन्नार्पयन्ति ते।
कर्मैव कर्मनाशाय यदि भक्त्याऽभिजायते ॥ २६ ॥
यथा हविरजीर्णोऽयं वायुना जरयत्यसौ।
एवं शश्वदभद्रं तद्भवेद्भद्रं हरेर्मतम् ॥ २७ ॥
कर्मणा सिद्धिमापन्नाः पूर्वं स्वायम्भुवादयः।
नियमो न सतो लोके सिद्धिर्नास्मिन्व्यवस्थिता ॥ २८ ॥
समर्थस्य स्वतन्त्रस्य का भवेद्धारणा हरेः।
पापिनं मोचयेत्कापि किं पुनश्चोक्तकारिणम् ॥ २९ ॥
एवं वै कर्म केचित्कृतिनः समुपागताः।
प्रणत्या संयुता चित्ते भक्तिभर्गवतो वरा ॥ ३० ॥
अनिमित्तेन धर्मेण स्वीयेन हरिमेधसा।
भवेत्सालोक्यताऽवाप्तिर्येनासौ सुखमेधते ॥ ३१ ॥
येन केन प्रकारेण कृष्णस्य भजनं हितम्।
तेन संमुच्यते जीवो यदानन्दमयो ह्यसौ ॥ ३२ ॥
एवं परम्परासिद्धिः केषाञ्चिद्दृश्यते स्वतः।
ते तु नानोपचारेण भक्तियोगेन संश्रिताः ॥ ३३ ॥

शुद्धात्मानो जितात्मान उपासन्ते यथाविधि।
केचित्तु वैदिकैर्मन्त्रैरागमोक्तैस्तथोभयैः ॥ ३४ ॥
दीक्षाविधिं गुरोर्लब्ध्वा कृत्वा देहं तदात्मकम्।
श्रद्धया प्रयतो नित्यं समर्चेद्भगवत्पदम् ॥ ३५ ॥
प्राणायामादिभिः शुद्धं धारणादग्धकिल्विषम्।
समर्चन् यदसौ चेतः सुखमत्यन्तमश्नुते ॥ ३६ ॥
प्रातर्ध्यात्वा तथा स्नात्वा निवृत्तः स्वाह्निकादपि।
भूतानि शोध्य प्राणांश्च संस्थाप्यासौ विशुद्ध्यति ॥ ३७ ॥
न्यासैर्नानाविधैस्तस्य भवेत्सर्वात्मभावना।
तयास्यार्चनसंसिद्धिर्भाववृद्धिः समर्चनात् ॥ ३८ ॥
नित्यैर्नैमित्तिकैरस्य व्यावृत्तस्याप्यहर्निशम्।
भवेत्सारूप्यसम्पत्तिर्निवृत्तिर्भवसागरात् ॥ ३९ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे हरिभक्तिखण्डे द्वितीयोऽध्यायः ॥ २ ॥

## ॥ अथ तृतीयोऽध्यायः ॥

**श्रीशाण्डिल्य उवाच –**

अथार्चावसथं तस्य शृण्वन्तु मुनिसत्तमाः।
दिव्यसूरीन् प्रपद्याशु पञ्चधा संस्कृतः स्वयम् ॥ १ ॥
पञ्चार्थवित्पुण्यमूर्तिर्वेदशास्त्रविदग्रणीः।
अमानी मानदः शान्तो मैत्रः करुण आत्मवान् ॥ २ ॥
निस्पृहः सर्वकामेभ्यो विरक्तो निजधर्मकृत्।
शुचिः प्रसन्नो गम्भीरो धीरो विष्णुजनप्रियः ॥ ३ ॥
एवंभूतो महाविष्णोरर्चनं भक्तितश्चरेत्।
स्वयं व्यक्ते तथाऽव्यक्ते स्वरूपे पूजनं भवेत् ॥ ४ ॥
शिलामृद्दारुलोहाद्यैः कृत्वा प्रतिकृतिं विभोः।
श्रौतस्मार्तागमैस्तस्य प्रतिष्ठापनमिष्यते ॥ ५ ॥
यत्र सन्निहितो देवः स्वयमेव सदा भवेत्।
शालग्रामादिसंस्थानं स्वयं व्यक्तं हि तन्मतम् ॥ ६ ॥
चिरन्तनार्चा यत्रास्ति मुनिदेवाभिवन्दिता।
अर्चावताररूपेण तत्र देवो जनार्दनः ॥ ७ ॥
तत्र पूजाप्रवाहोऽपि महतां समयानुगः।
तत्तथैवानुसर्त्तव्यो दूषयंश्च पतत्यसौ ॥ ८ ॥
तीर्थे देवे तथा क्षेत्रे काले देशे च धामनि।
या यथा वर्तते रीतिस्तां तथैवाभिमानयेत् ॥ ९ ॥
ये तत्र देवा भूदेवा यो धर्मः शास्त्रसम्मतः।
ते तथैवानुसर्तव्या इत्याह भगवानजः ॥ १० ॥
नाष्टाङ्गयोगयज्ञाद्यैर्मन्दानां दृक्फलं गतः।
स एवार्चावतारेण याति प्रत्यक्षतां नृणाम् ॥ ११ ॥

चक्षुषो विषयं गत्वा अर्चारूपेण माधवः।
सर्वेषां परमानन्दं धत्ते कल्पतरुर्यथा॥ १२ ॥
पुण्यं भूमितले यस्मिन्वर्षे पुण्यतरे पुनः।
व्यक्तः पुण्यतमे स्थाने भगवान्स्वयमेव हि॥ १३ ॥
कलापे तु विशालायां सालङ्कायननीवृति (?)।
इन्द्रद्युम्ने चोत्कलेषु कूर्मक्षेत्रे परत्र च॥ १४ ॥
कावेर्यां द्राविडे पुण्ये पद्मनाभे च वैङ्कटे।
कुशस्थल्यां द्वारकायां शङ्खोद्धारे प्रभासके॥ १५ ॥
माथुरे गोकुले वृन्दावने गोवर्द्धने गिरौ।
एवंविधेषु चान्येषु स्वयं व्यक्तो हरिः प्रभुः॥ १६ ॥
नैवागमविसर्गे स्तः स्वयं चक्रे स्थिरेऽपि च।
भोगमूर्तेर्भवन्त्यत्र उपचारा निमित्तजाः॥ १७ ॥
महाविभूतिभिः पूजा अवतारोत्सवा अपि।
तौर्यत्रिकं वेदघोषः पूजा सत्रे प्रवर्तते॥ १८ ॥
महाभिषेकोऽनुसवं महामन्त्राभिसंहृतिः।
सदैव सर्वभक्तीनां विनियोगोऽत्र जायते॥ १९ ॥
अर्चनं मन्त्रपठने यागो योगो मधुद्विषः।
नाम्नां संकीर्तनं सेवा तथा तच्चिह्नधारणम्॥ २० ॥
तदीयाराधनं चर्या नवधा द्विजसत्तम।
जन्मना विद्ययात्रापि तपसा हरिसेवया॥ २१ ॥
सत्सङ्गेन नृणां शुद्धिः पञ्चधा परिकीर्तिता।
नवधा भक्तियोगेन तस्यैवोद्धरणं स्मृतम्॥ २२ ॥
वन्दनं सेवनं चास्य भक्तानामभिपूजनम्।
नामसंकीर्तनं चिह्नैरङ्कनं शूद्रजन्मनाम्॥ २३ ॥
देवालयनतिर्दूरात्तथा भक्तानुसम्मतिः।
मानसेज्या नामकीर्तिर्भक्तिश्चावरजन्मनाम्॥ २४ ॥

प्रसादग्रहणं तेषां भक्तो विष्टेन जायते (?)।
श्वजन्मनां परा भक्तिर्हृदि वास्य स्वयं भवेत् ॥ २५ ॥
श्रुतिस्मृत्युदितं नित्यं स्वीयमाचारमाचरेत्।
यो न सेवेत शक्तस्तं पाखण्डो हि मतो हरेः॥ २६ ॥
नामसंकीर्तनाद्विष्णो नरको न कथञ्चन।
नीचयोनिषु तस्यैव जननाज्ञाविलङ्घनात् (?)॥ २७ ॥
शनैरुत्तमतां याति चोक्तकारी पुनर्भवेत्।
अयोनावपि दृश्यन्ते भक्ता देवादिवन्दिताः॥ २८ ॥
इत्येकेषां वचो विप्रा धारयेद्भगवत्प्रियः।
भक्त्यैव सकला सिद्धिर्भवत्यस्येति साम्प्रतम् ॥ २९ ॥
चेतसोऽनुगतिर्नित्या पादयोः करुणानिधेः।
तयैव प्रीयते विष्णुर्न तथार्चोपचारकैः॥ ३० ॥
भक्त्या निर्मलपानीयैस्तथा किसलयैः सुमैः।
तुलसीमञ्जरिदलैः प्रीयते केशवो न किम् ॥ ३१ ॥
सुवर्णैर्मौक्तिकैः पुष्पैः पटैः क्षौमाम्बरैस्तथा।
न गृह्णाति रमानाथो यदि प्रीत्या न चार्पितम् ॥ ३२ ॥
परमानन्दमात्रस्य पूर्णकामस्य श्रीपतेः।
तार्क्ष्यासनस्य वैकुण्ठनाथस्य किमपेक्षितम् ॥ ३३ ॥
शङ्खचक्रादिसंकीर्णा श्यामलामलकोन्मिता।
शालग्रामशिला पूज्या स्वयं व्यक्ता द्विजैर्गृहे ॥ ३४ ॥
गृहे मूर्तिः सदा पूज्या शालग्रामशिलायुता।
चक्राङ्कसहिता सैव पूजनीया यथाविधि ॥ ३५ ॥
शालग्रामं न यद् गेहे तुलसी गौर्न विद्यते।
न च भागवतं शास्त्रं तच्छ्मशानवदेव हि ॥ ३६ ॥

शालग्रामशिलायां तु नित्यं सन्निहितो हरिः।
यावन्ति तीर्थजातानि तावन्त्यस्यावनेजने ॥ ३७॥
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैस्तत्प्रायुधाङ्कितैः।
दीक्षायुक्तैस्तथा दारैः पूजनीया सदा शिला ॥ ३८ ॥
शालग्रामशिलातीर्थं पेयं जीवैर्दिने दिने।
अपूजयंश्च विप्रस्तु रौरवं याति दारुणम् ॥ ३९ ॥
मन्त्रोपचारविधिभिर्हीनमप्यस्य पूजनम्।
मुक्तिं ददाति सारूप्यां दशपूर्वैर्दशापरैः ॥ ४० ॥
अदत्वा तुलसी तस्मा अग्रहीत्वाऽवनेजनम्।
कदापि नैव भुञ्जीत वैष्णवैर्विधवाजनैः ॥ ४१ ॥
उदकं चन्दनं चक्रं शङ्खं च तुलसीदलम्।
घण्टारुचा (?) शिलाताम्रं नवभिश्चरणामृतम् ॥ ४२ ॥
चुलकेन पिबेत्तीर्थं शेषं शीर्ष्णि समावहेत्।
पूजापराधदोषाणां पापानां शमनं भवेत् ॥ ४३ ॥
तीर्थपानाच्छतगुणं दोषस्तीर्थच्युतौ भवेत्।
तस्मात्पात्रेण तत्पेयं किं बाधः करवाससा ॥ ४४ ॥
शालग्रामाः समाः पूज्या विषमा न कदाचन।
विषमेष्वेकमेवार्च्यं समेषु द्वितयं न हि ॥ ४५ ॥
शुचिः श्लक्ष्णामला सूक्ष्मा स्वर्णरेखाङ्किता शुभा।
यथा यथा शिला सूक्ष्मा महत्पुण्यं तथा तथा ॥ ४६ ॥
या कापि मूर्तिः सम्पूज्या गण्डकीसम्भवा शिला।
गोमतीचक्रसहिता शङ्खेन गरुडेन च ॥ ४७ ॥
गोमतीचक्रसंयुक्ता यत्र स्याद्गण्डकी शिला।
वाराणसीसमं क्षेत्रं जीवानां मुक्तये मतम् ॥ ४८ ॥

शालग्रामं वहेच्छिर्ष्णा प्रवासे द्विजसत्तम।
भूमियात्राफलं तस्य भवत्येव पदे पदे॥४९॥
आसन्नो मरणे प्राप्ते शालिग्रामं प्रपूज्य च।
हृदि कृत्वा पिवेत्तीर्थं स याति भवनं हरेः॥५०॥
आसन्ने मरणे यस्य मुखे नामावली हरेः।
महापातकमुक्तोऽसौ वैकुण्ठं चाधिरोहति॥५१॥
रात्रिशेषे समुत्थाय शुचिर्नारायणं गुरुम्।
स्मेरच्छ्रियं च गरुडं सर्वां लीलां विभूतिभिः॥५२॥
शौचं कृत्वा बहिर्ग्रामाद्दन्तधावनमाचरेत्।
मलस्नानं बहिः कृत्वा तीर्थस्नानं ततश्चरेत्॥५३॥
तुलसीमूलमृल्लिप्त्वा गङ्गाद्यावाह्य मन्त्रतः।
स्नात्वाऽघमर्षणं कार्यमाचम्यात्मनि मार्जनम्॥५४॥
पौरुषं सूक्तमावर्त्य जपेन्नारायणं मनुम्।
आचम्य तर्पणं कृत्वा शुद्धे दद्यात्सितांशुके॥५५॥
गोपीचन्दनमृत्स्नाभिर्द्वादशाङ्गेषु नामतः।
ऊर्ध्वपुण्ड्राणि कुर्वीत श्रिया युक्तानि वैष्णवः॥५६॥
स्वशाखोक्तां ततः सन्ध्यां देवर्षिपितृतर्पणम्।
विधाय गृहमागच्छेत् पादौ प्रक्षाल्य शुद्ध्यति॥५७॥
कृतन्यासो शुचिः शान्तो धृतमुद्रो स्रजा युतः।
रम्यपुष्पादिरचिते पीठे लक्ष्मीपतिं यजेत्॥५८॥
भूलीलाविमलाद्याभिः शक्तिभिर्मधुसूदनम्।
अनन्तविहगेन्द्राद्यैर्नित्यदासे विभूतिभिः॥५९॥
वासुदेवादिमूर्तीनां केशवाद्यैश्च नामभिः।
आयुधैः शङ्खचक्राद्यैः कुमुदाद्यैश्च पार्षदैः॥६०॥

इन्द्राद्यैर्लोकपालैश्च सर्वानेव यथाक्रमम् ।
सुगन्धिपुष्पधूपाद्यैरुपचारैः समर्चयेत् ॥ ६१ ॥
यथोपदेशं कुर्वीत पूजनं मुरवैरिणः ।
श्रौतस्मार्तविधानेन आगमोक्तेन वा द्विजः ॥ ६२ ॥
श्रौतं वैखानसाद्युक्तं स्मार्तं प्रोक्तं वशिष्ठकैः ।
रहस्यं पञ्चरात्रोक्तमागमं मुनयो जगुः ॥ ६३ ॥
मन्त्रैः पुरुषसूक्तोत्थैस्तथा नारायणोदितैः ।
गुरुलब्धैर्भजेद् देवं यथालब्धोपचारकैः ॥ ६४ ॥
स्तुत्वा प्रणम्य नागेशपर्यङ्के शाययेद्धरिम् ।
मङ्गलार्घ्यं समर्प्यैव होमं कुर्याद्यथाविधि ॥ ६५ ॥
प्रणवैः पुरुषसूक्तैश्च श्रीसूक्तैर्मूलमन्त्रकैः ।
ध्यात्वा जाम्बूनदाभासं यज्ञनारायणं यजेत् ॥ ६६ ॥
नैवेद्यशेषद्रव्येण समव्योपृतरेशतैः (?) ।
प्रसादाहुतयो विद्यात्पाञ्चरात्रविधानतः ॥ ६७ ॥
एकैकाहुतिभिस्तत्र सर्वा लीलाविभूतयः ।
समर्चनीया विप्रेण यथाविभवविस्तरम् ॥ ६८ ॥
क्रियालोपो न कर्तव्यो न चाश्रद्धा न चालसम् ।
नावैष्णवानां सम्पर्को वित्तशाठ्यं न मौढ्यता ॥ ६९ ॥
एतद्वैकुण्ठसद्यज्ञं महाभागवतैः कृतम् ।
अनेन भवनं विष्णोर्याति विप्रो न संशयः ॥ ७० ॥
बलिदानं च नैवेद्यं ततो मध्याचमं भवेत् ।
भूतशुद्धिं हृदा ध्यायेत्ततो मूलजपं चरेत् ॥ ७१ ॥
स्वध्यायाह्निकमप्यर्चा यथाशक्तिर्यथोदिता ।
वैष्णवो विष्णुतुष्ट्यर्थं नित्यकर्म समाचरेत् ॥ ७२ ॥

एवमर्चां समाप्याथ तदीयार्चनमाचरेत्।
दीक्षाक्रमेण वर्णाद्वा शीलेन वयसापि वा ॥ ७३ ॥
नत्वा पादौ च प्रक्षाल्य शुभे पीठे निवेश्य च।
गन्धैर्माल्यैः प्रसादैश्च ताम्बूलाद्यैः समर्चनम् ॥ ७४ ॥
सन्तोष्य नत्वा चोत्थाय कृताञ्जलिपुटः स्तुवन्।
भक्तेषु भगवान्यस्मात्स्थितोऽनुग्रहमूर्तिभाक् ॥ ७५ ॥
अनन्तकोटिब्रह्माण्डयादोण्ड (?) चयवारिधिः।
कारुण्यामृतसम्पूर्णो येषु तेभ्यो नमो नमः ॥ ७६ ॥
समस्तवेदवेदान्तसर्वागममहोदधिः।
भक्तीन्दोः संश्रितेभ्यो वो नित्यमेव नमो नमः ॥ ७७ ॥
सर्वत्र व्यापको विष्णुर्यो न गम्यो महेश्वरैः।
स यत्र व्यक्तिमापन्नस्तेभ्यो नित्यं नमो नमः ॥७८॥
सर्वत्र समभावेन वर्त्तमानोऽपि माधवः।
यः सुप्रसादरूपेण आस्ते तेभ्यो नमो नमः ॥ ७९ ॥
संसारग्राहगीर्णानां ये संजीवनभेषजाः।
तेभ्यो महद्भ्यो भक्तेभ्यो नित्यमेव नमो नमः ॥ ८० ॥
प्रवर्तते यतो भक्तिशास्त्रं तेभ्यो नमो नमः।
सर्वशास्त्रैकसारं यद्ब्रह्मविष्णुशिवोदितम् ॥ ८१ ॥
एवमादिस्तवैः स्तुत्वा कृत्वा चैव प्रदक्षिणाम्।
विसृज्य स्वगृहे भक्तो यात्यसौ कृतकृत्यताम् ॥ ८२ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डेऽर्चावसथनिरूपणं नाम तृतीयोऽध्यायः ॥ ३ ॥

## ॥ चतुर्थोऽध्यायः ॥

ऋषय ऊचुः —

ब्रह्मविष्णुशिवेभ्यो यद्भक्तिशास्त्रं महामुने।
प्रोक्तं तत्सम्प्रदायान्नः कृपया वक्तुमर्हसि ॥ १ ॥

श्रीशाण्डिल्य उवाच —

शृणुध्वं मुनयः सर्वे रहस्यमि्दमुत्तमम्।
भक्तिशास्त्रं सुगम्भीरं यथाचार्यैर्निरूपितम् ॥ २ ॥
आसीत्तमोमयं विश्वमप्रज्ञातमलक्षणम्।
तत्रापि स्वप्रकाशैकश्चिदानन्दमयो हरिः ॥ ३ ॥
स्वात्मक्रीडः स्वात्मरतिः स्वतन्त्रः स्वप्रकाशनः।
स्वयंव्यक्तः स्वानुभूतः स्वाराज्ये सम्प्रतिष्ठितः ॥ ४ ॥
स एव लीलया लीलासृष्टिं चक्रे निजात्मना।
निजानन्दमयीं नित्यामप्राकृतगुणात्मिकाम् ॥ ५ ॥
प्रादुर्भावे कृते तस्याश्चिक्रीडयिषयात्मनः।
निजानन्दात्ममूर्तीनां पूर्णानन्दोऽप्यरीरमत् ॥ ६ ॥
एवं स रममाणः स्ववैचित्र्यमभिलक्ष्यतः।
स्वभूर्नारायणो देव. प्रादुरासीत्स्वयंप्रभुः ॥ ७ ॥
स्वाभाविक्यास्य शक्त्याथ जाता ज्ञानवलक्रियाः।
त्रिगुणा त्रिविधा देवी माया नाम महेश्वरी॥८॥
समृद्धपावकाद्यस्माद्विस्फुलिङ्गा इवात्मनः।
सर्व एव समुद्भूता नित्यात्मानोऽथ निष्क्रियाः ॥ ९ ॥
चिदानन्दांशयुक्तानां तत्त्वानां नवविंशतिः।
असूत भगवान्विष्णुर्माया तैरकरोदिदम् ॥ १० ॥
मनसा वचसाप्यास स्वतोयुः कतिधा जगत् (?)।
मायया निजशक्त्या च यथायथमिदं बभौ ॥ ११ ॥

कालकर्मस्तु भावेन वैचित्र्यं जगतामभूत्।
तेऽपि तस्मात्समासन्त्वै (?) प्रकृत्यैव परात्मनः॥ १२॥
ततो नारायणो देवो भगवानीश्वरः स्वयम्।
क्षीरसिन्धुं च शेषं च कृत्वा निद्रां रतिं ययौ॥ १३॥
निद्रया मायया तस्याः कालकर्मानुरूपया।
पूर्वक्लृप्तं जगत्सूष्यन्नाभ्याः पद्मभूद्विभोः॥ १४॥
रजोगुणमुपादाय उद्यतः सर्गकर्मणि।
स्वयंभूः पद्मभूरासीन्मुह्यमानः स्वकर्मणि॥ १५॥
चतुर्मुखान्यसौ लेभे तपसा तोषयन्विभुम्।
ददर्श चात्मनात्मानमात्मन्येव समाहितः॥ १६॥
स स्तुत्वा सम्प्रसाद्यैनं वेदगर्भो विसृष्टये।
प्रार्थयामास साहाय्यं निजात्मानुभवं तदा॥
रजसो ह्यपनोदार्थं शेषशायिनमीश्वरम्॥ १७॥
वामदक्षिणभागाभ्यां तदा देवस्य शार्ङ्गिणः।
वामदेवमहादेवौ प्रादुरास्तां स्वयंप्रभू॥ १८॥
तौ कृताञ्जलयस्तेन सार्धमाज्ञां व्यजिज्ञपन्।
तानाह देवदेवेशो वासुदेवोऽनुकम्पितः॥ १९॥
सङ्कर्षणस्वात्ममूर्तिं वामदेवं सदा भज।
संहारं कुरु दुष्टानां कालरूपेण नित्यशः॥ २०॥
अनिरुद्धगतिर्विष्णोः पालयैनं महाबल।
मोचयात्र जगज्ञातं सङ्कटेभ्यः समाश्रितान्॥ २१॥
विरिञ्चे कुरु सृष्टिं मे पूर्वसृष्टाभिकल्पिताम्।
मदीयज्ञानसम्पत्त्या नत्वा मोहयितारजः (?)॥ २२॥

हंसरूपधरोऽहं त्वां भक्तियोगमनुत्तमम्।
विस्तरेण पुनर्वक्ष्ये ततः संक्षेपतः शृणु॥२३॥
अहमेको विभुः साक्षात्प्रभुर्नान्यः परो मम।
मयैव सकलं व्याप्तं भूतभव्यं भवच्च यत्॥२४॥
सच्चिदानन्दमात्रोऽहमीश्वरो मुक्तिदोऽमृतः।
मदंशभूता मामेव भजन्ति पदलिप्सवः॥२५॥
योगेन तपसाचारैर्यथा जानन्ति मामिह।
ज्ञात्वा भक्त्या भजन्तो मां प्रविशन्ति मुनीश्वराः॥२६॥
भक्त्या मदात्मका भूत्वा शङ्खचक्रादिलक्षिताः।
अनन्या मत्परा शान्ता मुक्ता मत्पार्श्वसंस्थिताः॥२७॥
एवंभूता मदीयास्ते पूजयन्ति यथाविधि।
नानावताररूपं मां भक्त्या बहुविभेदतः॥२८॥
तारकं मे महामन्त्रं जप त्वं येन वाञ्छिता।
भक्तिः सृष्टिश्च भो ब्रह्मन्समृद्धा सम्भविष्यति॥२९॥
एवमुक्तस्ततो देवस्तथा चक्रे सिसृक्षया।
सृष्टिस्तस्य ततः पूर्णा यथेष्टा प्रादुरास ह॥३०॥
सुराश्चोत्तरकायेन असुरास्तस्य चेतरात्।
वामदक्षिणभागेन नरनारीमयाश्च ते॥३१॥
तौ कदाचित्सहायातौ प्रष्टुं देवं पितामहम्।
योग्यतामवलोक्यैषा यथायोग्यमबोधयत्॥३२॥
आदर्शदर्शनेनैव ते तथार्थं प्रपेदिरे।
आत्मभासात्मवादेन बहुधा निजयुक्तितः॥३३॥
उपासितो वसिष्ठेन कदाचित्प्रपितामहः।
प्रायः प्राह महायोगं भक्तियोगं यथायथम्॥३४॥

वसिष्ठोऽपि कृपाविष्टः शक्तये भक्तितो जगौ।
पराशराय तन्मन्त्रं कुरुक्षेत्रे जगौ स च ॥ ३५ ॥
पराशरो जजापैनं भक्त्याऽऽचारेण सादरम्।
जातोऽसौ परमाचार्यो मुकुन्दे भक्तिमान्मुनिः ॥ ३६ ॥
मुकुन्दभजनात्तस्य पुत्रो व्यासो महामुनिः।
यतो धर्मो यतो ज्ञानं यतो भक्तिः प्रवर्तते ॥ ३७ ॥
पाराशर्यात्प्रवृत्ताभूद्भक्तेः सरणिरुत्तमा।
ज्ञानवैराग्यसम्पूर्णा वेदवेदान्तसम्मिता ॥ ३८ ॥
जग्राह तां समाराध्य मधुनामा प्रभञ्जनः।
मधुविद्येति सा प्रोक्ता दधीचिर्यामुवाच ह ॥ ३९ ॥
सा विद्या परमा लोके बहुधाऽस्ति प्रभञ्जनात्।
यस्यां मन्त्रविभागोऽपि देशिकानां पृथक् पृथक् ॥ ४० ॥
कर्णाटके द्राविडे च आन्ध्रे सौराष्ट्र उत्कले।
शूरसेने माथुरेऽपि प्राधान्याद्व्यापृता तु सा ॥ ४१ ॥
व्यासराज्ये चोडपे च विमले कमलावने।
हरिस्थाने महानागे कुलाद्रौ वरसिन्धुके ॥ ४२ ॥
सर्वत्रैव तु सा भक्तिर्जगत्प्राणायते सताम्।
यत्र मृण्मुद्रया (?) विष्णुरेक एवेश्वरः प्रभुः ॥ ४३ ॥
ब्रह्माद्या भगवद्भक्ता जीवा दासा निसर्गतः।
उपकुर्वन्ति मुक्त्यर्थमाश्रयान्मुरवैरिणः ॥ ४४ ॥
ब्रह्मणो मानसा पुत्राः पूर्वजाः सनकादयः।
प्रतिसर्गास्तपोनिष्ठाः श्रमणा ऊर्ध्वरेतसः ॥ ४५ ॥

ते कदाचित्स्वपितरं सन्दिहाना अयूयुजन्।
पितामहः स पितरं सस्मारास्योपलब्धये ॥ ४६ ॥
हंसरूपधरो विष्णुस्तदा दृग्गोचरोऽभवत्।
त एनं प्रणिपत्याथोऽवतस्थुर्बद्धपाणयः ॥ ४७ ॥
तमर्थं द्रुहिणो देवं पप्रच्छ परमादरात्।
यथायथमुवाचैनं भक्तियोगं सुदुर्लभम् ॥ ४८ ॥
सनकाद्या महात्मानो ब्रह्मणाप्यथ शिक्षिताः।
याथातथ्येन ते लोके नारदादिभ्य ऊचिरे ॥ ४९ ॥
स एवानुग्रहाद्विष्णोर्विचरन् भुवनत्रयम्।
आदित्येभ्यः समाचख्यौ हरयेऽपि प्रतोषितः ॥ ५० ॥
वदिष्यति महाभागान् विरक्तानूर्ध्वरेतसः।
तेऽपि तां बहुधा व्यस्य स्थापयिष्यन्ति माथुरे ॥ ५१ ॥
गोविन्दचरणाम्भोजदासात्मानो मम प्रियाः।
विरक्ताः कामभोगेभ्यो भवितारो जितेन्द्रियाः ॥ ५२ ॥
अथ विष्णोर्महाभागाः सम्प्रदायं निबोधत।
पवित्रं मङ्गलं वेदैः पाञ्चरात्रैश्च सम्मितम् ॥ ५३ ॥
श्वेतद्वीपे पुरा विष्णुं क्षीरसागरशायिनम्।
ब्रह्माद्या देवताः सर्वे मुनयश्च तपोधनाः ॥ ५४ ॥
समाराध्य महात्मानो भक्त्या परमया विभुम् ॥ ५५ ॥
ऋचां च यजुषां चापि साम्नामाङ्गिरसामपि।
साङ्ख्यानामपि योगानां सर्वोपनिषदां गिराम् ॥ ५६ ॥
सर्वेषामपि शास्त्राणां सारभूतं हरेः प्रियम्।
रहस्यं पञ्चरात्राख्य काले कालेऽभिलेभिरे ॥ ५७ ॥

स च कालस्य दैर्घ्येण दुरदृष्टवशान्नृणाम्।
जगामोपरिचारेण महाभागवतेन भोः॥ ५८॥
अधुना तु महाभागो नारदो देवसम्मतः।
आराध्य तं महाविष्णुं लेभे शास्त्रं पुनश्च तत्॥ ५९॥
तन्नारदेन मुनिना क्वचिदेव प्रकाशितम्।
भीष्मोऽपि तं समाराध्य लेभे एवं परेऽपि च॥ ६०॥
तदुपासनया पूर्वं कर्दमात् कपिलो मुनिः।
देवहुत्यनुसूयाद्या जग्मुर्नारायणान्तिकम्॥ ६१॥
हरेः समादरस्तेषु वीक्ष्यैव कमलाऽधिपम्।
कदाचिद्रमणं देवं पप्रच्छावनता सती॥ ६२॥
पूर्णकाम हरे नाथ समभावेन वर्ततः।
यदेष्वेवाधिका प्रीतिः वद कान्त रहो न चेत्॥ ६३॥
प्राहैनां प्रेयसीं प्रेष्ठः प्रणयेनाभिपृच्छतीम्।
रह एव परं ह्येतत्कथयेऽथापि ते प्रिये॥ ६४॥
शुद्धोऽहं मुक्तदोषोऽहं निर्विकारोऽहमीश्वरः।
तथापि भजमानानां वशीभूतः सुरद्रुमः॥ ६५॥
समोऽपि मिहरो लोके यथैवाश्रयरूपतः।
प्रकाशतेऽम्बुदर्शाश्मकुड्यादिषु स्वरूपतः॥ ६६॥
यथा चिन्तामणिर्नृणां चिन्तितार्थं प्रयच्छति।
न रागस्तस्य वैषम्यं स्वानुरूपफलप्रदः॥ ६७॥
वासनाप्रेरणादेषामीश्वरो नैव दूष्यति।
वैचित्र्यस्य विधानाय कर्मणा मय्यनादिता॥ ६८॥
निर्गुणस्य गुणेशस्य एकस्यानेकरूपिणः।
निष्क्रियस्य जगत्कर्तुः शक्तिरेवाविरोधिनी॥ ६९॥

सदैकरसपूर्णस्य आनन्दाकारधर्मिणः।
स्वतन्त्रस्य महेशस्य लीला राजकुमारवत्॥७०॥
अनादिरेव लोकानां रचना घटनेतरा।
एकदैवेह संक्लृष्णा (प्ता) अलुप्तज्ञानशालिना॥७१॥
पञ्चरात्ररहस्याख्यं यन्मे योगं सुदुर्लभम्।
प्राप्यैते नारदाद् देवि मामिष्ट्वा मामुपागताः॥७२॥
मत्परा नान्यशरणा जपन्तो मे महामनुम्।
समायाता पदं मेऽद्य उपकृत्य परानपि॥७३॥
ज्ञानविज्ञानसम्पन्ना वेदवेदान्ततत्पराः।
जितेन्द्रिया जितात्मानः साङ्ख्ययोगेन सङ्गताः॥७४॥
साङ्ख्यं योगस्तथा शैवं वेदारण्ये च पञ्चकम्।
प्रोच्यन्ते रात्रयः कान्ते आत्मानन्दसमर्पणात्॥७५॥
पञ्चानामीप्सितो योऽर्थः स यत्र स्वयमाप्यते।
परमानन्दमेतेन प्राप्नोति परमात्मनः॥७६॥
प्रमाणपञ्चकैः पूर्णं पञ्चकार्थोपदेशनम्।
प्रपञ्चातीतसद्धर्मं पञ्चरात्रमुदाहृतम्॥७७॥
साङ्ख्यं योगश्च वैराग्यं तपो भक्तिश्च केशवे।
पञ्चार्थदानतस्त्राणात् विद्या सा पाञ्चरात्रिकी॥७८॥
पञ्चरात्रं बहुविधं बहुधा भाषितं परैः।
प्रमाणानां विरोधेन तद्यथार्थं न चेदृशम्॥७९॥
एतत्सर्वप्रमाणानां रहस्यं वेदसम्मितम्।
मयैव कथितं दिव्यं नारदाय महात्मने॥८०॥
एतन्मे परमं दिव्यं पवित्रं मङ्गलं शुभम्।
गृहाण साभिलाषा त्वं मन्त्रराजं समाहिता॥८१॥

विश्वाक्षरं महामन्त्रं प्रपन्ना सा यथाविधि।
जग्राह कमला देवी जजाप विरजातटे ॥ ८२ ॥
जप्यमाने महामन्त्रे सापि चैकान्तवल्लभा।
निवासं वक्षसि प्राप्ता सम्प्रदायं ततो जगौ ॥ ८३ ॥
विष्वक्सेनाय प्रथममादिदेश प्रसादिता।
स चान्येभ्यो जगौ देव अगस्त्याय महात्मने ॥ ८४ ॥
इन्द्रप्रमितये सोऽपि जैगीषव्याय योगिने।
पराभूतिमहाभूतियोगिभ्यां क्रमशो जगौ ॥ ८५ ॥
नन्दाय विमलायैव प्रह्लादाय विवस्वते।
पुण्डरीकाय सा देवी स्वयमेव ददौ रमा ॥ ८६ ॥
द्राविडे पाण्ड्यविषये कावेर्यां सह्यसानुनि।
आहोवले व्यङ्कटे च श्रीरङ्गे मलयाचले ॥ ८७ ॥
काञ्च्यां कूर्माचले चापि पद्मनाभे त्रिविक्रमे।
एवमादिमहास्थानेऽप्याविर्भूतैर्महात्मभिः ॥ ८८ ॥
प्रस्तार्यते रमाभक्तिर्बहुधा स्वानुरूपतः।
शेषशेषिविभागेन यत्रात्मा प्रगटीकृतः ॥ ८९ ॥
ज्ञानकर्मसहायेन सा तु नारायणात्मिका।
प्रयतिः सर्वदा शुद्धा वीरैर्धीरैरुपासिता ॥ ९० ॥
नवधार्चाप्रकारेण नित्यैषा कृतलक्षणा।
यज्ञदानतपोनिष्ठैर्मुनिभिः सेव्यते सदा ॥ ९१ ॥
शमो दमस्तपः शौचं वैराग्यं यत्र तिष्ठति।
सुहृदः सरलाः शुद्धा महाभागवतास्तु ते ॥ ९२ ॥
जानन्ति ते महाविष्णुं किञ्चिन्नान्यं मनागपि।
सर्वदा हृदयाम्भोजे ध्यायन्ति परमादृताः ॥ ९३ ॥

सात्त्विकाः सत्त्वसम्पन्ना वैकुण्ठपुरवासिनः।
भवन्ति भगवद्भक्ताः शान्ता दान्ता जितेन्द्रियाः॥ ९४॥
इत्येवं संस्थितिस्तेषामेवमाह महेश्वरः।
भक्तिज्ञानविरागाभ्यां सप्तधा नवधा तथा॥ ९५॥
यः सत्यधर्मविख्यातो यत्र राजविभूतिभिः।
सेव्यते श्रीपतिः प्रेम्णा सततं केवलात्मभिः॥ ९६॥
शङ्कराद् देवरातोऽपि मुनिराप पराशरिः।
ब्रह्मा शुकश्च सनका जानते यां यथायथम्॥ ९७॥
यथाकालञ्च सम्प्राप्ताः स्वस्वभावानुरूपतः।
कृतादौ सम्प्रवृत्ताऽभूद्भक्तिर्दिव्या परात्मनः॥ ९८॥
कृते नारायणी भक्तिर्ब्राह्मी त्रेतायुगे बभौ।
द्वापरे शाङ्करी भक्तिर्मुनिभिः समुपासिता॥ ९९॥
स्ववर्णाश्रमधर्मेण कर्त्तव्येति धिया कृता।
सात्त्विकाचारनिरतैः सात्त्विका सा कृते युगे॥ १००॥
किञ्चिन्निमित्तमुद्दिश्य विभिन्नधृतशालिनी।
यज्ञदानादिधर्मेण त्रेताख्ये राजसी कृता॥ १०१॥
शास्त्रमज्ञाय मूढात्मजनैर्लोकानुकारिभिः।
तामसी द्वापरे भक्तिः कृता साऽऽग्रहवादतः॥ १०२॥
दक्षिणे सात्त्विकी भक्तिर्मध्यदेशे तु राजसी।
तामसी क्वचिदन्यत्रागुणा संदृश्यते द्विजाः॥ १०३॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे सम्प्रदायत्रयनिरूपणं नाम चतुर्थोऽध्यायः॥ ४॥

## ॥ अथ पञ्चमोऽध्यायः ॥

ऋषय ऊचुः –

भगवन्भवता प्रोक्तं सम्प्रदायत्रयं पुरा।
विष्णुब्रह्ममहेशेभ्यो बहुधाचार्यभेदतः॥ १ ॥
गुणत्रयविभागश्च युगत्रयविभागतः।
तेषां च लक्षणं प्रोक्तं पारम्पर्यक्रमोऽपि च॥ २ ॥
तेषां देशस्थितिः प्रोक्ता कालस्थितिरुदाहृता।
अधुना तु महाभाग तार्तीयं वक्तुमर्हसि॥ ३ ॥
निर्गुणस्यापि भो साधो यथास्थितिमुदाहर।
न हि गोप्यं सुमहतां कृपालूनां विशेषतः॥ ४ ॥

श्रीशाण्डिल्य उवाच –

अथातः श्रूयतां विप्राः सम्प्रदायं पुरद्विषः।
यत्र प्रसन्नो मनुजो हरेः प्रियतमो भवेत्॥ ५ ॥
एकदा शङ्करो देवो गतो गोकुलमण्डलम्।
तत्र वृन्दावने रम्ये सच्चिदानन्दमन्दिरे॥ ६ ॥
त्रिभङ्गललितं देवं कोटिमन्मथसुन्दरम्।
अनौपम्यं वेणुधरं व्रजस्त्रीगणसेवितम्॥ ७ ॥
श्रुतिभिर्मुनिभिश्चैव सेव्यमानं मुदान्वितम्।
प्रणिपत्य मुदा देवः सामगानादतोषयत्॥ ८ ॥
जगतो हि समुद्धर्तुं सम्प्रदायस्य लब्धये।
तस्मै ददौ प्रसन्नात्मा तत्रत्यानामनुग्रहात्॥ ९ ॥
स लब्ध्वा परमं लाभं स्वधाम संन्यवर्तत।
परमानन्दसंमग्नो नृत्यं चक्रे दिगम्बरः॥ १० ॥

तं दृष्ट्वा परमाश्चर्यं नारदो देवसम्मतः।
तदा हर्षसमाविष्टो नारदेन प्रसादितः॥ ११ ॥
जगौ तदेव सन्मार्गं श्रुत्वा यच्छ्रीपतेर्मुखात्।
नारायणाच्च शेषाच्च मन्त्रभागैर्निजात्मनः॥ १२ ॥
नारदोऽपि महायोगी परमानन्दपूरितः।
अलंप्रसादितः प्रादाद् व्यासायामिततेजसे॥ १३ ॥
कौण्डिन्याय मया प्रोक्तो गर्गाय च महात्मने।
व्यासस्तु वक्ति पुत्राय ब्रह्मराताय विष्णवे॥ १४ ॥
अथो कलौ संप्रवृत्ते पूर्वाचार्यैरथागतैः।
भविष्यति परा भक्तिः किञ्चित्कालं मुनीश्वराः॥ १५ ॥
वेदवेदान्ततत्त्वज्ञैर्वैष्णवैर्ब्राह्मणोत्तमैः।
निर्वाहिता ततो भक्तिर्लुप्तप्राया भविष्यति॥ १६ ॥
ततोऽपि श्रीपतेरस्य स्वीयानुगृह्णतो हरेः।
माथुरे मण्डले तत्र गोकुलेऽस्मिन् गिरावपि॥ १७ ॥
प्रादुर्भविष्यति महापुरुषैरुपभाविता।
तस्याः संप्रीयते तत्र संप्रदायं रिरक्षिषुः॥ १८ ॥
महात्मा सुमहातेजा भगवद्वदनोदितः।
प्रादुर्भविष्यति ततः सर्वश्रुतिविशारदः॥ १९ ॥
योगी योगीश्वरस्तं वै सम्प्रदायं वदिष्यति।
भगवानपि तं साक्षादुपदेष्टा निजागमम्॥ २० ॥
आसाद्य गोकुलं धाम भक्तिं संवर्द्धयिष्यति।
गिरिराजं तथा प्राप्य महात्मैकान्तसंश्रयैः॥ २१ ॥

निर्गुणं भक्तिमार्गं तु वर्धयित्वा चरिष्यति ।
निजात्मप्रेमसम्पूर्णैर्भगवद्ध्यानतत्परैः ॥ २२ ॥
तद्रसाक्षिप्तचित्तानां स्वाचारपरिवर्तनाम् ।
सर्वभूतैकसुहृदां वेदप्रामाण्यमीयुषाम् ॥ २३ ॥
विरलेष्वेव भविता सम्प्रदायो ह्यनुत्तमः ।
आश्चर्याणि चरित्राणि कृत्वा नानाविधान्यसौ ॥ २४ ॥
स्थापयिष्यति वै तस्याः पारम्पर्यक्रमं कुलम् ।
समुद्धृत्य ततो जीवान्हरेः प्रीतिं करिष्यति ॥ २५ ॥
ततः कतिपये काले कालदोषप्रभावतः ।
विलयं यास्यते पन्थाः कापट्येनाकुलः परः ॥ २६ ॥
परद्वेषान्वितैः पुम्भिर्निजाचारपराङ्मुखैः ।
परस्त्रीलम्पटैर्लुब्धैः कोपनैर्बालिशैः शठैः ॥ २७ ॥
इत्येवं हि समाख्यातं सम्प्रदायं पुरद्विषः ।
पुरुषोत्तममारभ्यलीलास्थानां हरेर्मुदे ॥ २८ ॥
अयमेव परः पुण्यो भक्तिशास्त्रैकसम्मतः ।
एतन्माहात्म्यमतुलं नालं वक्तुं चतुर्मुखः ॥ २९ ॥
अयं हरेः श्रीव्रजदेवताया अनुगृहीतः किल सम्प्रदायः ।
आविर्बभौ वेणुग्रहीतवेदैर्विभावयध्वं त्रिपुरारिसम्मतम् ॥ ३० ॥

॥ इति श्रीशाण्डिल्यसंहितायां भक्तिखण्डे त्रिपुरारिसम्प्रदायनिरूपणं नाम पञ्चमोऽध्यायः ॥५॥

## ॥ अथ षष्ठोऽध्यायः ॥

ऋषय ऊचुः –

कथं वेणुग्रहीता वै वेदा वेदविदांवर।
कथं च निर्गुणा भक्तिर्गिरावस्मिन्भविष्यति ॥ १ ॥
सात्त्विकी राजसी चापि तामसी च कथं भिदा।
फलभेदः कथं तत्र ह्यधिकारी च कीदृशः ॥ २ ॥
किं विधेयं किमादेयं परिहेयं च किं पुनः।
किमुपेक्षं किमाहृत्यं सर्वं वद कृपानिधे ॥ ३ ॥

श्रीशाण्डिल्य उवाच –

सावधानधियो भूत्वा शृणुध्वं मुनिसत्तमाः।
श्रीकृष्णभक्तिमाहात्म्यविस्तारं कथये यथा ॥ ४ ॥
देवोऽसुरो मनुष्योऽपि पशुपक्षिद्रुमाश्च ये।
सर्वेषामाधिकारोऽत्र भजने परमात्मनः ॥ ५ ॥
ब्राह्मणा क्षत्रिया वैश्याः स्त्रियः शूद्रास्तथान्त्यजाः।
अधिकारानुरूपेण भजन्तः श्रेय आप्नुयुः ॥ ६ ॥
वर्णाश्रमेण धर्मेण ज्ञानविज्ञानशालिना।
वैराग्येण गुरोर्लब्धा भक्तिः सा सात्त्विकी हरेः ॥ ७ ॥
विशुद्धचेतसः पुंसो महतां समनुग्रहात्।
चेतसामुन्नतिर्नित्या मुख्यैषा सात्त्विकी भवेत् ॥ ८ ॥
सर्वत्र भगवद्भावः सर्वत्रैवानुकम्पनम्।
सात्त्विकाचरणात्पुंसो भजनं सात्त्विकं मतम् ॥ ९ ॥
यज्ञैर्दानैः स्वधर्मेण ये भजन्ति सुमेधसः।
विच्छिन्नवृत्तयो भक्ता राजसास्ते प्रकीर्तिताः ॥ १० ॥

देशज्ञातिकुलानां च अभिमानेन संयुताः।
स्वधर्मेण हरेरर्चां कुर्वन्तो राजसा मताः॥ ११ ॥
मूढात्मानोऽतिविक्षिप्तचेतसो दृढनिश्चयात्।
यथोपदेशं कुर्वाणा भजनं तामसास्तु ते॥ १२ ॥
संरम्भेण निजार्थेन अविविक्ताऽऽग्रहेण वा।
शास्त्रैकदेशमाश्रित्य भजनं तामसं मतम्॥ १३ ॥
शमो दमस्तपः शौचं वैराग्यं ज्ञानमात्मता।
दया दानं तथा धैर्यं सात्त्विकानां स्वभावतः॥ १४ ॥
दया दानं तपः शौचं स्वाहङ्काररक्षमान्विता।
उत्साह उद्यमादीनि राजसानां स्वभावतः॥ १५ ॥
मौढ्यमाग्रहवादश्चादार्ढ्यं कार्येष्वनुद्यमः।
मोहो द्रोहो वृथैवेहा तामसानां स्वभावतः॥ १६ ॥
श्रवणात्कीर्तनाद्ध्यानान्महतां पादसेवनात्।
मनोगतिरविच्छिन्ना दीपार्चिरिव शाश्वती॥ १७ ॥
अनिमित्तनिमित्तेन धर्मेण बहुजन्मना।
अनुग्रहाद्भगवतो भक्तिः स्यान्निर्गुणा क्वचित्॥ १८ ॥
सर्वत्र सर्वदा सर्वं तदर्थे शुभचेष्टितम्।
सर्ववस्त्वभियोगश्च निर्गुणस्य उदाहृतः॥ १९ ॥
निजेशचरणाम्भोजसेवनातः पृथग्धिया।
मोक्षोऽपि नाभिलषितो भक्तानां निर्गुणात्मनाम्॥ २० ॥
सदा तद्गुणगानेन सदा तत्परिचर्यया।
सदा तद्भक्तसङ्गेन परमानन्दनिर्वृताः॥ २१ ॥

भगवन्नामधामार्चालीलाभक्तजनाश्च ये।
यच्चान्यद्भगवन्निष्ठनिर्गुणं समुदाहृतम् ॥ २२ ॥
प्राकृतैर्नश्वरैरेतैर्निरानन्दैरचेतनैः।
भिन्नात्मभिः स्वीयधर्मैः पदार्था रहिता (?) विभोः ॥ २३ ॥
सात्त्विकास्तस्य सारूप्यसार्ष्टिसायुज्यभागिनः।
सालोक्यं राजसादीनामेकत्वं निर्गुणात्मनाम् ॥ २४ ॥
सारूप्यं शङ्खचक्राद्यैर्विना श्रीवत्सकौस्तुभैः।
समानैश्वर्यमप्येवं जगद्व्यापारवर्जितम् ॥ २५ ॥
सायुज्यं सेवया तस्य तदानन्दात्मताऽपि वा।
सर्वानन्दानुभूतिर्या एकत्वं स्यात्तदात्मता ॥ २६ ॥
सर्वानन्दमयी लीला नित्या चैतन्यरूपिणी।
दिव्येन्द्रियैरात्मनाऽस्यां निवेशो निर्गुणात्मनाम् ॥ २७ ॥
सर्वं ब्रह्मात्मकं विश्वं ब्रह्मणैव प्रकाशितम्।
नित्यं शुद्धस्वरूपं च कनके कटकादिवत् ॥ २८ ॥
तस्यैव वाञ्छया पुंसो निजानन्दात्मषड्गुणम्।
तिरोहितं तु जीवेभ्यो निजांशेभ्यो विसृष्टये ॥ २९ ॥
आब्रह्मस्तम्भपर्यन्तनानायोनिषु सङ्गतैः।
नानुभूतोऽनुभूतोऽर्थो विनिश्चित्यागमाद् गुरोः ॥ ३० ॥
अनुभूतार्थलब्ध्यर्थं यतमानैर्महात्मभिः।
सेव्यते जगतां नाथो गोवर्द्धनधरो हरिः ॥ ३१ ॥
मयात्र संस्थितेनेशः सदैव हृदि संस्मृतः।
नवीननीरदश्यामो नीलेन्दीवरलोचनः ॥ ३२ ॥

पीनवक्षाः पृथुश्रोणिः कम्बुकण्ठोऽल्पकोदरः।
वृत्तावगूढजङ्घादिप्रांशुग्रीवस्तथोन्नसः॥ ३३ ॥
राकेन्दुचारुवदनो नीलालकविराजितः।
अम्भोजपल्लवाङ्घ्रिभ्यां नखचन्द्रकलां दधत्॥ ३४ ॥
रत्नकिङ्किणिसंसक्तपीतपीताम्बराञ्चितः।
वलिवल्गुदरोनाभिगाम्भीर्यागीर्णविष्टपः॥ ३५ ॥
सुविस्तीर्णोरसा बिभ्रदनौपम्यां महेन्दिराम्।
हारग्रैवेयरुचकनिष्कमालाविभूषितः॥ ३६ ॥
वैजयन्तीस्रजा युक्तो वनमालोल्लसोल्लसत्।
ऊर्मिकावलयाद्यैश्च केयूरालम्बसद्भुजः॥ ३७ ॥
हीरकोद्दीप्तचुबुको गजमौक्तिकनासिकः।
संशोभिशोणतिलकः स्फुरन्मकरकुण्डलः॥ ३८ ॥
मायूरमुकुटो वेणुवेत्रहस्तोऽतिसुन्दरः।
किशोरो दर्शनीयाङ्गः सर्वाभरणभूषणः॥ ३९ ॥
कोटीन्दिरासेविताङ्घ्रिः कोटीन्दुद्युतिशीतलः।
कोटिकल्पद्रुमामोदः कोटिकौस्तुभभासुरः॥ ४० ॥
कोटिचिन्तामणिस्थानः कोटिकामद्रुमाङ्गणः।
मन्दस्मितोऽतिकरुणः स्निग्धापाङ्गावलोकनः॥ ४१ ॥
गोपालबालकैः क्रीडन्कदाचित्प्रादुरास ह।
साष्टाङ्गप्रणतं दीनमनुकामयोचिवान्विभुः॥ ४२ ॥
साधु साधो महाभाग मद्भक्त्या मां भजन्निह।
स्थितः सुतपसा सिद्धः शाण्डिल्य वृणु वाञ्छितम्॥ ४३ ॥

निर्गुणोऽहं निराकारो निष्क्रियोऽहं निरञ्जनः।
केवलानन्दमात्रात्मा स्वतन्त्रः स्वेच्छकार्यकृत् ॥ ४४ ॥
आत्मरूपा ज्योतिरूपा मदेकशरणा सती।
करोति लीलानाम्नी सा यद्यदिष्टतमं मम ॥ ४५ ॥
आनन्दमात्रावयवः किशोरः श्यामलाकृतिः।
विहरामि सदा तस्यां नित्यलीलाविभूतिभिः ॥ ४६ ॥
कदाचिच्छ्रुतयः साम्नां सिद्धाः कीर्तनभक्तितः।
मदनुग्रहमायाता एवम्भूतं समीक्ष्य ताः ॥ ४७ ॥
स्मिता लुलुभिरे सर्वा वेणुना चुम्बितेऽधरे।
तमेव प्राविशन् रक्ता रागरूपेण मद्गताः ॥ ४८ ॥
अन्या अपि ततो लब्धुं क्षुब्धात्मानो गिरः सती।
गिरावस्मिन्तपस्यन्तीः कृत्वाऽऽपुर्भक्तिसङ्गताः ॥ ४९ ॥
तदर्थमहमत्रैव व्यापि वैकुण्ठसङ्गतः।
प्रादुर्भूतस्ततो लोके व्रजनात्स व्रजो मतः ॥ ५० ॥
वेणुना तेन ताः सर्वाः समाहूता व्रजस्त्रियः।
प्रावर्तयन्नहो दिव्यां साक्षाद्भक्तिमनुत्तमाम् ॥ ५१ ॥
निर्गुणां तां त्वमातिष्ठ मम भक्तिं मनोहराम्।
इमां लीलां यदि ब्रह्मन्प्रवेष्टुं संप्रतीक्ष्यसे ॥ ५२ ॥
योगमायेति लीलायाः काचिन्मे प्रतिहारिणी।
प्रवेशयति सा नान्यं भ्रामयन्ती स्वमायया ॥ ५३ ॥
एवमुक्त्वा ततो देवो दत्तवान्स्वस्रजं मम।
अनया संप्रवेशोऽत्र कामचारो भविष्यति ॥ ५४ ॥

ततः कृताञ्जलिरहं वाष्पपर्याकुलेक्षणः।
ऊचे नाथ रमानाथ करुणावरुणालय ॥ ५५ ॥
कृपानाथ प्रभो देव यशोदाप्राणवल्लभ।
कृतं मद्वाञ्छितं भव्यं स्वयं सर्वं विजानता ॥ ५६ ॥
श्रीमच्चरणराजीवं जीवतां किं नरासिषः।
कथञ्चिच्च सकृद्वापि स्मरणात्सकलार्थदः ॥ ५७ ॥
क्वाहं दीनतरो हीनसाधनो भववञ्चितः।
स्वीयानुकम्पया येन स्वकीयोऽहं स्वयं कृतः ॥ ५८ ॥
एतन्मे वाञ्छितं नाथ भ्रमतः कर्मणा भुवि।
प्रीतिर्भवेदविच्छिन्ना चरणाम्भोजयोस्तव ॥ ५९ ॥
श्रीमताऽनुग्रहीतोऽहमभीतोऽहमतः परम्।
तथापि सा कथं ज्ञेया कथं कार्या भवेदिति ॥ ६० ॥
पृष्टः प्राह प्रभुः प्रीतो मम शृङ्गात्तु पश्चिमे।
शृङ्गारमण्डलं दिव्यं बहिस्तस्य सरोवरम् ॥ ६१ ॥
तत्रैका ललितानाम्नी मुनिकन्या तपोमयी।
मत्प्रियानुग्रहीतैषा आचारं तेऽभिधास्यति ॥ ६२ ॥
इमं मे परमं मन्त्रं स्वयमेवाहमर्पये।
अनुगृह्य परान्विप्र मत्सकाशं ततो व्रज ॥ ६३ ॥
एवमुक्त्वा तिरोऽधत्त तत्रैव व्रजवल्लभः।
ततोऽहं तद्दिशं नत्वा स्थितोऽस्मि मुनिसत्तमाः ॥ ६४ ॥
सा कन्या मामुपव्रज्य स्वयमाह हरेर्मता।
प्रणताय प्रपन्नाय दिव्यज्ञानासुरैर्नुता ॥ ६५ ॥

वेदवेदान्तसच्छास्त्रैर्विज्ञाय भगवद्गतिम्।
स्थित्वा निजाश्रमाचारे सात्त्विके कर्मणि स्थितः॥ ६६॥
निवृत्तिमार्गनिरतः सर्वेषामुपकारकृत्।
सरलोऽनालसो दक्षो मैत्रः कारुणिकोऽशठः॥ ६७॥
शान्तो दान्तः शुचिर्धीरो महतां पादसेवकः।
भगवद्भक्तसङ्गेन जातश्रद्धो दृढोऽच्युते॥ ६८॥
कुलीनं भगवद्भक्तं वेदवेदान्ततत्परम्।
श्रीभागवतशास्त्रज्ञं शान्तं दान्तं सदा शुचिम्॥ ६९॥
जितचित्तेन्द्रियं दिव्यं सर्वदोषविवर्जितम्।
परम्पराप्राप्तविद्यमेवम्भूतं गुरुं भजेत्॥ ७०॥
उपदिष्टस्ततस्तेन वैष्णवाचारतत्परः।
श्रीगोपालं भजेत्प्राज्ञो मूर्त्याभिमतया विभुम्॥ ७१॥
प्रातरारभ्य सायाह्नावधिर्नित्यं समाहितः।
प्रेम्णा परिचरन्साधु विरक्तः संस्कृतो भवेत्॥ ७२॥
विधेयं विधिना तेन श्रवणादिमहज्जनैः।
आदेयं यत्तदीयं च शास्त्रं कर्म च चेष्टितम्॥ ७३॥
परिहार्योऽप्यभक्तानामसतामपि संश्रयः।
विरुद्धाचरणं चान्यदधर्माचरणं तथा॥ ७४॥
गृहापत्यकलत्रादिसंसारासक्तिकारणम्।
उपेक्ष्याविमुखा लोकाः कथायां हरिमेधसः॥ ७५॥
अनुकूलं सदा देयं स्वधर्माचरणं तथा।
गुरोः समुपदिष्टं यद्यच्च भक्तोपकारकम्॥ ७६॥

यावद्भेदाभिमानो हि कार्यबुद्धिश्च सेवने।
तावत्तु सगुणा भक्तिः कर्तॄणां विद्धि तत्त्वतः॥७७॥
यद्विधोऽस्या भवेत्कर्ता सा प्रोक्ता तद्विधा बुधैः।
भूम्याः सम्पर्कतो वारि मधुरं विरसं यथा॥७८॥
यदात्मरूपिणी सैव अहंप्रत्ययसाक्षिणी।
संशयेन समुत्कीर्णा तदा निर्गुणतां गता॥७९॥
विषया नावभासन्ते देहधर्मास्तथेन्द्रियाः।
प्रक्षीणवृत्तिर्भक्तेश असौ निर्गुणतां गतः॥८०॥
त्वमप्येवंविधो विप्र भव तेनाशु सिध्यसि।
इत्युक्त्वा सा गता मह्यं तथाहं करवाणि भोः॥८१॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे शाण्डिल्योपदेशनिरूपणं नाम षष्ठोऽध्यायः॥६॥

## ॥ अथ सप्तमोऽध्यायः ॥

ऋषय ऊचुः —

कर्तॄणां गुणसङ्गेन भक्तीनामीष्यते भिदा।
निर्गुणा तु कथं सा स्यात्कर्ता न गुणवर्जितः ॥ १ ॥
शाण्डिल्यमुनिशार्दूल एष नः संशयो महान्।
छिन्धि भो सूक्तिधाराभिर्भवान् भगवतः प्रियः ॥ २ ॥

श्रीशाण्डिल्य उवाच —

निर्गुणोऽपि भवेत्कर्ता यथैव परमेश्वरः।
यथैव तरणिस्तिष्ठन् प्रकाशयति विष्टपम् ॥ ३ ॥
कूटस्थेऽप्यपरिष्यन्दिक्रियाकोटिर्निरर्गला।
जीवोऽप्यस्ति निराकारो निरानन्दोऽथ निष्क्रियः ॥ ४ ॥
निर्गुणे केवलानन्दे स्वप्रकाशे परात्मनि।
सर्वात्मनाभिवेशे यः स एवाप्राकृतो मतः ॥ ५ ॥
यथा वीरो रणे वृत्तिमेकरूपां प्रपद्यते।
भिनत्ति तरणेर्बिम्बं धीराणां भेद्यमञ्जसा ॥ ६ ॥
एवं वैरेण केषाञ्चिद्भयेन जगदीशितुः।
कामादिभिस्तदिच्छातो वृतेरैक्यं प्रजायते ॥ ७ ॥
सर्वत्र भासते सैव व्यावृत्तस्यापि सर्वतः।
यथा जारं व्रजन्ती स्त्री न विन्दति भुवः श्रमम् ॥ ८ ॥
योगेऽप्यभिमते ध्याने फलं ब्रह्मैव केवलम्।
वृत्तिरोधेन लोकानां भवेच्छास्त्रप्रचोदितम् ॥ ९ ॥
ब्रह्मैव पुत्रभार्यादि वस्तुतो मायया वृतम्।
तत्रानुरागः सर्वेषां शास्त्रहीनं न मुक्तिदम् ॥ १० ॥

शास्त्रेण वा स्वरूपेण वस्तुतः सिद्धिरिष्यते।
हरौ तूभयतः सिद्धिः कथं न भवति द्विजाः॥ ११ ॥
निर्गुणो हि हरिः साक्षाद्येनासौ समुपासितः।
अनन्यवृत्त्या तस्यात्र कर्तुर्निर्गुणता मता॥ १२ ॥
विषयान्तरसंवित्तिव्यावृत्तहृदयस्य या।
वृत्तिरात्यन्तिकी स्निग्धा निर्गुणा समुदाहृता॥ १३ ॥
स्वतन्त्रस्य हरेरिच्छां नियन्तुं नैव शक्यते।
यतोऽस्य प्रीतिपात्राणां भवे निर्गुणता भवेत्॥ १४ ॥
सनकाद्या मुनिश्रेष्ठा निर्गुणा वैष्णवोत्तमाः।
तथैवास्य प्रिया ज्ञेयाः सम्पन्नाः कृपया विभोः॥ १५ ॥
हृदि नित्यं विहरते भगवान् भक्तवत्सलः।
सगुणा निर्गुणास्ते स्युः कृतकृत्याः सुरैर्नुताः॥ १६ ॥
न विष्णुभक्तमाहात्म्ये वैचित्र्यं किञ्चिदिष्यते।
येषां प्रसङ्गतोऽप्यन्ये मुच्यन्ते नारका अपि॥ १७ ॥
बहुजन्मकृतैः पुण्यैः श्रीशस्याप्यनुकम्पया।
दैवात्मसम्पदां पुंसां कृष्णे भक्तिः परात्मनि॥ १८ ॥
भक्तिलीने भवेच्छ्रद्धा श्रवणादौ गुणेष्वतः।
भवेत्प्रेमपरिस्फूर्तिरनन्यास्मिन्नहैतुकी॥ १९ ॥
आसक्तिः शीलनात्तस्य कामिनीनां यथा धवे।
तया विरक्तिः सर्वत्र एतद्धर्माधिरोहणम्॥ २० ॥
ततोऽस्य व्यसनं भक्तेर्बाधकाः स्युस्तथेतराः।
क्षणमात्रवियोगेऽपि जीवनं नैव सम्भवेत्॥ २१ ॥

तदैव गद्गदादीनि गानं नित्यं च रोदनम्।
आनन्दसंप्लवो निद्राभङ्गस्तैमित्यमिष्यते (?)॥२२॥
शान्तवृत्तिः स एव स्यान्निर्गुणो निरपाश्रयः।
मुकुन्दात्मा विनिर्धूतदेहभासा प्रसन्नधीः॥२३॥
तस्यैतत्साधनाभ्यासो क्रमयोगेन सिध्यति।
ललितोक्तिर्मुनिश्रेष्ठाः सर्वानुभवसम्भवा॥२४॥
विरक्तोऽप्यशुचिः शान्तो मितभुग् जितषड्गुणः।
पुण्यैकान्ते समासीनो लब्धविद्यो गुरोरयम्॥२५॥
यथालब्धोपचारेण भक्तियोगेन सेवयेत्।
सदा भक्तप्रसङ्गेषु कुर्वन्भगवतः कथाः॥२६॥
एक एव सदासीनो गायमानो गुणान्विभोः।
भावयेत्तस्य ता लीला याभिश्चित्तं प्रसीदति॥२७॥
बालकैशोरपौगण्डवयः सुन्दरमूर्तिभिः।
अङ्गप्रत्यङ्गसुषमापरिवारमनोहरम्॥२८॥
नानाविहारस्थानानि चिन्तयन्भगवन्मयः।
विशुद्धात्माभिलभते रुचिमस्मिन्मनस्यपि (?)॥२९॥
लब्धसाक्षाद्रुचिश्चित्तं तदन्यस्मिन्विरज्यति।
स्वप्नमोहाद्यवस्थासु तमेवैकं प्रपश्यति॥३०॥
आसज्यते ततो भक्त्या गोविन्दचरणाम्बुजे।
सपर्यासु कथास्वस्य न विन्दति मनाक् श्रमम्॥३१॥
अत्यासक्त्या यदा किञ्चिद्यं विना नाभिविन्दति।
तदैव कृतकृत्योऽयं भवेत् सिद्धात्मभावनः॥३२॥

सगुणा साधनापन्ना सिद्धावस्था तु निर्गुणा।
केषाञ्चिदेव सा साक्षात्प्रसादान्मुरवैरिणः॥ ३३॥
भक्तिश्चतुर्विधा साध्या तस्याऽनुग्रहसम्मिता।
क्रियामिश्रास्तपोमिश्रा गुणमिश्राश्च निर्गुणाः॥ ३४॥
आद्याः सर्वाः समाख्याताश्चरमाः पुनरुच्यते।
भक्तिरेव फलं ब्रह्मन् हरिरेव हि साधनम्॥ ३५॥
हरेरपि हरेर्भक्तिः सात्र भक्तिः स्वयंवरा।
ययेश्वरस्यापि कष्टा कल्पना संहृतिः स्वयम्॥ ३६॥
लीलासु यत्र सर्वासु हेयोपादेयताभ्रमः।
निवर्तते सा श्रद्धेये निरपेक्षापि याऽन्यतः॥ ३७॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे भक्तिस्वरूपनिरूपणं नाम सप्तमोऽध्यायः॥ ७॥

## ॥ अथाष्टमोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

अथ दीक्षां प्रवक्ष्यामि मन्त्रराजस्य भो द्विजाः।
देहेन्द्रियात्मधर्माणां दिव्यभावं यतो भवेत् ॥ १ ॥
कुलत्रये विशुद्धेऽपि स्वयं चापि त्रिधा शुचिः।
गोविन्दैकप्रपन्नात्मा गुरुः संसारतारकः ॥ २ ॥
शमादिगुणसंपन्नः शीलाचारकुलैः शुचिः।
भवपाशमुमुक्षुर्यः शिष्य एवंविधो द्विजः ॥ ३ ॥
स्वस्वाचारविनिर्धूतचित्तः साधुजनप्रियः।
निवृत्तिशास्त्रश्रवणाज्ञातनिर्वेदमानसः ॥ ४ ॥
सोपायनकरः शान्तः शुद्धोऽतिसरलो नतः।
प्रणिपत्य गुरोः पादौ निर्विशेदनुकम्पितः ॥ ५ ॥
ततो बद्धाञ्जलिपुटः प्रणतः प्रणयार्द्रधीः।
विज्ञापयेद्धरिं साक्षाद्गुरुं गौरवतो गिरा ॥ ६ ॥
श्रीमदाचार्य भगवन् करुणाकर भो गुरो।
कृत्वा कृपां मां शरणीकुरु मृत्युभयार्दितम् ॥ ७ ॥
अहन्तामता ग्राहैर्गीर्णं संसारसागरे।
शक्तो मोचयितुं साक्षाद्भवान्हि गरुडध्वजः ॥ ८ ॥
इत्युक्तवन्तं विनतं ज्ञात्वा शीलकुलादिभिः।
ज्ञाताज्ञातैनसां चीर्णव्रतं शुद्धमथातुरम् ॥ ९ ॥
श्रीकृष्णं शरणं कुर्याद्दद्यात्तं वैष्णवीं स्रजम्।
वासयेदन्तिके तस्य ज्ञातुं शीलादिकं गुणम् ॥ १० ॥

विरक्तः सोऽपि भोगेभ्यः पुत्रवद्वृत्तिमद्गृहम्।
विहाय निवसेत्तत्र सेवमानः शुचिर्यथा॥ ११॥
स ताम्रालावुजैः पात्रैः शुद्धैः शुभैस्तथाम्बरैः।
शिक्षन्भागवतान् धर्मान् वसेद् भैक्ष्यमिताशनः॥ १२॥
वैष्णवाश्रममाश्रित्य चरेद्धर्मं निबोधयन्।
ब्राह्मे मुहूर्त्ते चोत्थाय ध्यायेद् गायेद्धरिं गुरुम्॥ १३॥
कृत्वा शौचं बहिर्बाह्यं तीर्थे स्नात्वा धृतांशुकः।
मृदोर्ध्वपुण्ड्रमुद्रादि दधत् श्रद्धाऽऽसनस्थितः॥ १४॥
सन्ध्यां जपं च सावित्र्या ब्रह्मयज्ञं च तर्पणम्।
यथावकाशं निर्वर्त्य गुरुसेवां समाचरेत्॥ १५॥
हरेः सेवां गुरोः सेवां प्रेम्णा नित्यं यथाविधि।
कुर्याद् गुरोरनुमतो भक्तिशास्त्रं सदाभ्यसेत्॥ १६॥
अभ्यस्य भक्तिशास्त्राणि प्रणामादिविधानतः।
गुरोरनुज्ञामादाय गत्वा स्वीयनिकेतनम्॥ १७॥
सम्पन्नहरिभक्तेभ्यो भिक्षां शुष्कान्नमाहरेत्।
एकान्नं सुरहः शुद्धं शुचिरेव स्वयं पचेत्॥ १८॥
पक्त्वा निवेद्य हरये विभज्य द्विजवैष्णवान्।
शक्त्या सुरेभ्यो हुत्वा च भुञ्जीतान्नं मितं लघु॥ १९॥
आचम्य धौतहस्तादिर्मुखं वासो विधाय च।
उच्छिष्टमार्जनं कृत्वा लेपाद्यैः पुनराचरेत्॥ २०॥
ततः शुद्धः पुनः सेवां गुरोः कुर्यात्तदाज्ञया।
भक्तिशास्त्राणि सेवेत स्नात्वाऽथो सेवनं हरेः॥ २१॥

सायंसन्ध्यां विधायैव कीर्तयेद्भगवद्यशः।
हरिभक्तप्रसङ्गेन गुरोर्वा शृणुयादिदम् ॥ २२ ॥
रात्रौ गुरुं परिचरेत्पादसंवाहनादिषु।
ततः शयीत शुद्धात्मा कटे वा कम्बलादिषु ॥ २३ ॥
एवं कुर्वन्तपस्तीव्रं जातभक्तिरुचिः पुमान्।
निवेदयेन्निजात्मानं गुरोरनुमतेन च ॥ २४ ॥
संशोध्य स्वगृहं सर्वं देहं चापि व्रतादिभिः।
गुरोरनुज्ञामादाय एकादश्यामुपोषितः ॥ २५ ॥
यज्ञोपवीतमालादि नवं धृत्वा यथाविधि।
द्वादश्यामुषसि स्नात्वा कृत्वा तत्रैव चाह्निकम् ॥ २६ ॥
पुनः स्नात्वा तीर्थतोयः कौशेयाम्बरधृक्शुचिः।
गुरोः समीपमागत्य कृत्वा मुद्राभिधारणम् ॥ २७ ॥
तस्याऽनुकम्पितः श्रुत्वा महाभागवतागमम्।
गत्वा हरिपदं तत्र धृत्वैव शयनं पुरः(?) ॥ २८ ॥
प्रणमेद्दण्डवद्देवं गृह्णीयात्सुव्रतं हरेः।
गुरुस्तस्मै वदेच्छिक्षां सद्यः संसारमोचनीम् ॥ २९ ॥
उपदेशविधानेन पुराणार्थं समादिशेत्।
अधिकारं गुरुर्ज्ञात्वा बोधयेत्तं द्विजोत्तमम् ॥ ३० ॥
आनन्दमात्रममलं फुल्लेन्दीवरसुन्दरम्।
किशोरं सस्मितं कान्तं नयनानन्दवर्धनम् ॥ ३१ ॥
श्रुतिरूपव्रजस्त्रीणां रासे लास्यपरं वरम्।
निगमागमसङ्गीतमहिमं करुणाकरम् ॥ ३२ ॥

विद्धि भो परमं तत्त्वं श्रीमन्तं नन्दनन्दनम्।
तस्यैवासीद्गिरं सान्तः कदा क्वापि चिदंशतः(?)॥३३॥
मायया संवृतो मुग्धो जीवभावं दृढं गतः।
आनन्देन स्वरूपेण सद्धर्म्मे रहितो यतः॥३४॥
भ्रमतेऽस्मिन्महामोहे अहंममभवोदरे।
आब्रह्मस्तम्भपर्यन्तं नानायोनिमहाभये॥३५॥
ध्यायन्सुखं पुत्रमित्रभार्यादिधनधामसु।
श्वशूकरादिवज्जन्तुः कष्टं मृत्युं च विन्दति॥३६॥
विसृत्यैनं हरिं देवं स्वामिनं च सदा सताम्।
लीलां च तद्वियोगस्य स्मृतिं सुखस्वरूपिणीम्॥३७॥
विद्यया जन्मना चापि कर्मणापि धनेन च।
ईश्वरोऽहं बली भोगी एवं कुर्वे सुखं लभे॥३८॥
एवं नानाविधाभिस्त्वं दुराशाभिः स्थितः सदा।
अधुनाऽनुग्रहात्पुंस ईश्वरस्याप्तशेमुषी॥३९॥
देहेन्द्रियान्तःकरणं तद्धर्माश्चापि सर्वशः।
दारागारसुताप्तादिवसुलोकमिमं परम्॥४०॥
प्राणांश्चापि तथात्मानं सर्वं मे हरयेऽर्पितम्।
निवृत्ताहंममत्वेन कुर्वे वर्तेऽथ यत्प्रभो॥४१॥
दासोऽहं कृष्ण तवास्मीत्येवं वै भावये हरेः।
न ततो बन्धनं मे स्यात्कृपया भगवन् तव॥४२॥
इत्थं सम्भावयत्येवमादिष्टोऽथ सकृद्दृढा।
सङ्कल्प्य सर्वं तस्यैव पादयोरर्पयेद्धरेः॥४३॥

साष्टाङ्गं प्रणिपत्याथो पादाब्जे श्रीगुरोः स्पृशेत्।
प्रसाददानं गुरुणा कृतं चेद्दास्यकृद्भवेत्॥ ४४॥
मुक्त्वाहंममतां धीरो भजेद् देवमहर्निशम्।
गोपिका इव संरक्तश्चरणाम्भोजयोर्हरेः॥ ४५॥
तदाप्रभृति दारेषु पुत्रमित्रधनेषु च।
स्वस्वाम्यं च ममत्वं च त्यजेदेवं जितेन्द्रियः॥ ४६॥
रागी चेद्गुरुणाऽऽज्ञप्तो यावद्दास्यं प्रवर्तताम्।
तथापि तस्य सा सिद्धिः कष्टसाध्या मतिर्मम॥ ४७॥
स्वाम्यं हि द्विविधं देहे दैहिकं जैवमप्यथ।
दैहिकं स्यात्पराधीनं लोकतः शास्त्रतोऽपि वा॥ ४८॥
दासीनां लोकतः स्त्रीणां शास्त्रादेवं परत्र च।
निवृत्तं दैहिकं तेन जैवं तेभ्यो निवर्तयेत्॥ ४९॥
गुरोः प्रपत्तिमुद्दिश्य नान्यथा तानि संस्पृशेत्।
विरक्तो हरिधामानि पुण्यस्थानानि वाश्रयेत्॥ ५०॥
समुच्चरेन्महामन्त्रं श्रीकृष्णः शरणं मम।
जपेच्चापि शुचिः स्नातः श्रीगोपालमहामनुम्॥ ५१॥
अनन्यशरणो दासोऽहमित्येवं हृदा स्मरन्।
गायमानो गुणान्विष्णोश्चरेदविधिगोचरः॥ ५२॥
क्वचित्प्रेमाश्रुनिर्भिन्नपुलको मौनमाश्रितः।
क्वचित्स्मरन् विप्रयोगं हरे रोदिति रौति वा॥ ५३॥
क्वचित्तदानन्दपूर्णो विस्मृतात्मगतिर्भवेत्।
सावधानः क्वचित्तस्य परिचर्यां समाचरन्॥ ५४॥

क्वचिद्दीनतरान् दृष्ट्वा तत्त्वं ब्रूते हरेः प्रियम्।
क्वचिच्च विमुखान्दृष्ट्वा याति मौनं समाश्रितः॥ ५५ ॥
क्वचिद्भागवतान्दृष्ट्वा हर्षादभ्यर्णमेति च।
क्वचिद्विष्णुमयं विश्वं भावयन् वदते स्वयम्॥ ५६ ॥
क्वचिद्भगवतो बिम्बं दृष्ट्वा नन्दति नृत्यति।
क्वचिद् भागवतान्धर्माञ्छ्रुत्वा शोचति चिन्तया॥ ५७ ॥
क्वचिद् भगवतो नामधामलीलादिसङ्गतः।
प्रसन्नः शान्तधीरास्ते वक्ति भागवतागमम्॥ ५८ ॥
एवं नानाविधावस्थासम्भवत्यस्य दैहिकी।
अन्तःकरणसंरोधो भगवत्येव जायते॥ ५९ ॥
देहेन्द्रियान्तःकरणधर्मैश्च भगवन्मयैः।
सर्वत्र सर्वदा शश्वद् भाति तत्त्वं तदेव तत्॥ ६० ॥
एवं निरुद्धचित्तस्य महिम्नाऽथो मधुद्विषः।
नोत्क्रान्तिरस्य भवति सिद्धिरत्रैव जायते॥ ६१ ॥
एवं विरज्यमानस्य पराकाष्ठा निरूपिता।
फलस्य साधनस्यापि रक्तस्याथो निबोधत॥ ६२ ॥
यथाकथञ्चिद्यर्ह्येव जातश्रद्धो गुरुं भजेत्।
गुरुणाऽनुग्रहीतोऽथ स्वीकृत्यैव प्रपन्नताम्॥ ६३ ॥
प्रपन्नोऽथ व्रतैः शुद्धः कृत्वात्मानं निवेदितम्।
निर्माय वैष्णवीं देवीं कलशं स्थाप्य राजतम्॥ ६४ ॥
मण्डपादिस्वहोमान्तं सर्वाङ्गं स्याद् वृताद्व्रतम्।
कलशे देवमावाह्य परिवारेण संयुतम्॥ ६५ ॥

मन्त्राक्षरौषधैस्तीर्थैस्तोयैः संभृतकुम्भतः।
विप्राशीर्वचनैः साकं मङ्गलं मङ्गलस्वनैः॥ ६६ ॥
तन्मन्त्रैरभिषिञ्चेद्वै वैदिकैः क्रमसंभृतैः।
पूर्णो मन्त्राभिषेकेण धौतदेहो नवांशुके॥ ६७ ॥
पीताम्बरे परिदधेत् षण्मुद्रां तिलकान्विताम्।
तुलसीमालिकां पीतसुमनोमालिकामपि॥ ६८ ॥
पीतानुलेपलिप्ताङ्गः सुगन्धैः कृतभूषणः।
सन्मुखे प्रणतो दीनः समासीनो गुरोर्भवेत्॥ ६९ ॥
कृतन्यासो धृतध्यानो गुरुश्चोपदिशेत् त्रिशः(न्मनुम्)।
एवं धार्य प्रणम्यैनं जपन्मन्त्रं शतं ततः॥ ७० ॥
स्वचित्तमर्पयेच्छक्त्या सर्वमर्द्धार्द्धमेव वा।
समाप्य शेषकृत्यं च न्यासध्यानार्चनादिकम्॥ ७१ ॥
अवधार्य महापूजां कुर्यात्सप्तदिनावधिम्।
वर्णलक्षं जपेच्छुद्धो हविष्याशी जितेन्द्रियः॥ ७२ ॥
ततः सहस्रादधिकं नित्यमिष्ट्वा हरिं जपेत्।
वैष्णवेन स्वधर्मेण भव्यमूर्तिर्हरिप्रियः।
लोकद्वयाप्तसर्वार्थकृतार्थः स्याच्छनैः शनैः॥ ७३ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे दीक्षाविशेषनिरूपणं नामाष्टमोऽध्यायः॥ ८॥

## ॥ अथ नवमोऽध्यायः ॥

### अथ कामखण्डात् (?)

श्रीशाण्डिल्य उवाच –

अथ कामप्रयोगार्थं विशेषे च व्रते ब्रुवे।
शुद्धे देशे शुभे काले व्रतं ग्राह्यं यथाविधि ॥ १ ॥
तीर्थक्षेत्रे नदीतीरे विष्णोरायतनेषु च।
गोपालसन्निधौ गोष्ठे गोकुलेऽस्मिन् गिरावपि ॥ २ ॥
अरोगे सर्वसस्याढ्ये वत्सरे सुग्रहान्विते।
उत्तरे शुक्लपक्षे च रवीन्दुगुरुवद्दिने ॥ ३ ॥
कार्तिके मार्गशीर्षे च माघे वा माधवेऽपि वा ।
द्वादशैकादशीपूर्णादिवसेषु स्थिरोदये ॥ ४ ॥
नक्षत्रेषु यथोक्तेषु प्रसन्नेषु ग्रहेषु च।
वीक्ष्याथाऽकडहाचक्रं प्रारभेत गुरोर्व्रतम् ॥ ५ ॥
तत्र तद्दिनतः पूर्वं सर्वप्रायश्चितिं चरेत्।
व्रतैः प्रतिकृतैर्वापि शक्त्या वा स्वधनेन च ॥ ६ ॥
शुद्धः शुभदिनं वीक्ष्य भूमिं शुद्धां च शोधयेत्।
गुरोरनुमतस्तत्र कुर्याद्वास्तुविधिं यथा ॥ ७ ॥
कृत्वा समतलां भूमिं तत्र कृत्वा सुमण्डलम्।
त्रिपञ्चाशत्सुराः पूज्या ब्रह्माद्या मध्यमण्डलात् ॥ ८ ॥
पयोभक्तचरुद्रव्यैर्बलिर्देयो यथोदितः।
भूयो भूमिं समाकृत्य लोष्ठलोमादिवर्जिताम् ॥ ९ ॥
नवभिः सप्तभिः पञ्चभिः करैः परिणाहतः।
चतुर्द्वारसमोपेतं तोरणैर्यूपमण्डितम् ॥ १० ॥

दर्भादिपरिवीतं च शुद्धकाष्ठैः सुमण्डपम्।
तत्र कुर्यात्पञ्चचयि मण्डलं प्राक्परायतम्॥ ११॥
यत्र देवा मण्डयन्ति पान्ति भक्तं स्वशक्तिभिः।
तन्मण्डपमिति ख्यातं कार्यं वै शुभकर्मणि॥ १२॥
चतुर्विंशाङ्गुलोच्छ्राया पालिका सुमनोहरा।
बीजवापः प्रकर्तव्यस्तत्र सप्ताहतः पुरा॥ १३॥
शालीकङ्गुश्च श्यामाकतिलमुद्गाश्च सर्षपाः।
आढकी चापि निष्पावा वपेत्तान् शोध्य मन्त्रतः॥ १४॥
स्वस्वद्रव्यैश्च यजनं कारयेद्ग्रहमण्डले।
विष्णुशङ्करब्रह्मादियक्षपितृविहायसः॥ १५॥
दिक्सिद्धे मण्डले तत्रोदीच्यामेकं हविर्भुजः।
कुण्डलं त्रिमेखलं योनिनाभिपद्माद्यलङ्कृतम्॥ १६॥
मण्डपस्थचतुःस्तम्भमध्ये वेदी मनोहरा।
तस्यां तु सर्वतोभद्रचक्रं कार्यं सुरञ्जितम्॥ १७॥
इत्थं सम्भृतसम्भारो दीक्षाशुद्धांश्च ऋत्विजः।
सम्पाद्य गुरुणाऽऽज्ञप्तः स्वस्तिकर्म समारभेत्॥ १८॥
दीक्षायाः प्रथमे घस्रे मङ्गलैर्गीतवाद्यकैः।
सोपाध्यायो गुरोर्गेहं गत्वा स वृणुयाच्च तम्॥ १९॥
गुरुः शिष्येण विप्रैश्च वृतो मण्डपमाव्रजेत्।
द्वारपूजां विधायास्य भूसंस्कारं चरेदथ॥ २०॥
संशोध्य पञ्चगन्धेन श्रीखण्डाद्यैश्च धूपयेत्।
विकीर्य सर्षपादीनि सम्मार्ज्यमभिसंनयेत्॥ २१॥

पुण्याहवाचनं तत्र ब्राह्मणैर्वेदपारगैः ।
वास्तुपूजां ततः कुर्यात् क्षेत्राधिपतयश्च ये ॥ २२ ॥
न्यस्यात्मा मूलमन्त्रेण गुरुं गणपतिं यजेत् ।
पीठन्यासं निजेशस्य कुर्याद्वै सर्वभद्रके॥ २३ ॥
कर्णिकासु न्यसेच्छाली मन्त्रैः कूर्चाक्षता अपि ।
हैमं तु कलशं तत्र तोरणोक्तकषायकैः ॥ २४ ॥
सम्पूर्यावाहयेत्तत्र कला मूलार्णसम्भृताः ।
देवं च पूजयेत्तत्र नैवेद्यान्तं यथाविधि ॥ २५ ॥
विधायानीय सद्वह्निं निधायाभ्यर्च्य देशिकः ।
लक्षयोनौ हरेर्बीजं कुण्डे सम्भावयन्न्यसेत् ॥ २६ ॥
क्रव्यादांशविहीनाग्निं कुशैः प्रज्वालयेदथ ।
प्रज्वलन्तं समुत्थाय प्रोपस्थयोपसंविशेत् ॥ २७ ॥
वह्निन्यासं ततः कुर्यात्पूजनं जातवेदसः ।
गर्भादानादिसंस्कारा नामाहूत्या भवन्ति ते ॥ २८ ॥
जिह्वाङ्गमूर्तिमन्त्रैश्च सिद्धं कृत्वा विभावसुम् ।
चरुं च श्रपयेच्छुद्धं ताम्रे वा मृन्मयेऽपि वा ॥ २९ ॥
अभिधार्य त्रिधा भज्य आनीय कुशविष्टरे ।
कुण्डे स्वदेवं सम्पूज्य गन्धपुष्पाक्षतादिभिः ॥ ३० ॥
देवस्याग्नेर्मुखस्यैकां कृत्वा शुद्धास्वभागतः ।
एकादशाहुतीर्हुत्वा षडङ्गावरणानि च ॥ ३१ ॥
ध्रुवामध्यमभागेन इम मन्त्रेण होमयेत् ।
अवशिष्टाष्टभागेन बलिं दद्याद्यथाविधि ॥ ३२ ॥

सर्वतोभद्रराशीशकुजादीनां पृथक् पृथक्।
ऋक्षाणामपि चाङ्गानामुत्तरापोशनं ततः॥ ३ ३ ॥
कलशस्य निजेशस्य ततो नीराजनादिकम्।
ईशानावकरे पूर्णं करकं मण्डितं न्यसेत्॥ ३ ४ ॥
तत्रास्त्रदेवतामिष्टां स्वरक्षार्थं प्रदक्षिणम्।
धारां सम्पातयेदस्य मण्डपस्य समन्ततः॥ ३ ५ ॥
श्रीहरेः शासनाद्देवा सशिष्यं मामवन्तु ते।
पुनस्तं करकं तत्र विन्यस्यार्च्य च देवताम्॥ ३ ६ ॥
चरोस्तृतीयांशमथो सशिष्योऽभ्येति चात्ति वा।
ततस्त्वाचमनं कार्यं शुद्धो विष्टरसंस्थितौ॥ ३ ७ ॥
षडङ्गन्यासयोगेन शिष्यं चाभिमृषेद्गुरुः।
ततोऽभिमन्त्रितं दन्तकाष्ठं संस्कारयेदिमम्॥ ३ ८ ॥
ततोऽस्य मूलमन्त्रेण शिखां बध्वा कुशास्तरे।
स्वापयेद्बोधितं शिष्यं गुरुश्चापि तथा भवेत्॥ ३ ९ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चम भक्तिखण्डे मखपूर्वाङ्गनिरूपणं नाम नवमोध्यायः॥ ९ ॥

## ॥ अथ दशमोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

ब्राह्मे मुहूर्त्ते चोत्थाय दैहिकं सन्निवर्त्य च।
मूलाभिमन्त्रितं दत्तं काष्ठं शिष्याय देशिकः ॥ १ ॥
कारयेच्च स्वयं कुर्यात्तथा पूर्वाह्निकी क्रिया।
भूषितोऽथ प्रणम्यैवं गुरोः पार्श्वेऽथ संविशेत् ॥ २ ॥
गुरुर्निजेष्टं सम्पूज्य मन्त्रद्रव्यैर्हुनेत्ततः।
अष्टोत्तरशतं जप्त्वा अष्टोत्तरसहस्रकम् ॥ ३ ॥
ततो व्याङ्गाङ्गतोच्छित्यै किञ्चित्सङ्कल्पयेद्धिया।
पञ्चगव्यं प्राशयेत्तं दिव्यदृष्ट्यावलोकयेत् ॥ ४ ॥
तस्य हृत्पद्मतो जीवं योगेनात्मनि योजयेत्।
पिण्डं संशोधयेदस्य मन्त्रमूलकलाणुभिः ॥ ५ ॥
निवृत्तिं च प्रतिष्ठां च विद्यां शान्तिं तथा पराम्।
शान्त्यतीतां च पदयोः कलास्तस्य गुरुर्न्यसेत् ॥ ६ ॥
स्वाधिष्ठानेऽस्य जीवासुधीमतां (?) श्रोत्रत्वगदृशः।
जिह्वाघ्राणे च वाक्पाणिपादपायुश्रुतीन्द्रियम् ॥ ७ ॥
भूतपञ्चकमेवं हि मात्रापञ्चकमेव च।
हृदयाद्यं सोमसूर्याऽग्निमयं तेजस्त्रयं ततः ॥ ८ ॥
वासुदेवं सङ्कर्षणं प्रद्युम्नं चानिरुद्धकम्।
द्वात्रिंशत्तत्त्वरूपं च तत्त्वाध्वानं विभावयेत् ॥ ९ ॥
मणिपूरे स्मरेदस्य अतलादिचतुर्दश।
लोकाध्वानं न्यसेन्मन्त्री सत्यान्तं भुवनत्रयम् ॥ १० ॥

अनाहते अकारादिक्षकारान्तां तु मातृकाम्।
वर्णाध्वानमिदं दिव्यं देशिकोऽत्र धिया न्यसेत्॥११॥
सहस्रारे पुनस्तस्य मन्त्रवर्णां स्वदेवताम्।
मन्त्राध्वानं न्यसेदस्य तत्र दिव्यांश्च भावयेत्॥१२॥
इत्थं विचिन्त्याध्वषट्कं करेणाभिमृशन् हृदि।
तिलाज्याहुतिभिः षट्कं ततो नाम्नाभिशोधयेत्॥१३॥
विलापयेत्परं तस्मिन्मन्त्राध्वानावधिः पुनः।
मन्त्राध्वानमयं तत्त्वं तत्स्वस्थानेषु विन्यसेत्॥१४॥
एवं मन्त्रमये देहे दिव्यदृष्ट्या स्वयोगतः।
स्वस्थितं तस्य चैतन्यं ब्रह्मरन्ध्रे निवेशयेत्॥१५॥
साङ्गावरणतो देवमाज्याहुत्यापि होमयेत्।
अग्न्यादिमहदन्तं च चतुर्भिरपि तर्पयेत्॥१६॥
ततो हुनेदिमं पूर्वं प्राणबुध्यादिभिर्मया।
यत्कृतं तत्तु सकलं भवे ब्रह्मार्पणं मम॥१७॥
सम्पूर्णसाङ्गतासिद्ध्यै हुत्वा वै देवबीजतः।
प्रणवेन च साङ्गं मे कुरु स्वाहेति संहुनेत्॥१८॥
ततोऽग्नेः प्रार्थनं कार्यं विष्णोरपि मदात्मनः।
ततः पूर्णाहुतिं कुर्याद्वह्निमुद्वासयेदथ॥१९॥
पूर्णपात्रं विसृज्याथ कलशे हरिमर्चयेत्।
नेत्रबन्धं विधायास्य नयेद् दैवतसन्निधौ॥२०॥
सुमनोऽञ्जलिनापूर्य दापयेद्धरिपादयोः।
नेत्रबन्धमपाकृत्य पाठयेत्सुगुरोः स्तुतिः॥२१॥
ततो मातृमुखान्न्यासान्मन्त्रस्यास्य तनौ न्यसेत्।
स्नानमण्डपमानीय पञ्चवाद्यैर्मनोहरैः॥२२॥

पूर्वास्यं सङ्कलीकृत्याभ्यर्च्य विप्राशिषां गणैः।
उदङ्मुखं चाभिषिञ्चन्मन्त्रैः कलशसम्भृतैः॥ २३ ॥
अवशिष्टजलेनैनं गुरुराचामयेत्ततः।
वाससी विमले तस्मै दत्वा मौनमुपाश्रितः॥ २४॥
देवभावं समासाद्य उपविष्टं कुशास्तरे।
शिष्यस्य दक्षिणे कर्णे वदेन्मन्त्रं त्रिशो (?) गुरुः॥ २५ ॥
शिष्योऽपि देवमायातं मन्त्रद्वारेण भावयेत्।
ततः सद्यो जपेन्मन्त्रं तेषामैक्यं धिया गृणन्॥ २६ ॥
ततः समर्प्य सर्वस्वं तदाधीनो भवेत्सदा।
तज्जन्मदिवसे चाथ तदीयानां च जन्मनः॥ २७ ॥
मन्त्रप्राप्तिदिने दिव्यदिनानामुत्सवं चरेत्।
गीतैर्वाद्यैश्च नृत्यैश्च महापूजोपचारकैः॥ २८ ॥
एवं लब्धमहामन्त्रैर्विप्राम्बुतुलसीदलैः।
कुर्यात्सप्तदिने तत्र महापूजां मिताशनः॥ २९ ॥
नित्यार्चनं ततः कुर्यात्तथा नैमित्तिकार्चनम्।
पुरश्चर्याविधानेन ततः सिद्धमनुर्भवेत्॥ ३० ॥
हिंसका लिङ्गिनो व्रात्या मद्यमांसभुजोऽपि ये।
न संसर्गं भजेत्तेषां निजधर्मपरो व्रती॥ ३१ ॥
कामस्य चानुरूपेण जपन्कुर्वन्स्मरेद्धरिम्।
तत्तत्कार्यपरं ध्यात्वा हुनेद्द्रव्यैर्यथाविधैः॥ ३२ ॥
वैदिकं तान्त्रिकं स्मार्तं मिश्रं पौराणिकं तथा।
भक्तिशास्त्रोदितं चापि षड्विधं नित्यपूजनम्॥ ३३ ॥
वैदिकं पौरुषैर्मन्त्रैस्तथा नारायणादिभिः।
प्रणवेनापि मूलार्णैर्यतिनो ब्राह्मणस्य च॥ ३४ ॥

वैखानसं पञ्चरात्रं ब्रह्मोक्तं नारदोदितम्।
तान्त्रिकं तु द्विजातीनां दीक्षितानां प्रशस्यते ॥ ३५ ॥
स्मार्तं बौधायनप्रोक्तं मिश्रं वेदेन मिश्रितम्।
पौराणिकैर्नामभिश्च भवेत्तच्छूद्रधर्मिणः ॥ ३६ ॥
भक्तैः परम्पराचीर्णं प्रेमैकविधिगोचरम्।
अहर्निशं भवति यत्तद्भक्तार्चनमिष्यते ॥ ३७ ॥
भक्तिशास्त्रोपदेशस्तु पुरा प्रोक्तो यथाविधि।
आधारान्तं स्वगृह्योक्तं वैदिकं तत्र जायते ॥ ३८ ॥
तान्त्रिकं तान्त्रिकैरेव साधनैरभिषेचनैः।
पौराणिकोपदेशैश्च देशे काले शुभे मते ॥ ३९ ॥
चन्द्रसूर्योपरागे च गङ्गायमुनयोस्तटे।
श्रद्धायाश्च गुरोश्चापि भवेत्तद्धि समागमे ॥ ४० ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे दीक्षाप्राप्तिनिरूपणं नाम दशमोऽध्यायः ॥ १० ॥

## ॥ अथैकादशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

पाश्चात्ययामे चोत्थाय निशायाः शुद्धधीः शुचिः।
स्वान्ते विचिन्त्य चात्मेशं गोपिकेशं गवां गणे ॥ १ ॥
विचिन्त्यात्मकृतिं पश्येद् देवद्विजगुरून् शुचीन्।
देहयात्रां च संकल्प्य भूमिं स्तुत्वा शुचिर्भवेत् ॥ २ ॥
सुखासने स्वस्तिकेन समासीनोऽथ चाचमेत्।
प्राणान्मूलार्णतो यच्छन् मूलाधारं नियम्य च ॥ ३ ॥
पिण्डे वायुं प्रपूर्याथ जीवज्योतिः सुवर्धयेत्।
हृत्पुण्डरीकं सम्वोध्य शिरः पद्मं च भासयेत् ॥ ४ ॥
हृदयाब्जे तु यमुनापरीतं गोकुलं स्मरेत्।
किं वा वृन्दवनं ध्यायेत् परमानन्दमन्दिरम् ॥ ५ ॥
सर्वर्तुकुसुमोपेतं लसत्कल्पद्रुमाञ्चितम्।
नानामण्डलसौधालिजलाशयमनोहरम् ॥ ६ ॥
मुनिरूपविहङ्गानां चित्रराजीवकूजितम्।
मातृभावं गताभिर्यद्गोभिश्चारुभिरञ्जितम् ॥ ७ ॥
गोपैः स्मृतिपुराणाद्यैः सर्वाभरणभूषितैः।
श्रुतिरूपभजस्त्रीभिर्नानाभावैः समर्चितम् ॥ ८ ॥
तत्र कल्पद्रुमस्याधो रत्नसिंहासने हरिम्।
अनौपम्यं वेणुधरं फुल्लेन्दीवरसुन्दरम् ॥ ९ ॥
त्रिभङ्गललितं ध्यायेत्करुणावरुणालयम्।
तत्र पीताम्बरं ध्यायेद् गुरुं भूषाङ्गभूषितम् ॥ १० ॥

प्रसन्नं भक्तिशास्त्रं यत्कृपया बोधयन् निजान्।
तदीयचरणाम्भोजरजःसंक्लृप्तमात्मनः॥ ११ ॥
पिण्डं विभावयेत्प्राज्ञो योग्यं भजनकर्मणि।
ततो मानसिकं कार्यं गन्धाद्यैस्तत्समर्चनम्॥ १२ ॥
ततः स्तुत्वा प्रणम्यैनं क्षमाप्यावर्तयेन्मनुम्।
स्तुवेन्नमेद्वा मनसा पूजयेज्जगदीश्वरम्॥ १३ ॥
ततो नित्यजपं जीवः कल्पयेत्परमात्मने।
अणीयसे हृदम्भोजे हंसरूपेण तिष्ठते॥ १४ ॥
सोऽहं सोऽहं जपन् जीवो मूलाध्यासेन बाध्यते।
देशिकास्मै श्रुतिः शास्ति दासोऽहं तेन भावयेत्॥ १५ ॥
इत्थं भावयतस्तस्य सखा सख्यं प्रयच्छति।
हंसः सोऽहमिति ध्यानं तदा तस्य भविष्यति॥ १६ ॥
ततोऽर्चायां सुतान् शिष्यान् भृत्यान् वा योजयेद् गृहे।
सम्मार्जनोपलेपाद्यैः कुर्युः स्नाता सुसम्भृतिम्॥ १७ ॥
दन्तकाष्ठं ततः कार्यं निषेधेऽप्याम्रजम्बुकैः।
गोमयं मृत्कुशान् धृत्वा द्विवासाः स्नानमाचरेत्॥ १८ ॥
स्वयं सशिष्यस्तीर्थादौ गत्वाथ पेटकं न्यसेत्।
ततो मूत्रपुरीषादि शौचं शास्त्रोक्तमाचरेत्॥ १९ ॥
कृतध्यानार्चनजपं निवेद्य हरये ततः।
मलस्नानं बहिः कृत्वा अवगाह्य ततो जलम्॥ २० ॥
देशकालौ समुच्चार्य कुशपाणिर्यथाविधि।
कृत्वैवं वैदिकं स्नानं मन्त्रमेतमुदीरयेत्॥ २१ ॥
श्रीमन्मुकुन्द यज्जाते गङ्गे त्रिपथगामिनि।
पुनीहि मामम्भसा त्वं संसारासक्तमानसम्॥ २२ ॥

कलिन्दगिरिसम्भूते श्रीमुकुन्दैकवल्लभे।
देहि मां दास्यभावेन सेवनं मुरवैरिणः॥ २३॥
देहि मे योग्यतां देवि परिचर्याविधौ हरेः।
तुर्यप्रिये जगद्वन्द्ये गोविन्दरतिवर्द्धिनि॥ २४॥
कृष्णे तरणिजे देवि श्रीवृन्दावनभूषणे।
गोपगोपिगवां सेव्ये शुद्धोदधिकृतालये॥ २५॥
नमो भगवति तुभ्यं नमो रासविलासिनि।
नमो वेदमयि मातर्भजनानन्दलब्धये॥ २६॥
इत्येवं बहुधा स्तुत्वा निमज्योन्मज्य वैष्णवः।
जलदेवीं समावाह्य दिव्यवैकुण्ठनिम्नगाम्॥ २७॥
श्रीगोपालं ततो भक्तोऽभ्यर्च्य मूलार्णसम्भृतैः।
आचम्याथो सुधारूपैस्तर्पयेद् यमुनाजलैः॥ २८॥
श्रीगोपालं तर्पयामि एवं श्रीगोकुलेश्वरम्।
गोविन्दं गोपिकानाथं यशोदोत्सङ्गलालितम्॥ २९॥
श्रीनन्दनन्दनं देवं श्रीनाथं श्रीहरिं प्रभुम्।
पुरुषोत्तममीशानं श्रीकृष्णमिति नामभिः॥ ३०॥
श्रीराधिकां स्वात्मरूपां नित्यसिद्धां व्रजेश्वरीम्।
पूर्णानन्दप्रकाशात्मरूपां वामाङ्गभागिनीम्॥ ३१॥
गोपिकाश्चापि गावश्च वत्सा गोपाश्च वैष्णवाः।
परिवारं व्रजस्थानां लीलाधामानि तर्पयेत्॥ ३२॥
ततस्तीरं समासाद्य अङ्गं सम्माज्र्य चाग्रतः।
शुद्धे शुक्लाम्बरे दध्यात् कौशेये वापि पीतके॥ ३३॥
ततस्तीर्थरजो लिप्त्वा पीत्वा तीर्थपयस्ततः।
तीर्थमालां ततो धृत्वा स्वयं तीर्थमयो भवेत्॥ ३४॥

ततः प्रक्षालयेत्पाणी आचम्यासनसंस्थितः।
कुङ्कुमस्योर्ध्वपुण्ड्राणि द्वादशाङ्गेषु धारयेत्॥ ३५॥
नासिकामूलमाश्रित्य दण्डाकारं सुशोभनम्।
सान्तरालं दधेद्भालं केशवाय नमोऽस्त्विति॥ ३६॥
उदरे कुमुदाकारं नमो नारायणाय च।
हृदये कमलाकारं माधवाय नमोऽस्त्विति॥ ३७॥
शङ्खाकृतिं कण्ठकूपे गोविन्दाय नमोऽस्त्विति।
कट्यां तु दक्षिणे विष्णुर्मत्स्याकारो व्यवस्थितः॥ ३८॥
दक्षिणेऽथ भुजे वंशत्रये स्यान्मधुसूदनः।
दीपवर्तिसमे दक्षकर्णप्रान्ते त्रिविक्रमः॥ ३९॥
वामकट्यां वामनाय नमो वामभुजे तथा।
श्रीधराय नमः कर्णे हृषीकेशाय वै नमः॥ ४०॥
कूर्माकारे पृष्ठदेशे पद्मनाभाय वै नमः।
दामोदरं ककुद्देशे गदाकारेऽभिधारयेत्॥ ४१॥
वासुदेवं निराकारे मूर्ध्नि भक्तोऽभिधारयेत्।
सङ्कर्षणादिभिः कृष्णे एवं नामभिरर्पयेत्॥ ४२॥
केचिच्छ्रियं वामवक्षोमण्डनां धारयन्ति हि।
चरणाम्बुमृदः पुण्ड्रं विरक्तस्य सदा भवेत्॥ ४३॥
आदर्शे वा जले वीक्ष्य पुण्ड्राणां धारणं भवेत्।
गोपीचन्दनमृत्स्नायास्ततो मुद्राभिधारणम्॥ ४४॥
ललाटे चक्रमेकं स्यान्मन्त्रमुद्रास्त्वनेकशः।
दक्षिणे बाहुमूले तु न्यसेच्चक्रचतुष्टयम्॥ ४५॥

वामबाहौ तु चतुरः शङ्खानां चापि धारणम्।
हृन्मध्ये पद्ममेकं तु गदाः स्युरेतदन्तरे॥ ४६॥
शङ्खं तु कण्ठकूपे च ऊर्ध्वं नाम समुद्रिकाः।
शेषेषु पुण्ड्रदेशेषु चक्रमेकैकमर्पयेत्॥ ४७॥
मन्त्रमुद्राश्च सर्वत्र माया (अथो) भाग्यं दधद्द्विजः।
पञ्चाङ्गं क्षत्रिये पुण्ड्रं चतुरङ्गं विशो मतम्॥ ४८॥
स्त्रीशूद्राणां सदैकाङ्गं शिरोंसगलहृत्सु वा।
सम्प्रदायानुसारेण पुण्ड्रं मुद्रास्त्वनेकधा॥ ४९॥
निजेष्टदेवमुद्रासौ मन्त्रमुद्रा ह्युदाहृता।
स्वधर्ममूलमुद्रा तु नाममुद्रा तु सम्मता॥ ५०॥
दशाक्षरमयी मुद्रा मन्त्रमुद्रा प्रकीर्तिता।
अष्टाक्षरमयी मुद्रा नाममुद्रा तु सम्मता॥ ५१॥
अधृत्वा तिलकं स्वाङ्गे मुद्राषट्कं तथोपरि।
यः करोति हरेरर्चां जपं वा तस्य निष्फलम्॥ ५२॥
यो न दद्याद् द्विजो मोहात्पुण्ड्रं वै पुण्यकर्मणि।
तस्य क्रिया भवेद् व्यर्था रौरवं सोऽधिगच्छति॥ ५३॥
स्नानं सन्ध्या जपो होमः स्वाध्यायः पैतृकं तथा।
देवकार्य्यं ब्रह्मणानामूर्ध्वपुण्ड्रेण चेष्यते॥ ५४॥
ऊर्ध्वपुण्ड्रधरः शुद्धः सत्क्रियां कुरुते तु यः।
सा क्रिया वैष्णवी प्रोक्ता सर्वपापापनुत्तये॥ ५५॥
तुलसीकाष्ठजा माला ऊर्ध्वपुण्ड्रं द्विजन्मनाम्।
भक्तिज्ञानविरागाय तथा सत्कर्मणो मतम्॥ ५६॥
विप्राणां नित्यमेतद्धि प्राधानाङ्गं सुकर्मणाम्।
ऊर्ध्वपुण्ड्रं च तुलसीकाष्ठमालातिपावनी॥ ५७॥

वैदिकं तान्त्रिकं स्मार्तं पौराणं वैष्णवं तथा।
ऊर्ध्वपुण्ड्रं चोर्ध्वगतिं निषेधन्ति तथेतरम् ॥ ५८ ॥
हरिपादाम्बुजा मुद्रा तुलसीकाष्ठमालिका।
ऊर्ध्वपुण्ड्रं द्विजातीनां स्नानसन्ध्यादिवच्छुभम् ॥ ५९ ॥
द्वादशाङ्गोर्ध्वतिलकास्तुलसीकाष्ठमण्डिताः।
तीर्थमृद्धूसराङ्गाश्च विरक्ता वैष्णवोत्तमाः ॥ ६० ॥
नास्तिक्यादथवालस्याद्वचनान्तरविभ्रमात्।
न धारयन्त्यूर्ध्वपुण्ड्रं मालां ते हरिविद्विषः ॥ ६१ ॥
कर्मज्ञानाङ्गभूतानि निषेधवचनानि चेत्।
कर्मज्ञानाङ्गभूतानि स्पृशन्ति दिशोऽपि वै ॥ ६२ ॥
विहाय वैष्णवं धर्मं संसारं तर्तुमिच्छति।
त्यक्तनौर्वारिधेः पारं बाहुभ्यामाप्तुमिच्छति ॥ ६३ ॥
एष निष्कण्टकः पन्थाः श्रीपतेश्चरणाश्रितः।
अनेन विश्वगहनमतिवर्त्याभिमोदते ॥ ६४ ॥
कुशाजिनासने स्थित्वा पात्राण्यासाद्य शोधयेत्।
पञ्चपात्राणि दर्भाद्याचमनीयाम्बुसङ्ग्रहैः ॥ ६५ ॥
पवित्रदर्भपाणिः सन्द्विवासाः प्राङ्मुखो द्विजः।
कुर्यात्स वैदिकीं सन्ध्यां तर्पणं वापि सम्भवात् ॥ ६६ ॥
ततस्तु कलशं शुद्धं वस्त्रपूताम्बुसम्भृतम्।
तुलसीकुसुमैः साकमादाय गृहमाव्रजेत् ॥ ६७ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे स्नानतिलकमुद्राविधिनिरूपणं नाम एकादशोऽध्यायः ॥११॥

## ॥ अथ द्वादशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

निधाय कलशं स्थाने पादशौचं विधाय च।
अपवित्रं पवित्रो वेत्यपि सम्प्रोक्षयेत्तनुम् ॥ १ ॥
मन्दिरद्वारमागत्य प्रणम्य हरये मुदा।
शङ्खघण्टादिवाद्येन श्लोकयेत्तं कृताञ्जलिः ॥ २ ॥

भो भो जगन्मङ्गलमङ्गल प्रभो !
भो भो नवेन्दीवरसुन्दरद्युते ॥
भो भो समस्तैर्निगमागमैः स्तुत !
भो भो रमाललितपादपल्लव ! ॥ ३ ॥

विबुध्य भो भक्तजनानुकम्पया
व्रजेन्दिरां पश्य रमाभिराम।
प्रोत्फुल्लराजीवविकाशभासुरां
मिलन्मिलिन्दालिनिचोलसंवृताम् ॥ ४ ॥

द्विजा द्विजाः किं भगवत्भवत्स्तुतिं
कुर्वन्ति चाव्यक्तपदैर्मनोहरैः।
असौ दिदृक्षुस्तरणिस्त्रयीमयः
समेति वृन्दावनगोचरं हरिम् ॥ ५ ॥

गोबालकैस्त्वामभिगोपबालकाः
समाह्वयन्ते कृतकौतुकाः स्वयम्।
यशोदयेत्थं प्रतिबोधितः प्रभो
निजाननुगृह्य तथैव जागृहि ॥ ६ ॥

एवं प्रबोध्यं श्रीकान्तं जगदानन्दसुन्दरम्।
प्रविशेन्मन्दिरे विष्णोर्मार्ज्जनं लेपनं चरेत् ॥ ७ ॥

पात्राणि क्षालयेत्तस्य वस्त्रपीतासनादिभिः।
पाद्यार्घ्याचमनीयेन्दुशकलैर्गन्धभूषणैः ॥ ८ ॥
नैवेद्येन समभ्यर्च्य कुर्यान्नीराजनोत्सवम्।
गुरोश्च पूजनं दक्षे पीठे तत्पादुकाद्वये ॥ ९ ॥
शृङ्गारपीठे यन्त्रार्चां कुर्याद्वामस्थितो हरेः।
गुरुपीठाग्रवामाङ्के प्रभोः शृङ्गारमण्डपम् ॥ १० ॥
शोध्यं मालयाम्बुभृङ्गारैः पृथक्पात्रचतुष्टयम्।
कुर्याद्वा त्रिस्त्रिधैकैकं गुरोरस्यानुवर्त्तिनाम् ॥ ११ ॥
तत्र पीतं तु संस्थाप्य कलशं चापि दक्षिणे।
गन्धं पुष्पं च धूपं च दीपमालार्त्तिकादिकम् ॥ १२ ॥
तथा गुरोः पात्रगणं गुरुपीठस्य दक्षिणे।
देवपात्राणि चैवं हि कलशात्पृथुलानि च ॥ १३ ॥
तेषु पूजनसद्द्रव्यं क्षालितं प्रोक्षितं न्यसेत्।
नैवेद्यमिष्टदेवस्य पक्कं दौग्धं फलं तथा ॥ १४ ॥
पाद्यार्घ्याचमनीयाम्बुमधुपर्कादिकत्रयम्।
सौवर्णै राजतैस्ताम्रैः पात्रैर्वामे त्रिभिस्त्रिभिः ॥ १५ ॥
स्नानपीठं दक्षिणे च सपात्रं विन्यसेद्विभोः।
स्नानाम्बुकलशं शङ्खं पात्राण्युभयतोऽस्य तु ॥ १६ ॥
वेदगृहे स्वपात्राणि देवागारे हरेर्गुरोः।
शय्यागारे प्रियाणां च दक्षिणादिक्रमादिह ॥ १७ ॥
प्रज्वाल्य दीपमुत्थाय स्थित्वा स्वीयासने द्विजः।
मूलमन्त्राच्छिखां बध्वा करौ प्रक्षाल्य चाचमेत् ॥ १८ ॥
केशवाय नमः स्वाहा तथा नारायणाय च।
माधवायेति चाचम्य गोविन्दाय करौ मृजेत् ॥ १९ ॥

शेषैः खानि तथाङ्गानि शोधयेद् विष्णुतत्परः।
अनन्तं योगशक्तिं च समभ्यर्चारभेदथ॥ २०॥
गुरुं चैव नमस्कृत्य ध्यात्वाभ्यर्चा रमेत वा।
एवमाचम्य मूलेन प्राणायामं त्रिभिश्चरेत्॥ २१॥
मूलमन्त्रं धिया ध्यायेत्तस्मिन् श्रीनन्दनन्दनम्।
किशोरं श्यामलं कान्तं पीतवासोविभूषितम्॥ २२॥
पद्मासने समासीनं पद्माद्यर्चितपद्युगम्।
सर्वश्रुतिस्तुतं देवैर्मुनिभिश्चापि सेवितम्॥ २३॥
स्वस्तिकासनमासीनः पूरकुम्भकरेचकैः।
निर्धूमेन सधूमेन पिण्डं संशोध्य यत्नतः॥ २४॥
संहारक्रमतो दग्ध्वा सङ्कर्षणमुखांशुतः।
आकाशादि पुनर्ध्यायेदुत्पन्नं मूलवर्त्मना॥ २५॥
एवं पिण्डे योगबलाज्ञातेऽतिविमले हरेः।
एवं जीवकलां ध्यायेद्दासभूतां हरेः प्रियाम्॥ २६॥
एकादशेन्द्रियैर्दीप्तां प्रभया व्याप्य तिष्ठति।
तां संयोज्य हरेः पादपद्मयोः शुद्धिमागताम्॥ २७॥
शुद्धस्फटिकवर्णस्य गुरोः पादाब्जयोर्न्यसेत्।
सम्भाव्य शासनां तस्य सहस्रारां निवर्त्य च॥ २८॥
सर्वेन्द्रियैः सह प्राणैः शुद्धां निर्वासयेदथ।
आचम्य पीतपूजां च न्यासं कुर्याद्यथाविधि॥ २९॥
ध्यायेत्सङ्कर्षणं देवं सहस्रशिरसं मितम्।
नीलाम्बरं हलधरमेककुण्डलसुन्दरम्॥ ३०॥
नागकन्यासहस्रैश्च सनकाद्यैः प्रपूजितम्।
तस्यैव सितदंष्ट्राग्रे ध्यायेदिन्दीवराकृतिम्॥ ३१॥

धरणीं पीतवसनां सर्वाभरणभूषिताम्।
वराभयोद्यतकरां समासीनां शुचिस्मिताम्॥ ३२ ॥
माथुरं मण्डलं ध्यायेत्तत्र वृन्दावनस्थलीम्।
दिव्यरूपमनोहारिकालिन्दीकुञ्जशोभिताम्॥ ३३ ॥
नमः सङ्कर्षणायेति वराहायेति मन्त्रतः।
पृथ्वि त्वयेति मन्त्रेण आसनं परिकल्पयेत्॥ ३४ ॥
प्रक्षाल्याचम्य शुद्धोऽसौ न्यासषट्कं ततश्चरेत्।
मातृकां विन्यसेत्पूर्वं षष्ठब्रह्मतनूं पराम्॥ ३५ ॥
नारायणो ऋषिस्तस्या गायत्रीच्छन्द ईरितः।
लक्ष्मीनारायणो देवोऽधिकृत्यै विनियोजनम्॥ ३६ ॥
मन्त्रपदैः स्वरैर्वर्गैर्हृदयाद्यङ्गषण्मते।
अङ्गुष्ठादिक्रमेणापि षड्धानुकृत्य चापरान्॥ ३७ ॥
विद्याब्जकाचकुम्भाब्ज( ?)गदाशङ्खसुदर्शनैः।
शब्दार्थाकारसत्कान्तं लक्ष्मीनारायणं स्मरेत्॥ ३८ ॥
नारायणमहामन्त्रन्यासं कुर्यात्पुरोदितम्।
एवं न्यस्ततनुर्मन्त्री साक्षादक्षरतां गतः॥ ३९ ॥
आचक्राय विचक्राय सुचक्राय ततः परम्।
त्रैलोक्यरक्षाचक्राय असुरान्तकराय च॥ ४० ॥
चक्रपञ्चकतो मन्त्री पञ्चाङ्गान्यस्य रक्षयेत्।
भवेत्तेजोमयो मन्त्री चक्रपञ्चकरक्षितः॥ ४१ ॥
श्रीमन्मुकुन्देत्यङ्गुष्ठे तर्ज्जन्यां चरणाविति।
मध्यमायां सदा पादं शरणं स्यादनामयम्॥ ४२ ॥

अनामिकाकनिष्ठायां प्रपद्ये च करेऽखिले।
एवं च हृदयाद्यङ्गे पञ्चानुकटिधामसु ॥ ४३ ॥
उपस्थनाभिहृत्कण्ठकरकूर्पासकेषु च।
मुखे च रसनाघ्राणनेत्रश्रोत्रेषु भ्रूषु च ॥ ४४ ॥
शिरःसु वैकशो वर्णान् विलोमेन न्यसेदथ।
समस्तव्यापकं कुर्यादनुलोमाक्षरं मुखे ॥ ४५ ॥
भूतेन्द्रियमनोबुद्धिजीवतत्त्वैश्च सन्मते।
प्रणवेन युतान् वर्णान् न्यसेदथ दशाऽर्णवः ॥ ४६ ॥
न्यसेद्यथायथं स्थाने बीजैरन्यैः सकामतः।
एवं न्यस्ततनुर्मन्त्री साक्षान्मन्त्रमयो भवेत् ॥ ४७ ॥
ध्यायेद्गोकुलमण्डलेऽतिविमले क्रीडन्मणिप्राङ्गणे
नीत्वा वै निजपाणिपल्लवतले हैयङ्गवीनं नवम्।
बालैर्नृत्यपरैः परस्परगुणैरानन्दितं लालितं
फुल्लेन्दीवरसुन्दरव्रजवनीवृन्दे मुकुन्दं हरिम् ॥ ४८ ॥
एवं ध्यात्वा शतं जप्त्वा पूजयेद्वा रमापतिम्।
दशाक्षरमहान्यासं कुर्याद्वा परमोत्तमम् ॥ ४९ ॥
नारदो मुनिरस्यापि विराट्छन्दो मतः पुनः।
नन्दनन्दो हरिर्देवो निगमागमसंस्तुतः ॥ ५० ॥
गोशब्देन जगत्सर्वं गोप्यश्च श्रुतयोऽवनात्।
तदर्थजननात्सर्वा जनशब्देन कीर्तिताः ॥ ५१ ॥
वल्लभः परमात्मैव नित्यानन्दैकविग्रहः।
ताभिर्विज्ञापितोऽस्माकं स्वप्रकाशः परप्रभुः ॥ ५२ ॥
तस्मै स्वमहसे स्वीयं स्वाहारूपेण संवृतम्।
महसं प्रापयामीति मन्त्रार्थोऽयं भवेदिह ॥ ५३ ॥

स्निग्धा वृत्तिर्भवेद्गोपीजनस्तद्व्यापितो वरः।
तदानन्दघनं कान्तं दासीभूत्वा नमाम्यहम् ॥ ५४ ॥
नमोऽन्तो भक्तिसन्मन्त्रः स्वाहान्तो ज्ञानकर्मणि।
मन्त्रार्थं भावयेत्पूतो न्यासान् कुर्याद्यथाविधि ॥ ५५ ॥
पञ्चस्वरेण बीजेन पञ्चाङ्गानि भवन्ति ह।
चक्रपञ्चकयोगैर्वा स्वाहान्तैर्जातिसंयुतैः ॥ ५६ ॥
हृच्छिरोऽथ शिखा प्रोक्ता तनुत्रं चास्त्रमुच्यते।
पार्श्वयुग्मं कटियुगं पृष्ठं मूर्द्धा षडर्णतः ॥ ५७ ॥
मध्ये करे तस्य पृष्ठे पार्श्वयोस्तस्य मन्त्रतः।
व्याप्य संहृतिसृष्टिभ्यां स्थित्या चाङ्गुलिषु न्यसेत् ॥ ५८ ॥
अर्णशः करयुग्मे च दशपञ्चाङ्गकानि च।
मातृकामन्त्रवर्णाभ्यां पुटितां योजयेत्तनौ ॥ ५९ ॥
भूः कं खमित्याहुस्तथाहं महदित्यपि।
प्रकृतिः पुरुषश्चाथो परस्तत्त्वैश्च दिङ्मितैः ॥ ६० ॥
मन्त्रार्णान् विन्यसेत्पादयुगे शेफसि वक्षसि।
मुखे शिरसि हृन्मध्ये पुनस्तत्त्वद्वयं न्यसेत् ॥ ६१ ॥
सर्वाङ्गे तत्त्रयं प्रोक्तमेवं तु दशधा भवेत्।
शिरो मुखं च हृदयं शिखां च चरणं तथा ॥ ६२ ॥
विलोमेन च विन्यस्य भवेत्तत्त्वमयः पुमान्।
मस्तकादि च पादान्तं कुर्यात्त्रिर्व्यापकं पुमान् ॥ ६३ ॥
मूर्ध्नि घ्राणे च श्रवणे नासिकाननपाणिषु।
उदरे शेफसि जान्वोः पादयोः सृष्टितो न्यसेत् ॥ ६४ ॥
हृदये चोदरे लिङ्गे जानुनोः पादयोस्तथा।
मस्तके नयने श्रोत्रे नासायां वदने स्थितिः ॥ ६५ ॥

पादादिमूर्धपर्यन्तं संहारं सृष्टितोऽन्यथा।
एवं त्रिधा न्यसेद्वर्णान् मन्त्रराजस्य चैकशः॥ ६६॥
जानुलिङ्गजठरहृन्मुखघ्राणं च श्रोत्रदृक्।
विलोमा दशधा हृत्या स्थित्यापि च तृतीयकः॥ ६७॥
मूले शिखौ च नाभौ च हृदि कण्ठे मुखे तथा।
दक्षांसे चापि वामांसे दक्षेऽथापि च वामके॥ ६८॥
स्कन्धदेशेऽपि नाभौ च कुक्षौ हृदि कटौ तथा।
दक्षपार्श्वे वामपार्श्वे पृष्ठे चापि च श्रोत्रयोः॥ ६९॥
मन्त्रराजस्य विन्यासः सर्वेषां च परः स्मृतः।
मस्तकास्यदृष्टिमध्यश्रोत्राणां नासयोर्द्वयोः॥ ७०॥
बाहुमूले च मध्ये च मणिबन्धाङ्गुलीषु च।
अङ्गुल्यग्रे दक्षवामभेदा तु दशधा द्विधा॥ ७१॥
ऊरुमूले जानुगुल्फेष्वङ्गुल्याद्यग्रयोर्द्विधा।
सव्यापसव्याद्दशधा पञ्चधाङ्गुलिभिश्च वा॥ ७२॥
पूर्वदक्षिणपाश्चात्त्योदीचीषु शिरसाऽत्र च।
वामदक्षविभेदेन भुजांसवियषु (?) तद्भवेत्॥ ७३॥
मस्तके नयने चास्ये कण्ठे हृदि च तुन्दके।
आधारे च शिवे जानुयुगे च प्रपदे तथा॥ ७४॥
श्रोत्रयोर्नेत्रयोर्गण्डयुगे चांसयुगे तथा।
पार्श्वस्फिगूरुजान्वाख्ययुगयोर्जङ्घयोः पदोः॥ ७५॥
एवं हि दशधा न्यासो दशार्णस्यार्णशः स्मृतः।
विभूतिपञ्जरन्यासः सर्वन्यासवरः स्मृतः॥ ७६॥
स्वमूर्तिपञ्जरन्यासं बिन्दुनादकलायुतम्।
द्वादशार्णैः स्वरैः पुम्भिः केशवाद्यैश्च भास्करैः॥ ७७॥

सर्वाङ्गबिन्दुरूपाय नादरूपपरात्मने।
परतत्त्वात्मने शक्त्या शान्त्या ज्ञानात्मने नमः॥७८॥
सच्चिद्ग्राह्यस्वरूपाय केवलानेकरूपिणे।
स्वतःप्रकाशबोधाय प्रत्यग्धाम्ने नमो नमः॥७९॥
भालेऽथ चोदरे वक्षःस्थले कण्ठेऽथ दक्षिणे।
पार्श्वाङ्गलभागे च वामे चैवं त्रिधा भवेत्॥८०॥
पृष्ठे ककुदि मूलेन द्वादशार्णं च मस्तके।
सृष्टिस्थितिसंहतिभिः पुनर्न्यासं दशाङ्गकम्॥८१॥
पञ्चाङ्गास्त्राणि विन्यस्य मुद्राध्यानं समाचरेत्।
वेणुमुद्रा प्रिया तस्य माला श्रीवत्सकौस्तुभौ॥८२॥
ततो ध्यायेद्घनश्यामं पीतकौशयवाससम्।
रम्ये वृन्दावनारामे दिव्यकल्पतरोस्तले॥८३॥
गवाङ्गणे गोपगणे व्रजस्य युवतीगणे।
दर्शनीयतमं देवं कोटिमन्मथमन्मथम्॥८४॥
सर्वानन्दघनं कान्तं सर्वभूषणभूषितम्।
पादाब्जतलमारभ्य भावयेद्धारणापथैः॥८५॥
तद्ध्यानानन्दमुदितो जपेत्तं पूजयेच्च वा।
अस्य भावयतः सर्वाः सिद्धयोऽर्चन्ति पद्युगम्॥८६॥
मनोऽभीष्टा गतिस्तस्य कृपया शार्ङ्गिणो भवेत्।
निग्रहानुग्रहे शक्तो वश्याकर्षणवारणे॥८७॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे मन्त्रराजन्यासनिरूपणं नाम द्वादशोऽध्यायः॥१२॥

## ॥ अथ त्रयोदशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

अथ श्रीसिद्धगोपालमन्त्रराजस्य भास्वतः।
विधानं प्रोच्यते गुप्तं सारं श्रुतिगिरामिह ॥ १ ॥
पूर्वोक्तलक्षणैर्हीनो न चैनं प्रार्थयेत्क्वचित्।
न स सिद्धिमवाप्नोति सिद्धिकामोऽपि यः सदा ॥ २ ॥
भवतां भक्तियोगेन भक्तानामनुकम्पया।
सर्वगूढतमं वक्ष्ये हरिणा प्रेरितो हृदा ॥ ३ ॥
अष्टादशार्णमन्त्रस्य ऋषिर्ब्रह्मा प्रकीर्त्तितः।
गायत्री त्रिपदा च्छन्दः श्रीगोपालो हरिप्रभुः ॥ ४ ॥
कृषिर्भूवाचको णश्च परमानन्दवाचकः।
सदानन्दस्ततः कृष्णः प्रोच्यते पुरुषोत्तमः ॥ ५ ॥
गावो लोकात्मका जानन् स्वयं ते तु ततः पदात् (?)।
नित्याखण्डितविज्ञानो गोविन्दो हरिरेव हि ॥ ६ ॥
एवं तु सच्चिदानन्दघनाय परमात्मने।
श्रीगोपीजनकान्ताय जीवज्योतिः समर्पयेत् ॥ ७ ॥
अथवा सच्चिदानन्दो भक्तरक्षणदीक्षितः।
भक्त्यैकवृत्तिलभ्योऽसौ दासीभूत्वा भजाम्यहम् ॥ ८ ॥
मन्त्रार्थं भावयेदेवमाचम्यास्याङ्गकैस्त्रिभिः।
प्राणानायम्य मूलेन न्यसेदङ्गैः सजातिभिः ॥ ९ ॥
आद्यबीजेन हृदयं कृष्णायेति शिरो मतम्।
गोविन्दाय शिखा प्रोक्ता वर्म गोपीजनेति च ॥ १० ॥

वल्लभाय भवेन्नेत्रे स्वाहेत्यस्त्रमुदाहृतम्।
न्यसेदेतानि करयोरङ्गुलीषु यथाक्रमम्॥ ११॥
सर्वाङ्गे सर्वमेवैवं न्यसेद् व्याप्त्या त्रिधा ततः।
प्रणवव्यापकं कृत्वा क्लीं बीजं चास्य एव वा॥ १२॥
शिरोरराटभ्रूमध्यश्रोत्रनेत्रनसां द्वयोः।
वक्त्रकण्ठे बाहुमूले बाहुमध्ये करद्वये॥ १३॥
वक्षःस्थले हृदि तथा नाभौ कट्यां च शेफसि।
जानुद्वये पादयोश्च न्यसेदेकैकमक्षरम्॥ १४॥
प्रणवं मस्तके कृत्वा पदन्यासं समाचरेत्।
मस्तके वदने वक्षःस्थले गुह्योरुयुग्मयोः॥ १५॥
पञ्चाङ्गं च पुनर्न्यासं पूर्वोक्तं चास्य संचरेत्।
अथ न्यासान्तरान्वक्ष्ये नमोऽन्तस्य महामनोः॥ १६॥
यैर्दिव्या जायते भक्तिस्त्रिषु लोकेषु दुर्लभा।
मातृकामेकपञ्चाशद्भेदे कृत्वा त्रिधादितः॥ १७॥
आचमेत्तैस्त्रिभिः स्वाङ्गैः शिखाबन्धनपूर्वकम्।
ब्रह्माण्डविवरे लग्नां ध्यात्वा शिरसि भासुराम्॥ १८॥
सुषुम्णां हरिपादाब्जनीरनीलहरीमिव।
तदध्वलब्धगङ्गाम्भः सिक्तामात्मतनुं तनुम्॥ १९॥
संहरेत्तेन मार्गेणानन्तवक्त्रानिलानलैः।
भूर्याति गन्धं गन्धोऽपि सलिलं तद्रसो रसम्॥ २०॥
वह्निं वह्नेः स्वरूपं च रूपं वायुपथे स च।
स्पर्शं स्पर्शोऽपि चाकाशं तच्च शब्दं स चात्मनि॥ २१॥
इन्द्रियाणि मनस्तानि मनो वैकारिकं महत्।
स्वस्वाधिष्ठितदेवेशैः संहृत्य प्रकृतिं जपेत्॥ २२॥

वासनाभिः कर्ममलैर्नयेद्ब्रह्मणि तां लयम्।
अक्षरात्मतयात्मानं भगवच्छब्दशब्दिते ॥ २३ ॥
नत्वा प्रसादं सम्प्राप्य भवेदक्षरतां गतः।
नादात्मनोन्मुखीभूतघनीभूतेन बिन्दुना ॥ २४ ॥
कलाविलासरूपेण विश्वमक्षरमूर्तिमत्।
वासुदेवाक्षरं प्राप्य ततः सङ्कर्षणं स्मरेत् ॥ २५ ॥
प्रद्युम्नं मध्यगं कृत्वाऽनिरुद्धं सर्वतस्ततम्।
तत्त्वमूर्तिमयो भूत्वा प्रणवेन परात्मना ॥ २६ ॥
ततो मूलार्णसतत्त्वनिर्मितां भावयेत्तनुम्।
१ २ ३ ४ ५ ६
अणो ऋकस्तथा चैचो बिन्दुसर्गौ च दीर्घकः ॥ २७ ॥
७ ८ ९ १० ११
प्लुतोदात्ताऽनुदात्ताश्च लयः स्पर्शस्य पञ्चकम्।
१२ १३ १४ १५ १६
अन्तस्थाश्चोष्मकालं क्षं तथा चार्द्धविर्सगकौ ॥ २८ ॥
१७ १८
अनुनासिकसंज्ञाश्च यमाश्चाष्टदशार्णकाः।
मन्त्रराजस्य क्लृप्ता वै वर्णैर्वर्णगणः स्वयम् ॥ २९ ॥
पुरुषः प्रकृतिर्भूतपञ्चकैरिन्द्रियाणि च।
मनःक्रमेण तत्त्वानां न्यासं प्रोक्तं यथाक्रमात् ॥ ३० ॥
शिरोरराटेन्द्रियाणि हृदयं नाभिरेव च।
पार्श्वं पृष्ठः ककुच्चेति कट्याङ्गानि विदुर्बुधाः ॥ ३१ ॥
पार्श्वं मूर्तयो दिव्याः केशवो भवता विभुः।
गोपालश्चेति मूलार्णैर्वृत्तिपञ्चाङ्गकं भवेत् ॥ ३२ ॥
मूर्तिपञ्चाङ्गकं न्यस्य तत्त्वसप्ताङ्गकं न्यसेत्।
षड्विंशपञ्चविंशश्च भूरसेन्दुगुणेन्दुभिः ॥ ३३ ॥

रुद्रैश्छिद्रैश्च सत्तत्त्वैर्निजनाथैर्निजाङ्ककैः।
गोपालकेशवाद्यैश्च विभुः षड्विंशके मताः ॥ ३४ ॥
शिरोवक्त्राकृतौ नेत्रश्रोत्रनासासु जैह्वके।
कण्ठहृन्नाभिलिङ्गेषु मूलाधारे च पृष्ठके ॥ ३५ ॥
तथा ककुदि बाह्वोश्च पार्श्वयोः पादयोस्तथा।
त्वगसृग्मांसमेदोऽस्थिमज्जाशुक्रेषु चादिगः ॥ ३६ ॥
वक्त्रमण्डलहीनोऽन्यः परे तत्त्वानुसारतः।
षड्विंशे पुरुषो जीवः प्रकृतिः प्रकृते कृतिः ॥ ३७ ॥
सप्तषोडशकं चापि विकारगणमुच्यते।
अभिन्नः पुरुषाज्जीवस्तत्त्वानां पञ्चविंशके॥ ३८ ॥
भूतमात्रेन्द्रियात्मानः स्युः सप्तदशके हरिः।
षोडशे हरिरात्मैव भूतेन्द्रियमनोयुतः ॥ ३९ ॥
जीवात्मपरमात्मनौ तत्त्वानां स्युस्त्रयोदश।
पुरुषः प्रकृतिर्व्यक्तमहङ्कारेण पञ्चकम् ॥ ४० ॥
एकादश मनोजीवौ न च प्रोक्तं तु तौ विना।
मात्राज्ञानेन्द्रियाणि स्युस्तानि भूतानि कर्मभिः ॥ ४१ ॥
पुरुषस्तु शिरः प्रोक्तोऽप्यन्यच्च हृदयादिकम्।
स्वरव्यञ्जनयोगेन मूलमेभिः प्रविन्यसेत् ॥ ४२ ॥
तत्र मुद्रामुपाश्रित्य प्राणायामपथाश्रितः।
अस्पर्शास्पर्शकान्तस्थाः स्वरा एव स्वरास्तथा ॥ ४३ ॥
बिन्दुसर्गविहीनास्ते सर्गखण्डगताः परे।
वर्गशः स्वरमूलार्णतत्त्वानां क्रमशो मताः ॥ ४४ ॥
एवं विन्यस्य मूलार्णानायम्याचम्य मूलतः।
विभूतिपञ्जरं चैव न्यसेद्वै मूर्तिपञ्जरम् ॥ ४५ ॥

विभूतियो हरेः सृष्टा मूर्त्तयो हरिणा धृताः।
लोकन्यासं ततः कुर्यात्क्ष्मापातालादिसत्यतः ॥ ४६ ॥
भूतन्यासं ततो वर्णाश्रमवेदादि विन्यसेत्।
न्यसेत्तत्त्वकला दिव्याः सिद्धयः शक्तयस्ततः ॥ ४७ ॥
गुणाश्च हृदये स्वस्थो न्यसेद्भगवतो मुनिः।
आनन्दविग्रहं न्यासं ततः कुर्यात्त्रिधा हृदि ॥ ४८ ॥
ध्यात्वा भगवतो मूर्त्तिं सर्वावयवसुन्दराम्।
फुल्लेन्दीवरनीलाभां किशोरां परमाद्भुताम् ॥ ४९ ॥
पीताम्बरां चित्रमाल्यां मुक्ताभरणभूषिताम्।
मायूरमुकुटोष्णीषवेणुवेत्रालकैर्वृताम् ॥ ५० ॥
पादयोस्तस्य वाराहं जान्वोर्नरहरिं स्मरेत्।
ऊरुद्वये मत्स्यमस्य कट्यामेव त्रिविक्रमम् ॥ ५१ ॥
अग्रजं चोदरे कृत्वा हृदि कृष्णं जगत्पतिम्।
कण्ठे कूर्मं च भुजयोर्ध्यायेद्रामं सहानुजम् ॥ ५२ ॥
मुखे बलं सदा विज्ञं कल्किनं ककुदि न्यसेत्।
तथागतं पृष्ठदेशे कादिमन्त्रैर्यथोदितैः ॥ ५३ ॥

१ २ ३ ४ ५
संवित्तिः परमामोदा अखण्डा नित्यभासुराः।
६ ७ ८ ९ १०
स्वतन्त्रा स्वेच्छिकालङ्घ्यादिव्योऽप्यक्लिष्टकारिणी ॥ ५४ ॥
११ १२ १३ १४ १५ १६
ईश्वरी चापि विज्ञात्री कीर्तिः श्री कृष्णा धृतिः।
एतास्तु षोडशकलाः षोडशाङ्गेषु भावयेत् ॥ ५५ ॥

१ २ ३ ४ ५ ६
प्रियं मोदं प्रमोदं च ब्रह्मानन्दं रसं तथा।
भगषट्केन भक्तस्य द्वादशाङ्गेषु भावयेत् ॥ ५६ ॥
लीलाविग्रहमस्यापि न्यसेन्न्यासचतुष्टयम्।
माथुरं मण्डलं पादे जान्वन्तं क्षीरसागरम् ॥ ५७ ॥
श्वेतद्वीपं च कट्यन्तं नाभ्यन्तं तु रमागृहम्।
वक्षोऽतं शुद्धवैकुण्ठं व्यापि वैकुण्ठकं हृदि ॥ ५८ ॥
कण्ठे कालिन्दीनिकेतं बाह्वोर्गोवर्धनं गिरिम्।
मुखे वृन्दावनं भव्यं ललाटे गोकुलं न्यसेत् ॥ ५९ ॥
श्रुतिसिद्धाः पादयोः स्युः तपःसिद्धास्तु मध्यतः।
भक्तिसिद्धास्तु भुजयोर्नित्यसिद्धास्ततो मुखे ॥ ६० ॥
गोपालदशकं तस्य नवाङ्गेषु विभावयेत्।
गुणैश्च विग्रहैः स्वैः स्वैः स्वरूपन्यास उच्यते ॥ ६१ ॥
लीला तु संमुखे तस्य भक्तिरस्य च दक्षिणे।
पृष्ठेऽस्य योगमाया तु ईशशक्तिस्तथोत्तरे ॥ ६२ ॥
अधस्तात्तु क्रियाशक्तिर्ज्ञानशक्तिस्तथोर्द्ध्वतः।
स्वेच्छासिद्धिं तु सर्वत्र तस्य देवस्य चिन्तयेत् ॥ ६३ ॥
ध्यायेत्पादतले तस्य उत्कुशेशयपल्लवे।
वज्राङ्कुशध्वजयवस्वस्तिकाद्युपलक्षिते ॥ ६४ ॥
भक्तिः पराङ्गसम्पूर्णे भक्तसारङ्गसेविते।
तर्कशक्तिसमाकीर्णे कालव्यालभयच्युते ॥ ६५ ॥
पादाब्जलतिकाङ्गुल्यो नखचन्द्रांशुराजिताः।
भाग्यसौभाग्यसंरक्ता मुनिमानसनूपुराः ॥ ६६ ॥

गुणमञ्जीरकटकैर्गुल्फकन्दे महन्मये।
पुष्करे जङ्घयुगले श्रियासंलालिते शुभे ॥ ६७ ॥
जानुनी मुकुरे भव्ये भक्तदोषनिवारके।
रम्भास्तम्भनिभं चोरुयुगं मौञ्जीगणोद्धतम् ॥ ६८ ॥
चक्रबिम्बनिभे तस्य नितम्बे विक्रमक्रमे।
पीताम्बरं योगमायामयं काञ्चीं श्रियं मताम् ॥ ६९ ॥
नाभिं नभोनिम्नतरां वलिवल्गूदरे हरेः।
भुवनाम्भोजजलधिं अतसीकुसुमप्रभम् ॥ ७० ॥
हरिन्मणिगणाबद्धकपाटं हृदयं हरेः।
श्रेयसः सकलस्यास्य श्रियः श्रीवत्समालयम् ॥ ७१ ॥
हारग्रैवेयरुचकैः कलाभिरुपशोभितम्।
कौस्तुभं कम्बुकण्ठस्थं कैवल्यमिव मूर्तिमत् ॥ ७२ ॥
वैजयन्तीं परां भूतिं वनमालां यशोमयीम्।
वेदत्रयीं यज्ञसूत्रधृतिमंसयुगं विभोः ॥ ७३ ॥
स्थलाम्बुजे करतले क्षेमस्य शरणस्य च।
पञ्चविद्यानिभास्तस्य अङ्गुल्यः कल्पशाखिनः ॥ ७४ ॥
भुजे भुजगभोगाभे लोकपालमहोदये।
सर्वसिद्धिमणिव्रातमुद्रिकाः कटकाङ्गदौ ॥ ७५ ॥
चुबुकं हिबुकं तस्य चेतोलोहस्य मुद्गरम्।
पूर्णचन्द्रप्रभे वक्त्रे गण्डे मुकुरसुन्दरे ॥ ७६ ॥
अलकैर्ललिते मुक्तैर्योगसाङ्ख्ये सुकुण्डले।
अनुरक्ताऽनुरागेण लोभेनाधरपल्लवम् ॥ ७७ ॥
दन्तैः स्नेहकलाव्यक्तैः कुन्दकुड्मलशोभितैः।
ह्रियमाणोत्तरोष्ठेन स्मितं भक्ततिरस्कृतौ ॥ ७८ ॥

निगमागमसंगीतसरणीं रसनां दधत् ।
तिलप्रसूनोन्नसेन सुषमैकधनेन वै ॥ ७९ ॥
अरविन्ददलाभ्यां च लोचनाभ्यां कृपावृतम् ।
वर्षद्भक्तजनीवृन्दे मुखेन्दुवरमण्डलम् ॥ ८० ॥
भ्रूकुटी धनुषे विज्ये भयभङ्गकरे नृणाम् ।
तपोमयं रराटोऽस्य पदं मारकतप्रभम् ॥ ८१ ॥
दधन्माणिक्यतिलकं चारुमुक्താललन्तिकाम् ।
सुरत्ने कर्णाभरणे कर्णे मीमांसिके शुभे ॥ ८२ ॥
मायूरमुकुटं भास्वन्मणिमञ्जुलमण्डितम् ।
बिभर्ति परमां ज्योतिः सारभूतिं च चक्रिमाम् ॥ ८३ ॥
दधत्केतकसत्पत्रं भक्तिसौरभसंश्रयम् ।
वेणीं पन्नगराजस्य भोगभूतां मनोहराम् ॥ ८४ ॥
स्वरब्रह्मात्मिकां तस्य भजनानन्दमन्दिराम् ।
करे मुरलिकां दिव्यां सम्मोहनहरिप्रियाम् ॥ ८५ ॥
वेत्रं चापि जगन्नेत्रं गवां तेषां गिरां शुभम् ।
पादुके भक्तियुगले पीठमक्षरमुत्तमम् ॥ ८६ ॥
चामरे व्यजने कान्ते यशोधर्मौ मधुद्विषः ।
भक्तप्रेमघनं छत्रं श्वेतं चामृतवर्षणम् ॥ ८७ ॥
क्रीडोपस्करणं भक्तिप्रभेदबहुधोदितम् ।
भृङ्गारकं च मुकुरं भुक्तिवीटकभाजने ॥ ८८ ॥
चतुर्धा तत्तत्प्रकारैः पुराणानि च केलयः ।
पार्षदप्रवरा भक्ता यमुनोपनिषद्रसा ॥ ८९ ॥
षडैश्वर्यगुणं कान्तं लीलाकमलमुत्तमम् ।
श्रुतयो गोपिका दिव्या गावोऽपि स्मृतयः शुभाः ॥ ९० ॥

देवेशा बालकास्तत्र मुनयोऽपि विहङ्गमाः।
चिन्तामणिमयं स्थानं कल्पद्रुविपिनं शुभम् ॥ ९१ ॥
एवं महोत्तमध्यानं कृत्वा हृदयमण्डले।
आरभेत सपर्यान्तं यथाविभवविस्तरम् ॥ ९२ ॥
दिव्यन्यासमये धीरो वक्ष्यमाणार्चनं भवेत् ॥ ९३ ॥
मिश्रन्यासस्य वक्ष्यामि पूजनं सुरदुर्लभम्।
नैतन्न्यासात्परो न्यासः श्रीगोपालस्य च वल्लभः ॥ ९४ ॥
सकृत्कृतेऽपि ते तस्थुः पादाक्रान्तसुराधिपाः।
स्वेच्छासिद्धिः स्वयं तस्य चरणाम्भोजसेविनाम् ॥ ९५ ॥
न शिष्यतेऽत्र कर्तव्यं पुरुषार्थचतुष्टये।
अनेन दीक्षितो यस्य कुले भवति भूसुरः ॥ ९६ ॥
सोऽपि सर्वकुलः पूज्यो यथा देवो रमापतिः।
पूजया चोपदेशेन सिद्धिरेषां गरीयसी ॥ ९७ ॥
दीक्षितस्यैव वंश्यानां कुलदीक्षा प्रजायते।
उपदेशे कृते तेषां सिद्धिरव्यभिचारिणी ॥ ९८ ॥
प्राणात्ययेऽपि नो वाच्यं रहस्यं दुर्धियं प्रति।
येन केन प्रकारेण गोपनं फलसिद्धये ॥ ९९ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे न्यासाध्यायवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

## ॥ अथ चतुर्दशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

आचम्य कुसुमैर्मन्त्रैर्गोविन्दस्यापि सौरभैः।
करौ प्रक्षाल्य शृङ्गारपीठे देवं नयेत्ततः ॥ १ ॥
रथपीठे प्रतिष्ठाप्य नयेच्छृङ्गारमण्डपम्।
गुरोराज्ञां समासाद्य महामन्त्रं समुच्चरेत् ॥ २ ॥
भो भो भक्तजनानन्द परमानन्द कृपानिधे।
मदीयसेवनासिद्ध्यै व्रज शृङ्गारमण्डपम् ॥ ३ ॥
इत्युक्त्वाथो महामन्त्रं जगत्त्रयभगोदयम्।
स्वीयात्मपरिवारैश्च ततः श्रीगोकुलेश्वर ॥ ४ ॥
श्रीमद्यशोदाप्राणैकधनेत्युक्त्वा ततो वदेत्।
कृपया श्रीमदार्याणां स्वकीयमनुगृह्य माम् ॥ ५ ॥
सोपचारं ततोऽप्युक्त्वा द्विवारं चोपधारयेत्।
दासोऽहं श्रीनाथ तवास्मीत्येवं परिकीर्तयेत् ॥ ६ ॥
पुष्पाञ्जलिं समर्प्याथो यन्त्रराजं निवेशयेत्।
शृङ्गारपीठादादाय श्रीनाथस्य पदाब्जयोः ॥ ७ ॥
सौवर्णं राजतं वापि बीजषट्कोणमण्डितम्।
वृत्तं दिग्दलसंशोभि वलयैर्भूपुरार्चितम् ॥ ८ ॥
बाह्योद्देशमनोहारि श्रीविहारिनिकुञ्जकम्।
प्रतिष्ठितं वैदिकेन विधानेन शुभोदये ॥ ९ ॥
सङ्कल्पयेदथाखण्डं लीलानन्दविहारिणः।
विहाराय निकुञ्जस्य स्थापयेद् यन्त्रमन्दिरम् ॥ १० ॥

विन्यस्यात्मनि मन्त्रांश्च भूतशुद्धिं विधाय च।
शरणाख्यमहायन्त्रं मूलेनात्रापि विन्यसेत् ॥ ११ ॥
ततस्तीर्थजलैः पुष्पैः सेवनं तुलसीदलैः।
पीठन्यासोक्तमन्त्रैश्च दिव्यमन्त्रैस्तथा परैः ॥ १२ ॥
महामन्त्रं समुच्चार्य व्रजेशमिथुनं नयेत्।
पञ्चामृताम्बुभिः स्नाप्य पूजयेन्मूलमन्त्रतः ॥ १३ ॥
कृत्वाऽधिवासनं चैव पीठे चाष्टदलं चरेत्।
मथुरादि समारभ्य गोकुलान्तानि पूजयेत् ॥ १४ ॥
विहारकुञ्जं वृन्दाया ध्यात्वा चारु वनं ततः।
मिथुनं पूजयेत्कुर्यात्त्रिदिनं सुमहोत्सवम् ॥ १५ ॥
पायसेन हुनेदग्नौ वैदिके मूलमन्त्रतः।
ब्राह्मणान् तर्पयेद्भक्त्या हरिं सन्तर्प्य मार्ज्जयेत् ॥ १६ ॥
एवं सिद्धे महायन्त्रे हरिः सन्निहितः सदा।
भवेत्परिकरैः साकमन्यथा चैकलप्रभुः ॥ १७ ॥
एवं प्रतिष्ठिते यन्त्रे नित्यपूजां भजेद्धरेः।
विधाय चोपचाराणि शालग्रामदिनान्विते ॥ १८ ॥
यन्त्रे पुष्पाञ्जलिं दद्याद्गायत्र्या मूलमन्त्रतः।
आचम्य स्वासने स्थित्वा पात्रासादनमाचरेत् ॥ १९ ॥
स्नानमण्डपतो वामे मण्डले क्षीरसागरम्।
शीतामलामृता मोदा शुक्ला शुद्धाः समर्चयेत् ॥ २० ॥
पिण्डेन नाम्ना पादेषु त्रयीं पीठे ह्यथर्वणम्।
तीर्थतत्त्वं पाञ्चजन्यं तत्त्वतीर्थसरित्त्रयीम् ॥ २१ ॥
इमं म इति सम्पूर्य ब्रह्मानन्दं सुयामुनम्।
शुद्धाम्बुकलशादत्र गन्धमाल्ये ततो ददेत् ॥ २२ ॥

श्रीनाथहस्ताम्बुजराजहंस
मुक्ताफलं मानसतीर्थसंस्थः ।
श्रीकान्तकण्ठप्रभवेन घोषः
समर्च्चने सन्निहितो दरोऽस्तु ॥ २३ ॥

सर्वत्रैव नमो वाच्यं श्रीनाथस्यामुकाय ते ।
इति दत्वा दक्षकोणे कुम्भं शुद्धाम्बुसम्भृतम् ॥ २४ ॥
मण्डले चन्द्रसरसं यन्त्रेषु यमुनां प्रियाम् ।
कुमुद्वतीं कञ्जवतीं निकुञ्जां मञ्जुघोषिणीम् ॥ २५ ॥
अपराधहरीं पुण्यां लावण्यामृतवर्षिणीम् ।
पादेषु वरुणो विष्णुः सोमश्चौर्द्धेययः सरः (?) ॥ २६ ॥
नमोऽमलयामुनाब्जाय यन्त्रस्य मुखादिषु ।
गोविन्दं च मुकुन्दं च वासुदेवं समर्च्चयेत् ॥ २७ ॥
तदर्पितेऽथ पानीये विशेषाम्बुघटं न्यसेत् ।
स्वादिष्टयेति सम्पूर्य पुनः शङ्खस्य दक्षिणे ॥ २८ ॥
स्नानीयकलशं स्थाप्यं शङ्खार्घ्याचमनान्यथ ।
शङ्खतीर्थेन सम्प्रोक्ष्य सर्वपूजोपचारकम् ॥ २९ ॥
शङ्खादुत्तरतश्चाधो शेषं भूमिं हिमाचलम् ।
कैलासं हेमकूटं च केसरं रत्नपर्वतम् ॥ ३० ॥
कपर्दनार्कौ सम्पूज्य दिवं ब्रह्मकमण्डलु ।
ततो ब्रह्मद्रवां गङ्गां तत्र वाच्ये सितासिते ॥ ३१ ॥
द्रव्यं दत्वा ततः पात्रान्तरे शुद्धाम्बुपूरणम् ।
शुद्धाम्बुकलशं चार्प्य देवभृङ्गारकादिह ॥ ३२ ॥

ततोऽर्द्धतो मण्डलेऽर्च्यं कुसुमाकरपुष्करम्।
दलेषु अम्बुजा कृष्णा विष्णुक्रान्ताथ केतकी ॥ ३३ ॥
वृन्दा कुन्दा चम्पका च मन्दारा मोदनी पुनः।
पात्रे प्रभाकरं चार्घजले पुष्करपुष्करम् ॥ ३४ ॥
पात्रान्तरे तथाधाय द्रव्यं दत्वा पिधाय च।
तद्दक्षिणादधो भानोः पुष्करं तच्छदाष्टके॥ ३५ ॥
श्रद्धा सुतीर्था मोदा च प्रमोदा कान्तिका प्रभा।
रसा मधुमती मध्ये क्षीरधीः कामधुक् ततः ॥ ३६ ॥
हंसजाचमनीयेऽत्र पूर्ववत्पूजनादिकम्।
तदूर्ध्वमण्डले पूर्वं पूज्या मधुसरस्वती ॥ ३७ ॥
स्वदिष्ठा च मदिष्ठा च सोमा यज्ञा गिरिश्रुताः।
रसान्ता मृदुगोपूर्वा रसा तिस्रोऽथ मध्यतः ॥ ३८ ॥
यज्ञपत्न्यः स्वर्णपात्रे ध्यायेन्नीलकदम्बकम्।
शर्कराज्यमधु न्यस्य पुष्टिं मधुभिरर्चयेत् ॥ ३९ ॥
स्नानपीठं विधायात्र पृष्ठे स्नानीयसाधनम्।
गन्धं माल्यं च धूपं च दीपं पृथु तदग्रतः ॥ ४० ॥
पादुके तालवृन्ते च उपपात्राम्बरादिकम्।
यथर्तुविभवं स्थाप्यं ततः श्रृङ्गारमण्डले ॥ ४१ ॥
पूर्वादिक्रमतः पूर्वं मण्डले ललितां यजेत्।
इन्दुकुङ्कुमकाश्मीरागुरुपाठीररोचनाः ॥ ४२ ॥
सख्यः परिमलापात्रे सारङ्गा हरिचन्दनम् (?)।
तदग्रे शोभनादिष्ट-ऋतुभिः पूज्यमप्यधि ॥ ४३ ॥
पारिजातं ततः पात्रे चन्द्राकरसरोरुहम्।
वृन्दासुकुसुमान्यत्र अन्यत्सर्वं तु पूर्ववत् ॥ ४४ ॥

तदग्रे कल्पवृक्षं च कोणेष्वस्य चतुष्टयम्।
मलयागुरुके चापि गार्हपत्यममन्त्रके॥ ४५ ॥
वह्नावाहवनीयं च धूपे सम्भावयेद्बुधः।
ततोऽग्रे मण्डले ज्ञानं कोणे सूर्येन्दुपावकाः॥ ४६ ॥
तारिकातडितं रत्नं परमात्मास्य मध्यतः।
पात्रे ज्योतिः पदं द्रव्ये निगमं वर्तिकां धियम्॥ ४७॥
ब्रह्मज्योतिरियं ज्योतिः पात्रन्यासो हरेरयम्।
गुरुपीठादधस्तस्य कलशार्घ्याचमनत्रयम्॥ ४८ ॥
गन्धमाल्यद्वयं चापि न्यसेद्वर्तुलमण्डले।
स्नानपीठात्परत्रापि पात्राण्येवं स्वमन्त्रतः॥ ४९ ॥
पीठे शङ्खं च घण्टां च न्यसेत् षट्कोणमण्डले।
तेजस्तत्त्वं ततः पञ्चचक्रेणापि सुदर्शनम्॥ ५० ॥
विष्वक्सेनं तु घण्टायां स्वतिमन्त्रेण पूजयेत्।
जलतत्त्वं ततः कोणे देवदत्तादिपञ्चभिः॥ ५१ ॥
वेदघोषं समभ्यर्च्य तच्छ्रेय इति तद्वरम्।
भगवत्पृथुपात्रं तु ततः प्रक्षाल्य पूरितम्॥ ५२ ॥
स्नानपीठाग्रतः कार्यं गुरोः पृथुलमाहरेत्।
प्रक्षाल्याचम्य चायम्य नमो ब्रह्मेति मन्त्रतः॥ ५३ ॥
आचार्यपादुके चार्ये नित्ये नैमित्तिकेऽथ वा।
चरणं त्र्यम्बकं चेदमग्निमग्नेरुतामृतम्॥ ५४ ॥
तद्विष्णोश्च नमो ब्रह्मण इत्येवं प्रपूजयेत्।
चिदानन्दमये ज्ञानभक्तिसौरभसम्पदी॥ ५५ ॥

कारुण्याम्बुधिसंजाते गुरुपादाम्वुजे नुमः।
शब्दार्थचरणौ स्तर्कमध्यो योगहृदन्तरः॥ ५६ ॥
वेदान्तवदनस्तस्मै हरये गुरवे नमः।
शब्दब्रह्मपरब्रह्मनिष्णातं सर्वसद्गुणम्॥ ५७ ॥
भक्तिशास्त्रप्रदं वन्दे श्रीमदार्यपदोर्युगम्।
षड्गुणैश्वर्यसम्पन्नं हरिलीलैकसाक्षिणम्॥ ५८ ॥
प्रपन्नजनमन्दारमाचार्यं प्रणमाम्यहम्।
भज्यमानन्दलब्ध्यर्थं भक्तवृन्दैरुपासितम्॥ ५९ ॥
श्रीनन्दनन्दनात्मानं वन्दे वन्दारुवत्सलम्।
अविघ्नं कुरु मे नाथ अर्चनाज्ञां प्रदेहि मे॥ ६० ॥
तव पादाम्बुजध्यानात्सफलास्तु कृतिर्मम।
तदैव पूजनं ह्येतच्छ्रीमतैवानुशासितम्॥ ६१ ॥
तवैवातः प्रसादोऽस्तु त्वदीयोऽहं यतः प्रभो।
इति स्तुत्वार्पयेत्तस्मै मूलेन कुसुमाञ्जलिम्॥ ६२ ॥
ततस्तस्योपपीठेऽपि शेषं शक्तिं स्तवेद्यथा।
अनन्त देवदेवेश शब्दब्रह्मात्मक प्रभो॥ ६३ ॥
सर्वासुरोपसंहारभक्तरक्षापरायण।
देशतः कालतो दैवादर्चायाः विघ्नशान्तये॥ ६४ ॥
श्रद्धायाः सिद्धयेऽस्माकं भवन्तं प्रणमाम्यहम्।
पुण्डरीकप्रभो देव सहस्रवदन स्वराट्॥ ६५ ॥
अर्चाभक्तिप्रसिद्ध्यर्थमस्तु मे वरदो विभुः।
यः प्रपन्नं जनं पाति कालव्यालभयादपि॥ ६६ ॥
उपज्ञं भक्तिशास्त्राणां विज्ञानस्य गुरुं नुमः।
ममार्चने विघ्नकरा मोहलोभमदादयः॥ ६७ ॥

ते सर्वे विलयं यान्तु श्रीमत्सङ्कर्षणाज्ञया।
असुराणां विमोहाय सुराणां कार्यसिद्धये॥६८॥
आदिष्टा प्रभुणा देवि ममार्चामपि साधय।
यथा हि व्रजसुन्दर्यस्त्वया संयोजिता हरौ॥६९॥
तत्प्रसादादेव देवि तथा मामपि योजय।
स्थिता वृन्दावनद्वारि भक्तानां कार्यसिद्धये॥७०॥
देवीदेवप्रिये देवि निर्विघ्नं कुरु मेऽर्चनम्।
यशोदागर्भसम्भूते जगतां पूजिते परे॥७१॥
महामन्त्रार्चनकरे नमस्ते परमेश्वरि।
इत्येवं समनुज्ञाप्य प्रक्षाल्याचम्य पादुके॥७२॥
पीठे निधाय तत्पात्रैरर्चेत्पूर्वोक्तमन्त्रतः।
पुनः संस्थाप्य तत्पीठे स्तुवेद् गुरुपरम्पराम्॥७३॥
त्रिपुरारिसमारम्भां श्रीमदाचार्यमध्यमाम्।
मदीयाचार्यपरमां वन्दे गुरुपरम्पराम्॥७४॥
पुष्पाञ्जलिं समर्प्यैवं हस्तौ प्रक्षाल्य चाचमेत्।
शृङ्गारपीठमागत्य ध्यात्वा शेषं यथोदितम्॥७५॥
तन्मन्त्रेण समभ्यर्च्य वाराहं चैवमर्चति।
सर्वरत्नम्भरा सर्वंसहा विष्णुप्रिया इति॥७६॥
नमो धरायै धरणीं ततोऽर्चेत् क्षीरसागरम्।
अनिरुद्धनिवासाय शुद्धैश्वर्याय श्रीमते॥७७॥
वर्तुले तत्र वैकुण्ठं विरजामपि नन्दनम्।
अभ्यर्च्य च ततो नन्दसुनन्दादीन् प्रपूजयेत्॥७८॥
ब्रह्मविष्णुशिवाः सूर्यश्चतुष्कोणेष्वतोऽन्तरे।
मथुरामण्डलं नत्वा तत्राष्टदलकेसरान्॥७९॥

ततोऽन्तःकेशरेऽभ्यर्च्य वृन्दाद्या योगमायया।
कर्णिकासु व्रजं पीठे पादेषु गिरिपञ्चकम् ॥ ८० ॥
वृन्दावनं तदुपरि निदध्याद्यन्त्रमुत्तमम्।
विहारकुञ्जं तत्रार्च्य व्रजेशमिथुनं ततः ॥ ८१ ॥
सौवर्णीमर्चयेद्भूमिं गोकुले वेदसम्मितम्।
द्वारेषु वेदाः सम्पूज्या ज्ञानभूमिस्तदन्तरे ॥ ८२ ॥
सर्वात्मभावयुग्भक्तिदलानि दशधाप्यतः।
प्रेमात्मकेशरानस्मान्यमुनोपनिषद्रसान् ॥ ८३ ॥
भगषट्कं ततोऽभ्यर्च्य योगिहृत्पद्मतूलिकाम्।
प्रियोत्तरीयावरणमभ्यर्च्य कुसुमाञ्जलिम् ॥ ८४ ॥
सकलेऽतिस्वनिगमागम्यभक्त्यैव लभ्यति।
रतिशयाखण्डनित्यलीलेति च विहारभूः ॥ ८५ ॥
पायश्रीपुरुषोत्तेति मविहारेति (?) चोच्चरेत्।
पीठाय नम इत्युक्त्वा पीठमन्त्रात्समर्पयेत् ॥ ८६ ॥
अनेन राजपीठादौ न्यासे पुष्पाञ्जलिर्भवेत्।
स्नानपीठं ततोऽभ्यर्च्य मण्डले मानसी सरित् ॥ ८७ ॥
पानीयमानप्रेमेन्दुसरांसि च विदिक्ष्वतः।
पीठपादेषु कुसुमं हरिं भानुमजं यजेत् ॥ ८८ ॥
पुष्करं पीतकं चोर्ध्वं सर्वतो यामुनेंऽशके।
ततोऽष्टदिक्क्रमेणास्य कूपघट्टाम्बुभृत्सरान्[1] ॥ ८९ ॥
वनोपवनन्यग्रोधतापिच्छादि प्रपूजयेत्।
वन्दिनी नन्दिनी चापि व्रजेशपरिचारिके ॥ ९० ॥

---

१. व्रज एतानि कुण्डानि प्रसिद्धानि।

हस्तप्रक्षालनं ह्यत्र मण्डले मण्डले भवेत्।
पृथक्पत्रेण दिव्यैश्च पूजनं च यथायथम्॥९१॥
हयदिशिकदेवात्मपात्रादौ नायुतिश्चरेत्।
क्रमशो विमला तेषां नावमोपरतोऽशुचिः (?)॥९२॥
स्नातो स्नातेन सख्यारादक्षारो दूष्यते ह्यतः।
एवं द्रव्येऽप्यशुद्धिः स्यात्स्पर्शात्पात्रांशुकादिषु॥९३॥
पीठादिपूजनं प्रोक्तं प्रभोः पृथुलपात्रतः।
एवं संसिद्धसर्वाङ्गः प्रक्षाल्याचम्य शोधयेत्॥९४॥
पुष्पाञ्जल्या परिकरैः ध्यायन् सम्प्रार्थयेद्धरिम्।
मनसा योगपूतेन निजतीर्थोक्तवर्त्मना॥९५॥
वृन्दावने निजनिकुञ्जकदम्बके ते
सिंहासने मणिमये निजसुन्दरीभिः॥
यः सेव्यते श्रुतिगणै रमते रमेशः
स श्रीमदार्यकृपया मम सन्निधत्ताम्॥९६॥
आयान्तं भावयेत्तेन करुणाभक्तिसेवितम्।
योगसंसिद्धहृत्पद्मं वासुदेवाक्षरान्वितम्॥९७॥
स्वीयोत्तरीयसंक्लृप्तमासनं स्वीकुरु प्रभो।
इत्यर्चया महामन्त्रान् देवं पीठे च विन्यसेत्॥९८॥
यथासुखं परिकरैरुपविष्टं विभावयेत्।
सेवाधिकारसिध्यर्थं प्रार्थयेद्वामभागतः॥९९॥
आनन्दैकरसस्य गोकुलपतेर्वामाङ्गभागेश्वरि
नित्ये नित्यनुते निकुञ्जनिलये भो नित्यलीलाधिपे।
श्रीमत्या सह संवदो हरिरसौ भव्यां सपर्यामिमां
कृत्वाभ्यर्हतरां निवेदय निजाचार्याननुगृह्य मे॥१००॥

निर्दोषोज्ज्वलकोटिचन्द्रमहसश्चन्द्रावली चन्द्रिका
तस्माद्गोकुलचन्द्र एष भगवान् चिच्चन्द्रकान्तामृतैः।
देवान्पोषयते चकोरशिशुकांस्त्वं सद्वचोभिस्तुता
सेवार्हं कुरु मां निजार्यवचसा सेवैकदानेश्वरि॥१०१॥
नानाभूषणभूषिताङ्गललिते नित्यं मुनीन्द्रैर्नुते
सद्भक्तागमसम्प्रदायरसिकाद्याचार्यरूपेश्वरि।
श्रीगोपीशसमर्चनैकचतुरे सम्पादितामर्चनां
श्रीमत्या ह्यनुशासितां मम हरेः पादाब्जयोरर्पय॥१०२॥
प्रादुर्भूय निजान्विधाय बत या तीर्थात्मना भूतले
सम्पाद्यातिपवित्रदर्शनभरैः स्वीयोपदेशामृतैः।
औदार्यैकरसोदयेन जगतामुद्धर्तुकामा सदा
लीलानन्दकलाभिसन्धिमनसा लीलेश्वरि त्वां भजे॥१०३॥
सम्प्रार्थ्यैवं स्नानकृतेंऽशुकादि परिधापयेत्।
कालानुकूलतश्चारु नयेदन्ति हसन्तिकाम्॥१०४॥
आयाहि गोकुलपते परिवारवर्गैः
स्नानाय भानुतनयारचिते निकुञ्जे।
पूर्णेन्दुकान्तकमनीयतमः प्रियाभिः
खेलां विधातुममलैः कमलैर्जलैर्वा॥१०५॥
इति नत्वा नयेत्स्नानमण्डपे तत्र वेशयेत्।
शुद्धपादाम्बु चादाय दद्यात्पादार्चनेजनम्॥१०६॥
ब्रह्माण्डवरणोद्भूतं ब्रह्माक्षरमयं शुभम्।
कलिन्दजे ललितया प्रापय स्वप्रियं करे॥१०७॥
शङ्करादिजटादेयं भक्तैर्भक्त्या समर्पितम्।
प्रेमपाथोधिसत्पाथः पाद्यं स्वीकुरु पादयोः॥१०८॥

इत्युच्चार्य महामन्त्रात्पाद्यं दत्वा पुनर्ददेत्।
वाससं प्रोञ्छ्य तत्पाद्यं पुनरादाय चार्चयेत् ॥ १०९ ॥
श्रीगोकुलेश स्वीयात्मपरिवाराय इत्यतः।
यन्त्रे निवेदनं ह्येवं सर्वत्र करशोधनम् ॥ ११० ॥
शुद्धार्घ्यं करयोर्दत्वा विशेषार्घ्ये जलार्पणम्।
कृत्वा समर्पयेद्भूय आशिखादि नखावधि ॥ १११ ॥
कुसुमाम्बुधिसत्पाथो हरिचन्दनचर्चितम्।
कलिन्दजासमानीतं ललिते प्रापय प्रियम् ॥ ११२ ॥
सुगन्धैः शोभनैर्नीरैर्भक्तैरपि समर्पितम्।
अर्घोऽयं गृह्यतां नाथ राधिकाप्राणवल्लभ ॥ ११३ ॥
इत्यर्घं पूर्ववद्दत्वा ततः शुद्धाचमं ददेत्।
पूर्वशुद्ध्यै ततः प्रीत्यै पुनश्चैवं त्रिधा भवेत् ॥ ११४ ॥
कामधुक्स्तनसम्भूतं क्षीरसागरसङ्गतम्।
हंसकन्यासमानीतं आचमं त्वां निवेदये ॥ ११५ ॥
रत्नपात्रगतं दिव्यं शीतलामलपुष्करम्।
श्रीमन्मुखाम्बुजे नाथ आचमं स्वीकुरु प्रभो ॥ ११६ ॥
अभ्यर्च्य पूर्ववत्सर्वं कृत्वा शुद्धाचमं चरेत्।
मधुपर्कं ततः कुर्यान्मधुदध्याज्यशर्करम् ॥ ११७ ॥
शुद्धात्मकमनोहारि शर्कराज्यमधूद्भवम्।
मधुमत्या समानीतं मधुपर्कं समर्पये ॥ ११८ ॥
स्वयं सर्वैः सुरैर्ग्राह्यं त्रिविधं परमामृतम्।
श्यामतापिच्छपुट्के मधुपर्कं लिह प्रभो ॥ ११९ ॥
इत्यभ्यर्च्याचमं दत्वा ततः सर्वं तु पूर्ववत्।
सुगन्धतैलामलककल्कं तप्तोदकैः प्रभो ॥ १२० ॥

स्नानं विधायाचमेन विधिस्नानं तु कारयेत्।
गन्धमाल्ये समर्प्याथ शङ्खमादाय तद्घटात्॥१२१॥
स्वर्णधर्मानुवाकेन घण्टाशङ्खादिवादनैः।
उत्सवेषु च दुग्धाम्बु दध्यम्बु च घृताम्बु च॥१२२॥
मध्यम्बु शर्कराम्बु स्याच्चन्दनं स्नानमर्पयेत्।
सौभाग्यतिलकं देयं सौभाग्याक्षतमर्पयेत्॥१२३॥
श्रीगोविन्दप्रियायै च दत्वा वृन्दादलानथ।
पीताक्षतानासनाय नमोऽस्त्विति समर्पयेत्॥१२४॥
सप्ताश्वमण्डलाज्ञातं छन्दोभिः स्तुतमुत्तमम्।
तीर्थाम्बु सम्भृतं भव्यं स्नानाय यमुनाहृतम्॥१२५॥
वृन्दावनविहारेण श्रान्ते विश्रान्तिकारकम्।
चन्द्रपुष्करपानीयं गृहाण पुरुषोत्तम॥१२६॥
महामन्त्रेणाभिषिच्य दत्वाचमनप्रोञ्छने।
परिधाय्य ततो वस्त्रे नयेत् पीठान्तरे हरिम्॥१२७॥
ततोऽस्य परिवारेभ्यः स्नानं शुद्धाम्बुसम्भृतम्।
प्रोञ्छनाचमनं वस्त्रं दत्वाथ स्वकरौ मृजेत्॥१२८॥
ततस्तु परिवारार्घ्यात्पाद्यार्घे आचमाच्च तत्।
स्नानाम्बुकलशात्स्नानं रुक्मिण्यादिषु योजयेत्॥१२९॥
अवशिष्टेन गरुडं शङ्खं चापि प्रपूजयेत्।
समर्प्य गन्धमाल्ये च यन्त्रराजं ततो नयेत्॥१३०॥
क्षालयेत्पृथु ात्रं तु पीठे सम्भृत्य योजयेत्।
निजद्रव्यैश्चोपयुक्तैः शोधयेत्क्ष्माकरादिकम्॥१३१॥

आयाहि गोकुलपते परिवारवर्गैः
　　शृङ्गारमण्डपमिदं रचितं सुरत्नैः।
चित्राम्बराणि च विचित्रसुमण्डनानि
　　अत्रोपधारय निजाभिमतानि नाथ ॥ १३२ ॥

इत्येवं प्रार्थयन्नत्वा निवेश्य निजपीठके।
वस्त्रभूषादिपेटिं च विमुच्याऽभ्यर्चयेद्यथा ॥ १३३ ॥

नमः साराङ्गदिव्यायै विशाखायै नमोऽस्त्विति।
पुष्पगन्धाक्षतान् दत्वा यथर्तुविभवं ततः ।॥ १३४ ॥

कौशेयक्षौमचीनीयवासांस्यत्युत्तमानि ते।
विशाखयाभिनीतानि सुरङ्गान्युपधारये ॥ १३५ ॥

छन्दसामप्यगम्याय योगगम्यस्वरूपिणे।
यशोदानन्दनन्दाय वस्त्रवेशं नु कल्पये ॥ १३६ ॥

इत्युक्त्वा महामन्त्राच्छृङ्गारं कल्पयेद्विभोः।
ततोऽस्य परिवारेभ्यस्तन्मन्त्रेण समर्पयेत् ॥ १३७ ॥

विमुक्तमुक्ताभरणैर्हीरमाणिक्यगारुडैः।
सारङ्गदीप्तयानीतैर्विभूषये निजेश्वरम् ॥ १३८ ॥

नानाशास्त्रवचोरत्नैस्तत्तद्विच्छित्तिगुम्फनैः।
भूषणानि महार्हाणि स्वीकुरुष्व व्रजेश्वर ॥ १३९ ॥

महामन्त्रात्समर्प्याशु यथायोग्यं क्रमाद्दधेत्।
नेत्राञ्जने सुतिलकं नासाभरणमर्प्पयेत् ॥ १४० ॥

ततः सुगन्धलेपं च मुकुरं चापि दर्शयेत्।
त्रिविधं सर्वगन्धाढ्यं परमामोदसुन्दरम् ॥ १४१ ॥

सुगन्धं ललितानीतमङ्गरागं विलेपये।
यशोदानन्दनन्दाय परमानन्दमूर्तये ॥ १४२ ॥

यशःसुरभि सद्गन्धं प्रभवे ते समर्पये।
पूर्ववच्च महामन्त्राद् मालायुग्मं समर्पयेत् ॥ १४३ ॥
वृन्दावनसमुद्भूतमल्लिमाल्यादिमञ्जुला।
हरिप्रियादलैः क्लृप्ता सुन्दरी व्रजगुम्फिता ॥१४४ ॥
वृन्दारण्यमहेन्द्राय मालिका भक्तिपालिका।
निवेदिता ललितया गृहाण पुरुषोत्तम ॥ १४५ ॥
पूर्ववच्च समर्प्याथो अर्पयेत्तुलसीस्रजम्।
वेणुवेत्रे हरेरेव पूजयित्वा नमोऽस्त्विति ॥ १४६ ॥
वृन्दावनाधिदेवेश्या भङ्ग्या तच्चरणाब्जयोः।
भक्तैः समर्पिता याने स्वीकुरुष्व स्रजं हरे ॥ १४७ ॥
षड्गुणानन्दसम्पन्नां स्वव्रजविभूषिताम्।
नित्यलीलाप्रियां नाथ गृहाण मुरलीमिमाम् ॥ १४८ ॥
त्रैलोक्याभयद नेत्रं गवां च त्रिदिवौकसाम्।
गृहाण गुप्तयेऽस्माकं वेत्रं व्रजपुरन्दर ॥ १४९ ॥
इत्यर्घ्याचमनं दत्वा भृङ्गारं चापि वीटकम्।
धृत्वा निवेदयेन्मिष्टं फलपक्वान्नगोरसम् ॥ १५० ॥
करौ प्रक्षाल्य वाचम्य प्रार्थयेज्जगदीश्वरम्।
अनन्तलीलानुकृते स्वीकृताऽनन्तविग्रह ॥
लीलाविग्रहपूजार्थं अनुज्ञां नाथ नाथय ॥ १५१ ॥
वामे श्रीमति काञ्चनौघसुतनो सद्भूषणाभूषणे
राजद्राजतपट्टनीलवसने स्वानन्दसन्तुन्दिले।
सेवासम्भ्रमविभ्रमैकविलसच्छ्रीनित्यसिद्धेश्वरि
श्रीराधे हरिवामभागरसिके मुख्यप्रिये त्वां नुमः ॥ १५२ ॥
चतुर्थ्यन्तान्नमोनाम्नः कुर्यात्पूजां यथोचिताम्।
गन्धाक्षतैः सुमनसा ताम्बूलानि समर्पयेत् ॥ १५३ ॥

दक्षे श्रीमति चन्द्रकोटिविशदे सद्भूषणाभूषणे
राजत्काञ्चनपट्टरक्तवसने प्राप्ते परानन्दके ।
सेवासंभ्रमविभ्रमोत्सुकलसच्छ्रीसिद्धसिद्धेश्वरि
श्रीचन्द्रावलि चन्द्रिके व्रज विधोर्वृन्दाप्रिये त्वां नुमः ॥ १५४ ॥

अग्रे कोकनदप्रभेऽथ सकलैः सद्भूषणैर्भूषिते
राजद्राजतपट्टपीतवसने तत्सेवनानन्दिते ।
नानासाधनसिद्धगोपमहिलापूजाधिनाथेश्वरि
वन्दे श्रीललिते हरेरनुमते सेवाप्रिये श्रीमति ॥ १५५ ॥

फुल्लेन्दीवरसुन्दरव्रजपते सद्भूषणैर्भूषिते
राजत्काञ्चनपट्टशुक्लवसने तत्सङ्गमानन्दिते ।
स्वीयानुग्रहसिद्धगोपवनितायूथाधिपाधीश्वरि
नित्यं त्वां प्रणमामि सूर्यतनये कीलालकेलिप्रिये ॥ १५६ ॥

एवं वै चतुरो व्यूहान् चतुःशृङ्गेतिमन्त्रतः ।
ध्यायन्समर्चयेद्विद्वान्यथापूर्वमनुक्रमात् ॥ १५७ ॥
पूर्वपुष्ट्या सदानन्दं श्रीगोपालं समर्चयेत् ।
सदक्षिणे संविदा शक्त्या चिदानन्दं प्रपूजयेत् ॥ १५८ ॥
पश्चिमे भक्तिशक्त्या तु यजेत्सम्मोहनं हरिम् ।
ह्लादिन्या उत्तरे शक्त्या आनन्दानन्दमर्चयेत् ॥ १५९ ॥
ततः षट्कोणमूलेषु पूर्वदीक्षाक्रमाद्यजेत् ।
पराऽस्य शक्तिमन्त्रेण लीलाद्या नाममन्त्रतः ॥ १६० ॥
लीलां च भक्तिं शक्तिं च योगमायां तथा कृपाम् ।
क्रियां च ज्ञानशक्तिं च चतुर्थ्यन्तैः प्रपूजयेत् ॥ १६१ ॥
चन्द्रभागार्द्धवपुषे ऐश्वर्यगुणशालिने ।
श्रीनागदमगोपालायेति विष्णोः समर्चयेत् ॥ १६२ ॥

ललिताङ्गर्द्धाङ्गवपुषे स्ववीर्यगुणशालिने।
श्रीदेवदमनायेति यजेद्वैष्णवमन्त्रतः॥१६३॥
विशाखार्द्धाङ्गवपुषे सद्यशोगुणशालिने।
महेन्द्रदमनायात्र यजेदैन्द्रेण साधकः॥१६४॥
सुशीलार्द्धाङ्गवपुषे दिव्यश्रीगुणशालिने।
असुरघ्नाय देवाय यजेद्रक्षोघ्नसूक्ततः॥१६५॥
श्यामार्द्धवपुषे चाथ सज्ज्ञानगुणशालिने।
खलघ्नाय च देवाय यजेद्भद्रादिमन्त्रतः॥१६६॥
वामार्द्धवपुषे चैवं वैराग्यगुणशालिने।
समस्तदमनायात्र नमोमन्त्रैः प्रपूजयेत्॥१६७॥
वामेऽस्य नित्यसिद्धाश्च श्रुतिसिद्धाश्च दक्षिणे।
पुरतश्च तपःसिद्धा भक्तिसिद्धाश्च पृष्ठतः॥१६८॥
तद्दक्षिणेऽस्य पितरौ वामे गोपाः सबालकाः।
सर्वतो वृत्तपरिधेर्गाश्च गोसूक्ततो यजेत्॥१६९॥
तत्रैव दिक्षु च सखीन् श्रीदामादीन्प्रपूजयेत्।
सर्वोपनिषदानन्दवाहिनीं यमुनां बहिः॥१७०॥
दिग्दलेषु रमारूपां रुक्मिणीमीशदिक्क्रमात्।
भूरूपां सत्यभामाख्यामुमां जाम्बवतीं यजेत्॥१७१॥
ह्रियं सुनन्दां मित्रां च गिरं कान्तिं सुलक्ष्मणाम्।
प्रीतिं सुभद्रां श्रद्धां च यजेत्कालिन्दिनीं पुनः॥१७२॥
देव्यो महिष्यो भक्त्यान्या यदुनाथप्रिया इति।
वासुदेवं सत्त्वरूपं देवधानीं च देवकीम्॥१७३॥
शेषं बलमविद्यां च सुभद्रामपि चार्चयेत्।
दानवं क्रूरनामानं ज्ञानमौपगविं यजेत्॥१७४॥

सद्धर्मं सात्त्विकं चाथ राजधर्मं च फाल्गुनम्।
तत्र भाग्यवतः सर्वान् द्वारकावासिनः स्मरेत्॥१७५॥
देवान्वै यादवान्ध्यायेत् देवमर्च्चेद्दलान्तिके।
ततस्तु वृत्तदिक्ष्वर्चेद् बहुलाश्वं महीपतिम्॥१७६॥
श्रुतदेवं नारदं च कृष्णद्वैपायनं गुरुम्।
चतुर्वेदात्मकं कोणे यजेद्दामचतुष्टयम्॥१७७॥
वृत्तान्तरे दिक्क्रमेण तत्त्वरूपायुधाष्टकम्।
ततस्तृतीयवृत्तेऽत्र कोणेष्वथ नगान्यजेत्॥१७८॥
मन्दारमथ सन्तानं पारिजातं च चन्दनम्।
स्वकार्योपाधिसंयुक्तं दिक्षु व्यूहचतुष्टयम्॥१७९॥
भूपुरे दिक्पतीनिष्ट्वा बाह्याधारं खगेश्वरम्।
सर्वाधारं महानागं मायां वै सर्वगां यजेत्॥१८०॥
व्रजेशमिथुनं चात्र गन्धपुष्पाक्षतैर्यजेत्।
नत्वा हस्तौ च प्रक्षाल्य शुद्धाचमनमाचरेत्॥१८१॥
गत्वा समीपं श्रीशस्य दत्वाचमनवीटके।
धूपमुद्धूपयेन्नीचैश्चन्दनागुरुचूर्णकैः॥१८२॥
कर्मणामधिदेवाय देवदेवाय शार्ङ्गिणे।
वानस्पत्यः सुधूपोऽयं ललिते प्रतिपादय॥१८३॥
धाम्ना मोहनकृद्भेदी गन्धाष्टकसमन्वितः।
अब्रह्मघ्नः सुधूपोऽयं गृह्यतां गोकुलेश्वर॥१८४॥
महामन्त्रात्समर्प्याथ घण्टावाद्यपुरःसरम्।
वर्त्येन्दुगर्भया दीपमेवमुच्चैर्निवेदयेत्॥१८५॥
उद्दीप्तरत्नजालांशु प्रियाभूषणभासुरम्।
ब्रह्मज्योतिरिदं ज्योतिर्दर्शयस्व हरिप्रिये॥१८६॥

निजाङ्घ्रिनखचन्द्रांशुमालालूनान्तरन्तमाः।
सुदीपो दर्शितो देव्या दामोदर गृहाण तम् ॥ १८७ ॥
पुनराचमनं दत्वा गन्धपुष्पैः समर्चयेत्।
आपादतलमारभ्य प्रत्यङ्गं प्रति भूषणम् ॥ १८८ ॥
स्वस्वरूपगुणैर्युक्तं गोपालं भक्तवत्सलम्।
दद्यान्मिष्टफलान्यत्र ताम्बूलकं स्रजं नवम् ॥ १८९ ॥
ततः शृङ्गारपीठाच्च नयेच्छ्रीराजमण्डपम्।
भो भो भक्तजनानन्द नन्दनन्द कृपानिधे ॥ १९० ॥
मदीयसेवासिद्ध्यर्थं व्रज श्रीराजमन्दिरम्।
मालामत्र नयेदस्मात्ततः श्रीललिताज्ञया ॥ १९१ ॥
भो विशाखे महाभागे श्रीसारङ्गे हरिप्रिये।
शृङ्गारदासिकावर्गं स्वस्थानं प्रति यापय ॥ १९२ ॥
इत्येवं तु नयेत्सर्वं घण्टाशङ्खाचमैर्विना।
स्थानं प्रक्षाल्य सम्प्रोक्ष्य करौ पादौ च मार्जयेत् ॥ १९३ ॥
वामे शृङ्गारपीठं च सयन्त्रं सोपमूर्तिकम्।
दक्षिणे गुरुपीठं च स्वस्वपात्रे निवेशयेत् ॥ १९४ ॥
विशेषाम्बुघटात्पूर्वं पानीयाचमनीयकम्।
शुद्धाम्बुकलशात्कुर्याद् वर्तुलं मण्डलत्रयम् ॥ १९५ ॥
गुरुपीठाग्रतश्चैकं चतुष्कोणं तथा परम्।
काष्ठपीठं ततः शुद्धं विन्यस्य पुरतो हरेः।
यशोदां प्रार्थयेत्पश्चाल्ललितोक्तिमुदाहरन् ॥ १९६ ॥
श्रीनन्दराजदयिते दयितां मम प्रि-
याशंसते तव सुतो जनकेन सार्द्धम्।
भोक्तुं च षड्विधरसैर्नवभोज्यभक्ष्य-
चोष्यावलेह्यविधिभिर्विदधन्मुदं ते ॥ १९७ ॥

आयान्तीं भावयेत्तत्र धृतभोजनपात्रिकाम्।
स्नेहार्द्रां परमापीच्यां भूषितां सर्वमङ्गलाम् ॥ १९८ ॥
पक्वान्नं परमं स्वादु नवं शुद्धं रहःकृतम्।
धृत्वाऽस्य दोषनिर्मुक्त्यै कुर्याच्छङ्खदलोदकम् ॥ १९९ ॥
गोभ्यो ग्रासं ततो दद्यात् करौ संशोधयेत्ततः।
मण्डले हवनीयाग्निकोणे गोगोपगोपिकाम् ॥ २०० ॥
व्रजेशवल्लभा ध्येया यज्ञपत्न्यश्च पट्टके।
पात्रे ब्रह्मसुधान्नं च नन्दाज्ञां च विभावयेत् ॥ २०१ ॥
स्वयं नन्दनन्दः सदानन्दरूपो
यशोदायशोदो नवेन्दीवराभः।
स्वकीयप्रियाभिः स्वकीयानुकम्प
स्वकीयाभिरुच्या प्रभो भुज्यतां भोः ॥ २०२ ॥
इति संप्रार्थयेद्देवं दध्यात्तन्मण्डलान्तरे।
चतुष्कोणेऽवशिष्टान्नं पात्रं धृत्वाचमं ददेत् ॥ २०३ ॥
अन्नं हविः सुधापूर्णं रत्नपात्रेषु सम्भृतम्।
क्लृप्तं चम्पकवल्ल्येतत् ललिते हरयेऽर्पय ॥ २०४ ॥
यथैव यज्ञपत्नीनां यया गिरिमखे प्रभो।
भुक्तं प्रीत्या नवं हव्यं तथैतत्स्वीकुरु प्रभो ॥ २०५ ॥
महामन्त्रात्समर्प्यैतत् तिरस्करणिकां चरेत्।
बहिः प्रक्षाल्य पत्पाणिमाचम्यान्तर्व्रजेदथ ॥ २०६ ॥
परिविष्य पुनः किञ्चित्कुर्याद्वै पात्रिकात्रयम्।
मण्डलं रचयेत्तत्र दत्वाचमनमर्पयेत् ॥ २०७ ॥
श्रीमन्नन्दकुमारस्य प्रसादं सुमनोहरम्।
मया निवेदितं भक्त्या स्वीकुर्वन्तु हरेः प्रियाः ॥ २०८ ॥

इत्येवं नित्यसिद्धाभ्यो लक्ष्म्यादिभ्योऽपि चार्पयेत्।
परिवाराचमान्तेऽथ भक्तेभ्योऽस्य समर्पयेत् ॥ २०९ ॥
श्रीमन्नन्दनिकेतने निजजनैः संभोजनीयैः प्रभु-
भुंञ्जन् भव्यसुधारसं सुकुतुकाच्छाकान्नपाकादिकम्।
भक्तेभ्यः प्रददाति चातिहसते संसाहयन् स्वप्रिया-
गोपीभिः परिवीजितो विजयते कुर्वन् जनन्या मुदम् ॥ २१० ॥
ध्यात्वैवं च स्तुवेत्स्तोत्रैरुपपीठं बहिर्नयेत्।
पाकशालासु नन्दस्य वैश्वदेवं विभावयेत् ॥ २११ ॥
पाकाग्निं तं प्रतिष्ठाप्य स्थण्डिले गुरुसन्निधौ।
नमो वैश्वानरायेति नमेत्तं गुरुरूपिणम् ॥ २१२ ॥
सर्वापराधहरण भक्तिमार्गैकपावन।
देवानन्द स्वधास्वामिन् वैश्वानर नमोऽस्तु ते ॥ २१३ ॥
नमो ब्रह्मण इत्यर्चेद् गायत्र्या दशधा हुनेत्।
अग्नये भूतपतये इति विष्णुं स्वमन्त्रतः ॥ २१४ ॥
हुत्वा द्वादशधा मिष्टमाचमं गुरवेऽर्पयेत्।
तच्छंयोरिति सम्प्रोक्ष्य ताम्बूलं च स्रजं दधेत् ॥ २१५ ॥
चत्वारिशृङ्गामन्त्रेण कुर्याद्ध्यात्वा विसर्ज्जनम्।
ततः संशोधयेत्पाणिं जयशब्दं समुच्चरन् ॥ २१६ ॥
शुद्धभृङ्गारकं नीत्वा विशेद्भोजनमण्डपम्।
करे कृत्वैव पानीयं नयेत् तस्यास्यसन्निधौ ॥ २१७ ॥
कलिन्दजासमातीतं श्रीमच्चित्रावलि प्रिये।
श्रीव्रजेशस्य पानीयमुपकल्पय शारदम् ॥ २१८ ॥
स्वच्छमुक्ताफलाभासं स्वातिजं स्वादुशीतलम्।
पानीयं रत्नपात्रस्थं गृहाण व्रजजीवन ॥ २१९ ॥

इत्युक्त्वाथ महामन्त्राद् दत्वाथ परिवारके।
ततः शुद्धाम्बु चादाय उत्तरापोशनं ददेत् ॥ २२० ॥
पतद्ग्रहान्तरे तूर्णं करशुद्धिं विभावयेत्।
जलेन चन्दनेनापि गण्डूषानिन्दुखण्डकैः ॥ २२१ ॥
संशोध्य प्रभुपात्राणि पादशुद्ध्याचमांशुकम्।
विशेषाम्बु च दत्वैवं ताम्बूलाचमनैर्यजेत् ॥ २२२ ॥
ततोऽस्यात्मप्रियादिभ्यः शुद्धिर्देया स्वपात्रतः।
एवं ताम्बूलसम्भुक्तौ ललिताज्ञामुदाहरेत् ॥ २२३ ॥
भो नन्दालयदासीनां यूथ चम्पकवल्लिक।
राजभोगोपकरण नयनाज्ञामुदाहर ॥ २२४ ॥
इति नीत्वा पुनः कार्या स्थानशुद्धिर्यथोचिता।
निजशुद्धिं विधायाथ कुर्याच्च सुरभी करौ ॥ २२५ ॥
सुगन्धैः खादिरैश्चूर्णैः क्रमुकैस्तु दलैर्हरेः।
वीटकं चारु रचयेच्छ्रीमुखेऽर्थाद् निवेदयेत् ॥ २२६ ॥
नागवल्लिदलैश्चारुसुगन्धैः क्रमुकादिभिः।
आरञ्जनं जयाक्लृप्तं वीटकं राधिकेऽर्पय ॥ २२७ ॥
स्वप्रियाधररागेण रक्तं सिक्तं सुधारसैः।
ताम्बूलचर्वणं कृत्वा देहि नाथ प्रियाजने ॥ २२८ ॥
महामन्त्रान्निवेद्यैवं चर्चितं च पतद्ग्रहे।
परिवारे ततो दद्यात् पाणिं प्रक्षालयेत्ततः ॥ २२९ ॥
मालावीटकभृङ्गारयुगं वेणुं च वेत्रकम्।
पृथुपात्रं च संशोध्य राजपीठे हरेरथ ॥ २३० ॥
भृङ्गारकं च मालाश्च पृथुलं वीटकं गुरोः।
भृङ्गारपीठेऽप्येतद्धि नयेच्छेषं यथोचितम् ॥ २३१ ॥

वामतः शयनागारे शय्यां तदुपचारकैः।
अलङ्कृत्य नयेत्तत्र चामरादर्शच्छत्रके॥ २३२ ॥
उद्घाट्य मन्दिरद्वारमाहूय भगवज्जनान्।
मालां मुरलिकां दत्वा कुर्यादारार्तिकोत्सवम् ॥ २३३ ॥
अलङ्कृत्य निजात्मानं रङ्कञ्चाद्यलङ्कृतम्।
कर्पूरवर्तिकं कुर्यात्तौर्यत्रिकमहोदयैः॥ २३४ ॥
मण्डले विधिमभ्यर्च्य पात्रे व्रज वांयुशुभम् (?)।
दीपे भक्तागमं नत्वा अग्रे पीठे निवेदयेत् ॥ २३५ ॥
अमङ्गलानां शमनं मङ्गलानां महोदयम्।
व्रजाङ्गनानां सौभाग्यमारार्तिकमिदं हरेः॥ २३६ ॥
महामन्त्रात्समभ्यर्च्य उत्तमाधममध्यतः।
नवधा नवधा कुर्याद्घण्टावाद्यैर्महास्तवैः॥ २३७ ॥
बहिर्धृत्वा कसै शोध्यौ भ्रामयेत्सजलं दरम्।
त्रिधैव गरुडं सिक्त्वा सिञ्चेत्स्वं भगवज्जनम् ॥ २३८ ॥
करौ प्रक्षाल्य च ततः शय्यामन्दिरमाव्रजेत्।
नत्वाथ विरजां कृत्वा शय्यां परमामङ्गलाम्॥ २३९ ॥
सुगन्धां कोमलांश्क्ष्णां लिको(?)च्छीर्षप्रच्छदाम्।
मुक्तासुदामसन्नद्धां समयार्होपतूलिकाम् ॥ २४० ॥
कृत्वाऽस्य वामतः पीठे गन्धं माल्यं च वीटकम्।
दद्यान्मिष्टफलं चापि जलभृङ्गारकं ततः॥ २४१ ॥
दर्पणं व्यजनं चोर्ध्वं अधश्चापि पतद्ग्रहम्।
पादुके पादपीठं च पादपट्टं प्रसारयेत् ॥ २४२ ॥
आगत्य च बहिः पाणी प्रक्षाल्य भगवत्सुरः।
पुष्पं गन्धतुलसिकां गृहीत्वा स्तोत्रमुच्चरेत्।
निवेदयेत्स्वमूलेन नत्वा चैतदुदाहरेत् ॥ २४३ ॥

नित्यं भक्तवरार्चितोऽर्चनमिदं भक्त्या स्वशक्त्या प्रभो
यत्किञ्चिच्च यथाकथञ्चिदपि ते कृत्वार्पितं पादयोः।
तत्स्वीकृत्य कृतार्थय स्वशरणापन्नं निजोक्त्याथ मां
पूर्णोऽयं कुसुमाञ्जलिः पुनरपि त्वत्प्रीतिपूर्त्यै भवेत् ॥ २४४॥

महामन्त्रं पठेच्चाथ स्वापराधं क्षमापयेत्।
प्रदक्षिणं प्रकुर्वीत यथाशक्ति विधानतः॥ २४५ ॥

अपराधसहस्रभाजनं भवदार्योक्तपथादपच्युतम्।
शरणीकुरु मामुपस्थितं चरणाब्जानुगतं प्रदक्षिणे ॥
महामन्त्रेण साष्टाङ्गं प्रणमेन्मन्दिराद्बहिः॥ २४६ ॥

गोविन्द केशव जनार्दन वासुदेव
श्रीनन्दनन्दन हरे निगमाभिगीत।
श्रीमत्पदाम्बुजयुगे प्रणतं प्रपन्नं
मां पाहि संसृतिभयाज्जगदेकनाथ॥ २४७ ॥

ततः श्रीगुरवे स्तुत्वा पुष्पाञ्जल्या प्रणम्य च।
क्षमाप्यार्चां निवेद्याथ मालामाहृत्य चार्थयेत्॥ २४८ ॥

श्रीनन्दनन्दन हरे यशोदाप्राणवल्लभ।
निकुञ्जमन्दिरे ह्यस्मिन्विहरस्व यथासुखम्॥ २४९ ॥

पिधाय मन्दिरद्वारं निधाय शिरसि स्रजम्।
प्रसादवीटकं तीर्थं गृहीत्वा स्थानमाव्रजेत्॥ २५० ॥

ततोऽवशिष्टं मध्याह्नकृत्यं कृत्वा समागतः।
पूजयेद्भगवद्भक्तं पाद्यार्घाचमगन्धकैः॥ २५१ ॥

भोजयेच्च यथाशक्ति तोषयेत्संस्तुवेदपि।
नत्वा विसर्ज्जयेच्चाथ गुरुं गत्वाथ पूजयेत्॥ २५२ ॥

तस्याज्ञयानुकल्पेन पादसंवाहनादिभिः।
तत्प्रसादमनुज्ञां च लब्ध्वा स्वगृहमाव्रजेत् ॥ २५३ ॥
हस्तौ पादौ तु प्रक्षाल्य आनीतं तीर्थमर्चयेत्।
विभज्य स्वजनेभ्योऽथ शुचिर्मौनी स्वकैर्युतः ॥ २५४ ॥
वैश्वदेवं निवृत्याथ भुञ्जीयाद्भोजिते स्वके।
अग्निपितृसुराणां च भक्तानामतिथिर्गवाम् ॥ २५५ ॥
ग्रासं पूर्वं भवेदत्र शेषं सर्वस्य दापयेत्।
पत्नीशिष्यौ न सम्भोज्यौ गर्भिणीं बालकं विना ॥ २५६ ॥
बालाश्च रोगिणो वृद्धाः पूर्वं भोज्या दयास्पदाः।
भुक्त्वाचम्य मुखं हस्तौ पादौ प्रक्षाल्य यत्नतः ॥ २५७ ॥
वीटकानि ततः प्राश्य आचम्य स्वगृहं विशेत्।
विलोकयेत्स्वशास्त्राणि पाठयेच्च पठेद्वदेत् ॥ २५८ ॥
शयीत वा मुहूर्त्तं वै एवं कुर्याद्दिने दिने।
मुहूर्त्तद्वयतो ह्यर्वाग् दिवसस्य बहिर्व्रजेत् ॥ २५९ ॥
कृत्वा शौचं ततः स्नात्वा कुर्यात्पुण्ड्राणि पूर्ववत्।
शुद्धाम्बुकलशं भृत्वा आदाय कुसुमादिकम् ॥ २६० ॥
आगत्य स्वगृहं धृत्वा कुम्भं संशोधयेत्करौ।
शङ्खघण्टास्वनेनैव बोधयेत् स्तोत्रतो हरिम् ॥ २६१ ॥
विमृज्यान्मन्त्रजालं तु पुनः शृङ्गारमण्डपे।
शुद्धाम्बुकलशं चापि विशेषाम्बुघटं तथा ॥ २६२ ॥
शङ्खमर्घ्यं प्रतिष्ठाप्य पुनराचमनादिकम्।
गन्धमाल्याक्षतान् धूपं दीपमारार्त्तिकादिकम् ॥ २६३ ॥
ग्रीष्मर्तौ स्वीयमूर्तिं तु यन्त्रराजं सदा यजेत्।
पाद्यार्घ्याचमनस्नानवस्त्रगन्धाक्षतैरपि ॥ २६४ ॥

धूपं दीपं च नैवेद्यं पानीयाचमनं पुनः।
वीटकारार्तिकं चापि कुर्यान्मुख्यार्चनं हरेः॥ २६५ ॥
पूर्ववद् गुरुपूजां हि स्तुतिं नुतिप्रदक्षिणे।
शयनं कारयेद्वस्त्रैर्माल्यै रम्यैर्विभूषयन्॥ २६६ ॥
वक्ष्यमाणप्रकारोक्त्या भावयन् राधिकेश्वरम्।
इत्थं वै सेवनं कुर्याद्दीक्षितः प्रत्यहं हरेः॥ २६७ ॥
स्वधर्मनिष्ठः पूतात्मा स तल्लीलामयो भवेत्।
त्रिकालं पूजनं वापि कुर्यात्समयगोचरम्॥ २६८ ॥
नेदृशी भावना योग्यानुग्रहेण विना गुरोः।
अशक्तस्यैककालेऽपि शालिग्रामेऽपि वा भवेत्॥ २६९ ॥
यन्त्रराजेन वै सार्द्धं शालग्रामं गिरीश्वरम्।
पूजयेत्साङ्गमेवं हि सायंकाले निरङ्कुम्॥
सायं विधिं क्वचित् कुर्यान्नापद्येव न चालसात्॥ २७० ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे पूजापद्धतिपटलवर्णनं नाम चतुर्दशोऽध्यायः॥ १४ ॥

## ॥ अथ पञ्चदशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

दीक्षितस्य त्रिधा कर्म नित्यं नैमित्तिकं तथा।
काम्यं चेति पुरश्चर्यां कृत्वा तदिह कथ्यते ॥ १ ॥
विशेषपूजनं कुर्याद्भोगमूर्तौ गिरीश्वरे।
शालग्रामे च चक्रे वा तानि शृण्वन्तु भो द्विजाः ॥ २ ॥
चैत्रस्य वत्सरारम्भे द्वादश्यां दमनार्चने।
गुरोर्जन्मदिने शुद्धे तदीयानां गुरोर्गुरोः ॥ ३ ॥
सम्प्रदायगुरोश्चापि मन्त्रप्राप्तिदिने तथा।
गुरोः समागमे चापि महतां च समागमे ॥ ४ ॥
हरेर्जन्मदिने तस्य प्रियाणां जन्मवासरे।
संस्कारेषु विशेषेषु कुर्यात्पूजामहोत्सवम् ॥ ५ ॥
वैशाखस्य तृतीयायां सप्तम्यां ज्येष्ठके पुनः।
दशम्यामथ राकायां ज्येष्ठर्क्षे च प्रकीर्तितम् ॥ ६ ॥
आषाढे चापि सत्षष्ठ्यां पूर्णायां हरिवासरे।
श्रावणैकादशीघस्रे तृतीयापूर्णिमासु च ॥ ७ ॥
नवरात्रे दशम्यां तु त्रयोदश्यादिकत्रिके।
आश्विनस्याथ नन्दायां भद्रायां प्रान्तकत्रिके ॥ ८ ॥
कार्तिके मार्गशीर्षेऽथ सप्तमीनवमीषु च।
पूर्णास्वमासु पौषेऽपि नन्दाभद्राजयासु च ॥ ९ ॥
माघस्यापि च पञ्चम्यामेकादश्यां समर्चनम्।
पूर्णिमायां चतुर्दश्याममसितेऽथाप्यमादिने ॥ १० ॥
फाल्गुनैकादशीपूर्णाप्रतिपत्सु सुपूजनम्।
पुष्पोत्सवश्चैत्रमासे माधवे चन्दनोत्सवः ॥ ११ ॥

ज्येष्ठे जलोत्सवः कार्य आषाढे तु रथोत्सवः।
हिण्डोलकोत्सवः प्रोक्तः श्रावणे भाद्रके हरेः॥१२॥
बाल्यक्रीडोत्सवः कार्यो रासः केल्यास्तथाश्विने।
मखोत्सवः कार्तिकेऽथ मार्गे प्रावरणोत्सवः॥१३॥
पौषे पाकोत्सवो माघे वसन्तक्रीडनोत्सवः।
होलाक्रीडोत्सवस्तस्य फाल्गुने तु विधीयते॥१४॥
श्वेतमाल्याम्बरालेपभूषणव्यजनासनैः।
सितनैवेद्यतोऽभ्यर्च्यः प्रसन्नार्चासु वत्सरे॥१५॥
पीतमाल्याम्बरालेपभूषणव्यजनासनैः।
पीतनैवेद्यतो देवं नित्यार्चासु प्रपूजयेत्॥१६॥
जन्मनां वासरे चाथ महतां च समागमे।
संस्कारेषु सर्वेषु च हरेर्जन्मसु लीलया॥१७॥
वैशाखस्य तृतीयायां चन्दनाम्बरमाल्यकैः।
मण्डनैर्नवपाकैश्च युगादिषु च पूजयेत्॥१८॥
सङ्क्रमेषु च दानीयैः पाकैरेनं समर्चयेत्।
पर्वोत्सवेषु मध्याह्ने जपैर्होमैः सुपूजनम्॥१९॥
गङ्गायमुनयोर्जन्मदिने ज्येष्ठे जलोत्सवम्।
मध्याह्ने पूजनं कार्यं प्रसन्नार्चा हरेरपि॥२०॥
ज्येष्ठायोगे महास्नानं चन्दनोशिरवासितैः।
शीतलैरम्बुभिः कुर्यान्नैवेद्यैश्च फलाङ्कुरैः॥२१॥
आषाढे रङ्गषष्ठ्यां तु पूजा रक्ताम्बरादिकैः।
जलान्ते पूजनं कार्यं शयने हरिवासरे॥२२॥
नियमं तत्र गृह्णीयाद्यद्यदिष्टतमं भवेत्।
व्यासपूजा च पूर्णायां सम्प्रदायगुरोरियम्॥२३॥

श्रावणैकादशीघस्रे पवित्रावासनोत्सवम्।
गुरूक्तविधिना कुर्याद् द्वादश्यां मन्त्रपूजनम्॥२४॥
तृतीयापूर्णिमास्वस्य शृङ्गारोत्सवमाचरेत्।
चित्ररक्ताम्बरैः पाकैर्नवरात्रे प्रपूजयेत्॥२५॥
मूलादिषु च भारत्याः स्वागमादौ प्रपूजनम्।
नवाङ्कुरार्पणस्यार्चा दशम्यां विजयोत्सवः॥२६॥
सायंपूजां विधायैव शास्त्रपूजाप्रमाणतः।
त्रयोदश्यां चतुर्दश्यां पूर्णायां दानकोत्सवम्॥२७॥
रक्ताऽम्बरानुलेपाद्यैर्महिभ्योऽर्चोपचारकैः।
नन्दायां कार्तिके कुर्यादन्नकूटमहोत्सवम्॥२८॥
यावत्संभावितैः पाकैः शाकै रत्नैर्मनोहरैः।
गिरीन्द्रं पूज्य विधिवद्गीतवाद्यैर्द्विजार्चनैः॥२९॥
स्वसुः संमाननाभ्यर्चा भद्रायां तस्य जायते।
अष्टम्यां तु गवामर्चा द्वादश्यां तु प्रबोधनम्॥३०॥
दशम्यादिषु देवस्य कुर्याज्जागरणोत्सवम्।
मार्गमासे वरप्राप्तिर्दिनेऽस्य व्यञ्जनोत्सवः॥३१॥
पौषे रहस्यलीलायां कुर्यात्पाकोत्सवं शुभम्।
माघे मदनजन्मादिर्निकुञ्जानां महोत्सवः॥३२॥
फाल्गुने तस्य लीलाया उत्सवः श्रीपतेः शुभः।
महोत्सवो हरेर्जन्मदिने लीलादिने हरेः॥३३॥
तत्तल्लीलानुकरणैस्तत्र पूजां चरेद्धरेः।
पुण्यकालविशेषेषु भवेत्पर्वोत्सवो हरेः॥३४॥
तेषु पूजा पुरा प्रोक्ता जपहोमार्चनादिभिः।
तदन्यदुत्सवे कुर्याद् वक्ष्यमाणं समर्चनम्॥३५॥

कुर्याद्दमनकेऽभ्यर्चा पूर्वघस्रे समर्चनम् ।
गत्वा तरुतले कार्यं ब्रह्मघोषै रथोत्सवैः ॥ ३६ ॥
शुचिर्भूत्वा दमनकं प्राङ्मुखः श्वेतमाल्यकैः ।
गन्धधूपैश्च नैवेद्यैः कृत्वाङ्गन्याससमर्चयेत् ॥ ३७ ॥
नमो दमनकतरो नमो मदनवल्लभ ।
श्रीमन्मुकुन्दप्रीत्यर्थं पूजये त्वा नमन्नये ॥ ३८ ॥
इत्यभ्यर्च्य नयेत्पत्रं बिभ्रन् शिरसि वाग्यतः ।
शृङ्गारमण्डपं गत्वा चतुरस्रेऽष्टकोणके ॥ ३९ ॥
चतुरस्रे चतुर्व्यूहमष्टकोणे प्रियाष्टकम् ।
षट्कोणे षड्गुणे ह्यर्वाग् मध्ये श्रीपतिमर्चयेत् ॥ ४० ॥
तदग्रतः स्वस्तिकाष्टदले पूर्णघटोपरि ।
पुष्पाणि तत्र संस्थाप्य यजेत्तन्त्रोपचारतः ॥ ४१ ॥
श्रीमाधव मधुजनितैर्दमनकपुष्पैः प्रियाहृतैर्यक्ष्ये ।
प्रतिवार्षिकसत्पूजाऽपराधशान्त्यै सदानन्द ॥ ४२ ॥
एवं सायं समावाह्य प्रातर्नित्यार्चनात्परम् ।
पूर्वोक्तमण्डलेऽभ्यर्च्य महामन्त्रेण चार्पयेत् ॥ ४३ ॥
भो भो श्रीललिते कान्ते मालत्यानन्दमन्दिरे ।
ममापराधशान्त्यर्थं कुरुष्व दमनार्पणम् ॥ ४४ ॥
परमामोदमुदितमदनानन्दसुन्दरम् ।
पुष्पं दमनकस्यैतज्जगदीश गृहाण मे ॥ ४५ ॥
इत्यभ्यर्च्य प्रसन्नार्चां कृत्वाऽथ गुरवेऽर्पयेत् ।
बहिर्भक्तजनेभ्यश्च समर्प्यैवं समर्चयेत् ॥ ४६ ॥
पूजनान्ते प्रसन्नार्चा भवेत्पञ्चोपचारतः ।
प्रागुक्तविधिना होम इत्येवं दमनार्चनम् ॥ ४७ ॥

पवित्राभ्यर्चनं वक्ष्ये पूर्वेद्युरधिवासनम् ।
पट्टसूत्रमयान्यत्र शोभनान्यपराणि च ॥ ४८ ॥
दमनोक्तप्रकारेण प्रभवे शोभनार्पयेत् ।
नमः पवित्राभरण श्रीपतेः प्रीतिवर्धन ॥ ४९ ॥
श्रीमन्मुकुन्दप्रीत्यर्थं भवास्मद्दोषशान्तये ।
भो श्रीललित इत्यादिमहामन्त्रेण वार्पयेत् ॥ ५० ॥
ममोपरि प्रसादार्थं पवित्राणि समर्पये ।
सौवर्णपट्टकौशेयरुचिराणि नवानि भोः ॥ ५१ ॥
अर्चितानि पवित्राणि गृहाण श्रीरमापते ।
इत्येवं हि पवित्रार्चाहोमस्त्रिमधुभिः शतम् ॥ ५२ ॥
गुरुभ्यो वैष्णवेभ्यश्च अवश्यं सितयार्पयेत् ।
पर्वार्चने प्रसन्नार्चां कृत्वा देवव्रतो भवेत् ॥ ५३ ॥
भो श्रीललित इत्यादिपर्वनैवेद्यमर्पयेत् ।
शर्कराघृतसंयुक्तं सक्तु चैतन्मनोहरम् ॥ ५४ ॥
अर्पये श्रीमते देव गृहाण जगदीश्वर ।
जन्मोत्सवे विशेषार्चा महाभ्यङ्गोपचारकैः ॥ ५५ ॥
रक्तपीतांशुकालेपमाल्यभोज्यार्पणैरपि ।
मध्याह्निकं निवर्त्यैव ताम्बूलान्तं ततः पुनः ॥ ५६ ॥
पञ्चामृताम्भसा स्नानं धूपदीपनिवेदनैः ।
चतुष्कोणात्मकान्यत्र षट् स्युर्वै स्नानमण्डले ॥ ५७ ।
कृष्णां धूम्रां च सुरभीं सितां दुग्धे च नन्दिनीम् ।
मधुनि मधुरां मध्वां कुसुमां च रसां वृषाम् (?) ॥ ५८ ॥
शर्करासु रसवतीं कोणेष्विक्षुमतीं क्रियाम् ।
यज्ञाङ्गीं परमामर्च्य जले शुद्धोदधिं पुनः ॥ ५९ ॥

क्षीराज्यदधीक्षुरससिन्धूनिष्ट्वा महामनोः।
वृन्दापत्राणि दत्वाथ सङ्कल्पतिलकादिभिः॥ ६० ॥
स्नापयेद्वारुणैर्मन्त्रैः कालिन्द्याः स्नानवर्त्मना।
पञ्चामृताभिषेकोऽयं जन्मर्क्षे भगवंस्तव॥ ६१ ॥
यशोदया समानीतं गृहाण व्रजजीवन।
ततः शुद्धोदगन्धोदैः सम्मार्ज्याभूष्य तोषयेत्॥ ६२ ॥
एवं कुर्याद्यथायोग्यां लीलां चापि महोत्सवे।
चन्दनाम्बुरथ प्रेङ्खाणां दिनेष्वधिवासनम्॥ ६३ ॥
उपरागे व्यतीपाते श्रावणेऽमासु संक्रमे।
स्वगृह्याग्नौ त्रिमधुभिर्हवनं द्विजतर्पणम्॥ ६४ ॥
कल्पादौ च युगादौ च मन्वादौ पुण्यवासरे।
दानं जपार्चनं कार्यं यथर्तुदिनसम्भवम्॥ ६५ ॥
वारानुरूपभोज्यानि शृङ्गाराणि तथा सुमैः।
विदध्यात्क्रियमाणस्तु यथाशक्ति यथोदयम्॥ ६६ ॥
प्राप्नुयात्परमां शुद्धिं मन्त्रान्तरसुदुर्लभाम्।
द्वादशाक्षरमन्त्रेण पूजां चाष्टाक्षरेण वा॥ ६७ ॥
दशाक्षरेण गायत्र्या सेवां कुर्यात्सुरोदितैः।
एवं नैमित्तिकं नित्यं कृत्वा चैव समाहितः॥ ६८ ॥
पौरश्चरणिकं कर्म कुर्यात्संवत्सरान्तरे।
ब्रह्मचर्यमधःशय्या स्नानं त्रिषवणं तथा॥ ६९ ॥
देवार्चनं जपो होमो नित्यमेव भवेदिह।
हविष्यमन्नमश्नीयान्नक्तं वाथापराह्णिके॥ ७० ॥
पूजान्ते च जपं कुर्याद् न्यासध्यानपुरःसरम्।
नायासेन कर्तव्यो जपः स्याद्विफलस्तथा॥ ७१ ॥

प्रसन्नेषु च सर्वेषु प्रसीदति हरिः स्वयम्।
वर्णलक्षं जपेन्मन्त्रं कुर्वन् सावरणार्चनम् ॥ ७२ ॥
पुरश्चरणमेव स्यात्सौम्यं वर्णमितैश्च तैः।
अष्टोत्तरशतैरेतैर्वाजिमेधो महामखः ॥ ७३ ॥
नातः परतरं पुण्यं ब्रह्माण्डेष्वखिलेष्वपि।
वीरव्रतेन तत्कुर्वन् ग्रीष्मे पञ्चतपा भवेत् ॥ ७४ ॥
शीते शीताम्बुमग्नश्च वर्षास्वासारषाण्मुनिः।
स्मिरासनस्थस्तिष्ठन्वा पादाङ्गुष्ठेन वायुभुक् ॥ ७५ ॥
पर्णपुष्पफलाहारो रक्षामृद्गोमयैर्वपुः।
पिबन् धूम्रं विलोमेन तीर्थे तीर्थे वसन् जपेत् ॥ ७६ ॥
एवं कष्टेन महता सिद्धिं प्राप्नोत्यनुत्तमाम्।
भक्त्या केवलया वापि गुरूणां समनुग्रहात् ॥ ७७ ॥
नटैर्विटैर्गायकैश्च दूतवृद्ध्युपजीवनैः।
पाषण्डैः पतितैः पापैर्निजधर्मपराङ्मुखैः ॥ ७८ ॥
अदीक्षितैः स्वागमस्य द्विड्भिर्देवस्य वा गुरोः।
न संसर्गं चरेदेतैर्दोषान् सर्वान् विवर्जयेत् ॥ ७९ ॥
न सम्प्रलापं कुर्वीत परनिन्दात्मसंस्तुतिम्।
जिह्वोपस्थादिलौल्यं च कामक्रोधादि वर्जयेत् ॥ ८० ॥
सतां सङ्गं प्रकुर्वीत शुद्धिं वाग्देहचेतसाम्।
शुद्धैर्दिव्यैर्जनैर्गार्हिः परिचर्यां तु साधयेत् ॥ ८१ ॥
जपस्य दशमांशेन नित्यं वा हवनं चरेत्।
घृतेन पायसेनापि मधुभिः कुसुमाम्बुजैः ॥ ८२ ॥
साकल्येन तिलैराज्यैर्गव्यैर्मिष्टफलैरपि।
इष्टमिष्टं तथा पीतं हविष्यं तु हुनेत् शुचिः ॥ ८३ ॥

वारानुरूपवस्त्रान्नमणिपुष्पादिनाऽर्चयेत्।
समाप्ते वा मखः कार्यो वित्तशाठ्यं न वै चरेत्॥८४॥
तर्पणं शीतलैः शुद्धैर्नीरैर्दुग्धैः सुमैरपि।
सुगन्धवासितैः कुर्यान्मार्जनं तद्दशांशतः॥८५॥
विप्राणां तर्पणं कार्यं वैष्णवानां विशेषतः।
सर्वेषामभयं दद्यात्तोषयेत्स्वजनानपि॥८६॥
एवं कृत्वा पुरश्चर्यां काम्यं कुर्यान्महापदि।
न परार्थं निजार्थं वा वाञ्छन् भक्तिमनुत्तमाम्॥८७॥
नित्यं कुर्याद्यथाशक्ति नैमित्तं च यथोदयम्।
काम्यं कुर्याद्यथोक्तं वै नान्यथा सिद्धिरीप्सिता॥८८॥
वर्णलक्षात्तदर्द्धाद्वा तदर्द्धाद्वापि लक्षतः।
कार्यानुरूपतो जापं कलौ कुर्याच्चतुर्गुणम्॥८९॥
हवनादावशक्तस्तु जपं पञ्चगुणं चरेत्।
अत्यशक्तस्तदर्द्धार्द्धः शक्तितो वाशयेद् द्विजान्॥९०॥
शान्तिकं पौष्टिकं तुष्टिकरमापन्निवारणम्।
कारणं चेषणानां च निग्रहानुग्रहप्रदम्॥९१॥
सप्तकर्माणि काम्यानि सप्तवारेषु चाचरेत्।
वसन्तादिषु शान्त्यादि सर्वदापन्निवारणम्॥९२॥
वसन्तग्रीष्मशरदो हेमन्तः प्रावृडेतरः।
ऋतवः क्रमतश्चैते जायन्ते वासरे निशि॥९३॥
श्वेतमाल्याम्बरालेपनैवेद्याद्यैश्च शान्तिकम्।
पूजनं च घृतैर्होमैर्दूर्वाभिः सर्षपैस्तिलैः॥९४॥
पीतैश्च पौष्टिकैर्द्रव्यैः पायसेनानले हुनेत्।
तुष्टौ हरितद्रव्यैश्च पूजा होमः फलैरपि॥९५॥

आपन्निवारणे चापद्धरैर्द्रव्यैर्हुनेत्सुधीः।
पूजनं पाटलैर्दिव्यैर्मधुना वाग्नितर्पणम् ॥९६॥
ईषणापूरणे पूजा रक्तैर्द्रव्यैर्विधीयते।
होमस्त्रिमधुभिः कार्यः कुन्दमन्दारचम्पकैः॥९७॥
निग्रहे कृष्णद्रव्यैश्च तिलैर्वापि हुनेदयम्।
अनुग्रहे सर्वरागद्रव्यैः पूजा भवेद्धरेः॥९८॥
साकल्येन हुनेदग्नौ फलैरपि सुमैरपि।
सर्वत्रैव घृतं देयं शर्करागन्धसंयुतम्॥९९॥
दद्यान्मिष्टफलान्यत्र तथा विप्रान् समर्चयेत्।
चक्रपूजां चरेदत्र सद्यः कार्यसुसिद्धये॥१००॥
विशेषपूजा वाराणां मासादेश्च यथायथम्।
चक्रपूजां प्रवक्ष्यामि स्नातः शुद्धः कृताह्निकः॥१०१॥
मण्डलं रचयेत्पूर्वमाचम्यार्चनमाचरेत्।
विष्वक्सेनं तथा व्यासं दुर्गामथ विनायकम्॥१०२॥
मण्डलस्य यजेद्दिक्षु तदन्तःस्वासनं चरेत्।
पुनश्च मण्डलं कार्यं निशिया(?)गोमयेन च॥१०३॥
पात्रन्यासं तत्र कुर्याच्छङ्खं वापि घटं न्यसेत्।
आचम्य कृतविन्यासस्त्रिकोणं मण्डलं लिखेत्॥१०४॥
ब्रह्म सम्पूजयेन्मध्ये पराशक्तिसमन्वितम्।
पूर्वकोणे यजेदीशं मायाशक्त्यादिसंयुतम्॥१०५॥
परमात्मानमात्मानं विद्याविद्यादिभिस्तयोः।
कालकर्मस्वभावान्वै प्रधानं पुरुषं तथा॥१०६॥
यदृच्छं च यजेदग्रे षट्कोणेषु यथाक्रमम्।
ततश्चाष्टदले पूज्या गुणा महदहङ्कृती॥१०७॥

वैकारिकस्तैजसश्च भूतादिश्च सशक्तिभिः।
पञ्चभूतानि पूज्यानि ततो मण्डलपञ्चके॥१०८॥
दिक्पतीन्मण्डलस्याग्रे मण्डले पुरुषं परम्।
हैरण्यमत्र ब्रह्माण्डं विराजं चार्चयेत्॥१०९।
गर्भोदके तत्र चात्मा पूज्यो नारायणस्ततः।
पार्श्वयोर्विष्णुमीशं च विधिं नाभिसरोरुहे॥११०॥
चतुर्दश ततो लोकान् नामभिः पूजयेदथ।
आधारशक्तिं कूर्मं च वाराहं शेषमर्चयेत्॥१११॥
धरां च क्षीरसिन्धुं च श्वेतद्वीपं च नन्दनम्।
यजेद्विरजया साकं ततो निःश्रेयसं वनम्॥११२॥
स्वर्णभूम्यां चतुर्दिक्षु नन्दादीन् तस्य पूजयेत्।
पीठपादेषु तत्राथ विधिमीशं च नारदम्॥११३॥
विष्णुं समर्चयेदूर्ध्वं व्यापि वैकुण्ठमर्चयेत्।
मथुरामण्डलं तत्र वृन्दाद्या दिक्षु शक्तयः॥११४॥
समर्च्य गोकुलं तत्र पूजयेत् गिरिपञ्चकम्।
मध्याद्रौ स्वर्णचिद्भूमिं दिक्षु वेदान्यजेदिह॥११५॥
श्रवणाद्यैर्यजेदत्र भक्त्यङ्गैर्भक्तिनीरजम्।
सर्वात्मभावं मध्येऽपि प्रेम्णार्कतनयामपि॥११६॥
यन्त्रराजोक्तदेवानां साङ्गोपाङ्गैश्च पूजनम्।
वैदिकैर्नाममन्त्रैश्च पूर्वोक्तैः सर्वमर्चयेत्॥११७॥
एवं पूजां चरेद्यस्तु कारयेद्वा समाहितः।
तस्य सिद्ध्यन्ति सर्वाणि चिन्तितानि शुभानि वै॥११८॥
कमलैर्हवनं सार्वकामिकं दिक्सहस्रकैः।
जपार्थं पायसैः सार्द्धं घृतैः शर्करया फलैः॥११९॥

मालत्या कमलावाप्तिः कुन्दैराप्नोति पौरुषम्।
करवीरैः प्रतिष्ठाप्तिर्वाञ्छितार्थः सितासितैः॥१२०॥
जातिभिर्जायते पुत्रो यूथीभिश्च धनागमः।
मन्दारैर्लोकसम्प्राप्तिररिप्राप्तिश्च चम्पकैः॥१२१॥
पराभवश्च शत्रूणां राजिकातैलसर्षपैः।
गुडूच्या रोगजातानां रोगाणां तत्तदौषधैः॥१२२॥
दृष्टिस्त्रिमधुभिर्भव्या मारी शाम्यति बिल्वकैः।
क्रमुकैर्नारिकेलैश्च फलै रम्यैः सुमैरपि॥१२३॥
शास्त्रोक्तैरन्यद्रव्यैश्च फलं प्रोक्तं प्रजायते।
शुरसा (?) लक्ष्यपत्राणां चम्पकानां तथा ब्रुहाम् (?)॥१२४॥
पूजनैः परमा शक्तिर्जायते चरमा शुभा।
नित्यं नैमित्तिकं काम्यमेवमुक्तं समर्चनम्॥१२५॥
कुर्वन्कामानवाप्नोति नात्र कार्या विचारणा॥१२६॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे विशेषपूजापटलपद्धतिवर्णनं नाम पञ्चदशोऽध्यायः॥१५॥

# ॥ अथ षोडशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

शास्त्रान्तरेऽपि यत्प्रोक्तं चरेच्छास्त्रानुसारतः।
महतां समयश्चापि प्रमाणं वेदसम्मितम् ॥ १ ॥
अथ स्तोत्रं प्रवक्ष्यामि गुरोः स्वात्मस्वरूपिणः।
येन भक्तिपथे दिव्यः प्रसिध्यति परात्मनि ॥ २ ॥

यः श्रीपुराणपुरुषस्य मुखारविन्दात्
संभूतभक्तिपथमाविरभूत्प्रणेतुम्।
साक्षात्करोति सकलां सकलात्मलीलां
तं श्रीमदार्यचरणं शरणं भजेम ॥ ३ ॥

यस्याङ्घ्रिपङ्कजयुगेऽम्बुजवज्रचाप-
कौमोदकीव्रततितोरणसत्पताकाः।
मीनाङ्कुशध्वजयवासिसरोजकुम्भा-
स्तं श्रीमदार्यचरणं शरणं भजेम ॥ ४ ॥

यः शारदेन्दुधवलां विमलाब्जगर्भ-
वासोभिशोभिततमां निजभूषणाङ्गीम्।
स्वात्मेन्दिराथ हरिपदां दधतेऽमृतेब्धे-
स्तं श्रीमदार्यचरणं शरणं भजेम ॥ ५ ॥

यश्चक्रशङ्खसुगदाम्बुजभूषिताङ्गो
यो यज्ञसूत्रकलितो ललितोर्ध्वपाण्डुः।
पीताम्बरस्तुलसिकाभरणेत्युदार-
स्तं श्रीमदार्यचरणं शरणं भजेम ॥ ६ ॥

वर्णाश्रमश्रमकृतैर्विविधैः स्वधर्मै-
र्दानैर्व्रतैरपि मखैः सुतपोभिरुग्रैः।
नाशीर्भजन्ति चरणाम्बुजमस्य हित्वा
तं श्रीमदार्यचरणं शरणं भजेम ॥ ७ ॥

दीनस्य हीनसकलागमसाधनस्य
पीनस्य पापपटलैरपि लीनवुद्धेः।
यस्याङ्घ्र्यधीनमनसः स्वयमेति भक्ति-
स्तं श्रीमदार्यचरणं शरणं भजेम॥ ८॥
यः स्वाश्रितोद्धृतिकृते चकमेऽवतारान्
तीर्थात्मना ह्युपदिदेश सुभक्तिमार्गान्।
सद्यः स्वयं हरिरमुष्य वशीकृतश्च
तं श्रीमदार्यचरणं शरणं भजेम॥ ९॥
निःसाधनाय चरणाम्बुजमाश्रिताय
सम्यग् विशोध्य कुरुते हरिसाञ्जनाय।
यस्मात्परो न करुणावरुणालयोऽन्य-
स्तं श्रीमदार्यचरणं शरणं भजेम॥ १०॥
इदं गुरुवरस्तोत्रं गुरुप्रीत्यै सदा पठेत्।
गुरुपूजाफलं प्राप्य हरिभक्तिं च विन्दति॥ ११॥

॥ इति गुरुस्तोत्रम्॥

अथ वक्ष्ये हरिस्तोत्रं पावनं दुःखनाशनम्।
भुक्तिमुक्तिप्रदं चान्त्ये भक्तितत्त्वार्थसङ्गतिम्॥ १॥
श्रीमान् पुमान् स भगवान् निगमाभिगीतः
शेषाद्यशेषसुरपुङ्गवसेविताङ्घ्रिः।
स स्वे महिम्न्यभिरतः स्वयमाप्तकाम-
स्तस्मै नमो भगवते महते सदैव॥ २॥

एकोऽप्यनेकरचनारचनात्पुरासीत्
सच्चित्सुखैकघनमूर्तिरमूर्तिराद्यः।
साम्यातिशायरहितो निजराधसा य-
स्तस्मै नमो भगवते महते सदैव ॥ ३ ॥

स्वात्मैकनिर्वृतिरसं रसितुं स्वकीय-
मानन्दमात्रममलं मिथुनं जजान।
तस्यानुरूपरमणे रमणात्मना य-
स्तस्मै नमो भगवते महते सदैव ॥ ४ ॥

यस्माद्बभूव वपुषा वचसा हृदापि
कालस्वभावकृतिविप्रकृतिः प्रपञ्चः।
जीवाः सुरासुरविधा मम गम्य यत्र
तस्मै नमो भगवते महते सदैव ॥ ५ ॥

यस्मिन्स्वधर्मचरणावरणोदितेन
धर्मेण तेन च हुतप्रहुतादिगेन।
निर्धूय कर्म समलं विमला रताः स्यु-
स्तस्मै नमो भगवते महते सदैव ॥ ६ ॥

शेषाद्युपास्य विबुधैः समुपासनीयं
पाद्मादिदेशिकवरैरुपदिष्टमार्गम्।
प्राप्नोति यं श्रुतिमतं हृदि वासुदेवं
तस्मै नमो भगवते महते सदैव ॥ ७ ॥

नो यान्ति यं प्रवचनैर्हवनैस्तपोभि-
र्योगप्रयोगविततैर्भजनादपेतैः।
पादाम्बुजाश्रयवतां श्रयणं च हित्वा
तस्मै नमो भगवते महते सदैव ॥ ८ ॥

वज्राङ्कुशध्वजमुखैरभिलक्षितस्य
यत्पादपङ्कजयुगस्य सदाभयस्य।
तन्मूलकर्म रजसोऽस्य ग्रहस्य कर्म
तस्मै नमो भगवते महते सदैव॥ ९ ॥
स्नातो विरक्तिसुगणेन यशोगुणेन
आमोदितः स्वमहिमा समलङ्कृतो यः।
ज्ञानामृतेन चकितश्चकितः श्रियापि
तस्मै नमो भगवते महते सदैव॥ १० ॥
इति श्रीमद्धरिस्तोत्रं प्रातरुत्थाय यः पठेत्।
सर्वपापविशुद्धात्मा हरिलोकं स गच्छति॥ ११ ॥

॥ इति हरिस्तोत्रम् ॥

अथ स्तोत्रवरं दिव्यं मङ्गलानां च मङ्गलम्।
श्रीनन्दनन्दनहरेः कालिन्द्या समुदीरितम्॥ १ ॥
जय जयाजय मङ्गलश्रुतिगणेन्दुमुखीव्रजसंस्तुत।
जय जयात्मपदाम्बुजसंश्रितनतसुरेन्द्रमतानुमहेन्दिर॥ २ ॥
जय जयाजय मङ्गलमङ्गलविकचनीलकुशेशयसुन्दर।
विधृतकाञ्चनकान्तनवाम्बर विविधभूषणभूषितभूषण॥ ३ ॥
जय जयाजय मङ्गलमङ्गल (विकचनीलकुशेशयसुन्दर।)
तव यदाब्जरजोऽभसिता जनाः जगति मङ्गल जयन्ति शुचिप्रभाः॥ ४ ॥
जय जयाजय मङ्गलमङ्गल मुनिवरैः परिणूत्तमहोदय।
सकलविश्वकुलानि कुलाणुभिस्तव कृतानि वदन्ति मनीषिणः॥ ५ ॥
जय जयाजय मङ्गलमङ्गल जयति मङ्गलमङ्गमिदं तव।
तदनु मङ्गलमेव विभूषणं वर सुमाल्यमुखं विधृतं विभो॥ ६ ॥

जय जयाजय मङ्गलमङ्गल व्रजजनीव्रजमङ्ग निजव्रजम्।
मुरलिका मुकुटं लकुटं स्रजः सकलमेव विभो तव मङ्गलम् ॥ ७ ॥
जय जयाजय मङ्गलमङ्गल जगति ते भवनं विपिनं गिरिः।
सरिदलं वचनं चरितं श्रुतं निखिलमङ्गलमस्ति न चापरम् ॥ ८ ॥
जय जयाजय मङ्गलमङ्गल कुरु विभो भवमङ्गलमङ्गलम्।
तव मुखाम्बुजदर्शनतः परं भवति आर्य सुमङ्गलमङ्गलम् ॥ ९ ॥
इति श्रीमङ्गलस्तोत्रं हरेरद्भुतकर्मणः।
पठेदुषसि यस्तस्य मङ्गलं ह्याष्टयामिकम् ॥ १० ॥

॥ इति श्रीमङ्गलाष्टकम् ॥

अथ चारार्तिकं स्तोत्रं वक्ष्ये परमशोभनम्।
यद्गीयते ललितया वृन्दावनमहेशितुः ॥ १ ॥
जय निगमागमगीतमहोदयश्रीव्रजराज हरे !
सच्चित्सुखघनस्वात्ममहित्वे रमसे प्रकृतिपरे।
नित्याखण्डे सुखां निजलीलां कर्त्तुं दृक्प्रसरे !
यो राधसा द्विधात्मनि धत्ते पुंस्त्रीरूपवरे ॥ २ ॥
वामांशतोऽस्य वामं नित्यायूथशतं
सौभाग्यैकनिकेतं स्वामिन्या विततम्।
जातं ततोऽन्यतोऽपि लीलानुप्रकृतं (?)
गोगोपालीविपिनविहारं प्रकटानन्दभृतम् ॥ ३ ॥
फुल्लेन्दीवरसुन्दररूपं लावण्यैकधनं
परमोदारचरित्रं कल्याणैकधनम्।
वञ्जुलमणिमञ्जिरितुलसीशोभितयुगचरणं
चन्द्रकलाकलिताम्बुजकल्पं भजतां यश्शरणम् ॥ ४ ॥

मञ्चकरम्भास्तम्भसुजङ्घे जानुयुघे मुकुरे
उदितारुणवाससि हरिदश्वप्रतिभोरुप्रवरे।
काञ्चनकाञ्चीविराजिनितम्बनाभिवियच्छशी रे (?)
त्रिवलिसरित्सङ्गमकृतशोभे लोकानन्दभरे॥ ५॥
मुद्रितसुमहेन्द्रमणिकवाटं हृत्सुषमागारं
मञ्जुलमण्डनरत्नविहारैर्लक्ष्म्याः सुविहारम्।
भोगिसुभोगनिभे भुजयुगले भव रक्षासारंम
केयूरैः कटकैर्मुद्राभिर्लोकेऽभिस्फारम्॥ ६॥
सितहीरकचिबुकं गुरुमुक्ताकृतनासाभरणं
शोणसरलविराजिततिलकं भव मङ्गलकरणम्।
मारकतोज्ज्वलकुण्डलयुगलं मकराकृतिहरणं
यस्याननेन्दुमण्डलममलं ज्योतिःस्मितशरणम्॥ ७॥
छुरितालकचूडाचूडामणिबर्हापीडवरं
केतकदलावतंसमनुश्रितमल्लीमाल्यभरम्।
यस्याम्बुजतुलसीगुञ्जालीकृतदामप्रसरं
काञ्चनसूत्रसुगुम्फविचित्रं पीतनिचोलसरम्॥ ८॥
मृगमदघुसृणसुशोभितलेपं विमलाञ्जनं नयने
ताम्बूलारुणो भाससि रे अधरे मन्दस्मितरदने।
दाडिमकुलानुकृतदन्तालिः स्फुरति वदि (?) दयने
कूजति हरेर्मुरलिका मधुरं करपल्लवशयने॥ ९॥
वृन्दाविपिनरासविहारे सुरवरविटपितले
चिन्तामणिचटिते क्षुरपीठे युक्तहृदब्जदले।
श्रुतिमुनिरूपव्रजस्त्रीयूथे विहरसि गीतकले
यमुनातीरे मन्दसमीरे मुखरितभृङ्गबले॥ १०॥

कामदुहां निवहे गोपानामनुरूपधरो
वर्षसि अधरसुधां निजवेणौ पूर्णानन्दभरः।
नृत्यसि राजे व्रजबालाभिस्तावद्रूपकरो
मन्मथमन्मथनिकारापीच्यां मूर्तिं वहसि वरः ॥ ११ ॥
भज भज नन्दयशोदानन्दं भज वृन्दावनकेलं
भज वृषभानुसुताकृतिसङ्गिनित्यनवीनसुखेलम्।
भज गोविन्दं गोकुलनाथं भज धृतपीतसुचैलं
भज भजतां सुरतरुजितसारं त्यज चान्यमनुवेलम् ॥१२॥
जय मङ्गलमङ्गल निजरूपैः निजमङ्गलदारै-
र्जय मङ्गलमङ्गल निजभक्तैः सुविहारैः ॥१३॥
आरार्तिकमिदं स्तोत्रं यः पठेद्धरिसन्निधौ।
तस्याश्रये भवेत् कृष्ण इति श्रीललितोदितम् ॥ १४ ॥

॥ इति नीराजनस्तोत्रम् ॥

पीठस्तोत्रमहं वक्ष्ये श्रीशार्चाफलसिद्धये।
येनास्य परिवाराणां देवानां स्यात्समर्चनम् ॥ १ ॥
चिदानन्दमयभक्तिज्ञानसौरभसम्पदी।
कारुण्याम्बुधिसंजाते गुरुपादाम्बुजे नुमः ॥ २ ॥
शब्दार्थचरणस्तर्कमध्यो योगहृदन्तरः।
वेदान्तवदनस्तस्मै हरये गुरवे नमः ॥ ३ ॥
षड्गुणैश्वर्यसम्पन्नं हरिलीलैकसाक्षिणम्।
प्रपन्नजनमन्दारमाचार्यं प्रणमाम्यहम् ॥ ४ ॥
भजनानन्दलब्ध्यर्थं भक्तवृन्दैरुपासितम्।
श्रीनन्दनन्दनात्मानं वन्दे वन्दारुवत्सलम् ॥ ५ ॥

अविघ्नं कुरु मे नाथ अर्चनाज्ञां प्रदेहि मे।
तव पादाम्बुजध्यानात्सफलं स्यात्स्वपूजनम् ॥ ६ ॥
तवैव पूजनं ह्येतत् श्रीमतो वानुशासनम्।
तवैवातः प्रसादोऽस्तु त्वदीयोऽहं सदा भवे ॥ ७ ॥
मनो भगवतेऽनन्त महापुरुषरूपिणे।
समस्तु गुणसङ्ख्यानायां व्यक्ताय च विष्णवे ॥ ८ ॥
नमो धरायै जगतां सर्वरत्नमहेश्वरि।
सर्वंसहायै दिव्यायै विष्णुपत्न्यै नमोऽस्तु ते ॥ ९ ॥
नमः क्षीरसुधासिन्धो अग्निरुद्धाश्रयाय ते।
विशुद्धैश्वर्यविज्ञानशालिने हरये नमः ॥ १० ॥
वैकुण्ठाय नमो नित्यं विरजायै नमो नमः।
नन्दनाय नमो विष्णोः सुनन्दादिभ्य एव च ॥ ११ ॥
ब्रह्मणे विष्णवे चापि शिवाय रवये नमः।
मथुरामण्डलायाथो श्रीमतेऽस्तु नमो नमः ॥ १२ ॥
नमो वृन्दे च सङ्केते वने कात्यायनि परे।
मथुरे नववारे च चतुर्वारे महेश्वरि ॥ १३ ॥
योगमाये नमस्तुभ्यं गोकुलाय नमो नमः।
नन्दाद्रये तथानन्दाद्रये कामाद्रये नमः ॥ १४ ॥
गोवर्द्धनाय चरणाद्रये नित्यं नमो नमः।
अक्षरब्रह्मरूपायै स्वर्णभूम्यै नमो नमः ॥ १५ ॥
वेदाय ऋग्यजुःसामाथर्वज्ञानभुवे नमः।
भक्त्यै नमस्तदङ्गेभ्यः श्रवणेभ्यो नमो नमः ॥ १६ ॥
नमः सर्वात्मभावाय प्रेम्णे नित्यं नमो नमः।
सर्वोपनिषदानन्दरसायै सरिते नमः ॥ १७ ॥

ऐश्वर्येभ्यो नमस्तस्यानुग्रहाय नमो नमः।
महानुभावभावाय प्रभवाय नमो नमः॥ १८॥
योगसंशुद्धहृत्पद्मं नत्वा श्रीव्रजभृद्वधूः।
निचोलाय नमो नित्यं पीठाय हरये नमः॥ १९॥
नमो मानसगङ्गायै पानमानरतीन्दुषु।
सरस्सु च नमश्चाथ नमः कुसुमपुष्करम्॥ २०॥
हरये भानवे जातपीतपुष्करयोर्नमः।
अथेशपुष्करं नत्वा कालिन्दिन्यै नमो नमः॥ २१॥
नमोऽस्तु दशकूपेभ्यस्तडागेभ्यो नमो नमः।
नमः षोडशघट्टेभ्यो नमेत्कुण्डोनषष्टिषु॥ २२॥
द्वादशेभ्यो वनेभ्यश्च तथोपवनकान्नमेत्।
नमो दशवटेभ्यश्च चतुस्तापिच्छिकान्नमेत्॥ २३॥
वन्दिन्यैश्च नमश्चाथ आनन्दिन्यै नमो नमः।
प्रभुप्रियायै स्वामिन्यै वल्लभायै नमो नमः॥ २४॥
खगेश्वराय मन्दाराद्यायुधेभ्यो नमो नमः।
दामभ्यो बहुलाश्वादिभ्यो यदुभ्यो नमः॥ २५॥
प्रभुप्रियायै स्वामिन्यै वल्लभायै नमो नमः।
पाथेभ्यश्चोद्धवादिभ्यो भक्तेभ्योऽपि नमो नमः॥
कुशस्थलनिवासिभ्यो मन्त्रिभ्योऽपि नमो नमः॥ २६॥
वसुदेवाय देवक्यै सहजाभ्यां नमो नमः।
पत्नीभ्यो महिषीभ्यश्च तत्प्रियाभ्यो नमो नमः॥ २७॥
नमो यशोदानन्दाभ्यां नमो गोपालबालयोः।
यमुनायै सखिभ्यश्च गोभ्यो नित्यं नमो नमः॥ २८॥

सिद्धाभ्यो दमनेभ्यश्च शक्तिभ्योऽपि नमो नमः।
स्वात्मगोपालकेभ्यश्च स्वप्रियाभ्यो नमो नमः॥ २९ ॥
परमानन्दरूपाय श्रीनाथाय नमो नमः।
नमो निखिलगोविन्दपरिवारात्मने नमः॥ ३० ॥
पीठस्तोत्रमिदं पुण्यं यः पठेद्वैष्णवो जनः।
ध्यायंस्तत्प्रातरुत्थाय तस्य स्यान्मनसेप्सितम्॥ ३१ ॥

॥ इति पीठस्तोत्रम्॥

स्तवराजं प्रवक्ष्यामि श्रीगोपालस्य भावतः।
भुक्तिमुक्तिप्रदं दिव्यं भक्तानामभिवर्द्धनम्॥ १ ॥
नवीननीरदश्यामो गाम्भीर्याद्दृष्ट्यगोचरः।
पीतवासानुरागेण लावण्यैकपरावधिः॥ २ ॥
सच्चिदानन्दमन्त्रैको नित्याखण्डात्मविग्रहः।
सदा सकामः सर्वात्मा निगमागमसंस्तुतः॥ ३ ॥
द्विभुजो भुक्तिमुक्तिभ्यां वाप्या पीयूषवर्षणः।
नवकञ्जदलाक्षिभ्यां सृष्टिस्थितिकरः प्रभुः॥ ४ ॥
भक्तिभिर्भूषितो देव आपादतलमस्तकम्।
क्रीडन्नेव सदा बालैर्गोपालो लोकपालकः॥ ५ ॥
वेदवेत्रेण शास्ते गा लोकानुग्रहकाम्यया।
स्वानन्दे गोपिकावृन्दे वृन्दारण्ये परात्मनि॥ ६ ॥
मन्दस्मितेन भक्तान्स्वान्हर्षयन्मोहयन्परान्।
सदात्मराधसा दासो भजतां कामधुग्घरिः॥ ७ ॥
अक्लिष्टकर्मा निर्दोषो निर्गुणो निरपाश्रयः।
अप्राकृतगुणोदारो नित्यानन्दगुणात्मकः॥ ८॥

गोपीभिः श्रुतिभिर्गीतः लीलानुग्रहविग्रहः।
लीलया योगमायां यस्तया सर्वं करोति च ॥ ९ ॥
तपसः सुकृतस्यापि योगविज्ञानयोरपि।
भक्तेरनुग्रहस्याक्ष्णा दर्शनं ह्यस्य सत्फलम् ॥ १० ॥
देहि तद्दर्शनं नाथ लोचने कुरु शीतले।
संसारतापजनितमज्ञानतिमिरं हरे ॥ ११ ॥
सर्वतः साधनैर्हीनं शिश्नोदरपरायणम्।
दम्भार्थमखिलारम्भं पाहि मां करुणानिधे ॥ १२ ॥
साम्प्रतं रमसे ह्यस्मिन् व्रजे वृन्दावने वने।
अज्ञानतिमिरान्धानामस्माकं नावभाससे ॥ १३ ॥
देहवाक्कायवृत्तीनामासुरीणां सुरेश्वर।
न शक्यसे ह्यवस्थानं त्वयि कल्पशतैरपि ॥ १४ ॥
न चोत्पादयितुं शक्या त्वयि प्रीतः सुखात्मनि।
प्रसादं भवतो हित्वा त्वां प्राप्तुं को भवेत्प्रभुः ॥ १५ ॥
नित्याखण्डसुखस्थस्य पूर्णकामस्य नित्यशः।
स्वलाभपरितुष्टस्य कथं तोषो विधीयताम् ॥ १६ ॥
सर्वत्र समभावेन पश्यतः परमात्मनः।
कया युक्त्या प्रसादः स्यात्प्रसन्नस्यैव नित्यदा ॥ १७ ॥
तथापि तस्य देवस्य लीलालीलस्य बालवत्।
प्रसादा निजभक्तेषु प्रवर्तन्ते स्वयं प्रभोः ॥ १८ ॥
न रागो वा विरागो वा क्रीडितुः क्रीडने शिशोः।
यथा तथा कल्पतरोः प्रसादः संश्रिते स्वयम् ॥ १९ ॥

अथवा जगतामीशे किं कुतर्को गिरां मिते।
विशिष्टेष्टैरुपदिष्टेऽस्मिन् वर्तना युज्यते पथि॥२०॥
कदा यशोदातनयः कदा श्रीनन्दनन्दनः।
कदा श्रीराधिकाकान्तो दीनेहां पूरयिष्यति॥ २१ ॥
यथा द्रुपदजा दीना कुन्तिका महिला यथा।
अनुग्रहीता भवतां यथा मां स्वीकुरु प्रभो॥ २२ ॥
यदि मां कुकृतिं वीक्ष्य उदास्तेऽथ भगवन्विभो।
तदा धरण्यां रुष्टायां क्व यामि शरणं वद॥ २३ ॥
रङ्केण सार्वभौमस्य न शक्योपकृतिः क्वचित्।
तथाप्ययं मलाङ्केन तेन सम्भाव्यते न किम्॥ २४ ॥
असारेऽस्मिन्नु संसारे कारागारे स्थितं जनम्।
मामुद्धर मुरारे श्रीकंसारे शरणं गतम्॥ २५ ॥
श्रीमच्चरणराजीवरजोलिप्सुर्मुखम्पच।
सुरतं समुपासीनोऽभग्नशक्तिं भवामि भोः॥ २६ ॥
तिर्यक्षु नाथ यादस्सु नारकेषु नरेषु वा।
जनिर्मे भ्रमतो नाथ भवतान्नासुरेषु च॥ २७ ॥
यत्र न श्रीमतः सेवा कथा नो भक्तसङ्गतिः।
न तत्र मे जनिर्भूयादिति याचे पुनः पुनः॥ २८ ॥
मनसा वपुषा वाचा नान्यं येन समाश्रये।
तथा मां कुरु कल्याण श्रीमन् श्याम मनोहर॥ २९ ॥
विहाय सकलं विश्वं विश्वेशानपि सर्वशः।
त्वामेवाहं प्रपन्नोऽस्मि त्वमेव परमा गतिः॥ ३० ॥

वृन्दारण्ये तरणितनयातीरजे दिव्यकुञ्जे
पीठे चिन्तामणिवरमये वेणुमापूरयन्तम् ।
नीलाम्भोदद्युतिमनुपमं पीतवासो वसानं
वन्दे मुक्ताभरणकुसुमैर्भूषितं नन्दनन्दम् ॥ ३१ ॥
स्तवराजमिमं पुण्यं श्रीकृष्णस्य परात्मनः ।
भगवान् भजतोऽमुष्य वश्यो भवति भूतले ॥ ३२ ॥

॥ इति स्तवराजः ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे स्तोत्रनिरूपणं नाम षोडशोऽध्यायः ॥

# ॥ सप्तदशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

शान्तिकं सम्प्रवक्ष्यामि भक्तानां हितकाम्यया ।
येन प्रयुज्यमानेन सर्वा भीतिर्निवर्तते ॥ १ ॥
समुद्‍भूतो यदा ब्रह्मा सृष्ट्वेदमयजद्धरिम् ।
स्वाहायै पश्यतस्तस्य हेतोर्यातो यदृच्छया ॥ २ ॥
तेन यज्ञात्मना यज्ञे पुरे कृत्वा निवर्तितुम् ।
यावद्दिष्टं ततस्तावज्जग्राह शिखया शुचिः ॥ ३ ॥
तेन सम्पीतमात्रेण देवकार्ये महत्तरे ।
असूत भगवानग्निः ऋषीन् षष्टिसहस्रिणः ॥ ४ ॥
ब्रह्मणा कृपया तेभ्यः सर्वमङ्गलमङ्गलम् ।
कवचञ्च पाठितं दिव्यं यदुक्तं हरिणात्मने ॥ ५ ॥
ये गुप्ता मुनिवरा ब्रह्मघ्नै रावणादिभिः ।
अधृष्यास्तप आतस्थुः प्रीतो येभ्यो रघूत्तमः ॥ ६ ॥
प्रसादशक्तेः सम्पर्कात् पूजनाच्च मधुद्विषः ।
प्रिया बभूवुस्ते लोके तदहं वच्मि भो द्विजाः ॥ ७ ॥
कवचस्यास्य मुनयो ब्रह्माग्नितनया मताः ।
गायत्रञ्च भवेच्छन्दो देवता श्रीपतिः स्वयम् ॥ ८ ॥
प्रसादाख्या भवेच्छक्तिः बीजं लीलाप्रियो हरिः ।
निष्प्रत्यूहनिजानन्दावाप्तये विनियोजनम् ॥ ९ ॥
मूलतोऽस्य षडङ्गानि भाचक्राद्यैश्च रक्षणम् ।
तीर्थगोपादरजसा न्यासः सर्वाङ्गलैः शुचेः ॥ १० ॥

॥ ॐ श्रीहरये नमः॥

श्रीकृष्णः सर्वतः पायात् शिरः श्रीपुरुषोत्तमः।
ललाटमक्षरः पायान्मायेशो नयने उभे॥ १ ॥
श्रवणे भगवान् कालः नासिके कृतिमान् विभुः।
परमात्मा च वाचं मे जीवेशो रसनां मम॥ २ ॥
हृदयं वासुदेवो मे अहं सङ्कर्षणः प्रभुः।
प्रद्युम्नश्च धियं पातु अनिरुद्धोऽपि मानसम्॥ ३ ॥
भुजौ मे यादसामीशः पादौ मे कमठेश्वरः।
मूलाधारन्तु वाराहो नृहरिर्मणिपूरकम्॥ ४ ॥
नाभिं मे भार्गवो रामः पार्श्वं मे रघुनन्दनः।
पृष्ठं बलः ककुद् बुद्धः कल्किः शेषं कलाधरः॥ ५ ॥
दृष्टिं त्रिविक्रमः पातु कृत्तिं च कमलापतिः।
सूत्रं सुदर्शनः पातु अनुसूत्रं महेश्वरः॥ ६ ॥
रूपं रमापतिः पातु रसं रक्षोविनाशनः।
गन्धं गणानामधिपः स्पर्शं मे मधुसूदनः॥ ७ ॥
नन्दको मे नभस्तत्त्वं नभस्वन्तं गदाधरः।
चक्रपाणिर्हुताशं मे शङ्खभृत्सलिलं सदा॥ ८ ॥
धरां मे कमली पातु स्वरूपं रविमण्डली।
अभिधां मे हरिः पातु सर्वतो जगदीश्वरः॥ ९ ॥
अव्यक्तं मां हरिः पायाद् व्यक्तं मां केशवो विभुः।
मायिनं मां रमानाथो माधवः परतन्त्रगम्॥ १० ॥
गोविन्दो मां निरानन्दं दुर्भगं विष्णुरव्ययः।
कर्मणोऽभिमुखं देवो मधुद्विट् प्राकृतं प्रभुः॥ ११ ॥

भूगतं वामनः पातु अन्नगं श्रीधरोऽवतु।
रेतस्थं तु हृषीकेशः पद्मनाभोऽपि गर्भगम् ॥ १२ ॥
दामोदरश्चोदरस्थजातं सङ्कर्षणोऽवतु।
शिशुं श्रीवासुदेवोऽव्यात् प्रद्युम्नोऽपि स्तनन्धयम् ॥ १३ ॥
मात्राऽनिरुद्धः सार्द्धं मां धात्र्यापि पुरुषोत्तमः।
अधोक्षजश्च ताताद्यैः बालैर्नरहरिः स्वयम् ॥ १४ ॥
अच्युतः क्रीडने पातु कुमारन्तु जनार्दनः।
भुञ्जानं वा पिबन्तं वा उपेन्द्रो हसितं रतम् ॥ १५ ॥
उच्चरन्तं चरन्तञ्च शयानं श्रीपतिर्हरिः।
रुदन्तं क्षुधितं पातु श्रीकृष्णः परिपीडितम् ॥ १६ ॥
ग्रहैर्बालग्रहैर्वापि कृत्रिमैश्च विषैः क्षतैः।
जन्तुभिः पापकैर्हिंस्रैः पातु श्रीरघुनन्दनः ॥ १७ ॥
भूतप्रेतक्षेत्रपालैर्महोत्पातैर्महाभयैः।
कार्मणैर्डाकिनीभिश्च पातु मां गरुडध्वजः ॥ १८ ॥
विषदंशैर्विषश्वासैर्विषसस्यैर्विषाक्षिभिः।
विषयोगैः चोपविषैः शेषशायी सदाऽवतु ॥ १९ ॥
किशोरे कमलाकान्तः पौगण्डे परमेश्वरः।
विहरन्तं विहारेषु देवो वै विष्टरश्रवाः ॥ २० ॥
संस्कारे यज्ञभुक् पातु श्रौतस्मार्तकृतौ हरिः।
वार्त्तायां व्यवहारे च श्रीनाथश्च पराश्रयः ॥ २१ ॥
सेवायां परवासे च सदा लाभे सदा व्यये।
गृहकृत्येषु सर्वेषु पातु मां जगदीश्वरः ॥ २२ ॥
गृहे पातु सदा रामः बहिः पातु बलाधिकः।
सन्धौ सभासु मार्गेषु वैकुण्ठः पातु भूतले ॥ २३ ॥

क्रीडन्तं भार्ययैकान्ते रुक्मिणीशो सदाऽवतु।
लालयन्तमपत्यानि पातु द्वारावतीपतिः॥ २४॥
पचन्तं गृहकृत्येषु हसन्तं सखिभिः पुनः।
व्रजन्तं दुर्गभागेषु तिष्ठन्तं दुर्जनैरपि॥ २५॥
शार्ङ्गधन्वा हरिः पातु विवदन्तं परैः क्वचित्।
विद्यावादे मन्त्रवादे विवादे कलहे परैः॥ २६॥
क्रियासु पौरुषे युद्धे पातु चाणूरदर्पहा।
भुक्ताभुक्तैरमुक्तैश्च मुक्तैः शस्त्रास्त्रसञ्चयैः॥ २७॥
मणिमन्त्रौषधैर्यन्त्रैस्तन्त्रैरव्याद्दिशां पतिः।
जले तु भगवान्मत्स्यः कमठश्च जले स्थले॥ २८॥
वाराहो धरणीपृष्ठे दुर्गे नरहरिर्हरिः।
जलमार्गे दुर्गमार्गे हिममार्गेऽग्निमार्गके॥ २९॥
नानाविधेषु यानेषु खगयानः सदाऽवतु।
आकाशाच्छब्दतश्चापि पातु मां परमेश्वरः॥ ३०॥
वायुतः स्पर्शतश्चापि पातु मां मुरमर्द्दनः।
वैश्वानरात्प्रकाशाच्च पातु मां माधवः स्वयम्॥ ३१॥
कीलालाद्रसतः पातु नरकोच्छेदको विभुः।
धराया गन्धतः पातु परमात्मा सनातनः॥ ३२॥
इन्द्रियेभ्यः क्रियाभ्यश्च पातु दैत्यनिषूदनः।
हृषीकेभ्यो गोचरेभ्यो हृषीकेशः सदाऽवतु॥ ३३॥
देवताभ्यः प्रकाशेभ्योऽप्यन्तःकरणतः प्रभुः।
आत्मनः परतश्चापि देवः पातु स्वभूः सदा॥ ३४॥
देशतः कालतश्चापि निजेच्छातोऽप्यदृष्टतः।
सर्वतोऽपि हरिः पायादुक्तानुक्तस्वरूपतः॥ ३५॥

श्रीकृष्णायेति मामूर्ध्वं गोविन्दायेति मध्यतः।
गोपीजनवल्लभाय नमः स्वाहेत्यधोऽवतु॥ ३६॥
क्लीं कृष्णाय नमश्चाग्रे ग्लौं कृष्णायेति पृष्ठतः।
श्रीकृष्णायेत्यूर्ध्वतो मां मां कृष्णायेत्यधःस्थलात्॥ ३७॥
श्रीमन्मुकुन्दचरणं शरणं मे सदा भवेत्।
तेन सार्वात्मिकी शुद्धी रक्षा भवतु सर्वतः॥ ३८॥
अहं हरेर्मम हरिः हरये सर्वमर्पितम्।
तेन मामनुगृह्णातु यशोदानन्दनन्दनः॥ ३९॥
हरिदासान् प्रपन्नं मां प्रपन्नं हरिभावुकान्।
श्रीमदार्यान् प्रपन्नं मां पातु श्रीगोकुलेश्वरः॥ ४०॥
श्रीमद्गुणानां श्रवणे श्रद्धया सक्तमानसम्।
श्रवणं मेऽवतु श्रोत्रे मनस्तत्त्वञ्च पातु मे॥ ४१॥
कीर्त्तनं वह्निना वाच्यं स्मरणं हृदयं धिया।
सेवनं स्थूलगात्रं मे अर्चनं च तनुं तनूम्॥ ४२॥
वन्दनं दैवतकुलं दास्ये जीवं पुनातु मे।
सख्यं मे भजनानन्दं स्वानन्दञ्चार्पणं ददेत्॥ ४३॥
प्रेमस्फूर्तिं सदा मां सा करोतु भगवन्मयम्।
येन केनाप्युपायेन अनुगृह्णातु मां हरिः॥ ४४॥
ददातु भजनानन्दं भक्तिं मह्यं ददातु सः।
दर्शनं निजलीलायाः कृपया कारयत्वथ॥ ४५॥
माथुरं मण्डलं पातु पातु दिव्यं व्रजस्थलम्।
गोकुलं गिरिराट् पातु वृन्दारण्यञ्च रक्षतु॥ ४६॥
श्रीराधिका स्वात्मरूपा नित्यसिद्धा व्रजेश्वरी।
अनुगृह्णातु गृह्णातु दासीवर्गे क्वचिच्च माम्॥ ४७॥

श्रीमच्चन्द्रावली दिव्यनिगमागमसंस्तुता।
नियोजयतु मां कार्ये दासीवर्गे समाश्रितम् ॥ ४८ ॥
ललिता ललिता मान्या मुनीन्द्रैर्भक्तवत्सला।
पुनातु मां निजप्रेष्या निचये संश्रितं हिता ॥ ४९ ॥
कालिन्दिनी महाभागा भक्तवृन्दैर्नमस्कृता।
सेवाधिकारसम्पत्तिं देहि देहि हरिप्रिये ॥ ५० ॥
यज्ञपत्न्यो हरेः पत्न्यो गोकुलस्थाश्च गोपिकाः।
सर्वास्ताः सर्वदा मह्यं प्रसीदन्तु हरिप्रियाः ॥ ५१ ॥
श्रीयशोदा हरेर्माता मिहिरः श्रीहरेः पिता।
बलभद्रो हरेर्भ्राता सुभद्रा श्रीहरेः स्वसा ॥ ५२ ॥
गोपाला गोपिका गावो व्रजबाला व्रजद्रुमाः।
ये केचिद्व्रजलीलास्थास्ते सर्वे कृपयन्तु मे ॥ ५३ ॥
अविद्यां पूतनाहन्ता हन्याद् बालग्रहानपि।
बकारिर्मम पाषण्डं नागारिर्मम कल्मषम् ॥ ५४ ॥
श्रीमद्गोवर्धनधरो देवेभ्योऽपि स रक्षतु।
असुरेभ्यश्च कंसारिर्मुरारिः पातु सर्वतः ॥ ५५ ॥
रागेभ्यो निजभोगेभ्यः पीडाभ्योऽप्यतिपीडनात्।
दावानलाद् हरः पातु सुदर्शनविमोचकः ॥ ५६ ॥
पूर्वतः परतश्चापि दक्षिणोत्तरतस्तथा।
ऊर्ध्वतश्चाप्यधस्ताच्च पातु ब्रह्मविमोहनः ॥ ५७ ॥
अङ्गानि सुन्दरः श्यामः प्रत्यङ्गानि मनोहरः।
मनसा वचसा चापि पातु चीरहरः प्रभुः ॥ ५८ ॥
कालतः कृतितो दैवात्पापेभ्योऽप्यतिपीडितम्।
भक्तापराधतः क्षीणं पातु मां खरसूदनः ॥ ५९ ॥

इन्द्रियाणाञ्च वैकल्याद्वपुषो जरयापि च।
मृत्युनापि वै ग्रस्तं मां पातु गोकुलपालकः॥ ६० ॥
धनधान्यसमृद्धिर्मे वृद्धिर्वा पुत्रपौत्रिकी।
सम्पत्तिः शस्त्रशास्त्रेभ्यो जायतां भवदाश्रयात्॥ ६१ ॥
नान्यत् किमपि वाञ्छामि नान्यत्किमपि संश्रये।
तथा मां कुरु कल्याण इति ध्याये महाप्रभो॥ ६२ ॥

॥ इति श्रीमङ्गलं नाम कवचम्॥

कमलापतिः कुमारेभ्यो जगौ पूर्वं (?)।
(?) विरिञ्चिः कमलोद्भवः॥ ६३ ॥
नानेन सदृशं किञ्चिद्वैष्णवानां हिताय वै।
सर्वरक्षाकरं विप्रा भक्तेः सम्पत्तिदायकम्॥ ६४ ॥
एतद्धारणतो ब्रह्मा सृष्टिं चक्रे हरिप्रियाम्।
रजसापि न सम्बद्धो भक्तानां प्रवरो बभौ॥ ६५ ॥
गोष्ठे सहस्रमभ्यस्य श्रीगोपालस्य सन्निधौ।
हुत्वा मधुभिः सिद्धः पालाशैर्जायते ध्रुवम्॥ ६६ ॥
कार्त्तिके तु पठेन्नित्यं वृन्दारण्ये विशेषतः।
यद्वाञ्छति कल्याणं तत्तद्भक्तेः प्रयच्छति॥ ६७ ॥
वेदनासु च घोरासु रोगे मृत्युभयेषु च।
तुलसीमूलमृल्लिप्तः पठेदस्माद्विमुच्यते॥ ६८ ॥
नित्यं पठन् भक्तिमान् स्यात्कामी कामानवाप्नुयात्।
किं विप्र बहुनोक्तेन श्रद्धया सर्वमश्नुते॥ ६९ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे स्तोत्रकवचनिरूपणं नाम सप्तदशोऽध्यायः॥१७॥

# ॥ अथाष्टादशोऽध्यायः ॥

## ॥ अथ लीलाशतनामस्तोत्रम् ॥

श्रीशाण्डिल्य उवाच –

अथ लीलाशतं (स्तोत्रं) प्रवक्ष्यामि हरेः प्रियम्।
यस्याभ्यसनतः सद्यः प्रीयते पुरुषोत्तमः ॥ १ ॥
यदुक्तं श्रीमता पूर्वं प्रियायै प्रीतिपूर्वकम्।
ललितायै यथा प्रोक्तं सा मह्यं कृपया जगौ ॥ २ ॥
श्रुतिभिर्यत्पुरा प्रोक्तं मुनिभिर्यत्पुरोदितम्।
तदहं वो वर्णयिष्ये श्रद्धालून् सम्मतान् शुचीन् ॥ ३ ॥
लीलानामशतस्यास्य ऋषयोऽग्निसमुद्भवाः।
देवता श्रीपतिर्नित्यलीलानुग्रहविग्रहः ॥ ४ ॥
छन्दांस्यनुष्टुपूरूपाणि कीर्त्तितानि मुनीश्वराः।
बीजं भक्तानुग्रहकृत् शक्तिर्लीलाप्रियः प्रभुः ॥ ५ ॥
श्रीकृष्णभगवत्प्रीतिद्वारा स्वार्थे नियोजनम्।
सर्वेश्वरश्च सर्वात्मा सर्वतोऽस्त्रेण रक्षतु ॥ ६ ॥
श्रीकृष्णः सच्चिदानन्दः स्वतन्त्रपरमावधिः।
लीलाकर्त्ता बाललीलो निजानन्दैकविग्रहः ॥ ७ ॥
लीलाशक्तिर्निजलीलासृष्टिदेहो विनोदकृत्।
वृन्दावने गोपिगोपगोद्विजादिसचिन्मयः ॥ ८ ॥
वाक्सृष्टिकर्त्ता नादात्मा प्रणवो वर्णरूपधृक् ॥ ९ ॥
प्रकृतिः प्रत्ययो वाक्यो वेदो वेदाङ्गजः कविः।
मायोद्भवोद्भवोऽचिन्त्यकार्यो जीवप्रवर्तकः ॥ १० ॥

नानातत्त्वानुरूपश्च कालकर्मस्वभावकः।
वेदानुगो वेदवेत्ता नियतो मुक्तबन्धनः॥ ११ ॥
असुरक्लेशदो क्लिष्टजननिद्रारतिप्रदः।
नारायणो हृषीकेशो देवदेवो जनार्दनः॥ १२ ॥
स्ववर्णाश्रमधर्मात्मा संस्कृतः शुद्धमानसः।
अग्निहोत्रादिपञ्चात्मा स्वर्गलोकफलप्रदः॥ १३ ॥
शुद्धात्मज्ञानदो ज्ञानगम्यः स्वानन्ददायकः।
देवानन्दकरो मेघश्यामलः सत्त्वविग्रहः॥ १४ ॥
गम्भीरोऽनवगाह्यश्रीद्विभुजो मुरलीधरः।
पूर्णानन्दघनः साक्षात्कोटिमन्मथमन्मथः॥ १५ ॥
श्रुतिगम्यो भक्तिगम्यो मुनिगम्यो व्रजेश्वरः।
श्रीयशोदासुतो नन्दभाग्यचिन्तामणिः प्रभुः॥ १६ ॥
अविद्याहरणः सर्वदोषसङ्घविनाशकः।
निःसाधनोद्धारदक्षो भक्तानुग्रहकातरः॥ १७ ॥
सर्वसामर्थ्यसहितो दैवदोषनिवारकः।
कुमारिकानुग्रहकृद् योगमायाप्रसादकृत्॥ १८ ॥
ब्रह्मानन्दपरानन्दभजनानन्ददायकः।
लोकव्यामोहकृत्यस्वीयानुग्रहो वेणुवादतः॥ १९ ॥
नित्यलीलारासरतो नित्यलीलाफलप्रदः।
मूढोद्धारकरो राजलीलासन्तोषितामरः॥ २० ॥
सतां लोकद्वयानन्ददश्चैश्वर्यादिभूषितः।
निरोधलीलासम्पत्तिर्दशलीलापरायणः॥ २१ ॥
द्वादशाङ्गवपुः श्रीमाँश्चतुर्व्यूहश्चतुर्मयः।
गोकुलानन्ददः श्रीमद्गोवर्द्धनकृताश्रयः॥ २२ ॥

चराचरानुग्रहकृद्वंशीवाद्यविशारदः।
देवकीनन्दनो द्वारापतिर्गोवर्द्धनाद्रिभृत् ॥ २३ ॥
श्रीगोकुलसुधानाथः श्रीमुकुन्दोऽतिसुन्दरः।
बाललीलारतो हैयङ्गवीनरसतत्परः ॥ २४ ॥
नृत्यप्रियो युग्मलीलो त्रिभङ्गललिताकृतिः।
आचार्यानुगृहीतात्मा करुणावरुणालयः ॥ २५ ॥
श्रीराधिकाप्रेममूर्त्तिः श्रीचन्द्रावलिवल्लभः।
ललिताप्राणनाथः श्रीकलिन्दगिरिजाप्रियः ॥ २६ ॥
अप्राकृतगुणोदारो ब्रह्मेशेन्द्रादिवन्दितः।
पवित्रकीर्त्तिः श्रीनाथो वृन्दारण्यपुरन्दरः ॥ २७ ॥
इति लीलाशतं नाम्नां निजात्मकसमन्वितम्।
यः पठेत्प्रत्यहं प्रीत्या तं प्रीणाति स माधवः ॥ २८ ॥
ईषणात्रयनिर्मुक्तो यः पठेद्धरिसन्निधौ।
सोऽचलां भक्तिमाप्नोति इति सत्यं मुनीश्वराः ॥ २९ ॥
ईषणात्रयसम्पन्नं यस्य चित्तं प्रखिद्यति।
तेनात्र ध्यानगम्येन प्रकारेण समाप्यते ॥ ३० ॥
पुत्रेषणासु सर्वासु ध्यायेत्पुत्रप्रदं हरिम्।
ब्रह्माणं मोहयेत्तेन वरावाप्तिः प्रजायते ॥ ३१ ॥
वित्तेषणासु वासांसि भूषणानि शिखामणिम्।
वदन्तं विषयीकुर्वल्लभते तत् स्थिरञ्च यत् ॥ ३२ ॥
लोकेषणासु नन्दस्य साधयन्परतन्त्रताम्।
ध्यात्वा हृदि महाभागो भवेल्लोकद्वये पुमान् ॥ ३३ ॥
समर्च्य भगवन्तं तं शालग्रामस्य मन्दिरे।
नमोऽन्तैर्नामसन्मन्त्रैर्दद्याद्वृन्दादलान्यसौ ॥ ३४ ॥

निवेदयेत्ततः स्वार्थं मध्याह्ने पररात्रके।
तेन सर्वमवाप्नोति प्रसीदति ततस्त्वमुम् ॥ ३५ ॥
सर्वापराधहरणं सर्वदोषनिवारणम्।
सर्वभक्तिप्रजननं भावस्य सदृशं परम् ॥ ३६ ॥
एतस्यैव समासाद्य गायत्र्याख्यं महामनुम्।
पठेन्नाम्ना सहस्रं च सुदामादिसमो भवेत् ॥ ३७ ॥
अनयोः सदृशं नास्ति प्रकारोऽत्रापरः परः।
कामव्याकुलचित्तस्य शोधनाय सतां मतः ॥ ३८ ॥
न सौषधी मता पुंसां या गदान्तरमर्पयेत्।
प्रकृतं सन्निवर्त्याघं वासनां या न संहरेत् ॥ ३९ ॥
विषयाक्रान्तचित्तानां नावेशः कर्हिचिद्धरेः।
ततो निवृत्तिः कार्येभ्य इत्याह तनयं विधिः ॥ ४० ॥
श्रीकृष्णेति महामन्त्रं श्रीकृष्णेति महौषधी।
ये भजन्ति महाभागास्तेषां किं किं न सिद्ध्यति ॥ ४१ ॥

(इति लीलाशतनामस्तोत्रम्)

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे
अष्टादशोऽध्यायः ॥१८॥

## ॥ अथैकोनविंशोऽध्यायः ॥

ऋषय ऊचुः –

कथं गोपीपतेर्भव्या गायत्री गृह्यते जनैः।
किं कार्यं तैस्तदाख्याहि तथा नामसहस्रकम् ॥ १ ॥

श्रीशाण्डिल्य उवाच –

वर्णाश्रमाचारवता पुरुषेण परः पुमान्।
आराध्यते तदा सद्यः प्रसीदति न चान्यथा ॥ २ ॥
ब्रह्मचारी गृही वानप्रस्थो यतिवरस्तथा।
चत्वार आश्रमाश्चैते ब्राह्मणस्यैव सम्मताः ॥ ३ ॥
राजन्यस्य त्रयश्चाद्या विशो द्वौ च युगान्तरे।
गृहाश्रमोऽपि शूद्रस्य ब्राह्मणानुगतस्य वै ॥ ४ ॥
व्रात्यापध्वंसजाः सर्वे ते भवन्ति निराश्रमाः।
तेषां सामान्य एवास्ति धर्मो मान्यस्तु वैदिकैः ॥ ५ ॥
ब्रह्मक्षत्रविशां वक्ष्ये मौञ्जी लुप्यति चेद्यदि।
तदैषां व्रात्यता प्रोक्ता योनिभेदाच्च सङ्करः ॥ ६ ॥
श्रूयते संस्कृतिर्येषां पूर्वेषामपि कुत्रचित्।
तेषान्तु वैदिकी कार्या प्रायश्चित्तैः स्वसंस्कृतिः ॥ ७ ॥
न मातृपितृभार्यादिकुले येषां तु संस्कृतिः।
विप्रस्यानुग्रहात् पूर्वा सङ्करे तु न सेष्यते ॥ ८ ॥
द्वादशाब्दव्रतं विप्रैर्देयं कृच्छ्रपुरःसरम्।
अशक्तैश्च फलाहारैस्तीर्थस्नानैश्च तन्मतम् ॥ ९ ॥
विप्रस्य ब्रह्मगायत्री क्षत्रियस्य विवस्वतः।
वैष्णवी च विशः प्रोक्ता रौद्री सङ्करजन्मनाम् ॥ १० ॥

अथवा सर्ववर्णानां विच्युतानां स्वधर्मतः।
श्रीपतेरेव सन्मन्त्रं परित्राणाय दृश्यते॥११॥
स्वाश्रमाचारयुग्वापि अथवापि निराश्रमः।
श्रीमुकुन्दं प्रपन्नो यो मुच्यते विश्वतो भयात्॥१२॥
आश्रमा वैष्णवब्राह्महराश्रमा इति त्रयः।
तत्तल्लिङ्गानि सेवेत तत्तदाराधने जनः॥१३॥
तत्राश्रमं सदा रम्यं सात्त्विकं वैष्णवाभिधम्।
यत्र वैदिकधर्मेण वैष्णवो धर्म इष्यते॥१४॥
दृष्ट्वा भागवतं विप्रं सर्वदोषविवर्जितम्।
परिचाय्य गुरुं कुर्यादुपदेशं ततो भजेत्॥१५॥
प्रायश्चित्तैर्व्रतैः स्नातः स्वस्तिवाचनपूर्वकम्।
गर्भाधानादिसंस्कारानाचार्येणैव कारयेत्॥१६॥
नारायणैर्वासुदेवैर्नारसिंहैः परैरपि।
जुहुयाल्लक्षसंख्याकैस्ततो ग्राह्यं मनूत्तमम्॥१७॥
अथ भूमिपतेर्वक्ष्ये विधानं जगतां मुदे।
गोपालाराधने योग्यं योग्यं लोकस्य पालने॥१८॥
शुभे काले शुभे देशे कृत्वा भूमिपरिग्रहम्।
मण्डपं तत्र कुर्वीत कुण्डानि च यथाविधि॥१९॥
चतुःशालं ततः कार्यं प्राकारोपवनाश्रितम्।
प्राग्वंशं पीतपट्टेन श्रीदाम्नापि प्रशोभयेत्॥२०॥
गोवर्द्धनं क्षेत्रपतिं योगमायां च द्वारपाम्।
मध्ये वेद्यान्तु गोपालं दिग्व्यूहे व्यूहपान् यजेत्॥२१॥
बाह्यशालेषु गणपं ग्रहान्मातृपुरःसरान्।
आघारान्तं स्वगृह्योक्तं आचार्यः स्वयमाचरेत्॥२२॥

ततोऽसौ गुरवे गत्वा साष्टाङ्गं प्रणिपत्य च।
समानयेन्महायानैराचार्यं पूजयेदथ ॥ २३ ॥
ब्रह्मणा प्रेषितं शिष्यमाचार्यो मन्त्रसम्भृतैः।
दीक्षोक्तवर्त्मना शुद्धं स्नापयेत् षोडशद्विजैः ॥ २४ ॥
ततः श्रीमूलगायत्र्या हुत्वा दशशतं पुनः।
भूषितः पीतवासःस्रग्मण्डितो वाद्यघोषतः ॥ २५ ॥
आदिशेदथ गायत्रीं गुरुः सम्प्रोक्तवर्त्मना।
वित्तार्द्धमर्पयेच्छक्त्या तोषयेच्च हरिं गुरुम् ॥ २६ ॥
देवर्षिच्छन्दसंयुक्तां षडङ्गध्यानसम्मताम्।
ध्यायन् भगवतो रूपं गुरुश्चोपदिशेत्त्रिशः ॥ २७ ॥
श्रीपतेरस्य गायत्र्या देवता पुरुषोत्तमः।
हुताशनो मुनिस्तस्याश्छन्दो गायत्र्यमिष्यते ॥ २८ ॥
हरिभक्तिप्रसिद्ध्यर्थं विनियोगः प्रकीर्त्तितः।
श्रीगोविन्दायेति हृदि ललाटे विद्महे इति ॥ २९ ॥
शिखायां वासुदेवाय कवचं धीमहीति च।
तन्नः कृष्ण इति स्वक्षणोरस्त्रे वापि प्रचोदयात् ॥ ३० ॥
आविर्भूय प्रभामये स्ववपुषे भक्तानुकम्पारसै-
जीवांश्चेतयते धिया निजकृतेः सम्पादयन् यः फलम्।
तस्यानन्दनिधेः स्वरूपममलं स्याद्गोचरं नः सदा
येनास्माकमपीदृशे भगवतो रूपे भवेच्छेमुषी ॥ ३१ ॥
इति लब्ध्वा गुरोर्मन्त्रं वैष्णवीं धारयेत्स्रजम्।
समाप्य होमशेषञ्च पूजाशेषं यथोदितम् ॥ ३२ ॥
गुरुं सम्मानयेद्भक्त्या दास्यमाजन्ममाचरेत्।
ग्रामधामधरावृत्तिः प्रासादाराममर्पयेत् ॥ ३३ ॥

मोचयेन्निगडग्रस्तान् राजभ्यो दास्यतो ऋणात् ।
अथ सम्प्रेषयेद्यानैर्महोत्सवपुरःसरम् ॥ ३४ ॥
दारागारसुतादीनि सर्वं तस्मै निवेदयेत् ।
ततो भगवतः कुर्यादुत्सवं वैष्णवैर्जनैः ॥ ३५ ॥
सप्ताहं तत्र निवसेत्सत्रं भोज्यं प्रवर्त्तयेत् ।
महोपचारविधिना वृन्दापत्रैः सितासितैः ॥ ३६ ॥
सहस्रनाममन्त्रैश्च पूजयेत्प्रत्यहं व्रती ।
ततः समाप्य तत्सर्वमाचार्य्यं परितोषयेत् ॥ ३७ ॥
ग्रामं गजहयं गेहं गावो वृत्तिश्च सन्तताम् ।
दासीदासधनं पूर्णं राजचिह्नानि यान्यपि ॥ ३८ ॥
एतैः पूजोपकरणैः प्रपूज्याचार्यमीश्वरम् ।
ब्राह्मणान् तोषयेद्भक्त्या धनधान्यैरथापरान् ॥ ३९ ॥
भूषणैरपि वासोभिः सपत्नीकान्समर्चयेत् ।
मानयेद्विदुषो विप्रान् तापसान् कुलजानपि ॥ ४० ॥
कन्या विवाहयेत्तेषामृणानि परिमोचयेत् ।
सभ्येभ्यश्च गृहिभ्यश्च नयं दद्यान्मतिं तथा ॥ ४१ ॥
दीनान्धबधिरादिभ्यश्चान्नं वासो यथायथम् ।
प्रजाभ्यः करमोक्षं च कुर्यात्किञ्चिद्यथारुचि ॥ ४२ ॥
गवां निरोधं भारञ्च वाहानां सुखयेज्जगत् ।
सर्वान् सुखेन सम्पन्नान् वीक्ष्य विप्रांश्च भोजयेत् ॥ ४३ ॥
गवां च यवसं दद्याद् बालान्सम्भोजयेत्स्त्रियः ।
ततः साम्राज्यसल्लक्ष्म्या भूषितोऽमात्यभृत्यकान् ॥ ४४ ॥
स्वसेनामपि सन्तोष्य आयान्निजगृहं नृपः ।
तत्र पूर्वस्थितान् देवान् गुरुं तोष्य मुदान्वितम् ॥ ४५ ॥

स्वैः सर्वैः सह भुञ्जीत ब्रह्मचर्यं ततस्त्यजेत्।
ततश्च प्रत्यहं यन्त्रे मूर्त्तौ देवं प्रपूजयेत्॥ ४६॥
यथालब्धोपचारैश्च यथासमयसम्पदा।
एवं कृत्वा महीपालः प्रजाधर्मपरायणः॥ ४७॥
गोपयेद्धर्मशास्त्रेण हरिं तद्राष्ट्रमर्पयेत्।
हिंसां निवर्त्तयेद् राष्ट्रान्मद्यद्यूतच्छलादिकम्॥ ४८॥
मद्यमांसभुजो लोकान् पाषण्डपतितांस्त्यजेत्।
एवं कुर्वन्महीपालः जायते वासवोपमः॥ ४९॥
पुत्रवित्तादिसम्पन्नो ह्यनुल्लङ्घितशासनः।
निरातङ्की दीर्घजीवी महिलावल्लभो युवा॥ ५०॥
परत्र वासुदेवस्य सारूप्यमपि गच्छति।
स्वच्छन्दचारी लोकेऽस्मिन् सदैव हरिवल्लभः॥ ५१॥
इत्येवं नृपतेः प्रोक्तोऽप्यन्येषां स्वानुरूपतः।
तदाचारः पुरा प्रोक्तो व्रात्यधर्मविनिर्णयः॥ ५२॥
भवेदच्युतगोत्रो वा ब्रह्मचर्यं समाश्रयेत्।
पौराणमाचमं कुर्यान्मूलबीजैश्च संहृतिः॥ ५३॥
मार्जनं स्नानमन्त्रैश्च गायत्र्यार्घ्यं जपं तथा।
उपस्थाय हरिं सूर्यं गुरुमग्निं समर्चयेत्॥ ५४॥
हरिं सम्पूजयेन्नित्यं तच्चिह्नैः समलङ्कृतः।
भिक्षाशनो विरक्तो वा एवं वर्त्तेत वा वनी॥ ५५॥
वनमेवाश्रयेद्धीमान्तपी हरिपरायणः।
भजेद्यती वा श्रीनाथं भजंस्तीर्थानि सञ्चरन्॥ ५६॥
वदन् भागवतं शास्त्रं विजितात्मा त्रिदण्डभृत्।
कुर्याद्भक्तिं हरे रम्यां तेन सिद्ध्यति सत्वरम्॥ ५७॥

अथ दीनतरस्यापि उपायं वो वदामि भोः।
स्नातः शुद्धः शुद्धिमन्तं सोपायनकरो गुरुम् ॥ ५८ ॥
विज्ञापयेत् श्रीभगवन् दीनोद्धारपरायण।
निःसाधनं कुकृतिनं मग्नं संसारवारिधौ ॥ ५९ ॥
प्रपन्नं श्रीमतः पादपद्मयोः कृपया गुरो।
समुद्धर महाक्लेशान्मुक्तिमार्गं प्रदर्शय ॥ ६० ॥
तवास्मि करुणापूर्ण इत्युक्तोऽसौ वदेदमुम्।
हरिरेव जगत्सर्वं हरिणा निर्मितं जगत् ॥ ६१ ॥
न हरेः परमं चान्यद्वस्तुभूतं सनातनम्।
हरेः सिसृक्षया रन्तुं जगज्जातं ततो भवान् ॥ ६२ ॥
यस्यांशः तस्य शरणं गृहाण जगदीशितुः।
भजस्व भक्तिसंयुक्तस्ततः सिध्यसि सत्वरम् ॥ ६३ ॥
इत्युक्त्वाथ महामन्त्रं दद्यादष्टाक्षरं हरेः।
श्रीमन्नारायणस्यैव प्रपन्नशरणं जनः ॥ ६४ ॥
शृण्वन् गृणन् गुणान् विष्णोः परिमुच्यति संसृतेः।
नानाजन्मकृतैः पुण्यैः सात्त्विकानां हरौ भवेत् ॥ ६५ ॥
भक्तिस्तद्वासनाबीजमहामन्त्रे महोदये।
इमं प्राप्य महामन्त्रं प्राप्तव्यं न परं भवेत् ॥ ६६ ॥
पीत्वाऽमृतं यथा लोके पेयं शिष्यति नापरम्।
एतच्छ्रवणमात्रेण साक्षान्नारायणो भवेत् ॥
बहुनोक्तेन किमिह इदं गुप्तं सुरेष्वपि ॥ ६७ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे गायत्र्युपदेशो नाम एकोनविंशोऽध्यायः ॥ १९ ॥

## ॥ अथ विंशतितमोऽध्यायः ॥

ऋषय ऊचुः—

अथ नाम्नां सहस्राख्यं वद स्तोत्रं महामुने।
यस्याभ्यसनतः सद्यः प्रीयते पुरुषोत्तमः ॥ १ ॥

श्रीशाण्डिल्य उवाच—

पुरा कृतयुगे देवः सविता सुषुवे सुताम्।
यमुनेति च विख्यातां देवतां च शुचिष्मतीम् ॥ २ ॥
पप्रच्छ पितरं सा च कः परो वापरो यतः।
कथं प्राप्यो भवेदेष ततः प्राह पिता सुताम् ॥ ३ ॥
तपसा ब्रह्मणा पूर्वं जगत्सृष्टमिति श्रुतम्।
तपसा भवती देवं स्वीयं विज्ञातुमर्हति ॥ ४ ॥
सा कलिन्दगिरिं प्राप्य तपश्चक्रे सुदारुणम्।
ध्यायन्ती रमणं देवं ब्राह्मकल्पमनीनयत् ॥ ५ ॥
ततः प्रसन्नो भगवान् श्रीकृष्णो भक्तवत्सलः।
प्रादुर्भूय गिरौ तत्र वेणुनादं चकार सः ॥ ६ ॥
तस्य नादस्य हर्षेण द्रवीभूता ततो हि सा।
दिव्यरूपा ततो जाता जगतां पावनी परा ॥ ७ ॥
तस्यै प्रसन्नो भगवान् नवकञ्जमयीं स्रजम्।
सारूप्यं च ददौ प्राह प्रिया भव सुभक्तितः ॥ ८ ॥
इदं नाम्नांसहस्रं मे पठ येन विबुध्यसे।
मम लोके सच्चिद्रूपे दिव्यरूपे प्रविश्यताम् ॥ ९ ॥
अस्मिंश्च ते द्रवे कान्ते मज्जतां भुक्तिमुक्तयः।
भविष्यन्ति वशीभूता भक्तिर्मे न च त्वां विना ॥ १० ॥

दत्वा सहस्रनामाख्यं स्तोत्रं सख्यै हरिर्ययौ।
विवस्वन्तमनुज्ञाप्य सा गता हरिणा सह॥११॥
इदं स्तोत्रं मया लब्धं स्वयं तुष्टाद्विवस्वतः।
पुण्यं स्वस्त्ययनं भव्यमायुष्यं हरिभक्तिदम् ॥१२॥
पाठादस्य प्रजायन्ते पुण्याः कामा मनोगताः।
पुत्राश्चापि प्रसूयन्ते विनीताश्चिरजीविनः॥१३॥
भाग्यवन्तः सुकृतिनः पितृभक्ता हरेः प्रियाः।
कान्ता भवन्ति सत्कान्ता दान्ताश्चापि पतिव्रताः॥१४॥
चतुर्दश महारत्नभोक्ता भवति पाठकृत्।
महारोगैर्विमुच्येत दारुणैर्बन्धनैरपि ॥१५॥
शत्रुभिश्च विषैः शस्त्रैः कृत्याभिश्च ग्रहैरपि।
भूतैः प्रेतैश्च रक्षोभिर्वह्निवायुमहाभयैः ॥१६॥
मुच्यते वारिधौ मज्जन् त्रायते चापरान्नपि।
स्वचक्रे परचक्रे च सेनाक्षोभे प्रजाक्षये॥१७॥
महामारीभये चान्यभये वाताशने भये।
गतं राज्यं गतां लक्ष्मीं रुद्धां वा दारुणैर्जनैः॥१८॥
साम्राज्यलक्ष्मीमाप्नोति किमन्यत् कथयामि भोः।
दारिद्र्यान्मुच्यते सोऽथ कुबेर इव जायते॥१९॥
विद्ययाऽसौ गिरीशः स्यात् सुरेषु त्रिदशेश्वरः।
वदान्यतां विधिः साक्षाल्लावण्यान्मदनोपमः॥२०॥
महादेवान् वशे कुर्याद् भूतान्यपि वशे नयेत्।
विपर्ययं च जगतां कुर्याद्बन्धं दिवौकसाम्॥२१॥
लोकानां रञ्जनं कुर्यान्नारीणामपि मन्मथम्।
पूज्यते जगतीमध्ये लोकानुग्रहकृद्भवेत्॥२२॥

तस्य वाक् जायते वेत्ता भूतभव्यभवज्जुषाम् ।
यद्यदिच्छति तत्सर्वं करस्थं चैव पश्यति ॥ २३ ॥
हरिभक्तस्तु भगवल्लीलां पश्यति सर्वशः ।
निजदोषान् परगुणान् हरिदासे महात्मनाम् ॥ २४ ॥
दैन्यप्रीतिं समाप्नोति गुरुभक्तिं च विन्दति ।
ततः कृतार्थ एव स्यान्निषेव्यः स्यान्महात्मनाम् ॥ २५ ॥
हस्तौ पादौ च प्रक्षाल्य शुचिः शुद्धात्मवासनः ।
जितेन्द्रियो वाग्यतश्च पूर्वास्यः स्वासने स्थितः ॥ २६ ॥
आचम्य प्राणानायम्य कृतरक्ष्यः पठेत्ततः ।
ध्यायन् भगवतो रूपं वाञ्छितार्थफलप्रदम् ॥ २७ ॥
हृदयं गोपिकानाथो भालं मे जगदीश्वरः ।
श्रीकृष्णो मे शिखां पातु कवचं पातु गोपतिः ॥ २८ ॥
नेत्रे पातु दधद्धेत्रमस्त्रं वेणुधरो हरिः ।
मूर्द्धादिकण्ठपर्यन्तं श्रीकृष्णः सर्वदाऽवतु ॥ २९ ॥
कण्ठादिमध्यपर्यन्तं श्रीगोविन्दोऽपि रक्षतु ।
श्रीगोपीजनकान्तस्तु पायान्मध्यादिपादतः ॥ ३० ॥
श्रीमन्मुकुन्दचरणौ शरणं मेऽस्तु सर्वतः ।
श्रीकृष्णः शरणं मेऽस्तु बाल्ये बालस्वरूपधृक् ॥ ३१ ॥
गोविन्दश्शरणं मेऽस्तु तारुण्ये तरुणीप्रियः ।
केशवः शरणं मेऽस्तु वार्द्धक्ये वृद्धवन्दितः ॥ ३२ ॥
आपन्नं गोकुलाधीशः प्रपन्नं गिरिधारणः ।
विपन्नं नन्दनन्दो मां सदा व्रजपुरन्दरः ॥ ३३ ॥
दिने कालिन्दिनीकान्तः रात्रौ श्रीराधिकेश्वरः ।
सन्ध्यासु सन्धिवेलासु श्रीमच्चन्द्रावलीप्रियः ॥ ३४ ॥

अग्रतो मे जगन्नाथः पृष्ठतो बदरीपतिः।
पार्श्वतो द्वारकानाथो रङ्गनाथस्तथा हरिः॥ ३५ ॥

॥ इति कवचम् ॥

अथ श्रीगोपालदिव्यसहस्रनामस्तोत्रमन्त्रस्य सविता ऋषिः, श्रीराधिकाधिपतिर्गोपालदेवता, अनुष्टुप् छन्दः, भक्तिर्बीजं लीलाशक्तिर्लोकद्वयवासनानिरसनपूर्वकश्रीकृष्णशुद्धभक्तिलब्धये विनियोगः।

सवित्रे नमः शिरसि। श्रीराधिकेशाय नमो हृदि। अनुष्टुप् छन्दसे नमो मुखे। भक्तिप्रियाय नमो नाभौ। श्रीकृष्णभक्तये नमः सर्वाङ्गे।

मूलेनापि गायत्र्या वा न्यासान् कुर्यात्त्रिधा पुनः।
ततः स्वाभिमतो ध्यानं कुर्यात्कार्येषु दीक्षितो॥ १ ॥
प्रोत्फुल्लेन्दीवराभः कमलदलसुदृग् दिव्यनीलेन्द्रकायः
विभ्रत्समृल्लकच्छो वरपटयुगलं चारुमायूरपिच्छम्।
मुक्तामाणिक्यहीराद्यतुलमणिकृतैर्मण्डनैर्मण्डिताङ्गो
भक्तान् वेणोर्निनादैः सुखयति जयताद् गोकुलेन्दुर्मुकुन्दः॥ २॥
श्रीकृष्णः सच्चिदानन्दो गोविन्दो गोकुलेश्वरः।
पूर्णानन्दो निजानन्दो निर्गुणो निरपाश्रयः॥ ३ ॥
लीलाशक्तिः स्वतन्त्रात्मा सदानन्दोऽतिसुन्दरः।
तेजोमयो द्युतिधरः लीलाशक्तिप्रवर्त्तकः॥ ४ ॥
वामांशानन्दनो नन्दो गोविन्दो गोकुलेश्वरः।
प्रेमरूपः प्रमेयात्मा प्रमाणं फलभृत् फलम्॥ ५ ॥
रासलीलारसास्वादो नित्याखण्डमहोदयः।
अचिन्त्यकार्यकरणो ह्यप्राकृतगुणालयः॥ ६ ॥
ईश्वरो नित्यलीलश्च शुद्धाद्वैतो निराश्रयः।
नित्यानन्दो महानन्दो सर्वानन्दो परात्परः॥ ७ ॥

ज्ञानशाक्तिः क्रियाशक्तिरिच्छाशक्तिः स्वयं प्रभुः।
मायारूपः कालरूपः कर्मरूपः स्वभावकृत् ॥ ८ ॥
सत्त्वं रजस्तमःसाम्यमूलप्रकृतिरव्ययः।
गुणक्षोभो बाललीलो महत्तत्त्वं हिरण्मयः॥ ९ ॥
विज्ञानं चित्तनिलयः सत्त्वमूर्त्तिरमूर्त्तिकः।
हिरण्यगर्भो लोकेशो विश्वलोको विराट् प्रभुः॥ १० ॥
प्रद्युम्नः सृष्टिकर्त्ता च विकर्त्ता विकृतोऽकृतः।
आविर्भूतस्तिरोभूतो नित्याखण्डसमाधिगः॥ ११ ॥
अहङ्कारोऽप्यहंभासस्तैजसस्त्रिगुणात्मकः।
सङ्कर्षणस्तमोरूपो रुद्रोऽननुभूतिकृत् ॥ १२ ॥
भूतादिस्तामसः क्षुब्धो जडोऽव्यक्तः प्रपञ्चकृत्।
शब्दैरबोधनिस्फोटो नादो बिन्दुः कला बली॥ १३ ॥
कुण्डलीप्रणवो व्यक्तो घण्टानादो महोदरः।
स्वरः स्पर्शस्तथोष्मा च अन्तस्थो बिन्दुसर्गकः॥ १४ ॥
उदात्तः प्रचयो दीर्घोऽनुदात्तः स्वरितः प्लुतः।
विसर्गात्मा यमो नानावर्णरूपो विकारभृत् ॥ १५ ॥
धातुः प्रकृतिराद्यश्चारूढोऽर्थः प्रत्ययोऽत्ययः।
यौगिकः शक्तिभृल्लक्ष्यो व्यञ्जकोऽर्थपदोऽपदः॥ १६ ॥
समस्तवाक्यरूपश्च ऋग्यजुःसामगो लयः।
रागश्च संहितासन्धिर्ब्राह्मणोपनिषन्मयः॥ १७ ॥
आकाशो निर्मलः शुद्धो ब्रह्मलिङ्गश्च जीवनः।
स्पर्शो मृदुस्तथा तीक्ष्ण उष्णोऽनुष्णः सदागतिः॥ १८ ॥
रूपं प्रकाशग्रहणस्तेजः परिणतिप्रियः।
रसं रस्यं जनं तृप्तिर्महीयान् सुरभिः शुचिः॥ १९ ॥

भूमिभूताश्रयः सर्वगुणाध्यक्षो महत्तरः।
उद्भिजः स्वेदजश्चाण्डभवोऽपि च जरायुजः॥ २० ॥
द्वेषजः कालजो जोष्टा जन्यश्चापि मनोभवः।
जीवश्चेतनयुग्व्यापी मनोबुद्धिरहं त्वसः (?)॥ २१ ॥
परमात्मा हृषीकेशो योगगम्यः सनातनः।
तैजसो विषयी वेत्ता करणं कारणः क्रमः॥ २२ ॥
मुख्यो बाह्येन्द्रियाग्राह्यः क्रियाशक्तिः कृतक्रमः।
दिग्वातोऽर्कः प्रचेतोऽश्वी वह्निरिन्द्रो हरिर्गुरुः॥ २३ ॥
मित्रो निर्ऋतिपो रुद्रो गिरीशो गिरिरीश्वरः।
समुद्रश्चौषधीप्रीतिधरः सङ्कल्पजीवनः॥ २४ ॥
देवोऽदेवश्च मनुजो मुनिर्मुक्तो महेश्वरः।
क्षीराब्धिशयनो लक्ष्मीपतिः शेषकृताश्रयः॥ २५ ॥
देवेशः सत्यसङ्कल्प आदिनारायणोऽपि च।
ब्रह्मा रजोगुणाध्यक्षो लोकपद्मसमुद्भवः॥ २६ ॥
अज्ञो विज्ञोऽनुग्रहीता चतुर्वक्त्रो तथोर्जितः।
योगीश्वरो विष्णुसखो वेदगर्भो विधानकृत्॥ २७ ॥
अविद्या सृष्टिकृद्विद्या प्रभवः सनकः सनात्।
सनन्दनः कुमारश्च प्रतिसर्गोपसर्गकृत्॥ २८ ॥
विसर्गलीलः सङ्क्रुद्धो रुद्रो रुद्रकरः प्रभुः।
एकादशात्मा कालेश उमेशो गिरिशो मृडः॥ २९ ॥
मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरूर्जितः।
दक्षो वसिष्ठोऽपि भृगुरथर्वाङ्गिरसांपतिः॥ ३० ॥
गौतमो नारदोऽगस्त्यः कर्दमो लोमशोऽरुणः।
ऋषिसर्गो विसर्गात्मा देवसर्गो सुरार्दनः॥ ३१ ॥

जलजः स्थलजो व्योमभवः पुण्यविमिश्रजः।
स्वायम्भुवो मनुर्धीमान् शतरूपापतिः शुचिः॥ ३२ ॥
आदिराजो महाराजो जगत्त्राणपरायणः।
मनुष्यसृष्टिकृत् कर्त्ता कृतकृत्यः कृतात्मभूः॥ ३३ ॥
आकूतिदेवसंहूतिप्रसूतिजठरोद्भवः।
प्रियव्रतः सत्यव्रतो लोकातीतमहोदयः॥ ३४ ॥
सीमाविभागकृत्सप्तसिन्धुनेमी महाबली।
मर्यादासृष्टिकृद्विश्वजनरक्षापरायणः॥ ३५ ॥
पुरुषो विश्वरूपश्च सहस्रास्यः सहस्रपात्।
सहस्रबाहुः सर्वत्र सर्वं सर्वादिरच्युतः॥ ३६ ॥
सर्वेन्द्रियगुणाभासः सर्वतोऽक्षिशिरोमुखः।
सर्वतः श्रुतिमल्लोके सर्वसाक्षी जनार्द्दनः॥ ३७ ॥
सूर्यकोटिप्रतीकाशो वायुकोटिमहाबलः।
समुद्रकोटिगम्भीरो मेरुकोटिमहाचलः॥ ३८ ॥
कल्पद्रुकोटिफलदः कामधुक्कोटिपूजितः।
कोटिचिन्तामणिस्थानश्चन्द्रकोटिसुरञ्जनः॥ ३९ ॥
सुधाकोटिमहानन्दः कोटिमन्मथसुन्दरः।
कोटीन्दिरासेविताङ्घ्रिः कोटिब्रह्माण्डविग्रहः॥ ४० ॥
वेदकोटिप्रगीतश्रीर्योगकोटिधृताशयः।
भक्तकोटिव्रतः श्रीमान् कोटिधैश्वर्यमङ्गलः॥ ४१ ॥
अनन्तोऽनन्तशीर्षेशो नागराजसमर्चितः।
नीलाम्बरो हलधरः शोणाक्षश्चैककुण्डली॥ ४२ ॥
नागकन्याकृताभ्यर्च्यः सनकादिसमर्चितः।
विद्याप्रवर्तको भक्तो नन्दनोऽसुरनन्दनः॥ ४३ ॥

श्रीशङ्कराचिर्तो भव्य इलावृत्तकृतालयः।
जम्बुद्वीपपतिः पूज्यो जगदीशो जगत्पतिः॥ ४४ ॥
विष्णुर्वृषाकपिर्मेरुशैलाधीशो गुहाशयः।
रम्यकेशो हिरण्येशः कुरुनाथो धरापतिः॥ ४५ ॥
हरिर्वर्षपती रामः किन्नराधीश्वरोऽपि च।
केतुमालविहारी च भद्राश्वकृतकेतनः॥ ४६ ॥
भारताधिपतिः कृष्णो नरनारायणो गुरुः।
वद्रीभक्तात्मदो भव्यो लोकानां हितकारकः॥ ४७ ॥
जगन्नाथो जगज्जीवः पावनः पुरुषोत्तमः।
श्रीरङ्गनायकः पद्मनाभोऽनन्तो जनार्द्दनः॥ ४८ ॥
दक्षिणाशाप्रियकरो धनुस्तीर्थो रघुप्रियः।
धवः कान्तः पतिर्भर्ता स्वामीशो डाकुराऽधिपः॥ ४९ ॥
भीमापतिर्भीमसुतानाथः श्रीविठ्ठलेश्वरः।
दीनोद्धारी कृपाकारी व्यङ्कटेशो हिमप्रियः॥ ५० ॥
चतुर्भद्राप्रियस्तुङ्गो भद्रेशः कृष्णभूपतिः।
शृगालहा शृङ्गधरो शृङ्गाधीशश्च मङ्गलः॥ ५१ ॥
विष्णुर्विष्णुप्रियाचार्यो चम्पारण्यकृतोदयः।
दुर्वादखण्डनो रुद्रः समुद्रः सर्वविज्जयी॥ ५२ ॥
लोकाज्ञानहरो दक्षः शिखी मुण्डी च दण्डभृत्।
शेषोऽशेषधरो विद्याधरः शोकहरः परः॥ ५३ ॥
माधवो मापतिर्जीवो जीवनोऽमृतदोऽमरः।
वैश्वानरो ब्रह्मवेत्ता सुधानाथो हरिप्रियः॥ ५४ ॥
कुमारो मुक्तिदो मुक्तो जनेशो विश्ववन्दितः।
द्वारावतिः शङ्खधरः कुशेशः श्रीत्रिविक्रमः॥ ५५ ॥

रणत्यागी रणहरो ऋणहा सिद्धसेवितः।
सोमनाथः प्रभाशेषः ज्वालामाली दिगम्बरः॥५६॥
हिमालयः पशुपतिः केदारो दारवल्लभः।
भूपतिर्भूधरः सिन्धुः सरिद्रूपो वनोऽवनिः॥५७॥
जम्बूनारायणो मेरुशिखरानन्दवर्द्धनः।
रत्नाकरो रत्नभोक्ता प्लक्षो प्लक्षाधिपो रविः॥५८॥
जगदात्मा जगच्चक्षुस्तपनः सविता घृणिः।
इक्षुः सिन्धुः शाल्मलीशश्चन्द्रः सुरपितृप्रियः॥५९॥
विश्वानन्दकरः कालः सुरासम्मोहितोऽसुरः।
कुशप्रियः कुशाध्यक्षो हुतभुग् घृतभोजनः॥६०॥
क्रौञ्चप्रियो भक्तमयो क्षीरसागरवल्लभः।
शाकः शाकप्रियः प्राणो दधिभुक् देवसंयुतः॥६१॥
पुष्करः पुष्करपतिर्विरिञ्चिर्मधुरो मधुः।
मानसो मानसगतिः काञ्चनी मुकुरप्रियः॥६२॥
लोकालोकमहास्थानो गोप्ता दिग्गजनायकः।
स्वर्गो महर्जनो दिव्यस्तपः सत्यं ध्रुवो व्रतम्॥६३॥
वैकुण्ठो देवलोकश्च गोलोको ब्रह्मभू रसः।
अतलो मयपुत्रेष्टः छलोऽथ वितलो हरः॥६४॥
सुतलो भक्तवश्यश्च विक्रमी बलिपूजितः।
महातलो महामायी काद्रवेयाशनासनः॥६५॥
रसातलो दानवान्तकरणः सुरवल्लभः।
त्रिलोकीधरणः शेषः नागेशो ज्ञानसागरः॥६६॥
नानाकर्मगतिः पापगतिर्दुर्गतिदो यमः।
अनन्तनरकच्छेदी पवित्रं वरसद्यशः॥६७॥

कोट्यश्वमेधपापघ्नः कोटितीर्थातिपावनः।
कोटिविश्वसमुद्धर्त्ता कोटिसाधनसाधनः॥ ६८॥
निजाऽनुग्रहवल्लील ईश्वरोऽचिन्त्यकार्यकृत्।
सत्प्रसादसमुद्धारः सतः सद्वासनाप्रदः॥ ६९॥
असद्बुद्धीहरणः सर्वव्यापी सद्धर्मसद्गतिः।
सद्धर्मपालकः सत्यमनुरूपी जनेश्वरः॥ ७०॥
वराहो यज्ञरूपश्च धरोद्धारी धरास्तुतः।
हयशीर्षो हयग्रीवः सर्वविद्याप्रवर्त्तकः॥ ७१॥
दत्तात्रेयो महायोगी नारदो देवपूजितः।
कुमारः कपिलाचार्यः साङ्ख्यवित्सागरो धृतिः॥ ७२॥
धर्मसूनुर्धर्मरूपः स्वधर्मपरिपालकः।
यज्ञः सुरगणाधीशो मेरुदेवीसुतस्त्रिवित्॥ ७३॥
योगीश ऋषभः स्थाणुर्योगचर्याप्रवर्त्तकः।
पृथुः पृथुमनाः पृथ्वीपालको जगतः पिता॥ ७४॥
मत्स्यः सत्यव्रतानन्दः कच्छपो मेरुभृत्समः।
धन्वन्तरिः सुधाहस्तो जनरोगापवर्गदः॥ ७५॥
मोहनी मोहनो मायी दनुजक्लेशदः पविः।
नरसिंहो महासिंहो प्रह्लादोऽदितिजार्द्दनः॥ ७६॥
उग्रो वीरो निजानन्दो भीषणार्त्तिहरः पविः।
उरुक्रमः कर्मगत इन्द्रसेनाभयप्रदः॥ ७७॥
रामः परशुभृद्द् दुष्टक्षत्रहारी द्विजार्त्तिहा।
पाराशर्यो महाभागो ह्यनुकम्प्यनुभाववित्॥ ७८॥
ज्ञानावतारो विज्ञाता वैष्णवोऽसुरमोहनः।
श्रीरामचन्द्रो रघुजः साक्षाद्ब्रह्ममयो हरिः॥ ७९॥

जगत्सन्तापहरणो ब्रह्मण्यः सत्यवत्सलः ।
सत्यसन्धः शरण्यश्च मर्यादापुरुषोत्तमः ॥ ८० ॥
कौसल्यानन्दनो देवदत्तो भरतवल्लभः ।
लक्ष्मणप्राणदः प्राणः शत्रुघ्नः शत्रुतापनः ॥ ८१ ॥
विश्वामित्रप्रियो दान्तः शान्तो दशरथात्मजः ।
सीतापतिः पुण्यकीर्त्तिर्हरकोदण्डभञ्जनः ॥ ८२ ॥
सत्यवाक् पितृसद्भक्तिर्मार्गनेता नरोत्तमः ।
निःस्पृहो निर्ममो नित्यो निर्मोहश्च निरञ्जनः ॥ ८३ ॥
चित्राद्रिरमणः काकभिद् आदिमुनिप्रियः ।
गुहस्वामी गुहानन्दी दण्डकारण्यपावनः ॥ ८४ ॥
दुष्टादानवहन्ता च स्वजनानन्दनक्रियः ।
शबरीशुद्धिदः सीतावियोगगतिनाट्यकृत् ॥ ८५ ॥
जटायुमुक्तिदो वायुसुतादिकपिवल्लभः ।
सेतुबन्धनकृन्नाम शक्तिसम्भृतभूधरः ॥ ८६ ॥
लङ्काधिपकुलध्वंसी विभीषणवरप्रदः ।
अयोध्यानायकश्चैकक्रियारमणसद्व्रतः ॥ ८७ ॥
यज्ञकृदृषिसम्मान्यो राजर्षिः सर्ववल्लभः ।
शिवादिवन्दितपदो नटनाट्यो नराकृतिः ॥ ८८ ॥
अयोध्यातारकस्तारः पुरुषश्लोकशिखामणिः ।
वासुदेवो महादेवो बलभद्रोऽसुरौघहा ॥ ८९ ॥
भूभारहरणो हारी त्रिलोकपरिपालकः ।
वृन्दारकानुगो विज्ञोऽसुरमोहनतत्परः ॥ ९० ॥
बुद्धो बुद्धिप्रदोऽशुद्धमार्गकृद्वेदधर्महा ।
अहिंसाव्याजसन्तप्तसर्वधर्मकृतागमः ॥ ९१ ॥

कलिधर्माकुलजगत्पालको पालनक्षमः।
सन्धिधर्मधरो धुर्यो ह्यसन्मार्गविनाशकः॥९२॥
सद्युक्तिः सत्कृतिः साधुर्मुनिरूपकृतावनः।
उपधर्महरो विद्वान् धर्मदण्डधरो हरः॥९३॥
जगज्जेता जगन्नेता सर्वधर्मप्रवर्त्तकः।
तामसस्तामसजनो दुष्टबुद्धिप्रदो मदी॥९४॥
बहुधोपासनामार्गो विरक्तोऽवनिमण्डनः।
निःसाधनजनोद्धारी करुणावरुणालयः॥९५॥
वाक्पतिः श्रीधरो धीरो माधवश्च सनातनः।
विष्णुः कलिमलध्वंसी जाह्नवीजलसंश्रितः॥९६॥
महाकलिः कलिः क्लिष्टः कल्किः कलिनिवारणः।
म्लेच्छहाऽसिधरो लीलायुतस्तुरगवाहनः॥९७॥
ईशलीलाधरः सूर्यः श्रद्धालुः श्राद्धभुक् शुभः।
इक्ष्वाकुः पुरुजिच्चन्द्रोऽम्बरीषोऽप्यमितद्युतिः॥९८॥
निमिर्निमेषगः सत्यो यौवनाश्वो महाबली।
सगरः सागरो योगी जिताभागीरथोऽरिहा॥९९॥
खट्वाङ्गो मुचुकुन्दश्च रघुर्दशरथो द्युमान्।
चन्द्रो द्विजेशो सुद्युम्न एलश्च नहुषो नृपः॥१००॥
ययातिश्च यदुत्राता कुरुश्च भरतो वृषः।
कार्त्तवीर्यो महावीर्यो विश्वामित्रोऽपि शन्तनुः॥१०१॥
भीष्मः पाण्डुसुतः शैब्योऽलर्कोऽयोध्यापतिस्त्रिपात्।
दिवोदासो रन्तिदेवो विष्णुदत्तो नरेश्वरः॥१०२॥
सद्धर्मरक्षणकृती निरोधगतिदोऽमृतः।
जगतामाश्रयो नित्यो लोकातीतमहोदयः॥१०३॥

वेदैकवेद्यो वेदात्मा वेदानुग्रहकृत्प्रभुः।
व्यापिवैकुण्ठनिलयो निजलीलारतिः प्रियः॥ १०४॥
अवतारितभक्तांशसमुद्धारत्वराकृतिः।
दिव्यैकनिलयो दिव्यो दिव्यक्रीडारसोऽरसः॥ १०५॥
नन्दो नन्दयिताऽऽनन्दी यशोदानन्दमन्दिरः।
व्रजेश्वरो व्रजाध्यक्षो व्रजवैभवकारकः॥ १०६॥
असुरमायाह्द्योगमायाजनककार्यकृत्।
पूर्णब्रह्मपरानन्दमात्रगात्रोऽविचिन्तनः॥ १०७॥
परिपूर्णकलास्वामी सहस्रसुकलाधरः।
भूभक्तप्रार्थितप्राप्यो भूभारहरणोदितः॥ १०८॥
ब्रह्मेशेन्द्रादिदेवेड्यः पुरुषः पुरुषोत्तमः।
असुरै रणकृत्त्राता मायेशो मोहकार्यकृत्॥ १०९॥
वसुदेवः सत्त्वमूर्तिर्दिवधानी निवासकृत्।
ब्रह्मादिसंस्तुतो देवो वासुदेवश्चतुर्भुजः॥ ११०॥
व्याख्याताशेषमाहात्म्यः गोकुलानन्दकारकः।
स्वव्यूहसंहरः सारः प्रयागचरितव्रतः॥ १११॥
स्वकीयजनविज्ञातः स्वप्रियो जनरञ्जनः।
महानन्दकरोऽमन्दगुणोदारो महोत्सवः॥ ११२॥
गोगोपजनतानन्दः पूतनाप्राणहारकः।
पूतनासुपयःपानप्रोद्धृतस्वीयबालकः॥ ११३॥
मूलाविद्याहरः स्वीयचित्तरोधनपण्डितः।
शकटासुरसंहारी स्वीयदोषनिवारकः॥ ११४॥
पवनासुरभिद्भीष्मः मुरारिः सुतलार्द्दनः।
गोस्वामी गोकुलपतिर्गोविन्दो नन्दलालितः॥ ११५॥

गोपालो गोकुलाधीशो नवनीतप्रियः प्रभुः।
दामोदरो भक्तवश्यो यमलार्जुनमुक्तिदः॥ ११६॥
अप्रमेयः प्रमेयात्मा बलदम्भविमर्द्दनः।
कालियासुरहरः क्रोधदण्डनो मण्डनः सताम्॥ ११७॥
प्राणपालो दिव्यजन्मा लीलाताण्डवपण्डितः।
वृन्दावनचरः कान्तो मल्लो नटसमाम्बरः॥ ११८॥
बर्हापीडः पीतवासा सूर्यभूषणभूषणः।
मुरलिनादमाधुर्यसमाहुतव्रजाङ्गनः॥ ११९॥
योगमायाविरचितसर्वसेवाकृतार्थतः।
लावण्यैकपरामूर्त्तिर्वृन्दारण्यपुरन्दरः॥ १२०॥
परमापीच्यगोपीड्यो वियोगह्रतबन्धनः।
सङ्प्राप्तान्यमंहिलामोहवाग् वदतां वरः॥ १२१॥
स्वकीया रतिदः कामी कामशास्त्रविशारदः।
पुरन्ध्रीदोषहरणः स्वात्ममायाप्रदर्शकः॥ १२२॥
गोपिकागीतमहिमा स्वदोषपरिबोधकः।
श्रीगोकुलपतिः साक्षी कोटिमन्मथमन्मथः॥ १२३॥
भक्तोत्तमर्णः संकीर्णः सर्वानन्दकरो गुरुः।
नृत्यलीलानुकरणस्त्रिभङ्गललिताकृतिः॥ १२४॥
परमानन्दविस्तारविस्मायितसुरेश्वरः।
सर्वसौभाग्यसुफलः कामदोषनिवारकः॥ १२५॥
अलौकिकगतिः शङ्खासुरचूडामणिप्रदः।
प्रेमात्मको रुक्ममूर्तिः पराश्रयनिवारकः॥ १२६॥
केशिहा वृषहा चैव नारदेड्यो नृपेश्वरः।
अक्रूरवल्लभो भूमिभारहा यादवेश्वरः॥ १२७॥

कंसारिर्दुष्टदमनो व्रती गुरुवरादृतः।
जरासन्धवधोद्दामी यवनान्तकरो रविः॥१२८॥
मुचुकुन्दप्रियः श्रीशो द्वारकासौभगोदयः।
रुक्मिणीशः स्मरकरः प्रद्युम्नो रतिवल्लभः॥१२९॥
सत्यभामापतिर्जाम्बवतीशो लक्ष्मणापतिः।
भद्रापतिर्मित्रविन्दापतिः शैब्यापतिर्मखी॥१३०॥
कालिन्दिनीधवो धाता शतस्त्रीनायको युवा।
षोडशस्त्रीसहस्रेशः सत्त्वसृष्टिपरायणः॥१३१॥
पाण्डवानन्दकरणः कौरवान्वयनाशनः।
भूभारभूतराजन्यदैत्यसङ्घविनाशकः॥१३२॥
सुदामाभ्यर्थितः प्राप्तश्रुतदेवो निमिप्रियः।
षड्गुणैश्वर्यसम्पन्नो निजभक्तानुरोधकृत्॥१३३॥
ज्ञानगम्यः साङ्ख्यगम्यो भक्तिवश्यः कृतागमः।
स्वरूपानन्दरमणः स्वाश्रयो निरपाश्रयः॥१३४॥
योगीश्वरैर्वन्दिताङ्घ्रिर्देवानन्दकरः प्रभुः।
शेषभूतसमस्तात्मा परानन्दमितो हरिः॥१३५॥
इति श्रीगोकुलेशस्य प्रोक्तं नामसहस्रकम्।
पठनाद्भावविज्ञानां भजनानन्ददायकम्॥१३६॥
श्रीमदार्यप्रसादेन प्राप्य श्रीशमहामनुम्।
समर्च्य संपठेद्भक्त्या निग्रहानुग्रहक्षमः॥१३७॥
भवेत् पूज्यश्च महतां विद्यानां पारदृश्वनः।
सर्वापराधैर्मुच्येत परचर्यासु सङ्गतैः॥१३८॥
भक्तिबीजमवाप्नोति प्राप्नोति च दृढां श्रियम्।
ब्राह्मणो वेदवेदान्तसदाचारफलं लभेत्॥१३९॥

क्षत्रियो विजयी भक्तवत्सलो ब्राह्मणप्रियः।
वैश्यो वित्तपतिर्भव्यो दाता भोक्ता भवेदयम् ॥ १४० ॥
शूद्रः शुद्धो भवेदस्माद् ब्रह्मण्यो हरिवल्लभः।
भक्तो भक्तिं समाप्नोति कामी कामान् मनोगतान् ॥ १४१ ॥
रोगार्तो मुच्यते रोगाद् बद्धो मुच्येत वन्धंनात्।
आपन्नश्चापदो मुच्येद् मुमुक्षुर्मुच्यते भयात् ॥ १४२ ॥
सर्वात्मनेह गदितः श्रीलीलापुरुषोत्तमः।
सर्वात्मभावलब्ध्यर्थं कामभावाप्तयेऽपि च ॥ १४३ ॥
नानेन सदृशं किञ्चित् श्रीपतेरतिवल्लभम्।
तस्मादवश्यमभ्यस्यं वैष्णवैः पूजने हरेः ॥ १४४ ॥
वृन्दावने वटप्रान्ते तीर्थस्थाने गुरोर्गृहि।
अभ्यस्य समवाप्नोति यजमानस्य बन्धुताम् ॥ १४५ ॥
परकृत्यासु घोरासु प्रेतादीनामुपद्रवे।
तीर्थामधुसरैः (?) पाठ्यं तत्तन्नाशयते क्षणात् ॥ १४६ ॥
पाषण्डानां प्रसङ्गेन ये ये दोषा भवन्ति वै।
ते सर्वे नाशमायान्ति सकृदावर्त्तनादपि ॥ १४७ ॥
एतेन मन्त्रितं भस्म अग्निहोत्रादिजं शुभम्।
विलिप्य घोरबाधासु तत्क्षणादुपसंहरेत् ॥ १४८ ॥
न वाञ्छन्ति च ये कामान् तेषां कामाः स्वसंस्थिताः।
अनुग्रहाद्भगवतः श्रीगोपालस्य ते प्रियाः ॥ १४९ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे सहस्रनामवर्णनं नाम विंशतितमोऽध्यायः ॥२०॥

॥ समाप्तः प्रथमांशः ॥

## ॥ अथ द्वितीयांशः ॥

### ॥ प्रथमोऽध्यायः ॥

श्रीमुनय ऊचुः—

भगवन् भवता भक्तिः श्रीगोपालस्य कीर्तिता।
निर्गुणा सगुणा चापि तदाचारं निरूपय ॥ १ ॥

श्रीशांण्डिल्य उवाच—

सुदुर्लभा भगवतो भक्तिर्निःश्रेयसरूपिणी।
सुकरा शान्तिदा सिद्धा वाञ्छिता जगदीश्वरैः ॥ २ ॥
अष्टादशाक्षरो मन्त्रः श्रीगोपालस्य सम्मतः।
जीवानां भजनानन्ददायकोऽसौ निरूपितः ॥ ३ ॥
त्रैवर्णिकाः कारुणिकास्त्रयीनिष्ठा जितेन्द्रियाः।
विद्यया जन्मना शुद्धाः सात्त्विका येऽधिकारिणः ॥ ४ ॥
वेदवेदान्तविद्विप्रः स्वाचारनिरतः सुहृत्।
अनन्यभक्त्या संसिद्धः कुलीनो वैष्णवो गुरुः ॥ ५ ॥
बहुतीर्थाभिषिक्तोऽपि बहुयज्ञेषु दीक्षितः।
सहस्रशाखाध्यायी च न गुरुः स्यादवैष्णवः ॥ ६ ॥
न तत्त्वं योऽभिजानाति न भागवतशास्त्रवित्।
न यत्र श्रद्धासम्पत्तिः स गुरुर्न भवेद्धरिः ॥ ७ ॥
न पारम्पर्यसंसिद्धा यस्य दीक्षास्ति वैष्णवी।
न चास्य महिमासिद्धिः स गुरुः किं गुरुर्भवेत् ॥ ८ ॥
गुरुमूलमिदं शास्त्रं शास्त्रमूलाऽऽदिदेवताः।
स संपरीक्ष्य कर्तव्यो यत्र श्रद्धा दृढा भवेत् ॥ ९ ॥

देशिके विकले कुर्यादुपदेशोऽस्य सन्निधौ ।
विदुषा वैष्णवेनापि ब्राह्मणेन नियोजितः ॥ १० ॥
स्नातः शुचिः शुद्धवासा निवर्तितनिजक्रियः ।
तीर्थक्षेत्रे तीर्थकाले वटपत्रविधानतः ॥ ११ ॥
भगवद्भक्तियुक्तेन ब्राह्मणेन कृतं तु यत् ।
तत्सर्वमकृतं विद्यान्नान्यत्तोषकारणम् ॥ १२ ॥
गर्भाधानादिसंस्कारैर्येषां मौञ्जी यथाविधि ।
तेषामत्राधिकारोऽस्ति यदि भक्तिर्हरौ दृढा ॥ १३ ॥
ऋतुशान्तिर्विधायादौ तत्र प्रजनने द्विजः ।
वैष्णवं चिन्तयेद्धाम दीक्षैषा गार्भिकी मनोः ॥ १४ ॥
पुंसवे चापि सीमन्ते मनुमष्टोत्तरं शतम् ।
जपेद्धुनेद्वा हविषा कृत्वा वैदिकसंस्कृतिम् ॥ १५ ॥
जातेऽपि जातकं कृत्वा मनुना ह्यभिषिच्य च ।
मधुपर्कं हरेर्देयं वैष्णवं भावयेच्च तम् ॥ १६ ॥
नाम्नि श्रौतं नाम कृत्वा हुत्वा मन्त्रेण पायसम् ।
वैष्णवैर्वैष्णवं नाम तेनात्ममनसी शुची ॥ १७ ॥
ततोऽस्य निष्क्रमं कार्यं शुभेऽह्नि गुरुमन्दिरे ।
गुरोस्तत्राऽभिमर्षेण प्रपत्तिस्तत्र सिद्ध्यति ॥ १८ ॥
प्रपत्तिमत्र मन्त्रैर्वा दिशेत्कर्णेऽस्य दक्षिणे ।
अर्पयेद्वैष्णवीं मालां तथैव चरणाऽमृतम् ॥ १९ ॥
एवं प्रपन्नतापन्ने नासुरं भावमापतेत् ।
श्रवणं कीर्तनं तत्र सततं तु प्रवर्तयेत् ॥ २० ॥
अथान्नप्राशनं तस्य हरेर्नैवेद्यशिष्टतः ।
तेनाऽस्य दैहिकी शुद्धिरिन्द्रियाणामथापरा ॥ २१ ॥
पाठयेद्वर्णमालां च वैष्णवं स्तोत्रमादितः ।
ततो मौञ्जी द्विजैः कार्या यथाम्नायविधानतः ॥ २२ ॥

आत्मार्पणं गुरावत्र वेदशास्त्रावलोकनम् ।
तेन सार्वात्मिकी शुद्धिः परा भक्तिर्दृढा हरेः ॥ २३ ॥
ब्रह्मचर्यव्रतं धार्यं गुरुशुश्रूषणं तथा ।
वसेद्गुरोर्निदिशेऽसौ वर्जयेच्च रजोगुणम् ॥ २४ ॥
मेखलाजिनदण्डानि कौपीनाच्छादनानि च ।
शिखोपवीतमालादि वैदिकैर्नियमैर्वहेत् ॥ २५ ॥
सायं प्रातर्हरेरर्चा वैष्णवैः सह सङ्गतिः ।
शृणुयाद्भक्तिशास्त्राणि हरिधामान्यसौ व्रजेत् ॥ २६ ॥
एवं गुरोरनुमतो लब्धविद्यामहोदयः ।
धारयेद् वैष्णवीं दीक्षां श्रीमद्गोपालवल्लभाम् ॥ २७ ॥
सुमुहूर्त्ते शुभे काले सुतीर्थे विष्णुसन्निधौ ।
लब्ध्वाऽनुग्रहमाचार्याद्वहेद्दीक्षां महामनोः ॥ २८ ॥
अथवा तु यदा शुद्धो भवेद्भक्तानुकम्पया ।
पूर्ववासनया पुंसस्तदा दीक्षापरिग्रहः ॥ २९ ॥
बहुजन्मविपाकैश्च श्रेयोभिर्विविधैरपि ।
सात्त्विकानां नृणां श्रद्धा मनौ स्याच्चरमे भवेत् ॥ ३० ॥
नानाराधितगोविन्दा नानाश्रितनिजक्रियाः ।
नातप्ततपसो लोके श्रद्धावन्तो मनाविह ॥ ३१ ॥
यदैव देवदेवस्य सदनुग्रहभाजनाः ।
अदग्धसुकृता विप्रास्तेऽत्र श्रद्धासमन्विताः ॥ ३२ ॥
पापात्मानो दुरात्मानस्तामसा निगमच्युताः ।
प्रीतिर्न तेषामत्रास्ति न देयस्तेषु सन्मनुः ॥ ३३ ॥
संसारबन्धविच्छित्यै स्वाराज्यावाप्तये नृणाम् ।
नानेन सदृशं किञ्चित्साधनं मम निश्चितम् ॥ ३४ ॥
अनेन दीक्षितो विप्रः सर्वदेवमयो हरिः ।
एकान्तभक्त्या सर्वेषां वन्दनीयः सदा गुरुः ॥ ३५ ॥

एतादृशो नास्य गोत्रे महिमा नास्य हीयते।
न चास्यान्यत्र श्रद्धा स्यात्प्रसादात् परमात्मनः॥ ३६ ॥
अधिकारस्य सिद्ध्यर्थं संस्कारादिविलोपजम्।
द्वादशाब्दव्रतं कार्यं विदुषा निजशक्तितः ॥ ३७ ॥
स्नात्वा सितासिते तीर्थे गत्वा वाराणसीमपि।
दृष्ट्वा नारायणं देवं विशुद्धोऽत्राधिकारभाक्॥ ३८ ॥
मथुरां द्वारकां वापि पुष्करं नैमिषं तथा।
काञ्चीमयोध्यां संस्पृश्य विशुद्धोऽत्राधिकारभाक्॥ ३९ ॥
श्रीरङ्गं व्यङ्कटं धाम व्रजं गोवर्द्धनं गयाम्।
पुरुषोत्तममानम्य विशुद्धोऽत्राधिकारभाक्॥ ४० ॥
पुनः संस्कारमासाद्य ग्रहं संपरिवर्त्य च।
भाण्डवस्त्रादिकं त्यक्त्वा यथाशक्ति यथाविधि॥ ४१ ॥
ज्ञात्वाऽऽचारं तथा शास्त्रं वैष्णवानुमतो द्विजः।
विभूयाद्वैष्णवीं दीक्षामच्छिन्ननियमं वहेत्॥ ४२ ॥
दीक्षादिनं समासाद्य वैष्णवाश्रमवान् भवेत्।
तेनाचारः प्रकर्तव्यो यदत्र विनिरूप्यते॥ ४३ ॥

॥ इति श्रीशाण्डिल्ये भक्तिशास्त्रे द्वितीयांशे दीक्षाप्रशंसाविधिनिरूपणं नाम प्रथमोऽध्यायः॥ १ ॥

## ॥ अथ द्वितीयोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

अथाचारं प्रवक्ष्यामि यदुक्तं पद्मजादिभिः।
यमाह शङ्करो देवो यं वै पाराशरोऽब्रवीत् ॥ १ ॥
अनालसः सदोद्योगी दृढदेहो जितेन्द्रियः।
व्रतवान् शास्त्रसम्पन्नः श्रद्धालुः कर्तुमर्हति ॥ २ ॥
पाकस्थानं जलस्थानं स्नानस्थानं हरेः पदम्।
स्वस्थानमशुचिस्थानं स्त्रीस्थानादि यथोदयम् ॥ ३ ॥
करशुद्ध्यर्थमेष्वेव पद्मजाद्यैर्यदुच्यते।
दूरे मूत्रपुरीषादि गृहादुच्छिष्टमुत्सृजेत् ॥ ४ ॥
एवंविधे गृहे स्थित्वा सर्ववस्तुसमन्विते।
सौवर्णे राजतैस्ताम्रैः पात्रैर्व्यवहरेत्परैः ॥ ५ ॥
सौवर्णेः क्षालनाच्छुद्धं राजतं मृद्विलेपनात्।
अम्लतापेन ताम्रस्य अन्येषां घर्षणादिभिः ॥ ६ ॥
स्वपात्रं पाकपात्रं च भगवत्पात्रमेव यत्।
स्नानपात्राण्यपात्राणि मेलयेन्न कदाचन ॥ ७ ॥
एवं वस्त्रेऽपि विज्ञेया शुद्धौ द्रव्येति भावयेत्।
नावशिष्टं भजेद्द्रव्यं पुरतोऽन्याभिमर्षणे ॥ ८ ॥
पाकं देवेषु पानीयं शुचि गूढं समर्पयेत्।
प्रसादान्नमतो ग्राह्यं विभज्य द्विजवैष्णवान् ॥ ९ ॥
प्राज्ञा द्विजाः प्रिया विष्णोर्वैष्णवास्ते विशेषतः।
अवैष्णवा अपि ह्येते पूज्या जातिप्रिया हरेः ॥ १० ॥
देहशुद्धिः सदा कार्या करशुद्धिर्विशेषतः।
यतो हि सकला शुद्धिः करशुद्धिमपेक्षते ॥ ११ ॥
प्रत्यहं क्षालयेत्पात्रं धार्यं वस्त्रं च प्रत्यहम्।
पानीयं प्रत्यहं त्याज्यं सिद्धान्नमपि प्रत्यहम् ॥ १२ ॥

वस्त्रपूतं व्यवहरेत्तोयं यामचतुष्टये।
घृतपक्वादिपक्वान्नं सङ्कटे त्रिदिनावधि॥१३॥
एकेनान्नं फलं द्वाभ्यां त्रिभिः शाकं न दुष्यति।
वह्निना च जलेनापि लवणेन यथाक्रमम्॥१४॥
पयसा पिण्डितं पिष्टं हविषा यदि पाचितम्।
तत्पक्वान्नं व्यवहरेच्छुचिरेव ग्रहान्तरे॥१५॥
वंशपात्रभृतं द्रव्यं कम्वलापिहितं यदि।
शूद्राहृतमपि ग्राह्यं प्रवासे सङ्कटे द्विजैः॥१६॥
नावैष्णवैः सह वसेद् न तैः संसर्गमाचरेत्।
प्रसङ्गेषु हरिं ध्यायेत्स्नायात् कर्मणि मन्त्रतः॥१७॥
सवर्णाश्च सतीर्थाश्च समन्त्राश्च समाचराः।
वैष्णवाः पावना ह्येते व्यवहारे परः परः॥१८॥
सवर्णो वैष्णवो वापि तीर्थमन्त्रपराङ्मुखः।
यो न विद्याधिकारी स्यान्नान्यव्यवहृतौ क्वचित्॥१९॥
देशे पुण्यतमे चाढ्ये नीचासङ्कीर्णसज्जने।
हरेरर्चाश्रिते वासोऽनूपे जाङ्गलके शुभः॥२०॥
गुरवो माननीयाः स्युर्विद्यया तपसापि वा।
सम्बन्धिनोऽपि सम्मान्या वयःसम्बन्धरूपतः॥२१॥
नामभिः प्रणमेद्विष्णो जायां सम्भावयेत्पदम्।
गुरवः पादयोर्वन्द्याः कट्यादिभ्यः परे समाः॥२२॥
असमा नाममात्रेण सर्वे वा भगवत्प्रियाः।
देहवर्णाऽभिमानानां वन्दना शास्त्रसम्मता॥२३॥
द्वादशाब्दं वसेद्यस्तु मद्यमांसादिवर्जितः।
स्वगुरुं सम्प्रसन्नोऽसौ सच्छूद्रो व्यवहारभाक्॥२४॥
सेवार्थमसृजत् तं वै पद्भ्यां स पुरुषो हरिः।
ततोऽस्य पादसेवैव वस्त्रपात्रादिमार्जनैः॥२५॥

शूद्राहृतेन नाचामेन्न पचेन्न पिबेदपः।
न कव्या ऊर्ध्वतः स्पर्शी नृस्पृश्योऽसौ शिरो विना ॥ २६ ॥
शूद्रा ह्यनुपनीताश्च परबालाः पराबलाः।
अज्ञानालिङ्गिनो व्रात्या वर्ज्याः स्युः पापिनोऽधमाः ॥ २७ ॥
रजस्वलां प्रसूतां च नियुञ्जीत गृहान्तरे।
रोगार्तो विच्युतो धर्मादुन्मत्तोऽपि समागतः ॥ २८ ॥
स्वकृता शुद्धिरुत्कृष्टा सवर्णैर्मध्यमा मता।
सतीर्थमात्रैरधमा यतः परकृताऽकृता ॥ २९ ॥
व्यवहारे शुचिस्ताम्रं पात्रं तु द्विमुखं शुचिः।
कम्बलं चापि कौशेयमाहतं राङ्कवादिकम् ॥ ३० ॥
सुवर्णं रजतं लोहं ताम्रं रीतिश्च कांस्यकम्।
सीसकं जसदं चापि पूर्वं पूर्वं शुचिस्ततः ॥ ३१ ॥
यद्वत्तु राङ्कवं शाणं कम्बलं कृमिजं तथा।
कार्पासमाहतं रक्तं वस्त्रं तेष्वशुचिः परम् ॥ ३२ ॥
मणिबन्धात्कूर्परान्तमस्पृष्टं चेत्करः शुचिः।
गुल्फादधो शुची पादौ सस्कन्धं चापि शिरः शुचिः ॥ ३३ ॥
नाधरोच्छिष्टके योज्यं स्वर्णं ताम्रं सुबुद्धिभिः।
तत्र स्थितं तु पानीयं शुचि तीर्थाम्बुवद्भवेत् ॥ ३४ ॥
उपानद्भ्यां चरेन्मार्गे अमेध्यान्वर्जयन्नपि।
स्नातश्चरेत् पादुकाभिर्गृहस्नातो न सञ्चरेत् ॥ ३५ ॥
मलप्राये पथि स्नातः सोपानत्कोऽम्बु चाहरेत्।
पार्ष्णेरधः शुद्धशुष्कचर्मस्पर्शो न दोषकृत् ॥ ३६ ॥
सदोपवीतपुण्ड्राणि तुलसीकाष्ठजां स्रजम्।
धारयेदुत्तरीयं च सदा बद्धशिखो भवेत् ॥ ३७ ॥
मौनमालम्ब्य कर्माणि कुर्याद्भक्तिसमन्वितः।
अमौनिनो यतो ह्यस्य बिन्दवो दूषयन्ति तम् ॥ ३८ ॥

ज्यायस्तु मौनमेव स्यादभावे मुखवन्धनम् ।
तद्वासो न स्पृशेद्धस्ताद् न तत्स्पृष्टो हि दुष्यति ॥ ३९ ॥
न दधेत्कृत्रिमं वासो कार्पासं शीतभीर्भवेत् ।
स्वभावरक्तं यद्वासो यच्च पाकेन रञ्जितम् ॥ ४० ॥
नवरक्तं तु यद्वासस्तदरक्तवदेव हि ।
नीलीरक्तं सुरास्पृष्टं वस्त्रं पात्रं न शुद्ध्यति ॥ ४१ ॥
वस्त्रे कौसुम्भरक्ते तु नीलीरागः स्त्रियाः शुचिः ।
शिरस्त्राणांशुकं धार्यं नोष्णीषं शुचि कर्मणि ॥ ४२ ॥
कञ्चुके मङ्गले धार्यं स्त्रीणां सर्वविधांशुकम् ।
स्वयं पाकं पचेच्छुद्धः स्वाहृतं च पिबेदपः ॥ ४३ ॥
स्वयं भगवतः कुर्यात्परिचर्याञ्जितेन्द्रियः ।
सजातीयैस्सदीक्षैश्च सदाचारैश्च पाचितम् ॥ ४४ ॥
भजेदन्नं गृहस्थस्तु स्वकीयैश्च सतीर्थकैः ।
शुचि धौतं तु यद्वासो अस्पृष्टं धारणे शुचि ॥ ४५ ॥
मलदिग्धं तथा स्निग्धं रजकेन विशुद्ध्यति ।
रजकक्षालितं वासो नवमक्षालितं शुचि ॥ ४६ ॥
दैवे पैत्र्ये न तच्छुद्धं यज्जीर्णं परिमार्जितम् ।
भूमिः प्रलेपतः शुद्धा उच्छिष्टा तु द्विलेपतः ॥ ४७ ॥
अमेध्ययुक्ता खननात् लेपो मृद्गोमयाम्बुभिः ।
अत्यमेध्या तु दाहेन गोचारैर्हवनादिभिः ॥ ४८ ॥
न शूद्रस्य वसेद्गेहे न शूद्रं वासयेद्गृहे ।
नाद्यात्परगृहे क्वापि प्राङ्गणे भोजयेत्परान् ॥ ४९ ॥
न जलानि पिबेत्प्राज्ञो हीनजातिजलाशयात् ।
न हीनादाहरेदम्बु कूपादेर्नापि पल्वलात् ॥ ५० ॥
असंस्कृतगृहारामौ वर्ज्यमाहुर्जलाशयम् ।
चिरन्तनमलाभे तु द्विजैर्व्यवहृतं भजेत् ॥ ५१ ॥

नान्त्यजेभ्यः श्मशानेभ्यः पतितेभ्यो वहेच्छुचिम् ।
यज्ञागाराच्छिवागारात् सभस्ममपि नाहरेत् ॥ ५२ ॥
दीपोच्छिष्टं स्पृशेन्नैव स्पृष्टे गन्धं व्यपोहयेत् ।
दशगोमयमृत्स्नाभिः शूद्रोच्छिष्टं समं हि तत् ॥ ५३ ॥
सुरालशुनमांसास्थिपुरीषादेः समीरणम् ।
आघ्रायोपवसेद् दूरात्स्नातोऽन्यत्र विशुद्ध्यति ॥ ५४ ॥
पावके दह्यमानानां गन्धे शुद्धिर्गरीयसी ।
विज्ञातेऽशुचिसंस्पर्शे पाकयोग्यानि वर्जयेत् ॥ ५५ ॥
हिक्काच्छिक्काजृम्भणेषु हरिं ध्यात्वाऽऽचमेद् बुधः ।
खात्काराश्रुनिपाते च प्रक्षाल्याचम्य शुद्ध्यति ॥ ५६ ॥
ऊर्ध्वेन्द्रियमलस्पर्शे अधोवायुविसर्जने ।
मूत्रेऽपि कामक्रोधे च शुद्धिः स्नानेन क्षालनैः ॥ ५७ ॥
पुरीषेऽन्यमलस्पर्शे शुद्धिस्नानं यथोदितम् ।
प्रायश्चित्तेऽशुचिस्नाने तद्दिनं दैववर्जितम् ॥ ५८ ॥
सूतके मृतके चापि ग्रासदोषस्तथार्तवे ।
पूजनं च जपं सन्ध्यां नित्यं रुग्णोऽपि वर्ज्जयेत् ॥ ५९ ॥
सूतके तु जलं वर्ज्यं मृतके स्पर्शनं तथा ।
आर्तवे दर्शनं वर्ज्यं सूत्याः प्रेताग्निदस्य च ॥ ६० ॥
पुरीषावकरोत्पन्नं वर्ज्यं शाकं फलं सुमम् ।
तत्प्रसक्तगवां क्षीरं प्रयुञ्जेदग्निकृच्छकृत् ॥ ६१ ॥
अज्ञातं शाकपुष्पान्नफलादीनि विवर्जयेत् ।
किं वै शास्त्रे निषिद्धानि किमु युक्तानि चार्यकैः ॥ ६२ ॥
हीनस्य नाधिरोहेत छायां मञ्चादिचामपि ।
न देवे पातयेच्छायां तत्र स्नानोपवासके॥ ६३ ॥
म्लेच्छदेशैकसंजातं मद्यमांसादियोगजम् ।
आद्यमार्यग्रहं ग्राह्यं न ग्राह्यमपरं बुधैः ॥ ६४ ॥

देवदीपश्च पर्यङ्कं मार्जनी नैव दुष्यति।
न स्पृशेत्तदनावश्ये देवशुद्धौ करौ मृजेत् ॥ ६५ ॥
यावन्न नश्येद्यो दीपस्तावच्छुद्धो नवो भवेत्।
देवदीपं न युञ्जीत कार्यार्थमितरत्र च ॥ ६६ ॥
मद्यमांसास्थिसम्पर्के गात्रं पात्रं पटं तथा।
गोमयात्क्षालयेदच्छं त्यजेदन्यं च पाटयेत् ॥ ६७ ॥
कटिमुक्तं तु कार्पासं कौशेयं भोजनोत्तरम्।
श्मशानगमहर्घ्यं च पट्टं भवति चाशुचि ॥ ६८ ॥
अदग्धं चाप्यदिग्धं च कम्बलं तु सदा शुचि।
कम्बलस्पर्शने शुद्धिस्तृतीयस्यर्ष्टिसंमिता ॥ ६९ ॥
लोमजानि तु वासांसि न देवेभ्योऽपि योजयेत्।
भोजनं च स्त्रियश्चापि निजेष्टार्णं निजागमम्।
निजधर्मं सदा गोप्यं गुप्तं प्रियतमं हरेः ॥ ७० ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे द्वितीयांशे सामान्याचारनिरूपणं नाम द्वितीयोऽध्यायः ॥ २ ॥

## ॥ अथ तृतीयोऽध्यायः ॥

गुरोर्नाम न गृह्णीयाद्धरेरस्य प्रियस्य च ।
पर्यायेण तदाख्येयं श्रीशब्दादिभिरर्हितम् ॥ १ ॥
श्रीमदार्य गुरुस्वामिन् कृपानाथ दयानिधे ।
श्रीमदाचार्य भो देव भगो श्रीमन्महाप्रभो ॥ २ ॥
चरणान्तैर्ल्लिखेच्छब्दैर्वदेच्च बहुवाचकैः ।
न निन्दां तस्य शृणुयात्प्राणैः कण्ठगतैरपि ॥ ३ ॥
अविज्ञातानुवादैश्च न तिरस्कारमाचरेत् ।
न चास्यामङ्गलं ध्यायेदातपेऽपि नियोजितः ॥ ४ ॥
त्वंकारमस्य सत्कारं तिरस्कारोऽपि चार्हति ।
अपकारोऽपि दोषघ्नः स्वल्पविद्याघदर्पितम् ॥ ५ ॥
गुरुं विद्याद्धरिं साक्षाद्धरिं स्वात्मवदाचरेत् ।
प्रेम्णा परिचरेदेतौ यावज्जीवं स्वशक्तितः ॥ ६ ॥
गुरुपुत्रेषु दारेषु कन्यासु गुरुबन्धुषु ।
समभावेन वर्तेत मुख्योच्छिष्टं विना द्विजः ॥ ७ ॥
भाण्डावशिष्टमुच्छिष्टं स्पृष्टोच्छिष्टमनेकधा ।
पात्रोच्छिष्टं तु दासानां भोज्यं भवति सद्गुरोः ॥ ८ ॥
ताम्बूलचर्वितं देयं प्रियायै क्वचिदेव हि ।
पात्रोच्छिष्टं महोच्छिष्टं मुख्योच्छिष्टं तु चर्वितम् ॥ ९ ॥
भाण्डोच्छिष्टं स्वकीयानां भक्तानां स्पर्शजं ह्यपि ।
नाभक्तेभ्यो न भक्तेभ्य उच्छिष्टं देयमर्हति ॥ १० ॥
गुरुपुत्रान् गुरोः कुल्यान् मानयेद् गुरुसन्निधौ ।
गुरोरभावे तेष्वेव सपर्या गुरुसम्मिता ॥ ११ ॥
हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कोऽपि हि ।
जनानामुपकाराय गुरुरूपी जनार्दनः ॥ १२ ॥

घटिकैकं गुरोर्ध्यानं गुरुदर्शनमाचरेत्।
न चासंपूज्य भुञ्जीत मरणाभिमुखोऽपि तम् ॥ १३ ॥
मृत्युकाले गुरोर्ध्यानं गुरुदर्शनमाचरेत्।
तेन सम्बोधितो मर्त्यो यात्येव हरिमन्दिरम् ॥ १४ ॥
गुरोरग्रेण नाज्ञप्तः नाप्रणम्य विशेत्पुरः।
न हास्यं कुकृतिं कुर्याद्धरिवन्मानयेच्च तम् ॥ १५ ॥
गुरुणा चादृतं ध्यातं मतं स्पृष्टं च मानयेत्।
स्वयोग्यतामिहालोक्य पूजयेद् गुरुपादुकाम् ॥ १६ ॥
स्वधर्माचरणं भक्त्या विधर्मात्तु निवर्तनम्।
अनाग्रहो लौकिकेषु शिक्षैषा परमा हरेः ॥ १७ ॥
पूजा प्रवाहतीर्थेषु भक्तिशास्त्रैकतत्परः।
हरिप्रेमा रहोवासी मुच्यते विश्वतो भयात् ॥ १८ ॥
इन्द्रियेषु प्रसक्त्या च स्वधर्मपरिवर्ज्जनात्।
अभक्तानां प्रसङ्गेन हरिरस्मादुदासते ॥ १९ ॥
हरिर्भक्तपराधीनः प्रसीदति प्रयोजितः।
दोषेषु न गतिस्तस्माद्दोषान् संपरिवर्ज्जयेत् ॥ २० ॥
शक्तेन ज्ञानतो भक्त्या विकृतो दोष उच्यते।
अपराधमनज्ञातं स्खलितं समुदाहृतम् ॥ २१ ॥
धर्मशास्त्रानुकूल्येन भक्तिशास्त्रं निरर्गलम्।
हरिभक्तिविरोधि यन्न तत् सुकृतमुच्यते ॥ २२ ॥
धर्मार्थकाममोक्षाणां धर्मः कारणतां गतः।
सहायो हरिभक्तानां हरिप्रीत्यै तमाचरेत् ॥ २३ ॥
निःसाधनानामप्येषा समुद्धारकृते कृता।
साधनानामिहाकाङ्क्षा व्यवहारार्थमेव हि ॥ २४ ॥
क्षालनं तु सदैव स्यात् स्नानेनैव विशुद्ध्यति।
मलस्नानं गृहे कुर्यात्तप्तोदकपरोदकैः ॥ २५ ॥

तीर्थे शुद्धिः स्वयं प्रोक्ता धाराशुद्धिर्गृहे मता।
न स्पृशेदशुचि पात्रं नोच्छिष्टं पात्रमाचरेत् ॥ २६ ॥
नाक्षालिते न्यसेत्पात्रं नास्थाने नापि दूषिते।
निषिद्धभाजने साक्षात् क्षिपेन्नो मृष्टभाजनात् ॥ २७ ॥
नाशुचि च पिबेदम्बु नास्नातो भोजनं चरेत्।
नाशुचिश्च न चास्नातो भगवन्मन्दिरं स्पृशेत् ॥ २८ ॥
पक्षान्महानसं शोध्यं पाकस्पृष्टं तु नित्यशः।
जलस्नानं तृतीयेऽह्नि मासादन्यानि वाऽयनात् ॥ २९ ॥
त्र्यहान्नखनिकृत्तिः स्यात् केशानां सप्तमाहतः।
यज्ञोपवीतं मासात्तु वाससी परतोऽयनात् ॥ ३० ॥
अज्ञातानामेनसां तु शुद्धिः कार्याऽयनेऽयने।
शिखावर्ज्जं पञ्चकच्छैर्दिग्भिः प्रतिकृतैश्च वा ॥ ३१ ॥
न दीक्षता वपेच्छ्मश्रु न जीवत्पितृको गुरुः।
सधवा केशवापञ्च निषिद्धेऽह्नि परित्यजेत् ॥ ३२ ॥
प्रायश्चित्ते वपेच्छ्मश्रु मृतौ यज्ञे समाचरेत्।
वैधव्ये दशमे वापः स्त्रीणां शुद्धौ प्रकीर्त्तितः ॥ ३३ ॥
वीरसूरक्षता चापि गोविन्दैकप्रपन्नधीः।
विधवापि वहेत्केशान् नित्यमेव व्रतस्थिता ॥ ३४ ॥
ताम्बूलं चापि गन्धे च मिष्टान्नं चोज्वलांशुकम्।
ग्राह्यं भगवदुच्छिष्टं विधवाभिर्व्रतस्थितैः ॥ ३५ ॥
गुणगानं भगवतो नृत्यं वाद्यं तदग्रतः।
दुष्यते सा न कुर्वाणा रागाक्ता पतिता भवेत् ॥ ३६ ॥
रक्तं वासो स्रजं पौष्पीं तथा सौभाग्यभूषणम्।
परिचर्यां भगवतः कुर्वाणापि न धारयेत् ॥ ३७ ॥
हरिं या पतिभावेन पुत्रभावेन वा भजेत्।
तस्यैवं वर्तनं प्रोक्तमिन्द्रियाणां गृहे सति ॥ ३८ ॥

कदिन्द्रियाणां शान्त्यर्थमेकभक्ता हविष्यभुक्।
कर्षयेद् देहमेवादौ व्रतैस्तीर्थैर्हरेर्जपैः॥ ३९॥
ततो धर्मान्तरं कुर्यान्मनोदुष्टा न शुद्ध्यति।
कक्षामुखं शिरश्चैव दैवं क्षौरं तु मानुषम्॥ ४०॥
मुखं शिरस्ततः कक्षा आसुरं तु शिरोमुखम्।
पूर्वाह्णिकं वा मध्याह्नं विधाय क्षौरमाचरेत्॥ ४१॥
शुचिना नापि तेनैव भुक्त्वा नैव कदाचन।
क्षौरे त्वश्रुमलस्नानं तीर्थस्नानं तु सम्भवे॥ ४२॥
मन्त्रस्नानं विधायैव प्राणायामशतैः शुचिः।
चूडां विना शिरोवापः कूर्चभ्रूभिर्विनानने॥ ४३॥
कक्षोपस्थप्रकोष्ठानि वपनीयानि चक्षते।
वंशादिपात्रं पाकेन स्नेहेनामेध्यवस्तुतः॥ ४४॥
दुष्यते काष्ठपाषाणैस्तक्षणाद्धर्षणाच्छुचिः।
अमेध्यलिप्तमशुचि तथोच्छिष्टेऽपि दुष्यति॥ ४५॥
खड्गजं शङ्खजं शुक्तिभवं दन्तजमेव च।
शुद्धानि क्षालयेत्स्पर्शे पाकेनैतानि योजयेत्॥ ४६॥
अमेध्येऽपि परित्याज्यं तथा चीनीयकाचजम्।
अस्पृष्टधातुस्तापेन शाणेनापि च संकरे॥ ४७॥
कांस्यं परित्यजेदेव सीसकादि विलापयेत्।
न केवलैर्मृदः पात्रैरुपपात्रैरथायसैः॥ ४८॥
हरिपूजाभिहारं च शौचं वापि विवर्जयेत्।
मार्जारमूषकादिभ्यः पाकं भुक्तं परित्यजेत्॥ ४९॥
स्पृष्टं तन्मात्रमेवेह राशौ देशादिकल्पना।
काकादिदृष्टमेवं हि अन्यदृष्टं परित्यजेत्॥ ५०॥
पाके पात्रे च वस्त्रे च षट्चतुर्द्विर्विधिस्पृशि।
दृष्टशुद्धिस्तथादृष्टशुद्धिस्तु द्विविधा मता॥ ५१॥

लेपग्लानिक्षयायाच्छा पुण्यायैवेतरा मता।
अच्छा त्ववश्यमेव स्यादितरा निजशक्तितः॥५२॥
एवमाचारमात्रेषु विचारो द्विविधो बुधैः।
पारम्पर्यमवेक्ष्यैव कार्यः शास्त्राऽनुरोधतः॥५३॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे द्वितीयांशे आचारवर्णनं नाम तृतीयोऽध्यायः॥३॥

## ।। अथ चतुर्थोऽध्यायः ।।

श्रीशाण्डिल्य उवाच –

पीताम्बरं परिदधेद्दीक्षितो गन्धभूषणे ।
उत्सवे पूजनेऽवश्यं पुरश्चर्यादिकर्मणि ।। १ ।।
मुखवासः सदा कार्यः परिचर्याविधौ हरेः ।
सावधानोऽनालसश्च सप्रेमा कुशलो भवेत् ।। २ ।।
प्रपन्नं मानुषं दीनं हरेः शरणमादिशेत् ।
श्रावयेद्भक्तिशास्त्राणि पठेच्चापि विचारयेत् ।। ३ ।।
परैर्वादातिवादैश्च पक्षपातं विवर्जयेत् ।
पृष्टं साधुतया विज्ञैर्यथार्थं स्वमतं वदेत् ।। ४ ।।
पूर्वाविद्धं चोपवसेद्व्रतं तद्विष्णुपञ्चकम् ।
उत्सवं तत्र कुर्वीत लीलाभिनयसम्भवम् ।। ५ ।।
पञ्चपञ्चाशतां विद्धां दशम्यैकादशीं त्यजेत् ।
द्वितये द्वादशी वृद्धौ क्षये वा संशये परा ।। ६ ।।
हरेर्जन्मदिनं चापि भानोरुदयदूषितम् ।
नोपोष्यं नोत्सवे शस्तं उत्सवान्ते तु पारणम् ।। ७ ।।
स्वजन्मदिवसं चापि गुरुजन्मदिनं तथा ।
संस्कारदिवसं चापि उत्सवेऽतिथिसम्मितम् ।। ८ ।।
भक्तिशास्त्रोदितं शास्त्रे स्वीयमूर्तेर्महोत्सवम् ।
शास्त्रोक्तमुत्सवं मूर्तेः पुण्यं पर्वोत्सवं भजेत् ।। ९ ।।
महोत्सवेषु भेरीणां कल्लरीणां तथोत्सवे ।
नित्यं मृदङ्गवीणानां गानं प्रियतमं हरेः ।। १० ।।
गायेद्भक्तकृतैः पद्यैर्लीलाभिनयसम्मतैः ।
शृङ्गाराणि विचित्राणि नित्यनूलानि कारयेत् ।। ११ ।।

यथा सुन्दरतां याति तथा प्रेम्णा विभावयेत्।
नानाव्यञ्जनपाकानि सिद्धान्नानि मृदूनि च ॥ १२ ॥
चोष्यलेह्याच्छभोज्यानि नित्यनूत्नानि चार्पयेत्।
एककालं द्विकालं वा त्रिकालं चापि पूजयेत् ॥ १३ ॥
न चाश्रद्धा न चालस्यं परिचर्याविधौ भजेत्।
राजोपचारभक्त्या वा निजलोकविभूतितः ॥ १४ ॥
सपर्या भावतः कार्या भावनासिद्धये बुधैः।
भावनाद् व्यसनात्सिद्धौ सिद्धा लीलावपुर्हरेः ॥१५॥
सेवना भावतः कार्या नन्दालयनिकुञ्जयोः।
स्वस्वामिभावतो भक्तैः मातृपुत्रप्रियेशवत् ॥ १६ ॥
हितस्यावरणं कार्यमहितस्य निवारणम्।
सर्वेन्द्रियवियोगश्च कार्यो योगस्तथात्मनः ॥ १७ ॥
हृषीकैरत्यकारोऽस्य पारम्पर्येण भावयेत्।
क्रियाशेषेण शेषाणामिन्द्रियाणां निवर्तयेत् ॥ १८ ॥
फलांशत्यागको हर्षादुपयोगो परस्य यः।
न तस्य किञ्चित्कर्तव्यं स महात्मा सुदुर्लभः ॥ १९ ॥
चित्रमूर्तिरविज्ञानां मूर्तिर्विज्ञात्मसम्पदाम्।
साक्षात्तां परमेशानीं लीलाविग्रहगां भजेत् ॥ २० ॥
स्वकृता स्वोपकाराय कथं सेत्यधियां भ्रमः।
यथौषधं यथाद्रौणि यथाराजं यथागमम् ॥ २१ ॥
मूर्तिस्तीर्थजलैः शोध्या मन्त्रैर्भावनयापि च।
द्रव्यशुद्धिरियं ह्यत्र देवभावस्तु भक्तिजः ॥ २२ ॥
देवालये स्थलस्याशु शुद्धिः पुण्याय मान्त्रिकी।
नात्र प्राणप्रतिष्ठादि व्यापकत्वाच्च जीवतः ॥ २३ ॥
जीवानामेव सा प्रोक्ता सर्वे जीवा हरेर्विना।
ये हि चागमसंसिद्धा जीवास्ता मूर्तयो मताः ॥ २४ ॥

तासु चांशकलाव्यक्तिर्भक्त्या संजायतेऽमितैः।
गुरोः सेव्या भजेद्भक्त्या रम्यस्थानोपचारकैः॥२५॥
शुचिरेव गृहे स्वीये प्रासादे स्वागमं भवेत्।
प्रसादे मूर्तेर्देवत्वं वर्ज्यं तीर्थं विनेतरत्॥२६॥
उपहारादिकैर्यत्र विशेषः कश्चिदिष्यते।
महान्ति तानि धामानि पूजायाः समयस्य च॥२७॥
भावदृष्टं यथा भ्रष्टं निजाचाराय सम्मतम्।
नाज्ञातदेवं प्रणमेद् नामन्त्रैर्नाद्विजार्चितम्॥२८॥
अवैदिकानां देवानां मद्यमांसभुजां तथा।
दिवौकसां तु भजनं सुरापानसमं भवेत्॥२९॥
कुलदेवाः शुभे मान्या वैदिका नित्यकर्मणि।
तीर्थेषु तीर्थदेवाश्च भूदेवा दैवपैतृके॥३०॥
नाप्रसङ्गाद्भजेद् देवान्प्रसक्तान् दानमानतः।
सर्वान् सम्मानयेदत्र हरिभावनया स्वयम्॥३१॥
पुण्यकालविशेषे च तथा पर्वसु चाह्निके।
जपेच्छुचिरहो मन्त्रं भावयेत्तन्मयं हरेः॥३२॥
एवं संवर्तनं यस्य दीक्षितस्य प्रवर्तते।
भवेन्निर्गुणता सिद्धिः परा भक्तिर्हरेर्दृढा॥३३॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे द्वितीयांशे विशेषाचारवर्णनं नाम चतुर्थोऽध्यायः॥४॥

## ॥ अथ पञ्चमोऽध्यायः ॥

अथाह्निकं प्रवक्ष्यामि यत्कृत्वाऽमृतमश्नुते।
यदनादरणात्पुंसो निश्चिता नरके धृतिः॥ १ ॥
यामिन्याः पश्चिमो यामो ब्राह्मी रात्रिरुदाहृता।
यतो रात्रिस्त्रियामैव ब्रह्मकर्मनिरोधिनी॥ २ ॥
ब्रह्मचारी पठेत्तत्र प्रक्षाल्य करवन्मुखम्।
स्नाायाद्यतिर्विरक्तस्तु गृहस्थो ध्यानमाचरेत्॥ ३ ॥
ब्राह्मे मुहूर्ते चोत्थाय आरोग्यं दवतोषकम्।
तत्रालसस्य सर्वाः सुक्रियाः पापसमाकुलाः॥ ४ ॥
ब्राह्मे मुहूर्त्ते निद्रा या पूर्वपुण्यहरी तु सा।
तस्मादुत्थाय तत्राशु कीर्तयेन्मधुसूदनम्॥ ५ ॥
प्रबुध्य दर्शनं कार्यं हरेर्वापि गुरोर्गवाम्।
श्लोकयेच्च स्तवैः पद्यैर्गायेद्वा भक्तिनिर्मितैः॥ ६ ॥
श्रुतिस्मृतिगणैर्गीतपूर्णानन्दैकविग्रहम्।
श्रीगोपालहरेर्नाम भवदिच्छावशाऽनुगम्॥ ७ ॥
देहयात्रां करिष्यामि पुण्यपापसमाकुलाम्।
दासोऽयमिति ज्ञापित्वा मा च यात कृपानिधे॥ ८ ॥
तदाज्ञां भावयन्नेवं दिनचर्यां समाचरेत्।
शोभनं तदहर्विद्यात् तदेव सफलं जनुः॥ ९ ॥
वाराहस्य प्रिये पत्नि जगतां धारणि धरे।
भगवद्भक्तिसिद्ध्यर्थं पादस्पर्शं क्षमस्व मे॥ १० ॥
उत्थाय हस्तौ प्रक्षाल्य गण्डूषैर्मुखमार्जनम्।
मृदा पादौ च प्रक्षाल्य परिवर्त्य च वाससी॥ ११ ॥
हरिपादोदकमृदा तिलकं संविधाय च।
कुशकम्बलपीठेषु पद्मकच्छासने स्थितः॥ १२ ॥

वरमानन्दसम्पन्नं कृपानन्दैकविग्रहम्।
गुरुं प्रसन्नमनसं दीक्षाकालस्थितं स्मरेत्॥ १३॥
शान्तं पद्मासनस्थं शशिकरधवलं पीतवासोऽवसानं
स्रङ्मृन्मुद्रोर्ध्वपुण्ड्रैर्जयति मणिमयैर्भूषणैः शुभ्रमौञ्ज्या।
चूडालं सस्मितास्यं परमकरुणया भक्तिशास्त्रोपदेशे
कालिन्द्याः कुञ्जके ते हरिपरिचरणे भावयेद्भक्तवृन्दैः॥ १४॥
नमो भगवते तुभ्यं नमो भक्तानुकम्पिने।
श्रीनन्दनन्दन हरे भजनानन्ददायिने॥ १५॥
श्रीभागवतशास्त्राब्धेः सुधासारप्रवर्षिणे।
प्रपन्नार्तिहृते तुभ्यं नित्यमेव नमो नमः॥ १६॥
श्रीमदाचार्यवर्याय चिन्ताज्वरहराय ते।
हरिसाज्जनकर्त्रे च श्रीमहाप्रभवे नमः॥ १७॥
लौकिकाशक्तिमनसं मामुद्धर कृपानिधे।
नियोजय हरेर्दास्ये त्वद्दासोऽहं महाप्रभो॥ १८॥
इति स्तुत्वा निजगुरुं तदीयानपि नामतः।
स्मरेन्नमेत्स्तुवेच्छक्त्या तत्तद्वृत्तानि संस्मरेत्॥ १९॥
अथ वृन्दावने रम्ये नवरत्नमयस्थले।
प्रफुल्लहृदयाम्भोजे स्मरेत् श्रीनन्दनन्दनम्॥ २०॥
अनन्तकोटिब्रह्माण्डघटनैकभ्रमोदरी।
मायां तमोपरि स्मरेद् ब्रह्मज्योतिः सनातनम्॥ २१॥
तदेव चाक्षरं ब्रह्म तदेव परमा गतिः।
तदेव निगमैर्गम्यं तदेवानन्दपौरुषम्॥ २२॥
तस्योपरि स्मरेच्चैत्यां चारुरत्नमयस्थलीम्।
चतुरस्रां चारुतरां चतुर्द्वारार्चितेश्वरैः॥ २३॥
योगशक्तिकृतैः पुंभिर्गुप्तां चेशैः समन्ततः।
अनौपम्यां रसघनां भक्तवृन्दैरभिष्टुताम्॥ २४॥

तत्र रत्नाश्मसम्बद्धतटां कुञ्जैरलङ्कृताम् ।
पद्माकरां विहङ्गानां कूजितां च कलस्वनैः ॥ २५ ॥
प्रतिविन्त् ( ?) कल्पद्रुवीचिमालासमाकुलाम् ।
व्रजस्त्रीस्नानविभ्रष्टनवकुङ्कुमपङ्किलाम् ॥ २६ ॥
सोपानश्रेणिसङ्कीर्णां दिव्यस्त्रीकेलिचञ्चलाम् ।
नदद्भृङ्गाश्रिताम्भोजां मणिमुक्तैकवालुकाम् ॥ २७ ॥
प्रासादारामसेतूनां मध्यतः शोभयोज्वलाम् ।
स्वादुस्वच्छाच्छपानीयां विष्वक्कालिन्दिनीं स्मरेत् ॥ २८ ॥
ततो विकुञ्जमालां च ध्यायेदुभयतो दिशम् ।
स्फाटिकैः कृतप्राकारां मणिवप्रमुन्नताम् ॥ २९ ॥
वज्रमाणिक्यप्रासादमालाभिरभिशोभिताम् ।
इन्द्रनीलगवाक्षैश्च मुक्तादामविलम्बिभिः ॥ ३० ॥
सिङ्घाणदीपतरुभिः कपाटैर्विद्रुमैः स्फुटाम् ।
तत्र घण्टापथं ध्यायेद्गरुडाश्म तथोन्नतम् ॥ ३१ ॥
परागवालुकाकीर्णं विद्रुमालम्बपञ्जरम् ।
मध्ये मध्ये चतुर्भद्रं रत्नसिंहासनं तथा ॥ ३२ ॥
तत्र काञ्चनच्छत्राणि वितानानि द्युमन्ति च ।
तस्यैवोभयतोऽहिरुक् कृता नीराहरी शुभा ॥ ३३ ॥
नानारेचकसङ्कीर्णह्रदनीगणसंवृता ।
फलपुष्पप्रवालाच्छन्नतद्रुमवनार्चिता ॥ ३४ ॥
प्रफुल्लाम्भोजसंमत्तनदद्भृङ्गालिशोभिता ।
चतुर्भद्रसहस्राणि निकुञ्जालिशतान्यपि ॥ ३५ ॥
सर्वेषामपि मध्येऽत्र प्राङ्गणं भास्वरं स्मरेत् ।
शृङ्गारमण्डलं पूर्वे याम्यामामोदमण्डलम् ॥ ३६ ॥
मण्डलं पश्चिमे भुक्तेरुदीच्यां केलिमण्डलम् ।
श्रीराममण्डलं मध्ये भक्तवृन्दैर्विभावितम् ॥ ३७ ॥

चन्द्रकान्तैः सूर्यकान्तैश्चिन्तारत्नैश्च कौस्तुभैः।
सर्वरत्नैरनर्घश्रीसुषमावसितानि हि॥ ३८॥
श्रुतिसिद्धवरस्त्रीणां यत्र वृन्दानि दक्षिणे।
कोटिशारदराकेन्दुरोचिं भूषां वरस्रजम्॥ ३९॥
निकुरं वाणिसिद्धानां वामे कह्लाररोचिषाम्।
पश्चिमे भक्तिसिद्धानां फुल्लेन्दीवरभाजुषाम्॥ ४०॥
पूर्वतो नित्यसिद्धानां पद्मरागप्रभास्पृहाम्।
सर्वाङ्गसुन्दरश्रीणां सर्वमण्डलसम्भृताम्॥ ४१॥
सर्वसौभाग्यभाग्यानां सर्वानन्दैकसम्पदाम्।
स्वेच्छासिद्धविहाराणां यूथानि परिभावयेत्॥ ४२॥
कस्मिंश्चिन्मण्डले वात्र कस्मिंश्चित्कुञ्जकेतने।
ध्यायेत्स्वाभिमताकारं पूर्णानन्दातिसुन्दरम्॥ ४३॥
अथवा बाललीलास्थं ध्यायेन्नन्दालये हरिम्।
श्रीगोकुलानन्दकरं यशोदानन्दलालितम्॥ ४४॥
क्रीडितं बालकैः सार्द्धं चारयन्तं स्ववत्सकान्।
प्राङ्गणे विहरन्तं च प्रेङ्खपर्यङ्कसंस्थितम्॥ ४५॥
गोकुलं तु रमाक्रीडं दिव्यरत्ननिकेतनम्।
गोगोपगोपिकावृन्दैः सुन्दरैः समलङ्कृतम्॥ ४६॥
वेणुनादैर्दोहनाद्यै रम्भामन्थानसध्वनैः।
गीतिभिर्गोपिकानां च ध्यायेत्परममङ्गलम्॥ ४७॥
ब्रह्मघोषेण महता द्विजानां वादितं रुतैः।
बन्दीजनानां सत्पद्यैः समुक्तपरमोदयम्॥ ४८॥
चतुर्भद्रं पुरं ध्यायेद् बाह्योपवनशोभितम्।
कालिन्दीमनुविस्तीर्णं हेमप्राकारमण्डितम्॥ ४९॥
हर्म्यैः स्फटिकसन्नद्धैर्मणिप्रस्तरसंचितम्।
विचित्ररचनोद्दीप्तं गवाक्षालिविराजितम्॥ ५०॥

प्रासादैर्हर्म्यमालाभिर्घट्टैर्मणिमयैरपि।
गोपुरैर्मण्डलद्वारैः पताकातोरणैः शुभैः॥५१॥
भूषितं कृतनारीभिर्मण्डितैर्गोव्रजैरपि।
तौर्यत्रिकेण महता पूजितैर्द्विजपुङ्गवैः॥५२॥
मध्यतो नवनन्दानां प्रासादान् परिभावयेत्।
तेषां समं ततो दिव्यबल्लवानां गृहाण्यपि॥५३॥
मध्ये श्रीनन्दराजस्य चतुर्भद्रोऽतिशोभनम्।
वज्राश्मघटितं चापि विशालप्रोन्नतोन्नतम्॥५४॥
सत्यप्राङ्गणभूकृत्यं सप्तप्राकारभूषितम्।
सर्वर्तुसुखदं सर्वसम्पत्या सुमनोहरम्॥५५॥
स्वगुणध्वजशोभाढ्यं श्रीदामाऽलङ्कृतं स्मरेत्।
आधाय कलशं तस्य हरितेजोऽनुरञ्जितम्॥५६॥
प्रथमे वप्रनिलये ब्रह्माद्या रक्षिणः स्वयम्।
द्वितीये शङ्खचक्राद्यैर्विष्णोरेवादिभूतयः॥५७॥
तृतीये गोपबालाश्च गावस्तु ये व्यवस्थिताः।
पञ्चमे हरिभक्तास्तु षष्ठे तस्यात्मसेवकाः॥५८॥
सप्तमे व्रजबल्लव्यो रक्षणाय व्यस्थिताः।
तास्तु दर्शनकालेऽस्य व्यवस्थापूर्वकं जनान्॥५९॥
अनुगृह्णन्ति गृह्णन्ति दूरयन्ति रजोगुणम्।
प्राघूर्णिकागारमाद्ये द्वितीये हविषां गृहम्॥६०॥
तृतीये तु सवर्णानां महतां तु तुरीयके।
ज्ञानिनां पञ्चमे प्रोक्तं षष्ठे तस्य सुधालिहाम्॥६१॥
माथुरं गोपुरं चाद्य गोकुलाख्यं द्वितीयकम्।
विरजाख्यं तृतीयं स्यात्तुर्यं सूर्येति संज्ञितम्॥६२॥
सिंहद्वारं पञ्चमे तु देवद्वारं ततः परम्।
सप्तमं यामुनद्वारं निजद्वारं प्रकीर्तितम्॥६३॥

आद्ये यज्ञभुजः पाला द्वितीये ज्ञानशालिनः।
तृतीये रागसंयुक्तास्तुर्ये देवेश्वरा अपि॥ ६४॥
पञ्चमे ज्ञानवैराग्यौ मुक्तिव्याघ्रीसुतौ हरी।
ऐश्वर्यवीर्यनामानौ षष्ठे गजपती स्थितौ॥ ६५॥
यशोधरः श्रीधरश्च सप्तमे प्रतिहारकौ।
शाकपाकान्नदुग्धाम्बुपात्रस्थानानि पृष्ठतः॥ ६६॥
वामे भक्तप्रसादेन्दुक्रीड्यकार्यगृहाण्यपि।
भाण्डमण्डननं देशशैय्यागाराणि दक्षिणे॥ ६७॥
ताम्बूलसुमनोवस्त्रक्रीडागाराणि चोर्ध्वतः।
गान्धर्वशाला तस्याग्रे वेदशाला तदग्रतः॥ ६८॥
एवंविधं भक्तवरैर्ध्यायेत्स्थानं मनोहरम्।
तत्र नन्दयशोदाभ्यां लालितं श्यामसुन्दरम्॥ ६९॥
पञ्चवर्षपरानन्दरूपं क्रीडापरं स्मरेत्।
गोबालकैर्बालकैश्च क्रीडन्तं मधुरस्मितम्॥ ७०॥
फुल्लारविन्दवदनं यशोदानन्दनन्दनम्।
श्रीगोविन्दं कृपासिन्धुं श्रीमुकुन्दं हरिं नुमः॥ ७१॥
जय श्रीराधिकाकान्तकान्तेन्दीवरसुन्दर।
गोकुलेन्दुमुखीनाथ वृन्दारण्यपुरन्दर॥ ७२॥
जय कालिन्दिनीतीरनिकुञ्जकृतमन्दिर।
वृन्दारकेन्द्रसम्पूज्य गिरीन्द्रधरणेश्वर॥ ७३॥
शरणागतसंत्राणगृहीतपरमव्रत।
कुरु मे मङ्गलं नाथ व्रजनाथ नमोऽस्तु ते॥ ७४॥
इत्येवं बहुधा स्तुत्वा हस्तौ प्रक्षाल्य वाग्यतः।
कुर्याद्देहक्रियां पश्चाच्छिरः प्रावृत्य वाससा॥ ७५॥
पानीयं दूरतः कृत्वा शुद्धे चाशौचपात्रके।
पृष्ठतो यज्ञसूत्रं च मालां कृत्वा बहिर्यजेत्॥ ७६॥

गृहान्तरेऽथवा गच्छेद् दुर्गे वा नगरोत्तमे।
मृत्तृणादि परिगृह्य मलोत्सर्गं यथाविधि॥ ७७ ॥
सोपानत्कोऽर्कशुचिस्थाने पिधाय वदनं चरेत्।
दूरं गत्वा पुरा लिङ्गे दद्याद्वै मृत्तिकात्रयम्॥ ७८ ॥
वामेन पाणिना लोष्टैर्गुदलेपं व्यापोहयेत्।
सप्त मृदा विशोध्या सा करं प्रक्षाल्य चोत्थितः॥ ७९ ॥
अस्पृश्य दक्षिणे पात्रं धृत्वा गत्वा कनीयसा।
प्रदत्तेन जलेनैव करप्रक्षालनं चरेत्॥ ८० ॥
शुचि श्लक्ष्णां मृदं लब्ध्वा सूक्ष्मामामलकोन्मिताम्।
सप्तधा प्रथमं वामे शोधयेद्दत्तधारया॥ ८१ ॥
त्रिधा चोभौ पुनः शोध्यौ करौ पादौ ततः परम्।
त्रिधा त्रिधा पुनः पाणिं पात्रं चापि त्रिधा पुनः॥ ८२ ॥
पात्रेण चैकधा स्थानं दूरे संक्षालितं न्यसेत्।
संक्षाल्य वामं चाकोष्ठं सप्तधाथो करौ मृजेत्॥ ८३ ॥
कुर्याद्द्वादश गण्डूषान् करौ प्रक्षाल्य चास्यकम्।
एका लिङ्गे करे तिस्रः पादे द्वे पञ्चधा द्वयोः॥ ८४ ॥
आजङ्घात्क्षालयेन्मूत्रे पुरीषे कटिसम्मितम्।
कुर्यादाचमनं चापि संपिबेच्चरणामृतम्॥ ८५ ॥
द्वादशाङ्गुलतो न्यूनं जम्ब्वाम्रादिसमुद्भवम्।
दन्तकाष्ठयुगं ग्राह्यं दन्तजिह्वाविशुद्धये॥ ८६ ॥
एवं कुर्यान्मुखे पूर्वं क्षालितं चापरं करे।
दन्तशुद्धिं पुरा कृत्वा जिह्वाशुद्धिं ततः परम्॥ ८७ ॥
प्रक्षाल्य विसृजेत् फाले गण्डूषैः करशोधनात्।
परत्र मुखशुद्धिः स्यात् षोडशैश्च मृदा करौ॥ ८८ ॥
पादौ प्रक्षाल्य चाचम्य वीटकेनास्य शोधनम्।
कुर्यादुद्गिरणं तस्य चोर्ध्वं वासान्तरं दधेत्॥ ८९ ॥

सुगन्धतैलाभ्यङ्गं च शिरःप्रभृतिमाचरेत्।
केशाकर्षणसंस्कारकरप्रक्षालनं मृदा॥९०॥
शीते च उदके कृत्वा मलस्नानं ततोऽन्यतः।
गण्डूषान्तं विधायाथो द्विवासाः शुद्धकुम्भतः॥९१॥
ध्यायन्तीर्थानि कालिन्दीं स्तुवन् स्नायाद्यथाविधि।
पात्रं प्रक्षाल्य संदद्याद् वस्त्रे संपीड्य मार्जयेत्॥९२॥
गच्छेत्प्रक्षाल्य पादौ च पन्थानं पादके अपि।
शुद्धे शुक्लाम्बरे दध्यात् कौशेये वापि पीतके॥९३॥
परिधानीयके त्यक्त्वा करप्रक्षालनं चरेत्।
विशुद्धोपकरणोऽसौ गुरुं ध्यायन् स्तुवन्नपि॥९४॥
परिधानमुपादाय शिष्यो गच्छेज्जलगृहम्।
विशोध्य ते दधेच्छुद्धे करौ प्रक्षाल्य चाव्रजेत्॥९५॥
कुङ्कुमस्योद्‌र्ध्वपुण्ड्राणि ललाटादिषु द्वादश।
ललाटे पद्ममेकं तु मन्त्रमुद्रा यथारुचि॥९६॥
दक्षिणे नाम द्वे द्वे दधेच्चक्रचतुष्टयम्।
द्वे द्वे पद्मे पार्श्वयोर्वै शङ्खमेकं च मध्यतः॥९७॥
वामेऽपि बाहुमूले तु शङ्खानां तु चतुष्टयम्।
अधोऽर्ध्वे नाममुद्रे द्वे गदे चक्रं च पूर्ववत्॥९८॥
मन्त्रमुद्रायुतान्यत्र षट्चक्राणि गलांसयोः।
दरमेकं गले मन्त्रमुद्राया हृदये ततः॥९९॥
देशस्तनोर्ध्वतश्चक्रं त्रयं शङ्खद्वयं त्वधि।
पार्श्वयोः पद्मयुगं वामे चैव गदे मते॥१००॥
नाममुद्रायुता मन्त्रा मुद्रकानां चतुष्टम्।
उक्तानुक्तेषु पुण्ड्रेषु चक्रमेकैकमर्पयेत्॥१०१॥
गोपीचन्दनमृत्स्नाया लेपं शिरसि शेषकम्।
शेषं यत्कुङ्कुमस्यैव तच्छ्रीवत्सं तु वक्षतः॥१०२॥

चरणाम्बुमृदो लेपं नेत्रयोः करुणानिधेः।
मन्त्रमुद्रायुता षष्ठी मुद्रकाणां च षड्विधा ॥ १०३ ॥
न त्रिंशत्सुतत्त्वानां याभिः शुद्धिर्द्विधाधिका।
स्नानात्तु भौतिकी शुद्धिस्तिलकैर्दैवकर्मणोः ॥ १०४ ॥
आध्यात्मिकी तु मुद्राभिर्जैविकी तीर्थपानतः।
मृदा तु मानसी प्रोक्ता पञ्चधा या च भौतिकी ॥ १०५ ॥
रूपात्मिका इयं प्रोक्ता नामतो नामकीर्तनात्।
एवं विशुद्धो विप्रोऽसौ वैदिकीमपि संचरेत् ॥ १०६ ॥
स्वशाखोक्तां ततः सन्ध्यां होमं कुर्याच्च तन्मनाः।
समयाननुरोधे तु यत्किञ्चित्समयान्तरे ॥ १०७ ॥
ऋषीणां षष्टिसाहस्री ब्रह्ममानससम्भवी।
कालातिकृतजां चर्यां या करोति हरेर्भुवि ॥ १०८ ॥
ये त्वालस्येन नास्तिक्यान्न कुर्वन्ति हरेर्मतम्।
निग्रहानुग्रहे तेषां हरिरेव करिष्यति ॥ १०९ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे द्वितीयांशे परिचर्याध्यानवर्णनं नाम पञ्चमोऽध्यायः ॥ ५ ॥

## ॥ अथ षष्ठोऽध्यायः ॥

अथ श्रीमन्दिरं गत्वा प्रणमेत्संस्तुवेद्धरिम् ।
द्वारमुद्घाट्य करयोः शुद्धिं चूर्णखलैश्चरेत् ॥ १ ॥
मन्दिरात्पात्रसामग्रीं समादाय त्वरान्वितः ।
स्वस्वस्थाने निवेश्याथ प्रक्षाल्य मार्जयेत्स्थले ॥ २ ॥
ततः प्रक्षाल्य च करौ क्षालिते शुभपट्टके ।
कल्पाहारं दधेत्पक्वं सिद्धशाकं च दौग्धकम् ॥ ३ ॥
निवेश्य हस्तौ प्रक्षाल्य वासोऽलङ्कारमाल्यके ।
पीठान्तरे राजपीठमलङ्कुर्याच्च मन्दिरम् ॥ ४ ॥
ततः प्रक्षाल्य सम्प्रोक्ष्य हस्तौ सन्ताप्य बोधयेत् ।
घण्टारवं कारयित्वा पत्न्या शिष्यैः सतीर्थकैः ॥ ५ ॥
नन्दालयं भावयित्वा निकुञ्जं स्वानुरूपतः ।
बालभावैः प्रौढभावैर्गरीयानुत्तरोत्तरम् ॥ ६ ॥
श्रीमन्नन्दमहाराजकुमार व्रजमङ्गल ।
श्रीयशोदाप्राणधन कोटिमन्मथसुन्दर ॥ ७ ॥
निजाननुगृह्य प्रभो जागृज्जहि स्वापमुञ्जीह ।
वत्सा वयस्या गोप्यस्त्वामाह्वयन्ते दिदृक्षवः ॥ ८ ॥
पूर्वोक्तयुक्त्या सम्बुद्धं नीत्वा पीठान्तरे हरिम् ।
मुखपाण्यादिभिः शुद्धं राज्यपीठे निवेशयेत् ॥ ९ ॥
तत्रानुकूलाभरणवस्त्रमाल्यैः प्रपूजयेत् ।
भृङ्गारकं नवं भृत्वा दधेद्वै वीटकद्वयम् ॥ १० ॥
मण्डले पट्टमानीय बालभोज्यं समर्पयेत् ।
बहिरागत्य शृङ्गारपट्टं सम्यङ्ग् निरूपयेत् ॥ ११ ॥
शय्यां तदुपकरणं मन्दिरं चापि सज्जयेत् ।
ततः करौ च प्रक्षाल्य तालेन बोधयन् विशेत् ॥ १२ ॥

आचमं शुद्धभृङ्गारात्कारयेत्तु पतद्ग्रहे।
ताम्बूलानि समर्प्यैव बहिर्नेपथ्यपट्टकम् ॥ १३ ॥
प्रसादं स्वीयसंस्थाने निधाय क्षालयेत्करौ।
करकेन च तत्पट्टं मण्डलं तत्करौ मृजेत् ॥ १४ ॥
सम्बोध्य दर्शयेद्देवं गीतवाद्यैर्मनोहरैः।
नीराजयेत्ततो देवं घण्टावाद्यपुरःसरम् ॥ १५ ॥
विसर्ज्यारार्तिकं नत्वा करौ प्रक्षाल्य कंसके।
नवे सम्भृत्य देवेशं स्नानपीठे निवेशयेत् ॥ १६ ॥
तिरस्करिणिकां कृत्वा पाकानुज्ञां स्त्रियै वदेत्।
सा गत्वा पाकशालायां पात्रासादनमाचरेत् ॥ १७ ॥
पाकं कुर्याद्यथान्यायं शुद्धैः परिचरैस्तदा।
वाससा मुखमाच्छाद्य द्वारमाच्छाद्य यत्नतः ॥ १८ ॥
पक्वान्नं चाथ शाकानि दौग्धसिद्धान्नमापचेत्।
परस्परमसृष्टानि नेक्षेत्तानि परैः क्वचित् ॥ १९ ॥
पद्भ्यामशुचिभिर्नैव न दुर्गन्धिमलीमसैः।
दुर्भावैर्न न दुर्नाम्ना योजयेत्सा न कुत्रचित् ॥ २० ॥
माता पत्नी स्नुषा पुत्री भगिनी च पितृष्वसा।
ऊढा दक्षा च वृद्धा च शुद्धा श्रद्धावती परा ॥ २१ ॥
योजयेदथ वा शिष्यं सुतं सम्बन्धिनं परम्।
सवर्णं च सतीर्थ्यं च योजयेच्च समाचरम् ॥ २२ ॥
अथवा स्नानपीठस्य अधः स्थालीं निवेशयेत्।
हसन्तीं दूरतो नीत्वा कवोष्णं जलमाहरेत् ॥ २३ ॥
कृत्वाभ्यङ्गं स्नापयित्वा प्रोञ्छयेत्परवस्त्रतः।
नवे पीताम्बरे दत्वा नयेच्छृङ्गारपीठके ॥ २४ ॥
वामाङ्गीं चापि संस्नाप्य कुर्याच्छृङ्गारमुत्तमम्।
तन्वंशुकं तथा नीवीं परिधानीयकाम्बरैः ॥ २५ ॥

उष्णीषं च शिरस्त्राणं मुकुटं पिच्छमप्युत।
कार्पासकञ्चुकं चाङ्गरक्षकं मल्लकच्छके॥ २६॥
नृत्यकच्छं चोत्तरीयं निचोलं पट्टकादिकम्।
हंसिकापीठपट्टं चोच्छीर्षकं लम्बिकादिकम्॥ २७॥
मुखांशुकं चाम्बुवासो मृदु शाटी च पादुका।
नित्यनूत्नैरलङ्कृत्य रत्नवेण्या च शोभयेत्॥ २८॥
गले ग्रैवेयपदकहाराणि विविधानि च।
वैजयन्तीं कौस्तुभं च श्रीवत्सं वक्षसोऽर्पयेत्॥ २९॥
कुण्डले कर्णयुग्मे च मायूरे मकरे तथा।
नासाभरणकं चापि चुबुकं तिलकं तिलम्॥ ३०॥
ललन्तिका चालकं च शिरोभूषणसल्लते।
नखमुद्रोर्मिकापुष्पकाङ्गदं भुजभूषणम्॥ ३१॥
मेखलाघण्टिकारत्नसिद्धं यज्ञोपसूत्रकम्।
नखांशुकतुलाकोटिपुष्पमञ्जीरकादिकम्॥ ३२॥
सौवर्णं मौक्तिकं रत्नकलितं चोपरत्नकैः।
समर्पयेद्यथान्यायं यथर्तुदिनसम्भवात्॥ ३३॥
वेणुवेत्रे चाञ्जनं च नेत्रालङ्कारमादितः।
शृङ्गारमिह कुर्वीत गुञ्जामाल्यस्रजं ततः॥ ३४॥
मुकुरं दर्शयेच्चातो वीटकं च निवेदयेत्।
सितामिष्टफले दद्याद् भृङ्गारं च समर्पयेत्॥ ३५॥
राजपीठे रत्नपीठे तूलिकासितप्रच्छदे।
पार्श्वोच्छीर्षकपाश्चात्यालम्बोच्छीर्षकमण्डिते॥ ३६॥
सौवर्णखण्डपीठे च उपपीठोपशोभिते।
चतुःशाले सुवर्णांशुकसुतलिकयोन्नते॥ ३७॥
क्रीडोपस्करसंयुक्ते चन्द्रांशुकविराजिते।
चित्रप्रसरशोभाढ्ये ताम्बूलाम्बुसृजान्विते॥ ३८॥

निवेशयेद्धरिं तत्र स्वामिनीं वामभागतः।
स्त्रीणां सौभाग्यभूषाभिर्मण्डनैरंश्कैरपि॥ ३९ ॥
मण्डितां परमोदारां कुर्याच्च प्राणवल्लभाम्।
अथ श्रीभोगमूर्तीनां स्नानं शृङ्गारमाचरेत्॥ ४० ॥
श्रीगुरोः पादुकेऽभ्यज्य स्नाप्य वस्त्रावृते न्यसेत्।
शालग्रामं तु पूर्वोक्तवर्त्मना पूजयेच्च वा॥ ४१ ॥
ताम्रपत्रे कुङ्कुमेन कृत्वाब्जं तत्र विन्यसेत्।
तुलसीमाल्यगन्धेन सम्पूज्य कलशाम्बुभिः॥ ४२ ॥
पाद्यार्घ्याचमनीयैश्च पूजिताब्जे तु सेचयेत्।
नारायणैः पौरुषैश्च स्वर्णधर्मानुवाकतः॥ ४३ ॥
ततः सम्प्रोक्ष्यान्यपीठे निधायाभ्यर्च्य गन्धतः।
माल्यैः सूत्रैश्च वासोभिः पूजयेन्नित्यशो द्विजः॥ ४४ ॥
गोवर्द्धनशिलाभ्यर्च्य स्नानगन्धसुमादिभिः।
ततस्तीर्थं समीकृत्वा कुर्यात्कुम्भान्तरे स्वयम्॥ ४५ ॥
करौ प्रक्षाल्य पात्राणि स्वस्वस्थाने नयेदथ।
शङ्खघण्टां पृथक्पीठे नीराजन्यां निवेशयेत्॥ ४६ ॥
प्रक्षाल्य प्राङ्गणं प्रोञ्छ्य हस्तौ प्रक्षाल्य चाव्रजेत्।
पाकं विलोकयेत्सर्वं नैवेद्याय नियोजयेत्॥ ४७ ॥
आगत्य पादौ प्रक्षाल्याचमनं च निवेदयेत्।
ताम्बूलमपि धृत्वात्र ततो राजविभूतिभिः॥ ४८ ॥
दर्शयेद्दर्शनार्हेभ्यः कुर्यात्तौर्यत्रिकं ततः।
आरार्तिकं ततः कुर्याद् हस्तौ प्रक्षाल्य तं नयेत्॥ ४९ ॥
कुर्याच्च मण्डलान्यत्र पीठानि क्षालितान्यपि।
सम्भोज्य स्थालिकास्तत्र यथायोग्यं तथा पृथक्॥ ५० ॥
निधाय हस्तौ संशोध्य कलशं भृत्वा नवं शुभम्।
आचामयेद् भगवते दत्त्वैव तुलसीदलम्॥ ५१ ॥

गायत्र्यास्यैव सम्प्रोक्ष्य स्वयं वै बहिराव्रजेत् ।
पिधाय द्वारमात्मीयजपं चाह्निकमाचरेत् ॥५२॥
प्रक्षाल्य हस्तौ पादौ च कृत्वा जयजयध्वनिम् ।
प्रविश्य मन्दिरे नाथं पुनराचमयेदथ ॥५३॥
उत्थापयेत्ततः सर्वं मण्डलादि विशोधयेत् ।
पात्रान्तरे च तत्कुर्यान्नयेत्स्थानान्तरेऽपि तत् ॥५४॥
करौ पादौ च प्रक्षाल्य भृङ्गारं नवमाहरेत् ।
वीटकं प्राशयेद्ध्यान्मालायुग्मं ततोऽर्पयेत् ॥ ५५ ॥
वेणुवेत्रे ततो दत्त्वा दर्शयेत्पूर्ववद्धरिम् ।
आदर्शादि निवेद्याथ शय्यामासज्य पादुकाम् ॥ ५६ ॥
माल्यं भृङ्गारकं भोज्यं सुगन्धादि यथोचितम् ।
ग्रीष्मे ग्रीष्महरं सर्वं शीते शीतहरं ददेत् ॥ ५७ ॥
अलङ्कृत्यैव शय्यौको बहिरागत्य संस्तुवेत् ।
वेणुवेत्रे च माले चापहृत्य बहिराव्रजेत् ॥ ५८ ॥
पिधाय मन्दिरद्वारं साष्टाङ्गं प्रणिपत्य च ।
गन्धताम्बूलस्रङ्मात्रप्रसादं शिरसा वहन् ॥ ५९ ॥
व्रजेन्निजनिकेतं च भक्तिशास्त्रं ततः पठेत् ।
पूजयेद् द्विजसद्भक्तान् प्रसादान्नेन चाशयेत् ॥ ६० ॥
पञ्चप्रासादिकं कृत्वा गुरून्नत्वा स्वकैरशेत् ।
मण्डले पर्णसत्पात्रे प्रसादं परिवेश्य च ॥ ६१ ॥
घृतं दौग्धं द्रवं चान्यद् मृन्मये च नवे न्यसेत् ।
लवणार्द्रकनिम्बादि पृथक्पात्रे यथाविधि ॥ ६२ ॥
दक्षिणे जलपात्रं तु वामे तु परिवेषकम् ।
पत्नी स्नुषा स्वसा ज्येष्ठा प्रसूर्वा परिवेषिका ॥ ६३ ॥
न कनीयानातुरश्च कर्तुरन्योऽत्र सम्मतः ।
ततो भुञ्जीत स्वीयोक्तविधिनाप्यस्वलम्पटः ॥ ६४ ॥

आचम्य बहिरागत्य हस्तं संशोध्य चाननम्।
कुर्याद् द्वादश गण्डूषान् सप्तधातु मृदा करौ॥ ६५॥
द्विधा पादौ करौ चाथ मुखं चक्षूंषि नैकधा।
करं प्रक्षाल्य चाचम्य मुखवासं ततो भजेत्॥ ६६॥
एलाताम्बूलपूगादि नैकपूगं तु भक्षयेत्।
एलादिसंयुतं त्वद्यात् तावत्यन्यं न ना स्पृशेत्॥ ६७॥
क्षिप्तोच्छिष्टं बहिर्गेहात् दद्याद्वापि तदर्हते।
अथवा निखनेद् भूमौ नोत्तमाधमयोर्ददेत्॥ ६८॥
मृद्गोमयाम्बुलेपेन मण्डलं शोध्य पट्टकम्।
पानपात्रे च संशोध्ये उच्छिष्टान्तो गतो भवेत्॥ ६९॥
दक्षप्रकोष्ठे चाधाय पिबेद्वामेन पाणिना।
दक्षिणेन पिबेत्पात्रं यदि वामेन पूरयेत्॥ ७०॥
सौवर्णं राजतं वापि उच्छिष्टं क्षालने शुचि।
मार्तिकं च परित्यागाद् नान्यमास्ये नियोजयेत्॥ ७१॥
परम्पराऽपि(तः) संसर्गं स्पर्शबुद्धौ विचारयेत्।
पात्रान्नमशुचि प्रोक्तं तावनान्यं स्पृशेत्क्वचित्॥ ७२॥
स्पृष्टश्चोपविशेत्तत्र अनाचान्तो यथोदितम्।
अकुर्वन् पात्रमुच्छिष्टं पिबेद्वारि शुचौ स्थितः॥ ७३॥
ततोऽसौ भक्तिशास्त्राणि वाचयेद्वाभ्यसेद्वदेत्।
विद्यागुरूणां शुश्रूषां चरेद्वार्तां स्वकां च वा॥ ७४॥
अमङ्गलं तथाश्लीलं न पश्येन्न वदेत्स्पृशेत्।
वस्त्रान्तरं परिदधेत् करौ प्रक्षालयेत्तदा॥ ७५॥
उष्णीषं कञ्चुकार्द्धं च उत्तरीयं दधन् व्रजेत्।
पादुकोपानहौ छत्रं वेत्रं चापि यथायथम्॥ ७६॥
शिबिकां शकटं चाश्वं वाहं वा कल्पयेद् गजम्।
रथं वाश्वरथं वापि खरोष्ट्राश्वतरादिना॥ ७७॥

आगत्य च बहिर्वासो दूरीकृत्योर्णवाससा।
करौ पादौ मुखं शोध्य तीर्थमाचम्य शुद्ध्यति॥७८॥
द्विवासासौ सदा भूयात्तथा बद्धशिखः शुचिः।
अभ्यसन् भगवन्नाम स्मरन् लीलां हरेरपि॥७९॥
सायं बहिस्ततो गत्वा कृत्वा शौचं यथाविधि।
स्नात्वा चादाय कुसुमं पात्राम्बुग्रहमाव्रजेत्॥८०॥
स्नात्वा शुक्लाम्बरे धृत्वा तिलकादि विधाय च।
प्रबोध्य श्लोकयेद् देवं नवताम्बूलकम्बुना॥८१॥
धृत्वा मिष्टफलादीनि राजभूत्या च दर्शयेत्।
तिरस्करिणिकां दत्त्वा पक्वान्नानि निवेदयेत्॥८२॥
नीराजयेत्ततो नाथं शृङ्गारं चावरोपयेत्।
रोहिण्या चाशयेच्चाथ भव्यं दुग्धोदनादिकम्॥८३॥
नीराज्य स्वापयेद्भक्त्या प्रेम्णा परिचरेदयम्।
लीलां व्रजपतेः सर्वां भावयन्मनसो मुदे॥८४॥
यस्त्वेषीवर्तमानानां (?) चित्तं रुद्धं हरौ विशेत्।
शेषं पूर्वोक्तमेव स्यात्कुर्याच्च समयानुगम्॥८५॥
न विधेर्नियमश्चात्र भवेत् प्रेमोद्गतौ नृणाम्।
राजवद्बालवत्प्रेम्णा लीलाऽनुगुणतो हरेः॥८६॥
सेवनं श्रद्धया कार्यमाजन्मन्यपि नित्यशः।
उत्सवेषु च सर्वेषु नानापाकान्समर्पयेत्॥८७॥
तास्ता लीला च शृङ्गारं कारयेद्धरिसम्मतः।
सायं सन्ध्याहुती कृत्वा भोजनाचमनादिकम्॥
हरिलीलां प्रगायेत भक्तैर्भगवतः कथाम्॥८८॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे द्वितीयांशे भगवत्सेवावर्णनं नाम षष्ठोऽध्यायः॥६॥

## ॥ अथ सप्तमोऽध्यायः ॥

अथ स्त्रीशूद्रयोर्वक्ष्ये कर्तव्यं प्रत्यहं द्विजाः।
प्रातः प्रबुध्य सा भर्तुः प्रणम्य शिरसा पुनः ॥ १ ॥
करौ पादौ च प्रक्षाल्य कीर्तयेद्भगवद्यशः।
गृहं सम्मार्ज्य संलिप्य बाह्यकार्यं निवर्त्य च ॥ २ ॥
देहकृत्यं तथा शौचं पुरुषादर्धमाचरेत्।
स्वीयाम्बुना ततः स्नात्वा हरिद्रातिलकं दधेत् ॥ ३ ॥
चरणाम्बुमृदो लिप्त्वा करो प्रक्षाल्य भाजने।
भगवत्पात्रपानीयं तीर्थं गत्वा नयेज्जलम् ॥ ४ ॥
उपानद्भ्यां चरेन्मार्गे ततो मन्दिरशोधनम्।
तत्पात्रशोधनं चाम्बु पाकपात्रादिशोधनम् ॥ ५ ॥
शाकपुष्पादिताम्बूलगन्धसम्पादनादिकम्।
विधाय चात्मशुद्धेश्च पात्रमार्जनमाचरेत् ॥ ६ ॥
ततः प्रज्वालयेद्वह्निमम्बुसन्तापनं ततः।
स्नानीयासादनं पश्चात् श्रौतसन्तापनं ततः ॥ ७ ॥
प्रसादाहरणं पश्चाद् बालकानां च पोषणम्।
गवां कार्यं ततः कार्यं अन्नकार्यं ततः परम् ॥ ८ ॥
पतिकार्यं ततः कुर्यात्पाककार्यं यथोचितम्।
स्नानं शुद्धेस्ततः कार्यं हरेः कार्यं ततः परम् ॥ ९ ॥
ततो हरिं प्रणम्यैषा पाकं कुर्यान्मनोहरम्।
ततः पात्राणि संशोध्य जपेन्मन्त्रं समाहिता ॥ १० ॥
ततः परिचरेत्कान्तं भिक्षुकान्भोजयेत्ततः।
पोष्यानि पोषयेत्पश्चात् स्वीयं कान्तं च भोजयेत् ॥ ११ ॥

परिचर्य पतिं भुक्त्वा गृहकार्यं ततश्चरेत्।
भूषिताथ हरेः कार्यं कुर्याद्वा श्रृणुयात्कथाम् ॥ १२ ॥
सायं स्नात्वा परिचरेद्धरिं पाकादिभिस्ततः।
भोजयेद्भोजनीयान् स्वान् जपेच्च मनसा मनुम् ॥ १३ ॥
भुक्त्वा शयीत बालैः स्वैः सुप्तेष्वेषु पुनर्गृहे।
स्नानशौचार्हपात्राणि स्थापयेन्मृत्घटादिकम् ॥ १४ ॥
मण्डितां पुंसवे काले कामिता स्वपतिं भजेत्।
प्रणम्य च पतिं चाशु समुत्थाय करौ मृजेत् ॥ १५ ॥
त्रिधा विशोध्य चाङ्गं स्वमाजङ्घं क्षालयेत्करौ।
मुखस्य पादयोः शुद्धिं कृत्वा स्मृत्वा हरिं स्वपेत् ॥ १६ ॥
सदैव मण्डिता दक्षा शुद्धा मुक्तकरा सती।
लज्जावती हरौ भक्ता स्निग्धा स्वीयेषु मिष्टवाक् ॥ १७ ॥
गुरुशुश्रूषणे दक्षा हरिसेवासु सादरा।
स्वगृहे स्वप्रसूर्गेहे कामदोषपराङ्मुखी ॥ १८ ॥
सा हरेर्वल्लभा साक्षान्नान्यथाऽसावसीदति।
व्रतानि हरितोषाणि पतिपुत्रादिदान्यपि ॥ १९ ॥
कुर्याद् गृहे स्थिता नारी दानं तीर्थं हरेः प्रियम्।
कन्यैवं दास्यमासाद्य हरे रूढा गुरोर्मता ॥ २० ॥
समर्पयन्निजात्मानं गृह्णीयाद्धरिसन्मनुम्।
पत्यादीनां तथैवास्ये स्वतन्त्राभ्यर्चयेद्धरिम् ॥ २१ ॥
प्रातिकूल्यै सुगुप्त्यै तत्र कष्टे परे गृहे।
चित्रे वा मनसा वापि श्रवणस्मरणादिभिः ॥ २२ ॥
एतत्तु सधवा कृत्यं विधवा सुव्रतस्थिता।
सेवेत बालभावेन शुचिर्दक्षा समाहिता ॥ २३ ॥

शुक्लाम्बरा गुरोर्लब्धदीक्षा निजगृहे हरेः।
सपर्यां पूर्वविधिना सुतादीनां प्रपोषणम् ॥ २४ ॥
तीर्थोपवासदानादिना सा वै हरिकीर्तनम्।
कुटुम्बार्ता दरिद्रार्ता अलसोपकृतिं चरेत् ॥ २५ ॥
गुणानां श्रवणं कार्यं महतां च समादरः।
नाम्नां सुभजनं चापि सर्वसाधारणं त्विदम् ॥ २६ ॥
प्रातः सायं व्रजेद्देवमालयेऽभ्यर्चितं हरिम्।
दृष्ट्वा प्रणम्य संस्तुत्य नत्वा स्थित्वा व्रजेद् गृहम् ॥ २७ ॥
मन्दिरे देवदेवस्य मार्ज्जनं या करोति हि।
तीर्थाभिषेकजं पुण्यं विरजो भक्तिमश्नुते ॥ २८ ॥
लेपनैः क्षालनैरस्य अलङ्करणशोभनैः।
गङ्गादिस्नानजं पुण्यं हरिभक्तिं च विन्दति ॥ २९ ॥
शाकसंशोधने चास्य धान्यसंशोधने तथा।
ताम्बूलशोधने पुष्पशोधने वस्त्रशोधने ॥ ३० ॥
शुद्धान्तःकरणा भक्त्या कृच्छ्राणां फलमश्नुते।
पाकस्योपकृतौ कोटिपाकयज्ञफलं लभेत् ॥ ३१ ॥
कल्पने वस्त्रभूषाणां माल्यगन्धानुकल्पने।
अश्वमेधादि पुण्यं च शुद्धां भक्तिं परां लभेत् ॥ ३२ ॥
शुश्रूषणे गवामस्य भक्तानां भुवनस्य च।
भूमिदानसमं पुण्यं विरजः प्रेमभाग् भवेत् ॥ ३३ ॥
ग्रामारामतडागानां भुवश्चाजीवनस्य च।
अर्पणे विश्वकोटीनां दानस्य फलमाप्यते ॥ ३४ ॥
भूषाकाञ्चनवस्त्राणां धनधान्यचयस्य च।
दाने दिवोऽधिपत्यं च पात्रादाने भुवः पतिः ॥ ३५ ॥

दीपदाने भवेल्लोकं (?) जलदाने जलाधिपः।
शाकपुष्पेन्धनादीनां दाने देवोत्तमो भवेत् ॥ ३६ ॥
अदरिद्रः फलं दत्वा कुबेरो रजतार्पणात्।
प्रियार्पणे महेशः स्याद् ब्रह्मा सर्वार्पणाद्भवेत् ॥ ३७ ॥
मन्दिरस्यार्पणाच्छात्रः पूजानिर्वाहनादपि।
रमापतिर्भवेदग्रे गणाधीशोऽपि किङ्करः ॥ ३८ ॥
मायेश्वरी क्रीडनानामर्पणान्मुकुरस्य च।
ज्ञानी स्यात्स्तवनादस्य महर्षित्वं समश्नुते ॥ ३९ ॥
यत्किञ्चिदुपकृत्वास्य सारूप्यं व्यसनं (?) लभेत्।
यः पाठयेद्द्विजानस्य मन्दिरे भगवद्यशः ॥ ४० ॥
साम्राज्यलक्ष्म्या सम्पन्नो जायते भक्तवत्सलः।
वेदपारायणे पुण्यं प्राप्यते श्रौतकर्मणाम् ॥ ४१ ॥
पुराणस्येतिहासस्य पाठे वा स्मार्तकर्मणाम्।
यं यं क्रतुमधीयेत तस्यानन्तफलं लभेत् ॥ ४२ ॥
तौर्यत्रिकं च गन्धर्वं यः करोति हरेः पुरः।
तस्य देवार्चनफलं प्रीतिपात्रत्वमाप्यते ॥ ४३ ॥
स्वरताललयादीनामज्ञानेऽपि हरेर्यशः।
पुनाति सप्तविंशत्या पुरुषाणां परम्पराम् ॥ ४४ ॥
तक्रदानं तु भक्तानां पक्वान्नान्नयोरपि।
प्रवर्त्य गोकुले वासं शाश्वतं प्राप्यते सुखम् ॥ ४५ ॥
विद्यासत्रं तरूणां त्वारोपणं वापिकादिकम्।
यः करोति हरेः स्थाने स वृन्दाविपिने चरेत् ॥ ४६ ॥
विप्राणां वरणैर्दानैर्ब्राह्मणाजीव्यकल्पनैः।
पुत्रवित्तधनाढ्यश्च निरातङ्को हरौ भवेत् ॥ ४७ ॥

स्थाने वा मन्दिरे वापि देवानां जीर्णकोद्धृतिम् ।
यः कारयति तस्यापि वैकुण्ठे वास इष्यते ॥ ४८ ॥
अर्चासत्रप्रवृत्त्यास्य आलयस्य प्रतिष्ठया ।
सारूप्यं प्राप्यते भक्त्या जीर्णोद्धृत्या ततोऽधिकम् ॥ ४९ ॥
श्रीमद्भागवतस्यात्र शास्त्रस्य परिपाठनैः ।
कथासत्रप्रवृत्यात्र सालोक्यं सुखमक्षयम् ॥ ५० ॥
ततः परतरं पुण्यं वाञ्छितार्थप्रदायकम् ।
तस्मात्सर्वप्रयत्नेन तेष्वन्यतममाचरेत् ॥ ५१ ॥
यथा यथोपकुर्वन्ति कार्याणीष्टं तथा तथा ।
पुण्यानि भक्तयस्तेषां सिद्ध्यन्ति च यथारुचि ॥ ५२ ॥
सेवनाद्भक्तिसिद्धिः स्याद्भक्त्या सर्वं प्रसिध्यति ।
स्त्रीणां पतिस्तथाऽशूद्रो जन्मना गुरुरिष्यते ॥ ५३ ॥
अस्वतन्त्रात्मनामेतदुक्तं कार्यं स्वशक्तितः ।
देवालयं समीक्ष्यैव नमेच्चाथ प्रविश्च च ॥ ५४ ॥
विनीतवेशो हि भवेत् शस्त्रदण्डादि वर्जयेत् ।
यतयो व्रतिनो भूपाः स्वोपचिह्नं त्यजन्त्यमी ॥ ५५ ॥
शुचयः प्राणिनः काले प्रविशेयुः समा इव ।
दृष्ट्वा उपायनं कुर्याद्भावुका दैन्यमाश्रिताः ॥ ५६ ॥
कुर्यादुपबलिं भ्राम्यत्काञ्चनैराश्रितेऽर्पयेत् ।
तापसस्तवमात्रेण तोषयेद् गुणिनो गुणैः ॥ ५७ ॥
प्रदक्षिणैः प्रणामैश्च तीर्थपानैश्च मानयेत् ।
प्रसादमस्य गृह्णीयात्सर्वेषूत्कृष्टजातितः ॥ ५८ ॥
सेवकेभ्यो न मौल्येन न निषेधेदयुक्तितः ।
प्रसादे वन्दनं कार्यं मूर्तौ चित्रे दले स्थले ॥ ५९ ॥

वृद्ध्यैवोपबलिः कार्य एवं वस्त्रस्रजादिषु।
एवं गुरूणां संस्थाने माननं समुदाहृतम् ॥ ६० ॥
अशक्तः सेवने तस्य तीर्थधामादिदर्शनम्।
कुर्यान्नातः परतरो धर्मः प्रोक्तो मनीषिभिः ॥ ६१ ॥
अर्चावतारधामादौ मानामानं न चिन्तयेत्।
ताडने क्रोशने क्षेपे पापहानिं विचिन्तयेत् ॥ ६२ ॥
अथवा हरिनाम्नो वै सदा जापं प्रकल्पयेत्।
रोमसङ्ख्यामितं नाम गृहीत्वा निर्भयो भवेत् ॥ ६३ ॥
सेवासक्ताः कथासक्ता नामासक्ता हरेर्नराः।
कृतकृत्या मताः सर्वे नात्र कार्या विचारणा ॥ ६४ ॥
यथाशक्ति स्वधर्मेण घृणालुर्गुरुमाश्रितः।
भजन् हरिं विमुक्तः स्यात् प्रेम्णा भक्तेषु शस्यते ॥ ६५ ॥

॥ इति श्रीशाण्डिल्यसंहितायां प्रथमे भक्तिखण्डे द्वितीयांशे स्त्रीशूद्रसाधारणधर्मवर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥

## ॥ अथाष्टमोऽध्यायः ॥

प्रवासे शौचमर्द्धं स्याद् हरिं तु पिटके नयेत्।
आमध्याह्नं परिचरेदेककालं यथायथम् ॥ १ ॥
आपन्नस्तु यथाशक्ति याममात्रं निवासयेत्।
रोगार्तो वैष्णवैरन्यैः सपर्यां कारयेद्धरेः ॥ २ ॥
मृताशौचे च पुष्पे च प्रसूतौ च क्षते दृढे।
महारोगे च विप्रेभ्यो वैष्णवेभ्यश्च कारयेत् ॥ ३ ॥
स्वयं तु मनसा कुर्यात्केवलाम्बुफलार्पणैः।
वैष्णवानामलाभे तु शुद्धं विप्रं नियोजयेत् ॥ ४ ॥
न शैवं नैव शाक्तं तु पाषण्डं नान्यवर्णजम्।
शुद्ध्यन्ते शोधनं कुर्यात्तीर्थतोयामृतैरपि ॥ ५ ॥
सहस्रमनुजापञ्च यथायोग्यं तु कारयेत्।
उपहारं हरेः कुर्याद्विप्रवैष्णवभोजनम् ॥ ६ ॥
न वसेद् म्लेच्छदेशेषु न वसेद्बहुजातिषु।
सदा परगृहे नैव नातिदूरे गुरोरपि ॥ ७ ॥
प्रवासे दर्शनं मासे गुरोर्वर्षेऽपि सम्भवात्।
गुरोः परं परं किञ्चिन्नैव नान्यं च चिन्तयेत् ॥ ८ ॥
हरिं प्रसादतः प्रीतिर्गुरोरेव गरीयसी।
श्रद्धा भक्तिर्भवेत्सिद्धा तत्सिद्धौ न विडम्बनम् ॥ ९ ॥
ये परम्परया व्रात्यास्तेऽपि शूद्रसमाः स्मृताः।
स्ववर्णानुरूपं च तेषां कार्यं न वैदिकम् ॥ १० ॥
प्रायश्चित्तविधिं कृत्वा तेऽपि योग्या भवन्ति वै।
अन्यथा तु प्रपन्नाः स्युश्चित्रसेवनमिष्यते ॥ ११ ॥
गुरोर्दत्तां हरेर्मूर्तिं गृहीत्वा गृहशुद्धितः।
फलमाल्याम्बुवस्त्राद्यैर्यथाशक्ति समर्पयेत् ॥ १२ ॥

व्रजे वसन्ति ये भक्ता ये विप्राः प्राणिनो नराः।
ते सर्वे माननीयाः स्युरङ्गीभूता हरेर्यतः॥ १३ ॥
व्रजे वसेद् व्रजरजो दुर्लभं तद्दिवौकसाम्।
मथुरामण्डलादन्यः प्रियो नास्ति हरेः क्वचित्॥ १४ ॥
श्रीमद्भागवतं शास्त्रं सदा पाठ्यं मुमुक्षुभिः।
व्रजे वासः सदा कार्यो गिरौ वृन्दावने च वा॥ १५ ॥
वृन्दावने गोकुले च श्रीमद्गोवर्धनाचले।
हरेः प्रियतमे वास अन्यत्रापि यथारुचि॥ १६ ॥
श्रीमद्भागवतं यैस्तु नाभ्यस्तं न श्रुतौ श्रुतम्।
न पीतं यमुनावारि तेषां जन्म वृथा गतम्॥ १७ ॥
वृन्दावनं न जुष्टं वै न च गोवर्धनाचलम्।
न गोकुलं व्रजं वापि ते कथं हरिवल्लभाः॥ १८ ॥
वृषभानोश्च नन्दस्य प्रियाणां मातुरेव च।
सखीनां निवसेद् ग्रामे व्रजेशप्रीतिमान्भवेत्॥ १९ ॥
संस्काराः पैतृके चापि शुद्धिर्नैमित्तिकं व्रतम्।
सर्वं समाचरेदत्र सात्त्विकं हरिसम्मतः॥ २० ॥
यथाकथञ्चिद्यत्किञ्चिन्मया भक्ताऽनुशासनम्।
कृतं तेन निजाचार्यः श्रीकृष्णः प्रीयतां मम॥ २१ ॥
इति संकल्पयेत्सर्वं कर्मणां शुद्धये द्विजः।
नाम्नामुच्चारणं चापि सर्वकर्माङ्गमिष्यते॥ २२ ॥
विरक्तो वा भवेदाशु गृहं त्यक्त्वा व्रती पुमान्।
सत्तीर्थेषु व्रजे वापि कथासत्रेऽपि वा वसेत्॥ २३ ॥
मितभिक्षाशनः शुद्धो गुरुशुश्रूषणे रतः।
आलये परिचर्यां च स्वधर्ममपि यल्लघु॥ २४ ॥
हतत्रपो विगतभीः प्रेमप्रसरविह्वलः।
गायन् हरिगुणान्नित्यं चरेदविधिगोचरः॥ २५ ॥

संन्यसेद्वा स्वधर्मेण शिखी दण्डी स्वसूत्रधृक् ।
तुलसीकाष्ठजां मालां पुण्ड्रमुद्राश्च धारयेत् ॥ २६ ॥
काषायाम्बरधृत् काष्ठपात्रो वेदान्ततत्परः ।
हरिं सर्वात्मभावेन भावयन् विचरेत्स गाम् ॥ २७ ॥
ब्राह्मणानां गृहे भिक्षां कुर्वन् भक्ताऽनुशिक्षणम् ।
भक्तिशास्त्रवितानं च कुर्वन् गायन् हरिं चरेत् ॥ २८ ॥
इत्येवं सर्वमाख्यातो वैष्णवाश्रमनिर्णयः ।
एतस्मिन्निवसन्भक्तो हरेः प्रियतमो भवेत् ॥ २९ ॥
ब्राह्मणोऽध्यापनाद्यैश्च क्षत्रियो रक्षया भुवः ।
वैश्योऽपि वार्तया जीवेच्छिल्पाच्छुश्रूषया परः ॥ ३० ॥
नृपः स्वधर्ममास्थाय प्रजा सर्वाक्षिरक्षयेत् ।
स्वे स्वे धर्मे वेदमार्गादत्यन्तमविरोधिनी ॥ ३१ ॥
विप्राणां कल्पयेद्वृत्तिं दुर्बलानां च भूपतिः ।
सर्वेषामुपकाराय महारम्भान्विचारयेत् ॥ ३२ ॥
दीनेषु पितृवत् स्निग्धः कोपनो दुर्जनेष्वलम् ।
दासवद्धरिभक्तेषु हरिसेवासु तत्परः ॥ ३३ ॥
प्रसादेषु प्रतिष्ठाप्य कुर्यादुपकृतिं तथा ।
आजीव्यान्नर्पयेत्तत्र निबन्धानि च कारयेत् ॥ ३४ ॥
नित्यं हरिं परिचरेदुत्सवेषु विशेषतः ।
व्यवहारं तु मध्याह्ने आर्तं पश्येत्सदैव हि ॥ ३५ ॥
राजानमाश्रितो धर्मः वेदावेदाश्च सज्जनाः ।
नालस्यं निर्दयत्वं च कार्यं तेन च कर्हिचित् ॥ ३६ ॥
विषयाभिनिवेशेन दीनानां समुपेक्षया ।
अनादराच्च विदुषां लोकान्नाशयते नृपः ॥ ३७ ॥
मन्वाद्युक्तं नृपैः कार्यं रागद्वेषविवर्जितैः ।
चाटुतस्करदुर्वृत्तपाषण्डानां च निग्रहम् ॥ ३८ ॥

युतस्तेन जनोद्वेगो लोकानां मोहनं भवेत्।
ततः पाषण्डमार्गाणां निरोद्धुं सर्वथा चरेत्॥ ३९॥
यस्य राष्ट्रे तु दीनानां न पतन्त्यस्रबिन्दवः।
स हरेः प्रियतामेति अन्यथोभयविच्युतः॥ ४०॥
वैष्णवस्तु स्वयं भूयात्कुर्याद्राष्ट्रं च वैष्णवम्।
वैष्णवास्तापसा विप्रास्ते च मान्याः सदैव हि॥ ४१॥
प्रजानां प्रीतये राजा विद्वान् योगक्षेमानपि।
वैद्यान्पौराणिकान् स्मार्तानस्विनो गुणिनः परे॥ ४२॥
सर्वे संरक्षणीया वै सेनावाहाश्च मन्त्रिणः।
दुर्गाणि कोशं मित्राणि शस्त्रास्त्राणि यथायथम्॥ ४३॥
इत्येवं राजधर्मेण सशरीरो दिवन्नृपः।
प्रवर्तते हरेर्भक्तस्तस्य लोकद्वये शुभम्॥ ४४॥
इत्येवं सर्वमाख्यातमाह्निकं धर्ममप्युत।
अकुर्वन्विहितं कर्म निरयं याति दारुणम्॥ ४५॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे द्वितीयांशे वैष्णवाश्रमधर्मवर्णनं नामाष्टमोऽध्यायः॥ ८॥

## ॥ अथ नवमोऽध्यायः ॥

अथ निष्कृतिसद्धर्मं वक्ष्ये शृण्वन्तु भो द्विजाः।
विहाय वैष्णवं धर्मं संसारान्न निवर्तते ॥ १ ॥
हरिं च हरिभक्तं च द्विषन्नासुर उच्यते।
कामक्रोधमदालस्याद् व्यशक्त्यापि तथोच्यते ॥ २ ॥
केषाञ्चिदासुरं जीवं हृषीकं देहमप्युत।
द्रविणं वैभवं चान्यद् ह्यसत्कार्येण युज्यते ॥ ३ ॥
जीवस्य चासुरत्वे तु गतिर्नैव कथञ्चन।
मनसश्चासुरत्वे तु गतिर्योगबलाद्भवेत् ॥ ४ ॥
देहस्य चासुरत्वे तु शास्त्रे गतिरुदाहृता।
वैभवस्य तु वैराग्ये तपसा सर्वतो भवेत् ॥ ५ ॥
प्रवाहेनातिवर्तन्ते संसारस्य नराः सुराः।
हृषीकान्न दिवः प्राप्तिर्देहान्नोत्कृष्टजातिता (?) ॥ ६ ॥
हरिद्वेषात्प्रवाहः स्याद्भक्तद्वेषात्तथासुरः।
शास्त्रद्वेषाद्विमूढत्वं तेषां चक्राद्गतिर्भवेत् ॥ ७ ॥
न हरिं संश्रयन्ते ये भ्रमन्ते स्वस्वकर्मसु।
दीक्षया रहितो जन्तुः पशुत्वं याति भूरिशः ॥ ८ ॥
प्रसन्ना ये न सेवन्ते नोपकुर्वन्ति वा गुरून्।
ते पिशाचा भवन्त्येव तेषां नाम्ना हि सद्गतिः ॥ ९ ॥
सेवमानाश्च ये दम्भात्कामक्रोधाद्व्रजन्ति वा।
वकत्वं च कपित्वं च कुण्डलित्वं व्रजन्ति ते ॥ १० ॥
लोभेनासूयया वापि द्वेषमोहादिभिः परे।
तेषां तु स्वानुरूपा वै योनिर्वा गद एव च ॥ ११ ॥
वृन्दावनं रोपयेयुः कुर्युश्चोपकृतिं पराम्।
नैवेद्यमाल्यवस्त्राद्यैः शुद्धिं कुर्युः परां शुभाम् ॥ १२ ॥

भक्तानां सेवनाद्वापि गवां संसेवनादपि।
गुरूणां तोषणान्मुच्येद् व्रजस्य परिदर्शनात्॥१३॥
क्षुद्रेषु वाऽपराधेषु तीर्थपानाच्छुचिर्भवेत्।
अवैष्णवस्य सम्पर्के स्नानं ध्यानं हरेर्मतम्॥१४॥
नाश्लीलं च वदेत्तत्र न हास्यं नानतिं चरेत्।
न स्त्रीषु सानुरागः स्यान्न द्वेष्टारिषु वा भवेत्॥१५॥
न दम्भं न च मात्सर्यं प्रष्टुर्मानं च दर्शयेत्।
नास्तिक्यमालसालापान् दूरतः परिवर्जयेत्॥१६॥
यानं च पादुकाच्छत्रमौत्क्रोश्यं ताडनादिकम्।
भोजनं सङ्गमं निद्रामुच्चारं दूरतस्त्यजेत्॥१७॥
वार्ता च व्यवहारं च न कुर्याच्च हरेः पुरः।
नातिदैन्यं प्रमोषंश्च तथा दुर्भाषणं त्यजेत्॥१८॥
एताननुष्ठितो रक्ष्यो भवेज्जन्मनि जन्मनि।
स्वपापस्यानुकूल्येन तस्मात्प्रतिकृतिं चरेत्॥१९॥
पाकस्याशुद्धियोगे तु भवेदुल्कामुखोऽसुरः।
जलस्याशुद्धियोगे च जायते ब्रह्मराक्षसः॥२०॥
स्थलस्याशुद्धिकरणे भवेत्सूचिमुखोऽपि सः।
फलवस्त्रान्नशाकादौ निषिद्धार्थाभियोजनात्॥२१॥
जायते स्वानुरूपेण श्वादियोनिगदैर्युतः।
अप्रीतिं समवाप्नोति हरेरस्यानुवर्तिनाम्॥२२॥
अनाचारेऽप्यशुद्धौ च सुराय(?) व्रतमाचरेत्।
पूजाभङ्गे तु देवस्य चरेद् ब्रह्महणो व्रतम्॥२३॥
काललोपे सुवर्णस्य स्तेयस्य व्रतमिष्यते।
गुरुतुल्यव्रतं कुर्यादुपचारं विलोपयेत्॥२४॥

पापोपपापैर्युज्येत दोषैरन्यैर्यथायथम्।
तेषां विनिग्रहे देवं तोषन् स्वमनु जपेत्॥ २५॥
आजीव्यच्छेदनं कार्यं समयादेश्च भज्जने।
पुनस्तथैव सम्पाद्य नाम्नां कोटिमुदाहरेत्॥ २६॥
ध्वजभङ्गे महाशन्तिः प्रासादप्रतिमादिषु।
दाहेऽत्र नीचसंसर्गे ब्रह्महत्यादिसङ्गमे॥ २७॥
कुर्यादर्चनदानादिशुद्धिः शास्त्रोक्तवर्त्मना।
वेदपारायणैर्विप्रतर्पणैर्धेनुतर्पणैः॥ २८॥
विशुद्ध्यते जगत्सर्वं गङ्गाम्भःक्षालनादिभिः।
तथोपकृतिभङ्गे च अङ्गप्रत्यङ्गयोरपि॥ २९॥
ब्रह्महत्याव्रतं कुर्यात्तोषयेच्च जगद्गुरुम्।
सहस्रब्रह्महत्याया व्रतं मूर्तेर्विनाशने॥ ३०॥
रहोभवां प्रतिष्ठाप्य अन्यैः पूजां प्रवर्तयेत्।
सर्वेषामपराधानां प्रणामैः शुद्धिरिष्यते॥ ३१॥
प्राणायामैर्यथान्यत्र तथैतानि विवर्जयेत्।
श्रीमद्भागवतं शास्त्रं बहुनाभ्यस्य मुच्यते॥ ३२॥
मूर्तिस्तेये उपवसेत् त्यजेत्किंचिन्निजप्रियम्।
गुरोरपकृतिं कृत्वा प्रसाद्यैनं प्रमुच्यते॥ ३३॥
भक्तिचिह्नं परित्यज्य वेदत्यागव्रतं चरेत्।
अदीक्षितस्य विप्रस्य योजने जलपाकयोः॥ ३४॥
हरौ शुद्धिः पुनः कार्या जपेल्लक्षं महामनुम्।
पञ्चैकादशलक्ष्यं च ज्ञाने तु द्विगुणं भवेत्॥ ३५॥
अन्यनृणां नियोगे तु पुनः संस्कारमर्हति।
प्रायश्चित्तमशेषाणां पापानां हरिकीर्तनम्॥ ३६॥

प्रसादतीर्थग्रहणं वैष्णवानां च भोजनम् ।
गवां शुश्रूषणं चास्य दर्शनं गुरुवन्दनम् ॥ ३७ ॥
विशोधनं च सर्वेषामेनसां शुद्धिरिष्यते ।
तथापि समयार्थं वै मया किञ्चिन्निरूपितम् ॥ ३८ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे द्वितीयांशे प्रायश्चित्तधर्मवर्णनं नाम नवमोऽध्यायः ॥ ९ ॥

*॥ समाप्तश्च द्वितीयांशः ॥*

# ॥ अथ तृतीयांशः ॥

## ॥ प्रथमोऽध्यायः ॥

ऋषय ऊचुः –

भगवन्सर्वधर्मज्ञ शाण्डिल्य वद नो मुने।
विष्णोः प्रियाणां भूतीनां माहात्म्यं निर्णयक्रमम् ॥ १ ॥

श्रीशाण्डिल्य उवाच –

सर्वं श्रुतिस्मृतिगणैः सुरैश्च मुनिभिस्तथा।
एको नारायणो देवो निर्गुणो वस्तु ईर्यते ॥ २ ॥
निराश्रयो निराकारो निर्विकारो निरन्तरः।
नित्यो निजानन्दपूर्णो गोविन्दो योगधीर्यतः ॥ ३ ॥
स एव स्वेच्छया देवः पूर्णानन्दैकविग्रहः।
एकाकी रन्तुमेवासौ लीलाशक्तिं ससर्ज ह ॥ ४ ॥
ततोऽसौ गोकुले दिव्ये सच्चिदानन्दमिन्दरे।
मुरलीं नादयन् व्यक्तं लावण्यैकधनो युवा ॥ ५ ॥
द्विधा स वामतो वामा लीलाधामसुखात्मकाः।
पुम्भावमाश्रितः प्रादुर्भाव्य लीलां निजात्मिकाम् ॥ ६ ॥
वासुदेवः स भगवानुक्तो भागवतागमे।
तस्मात्सङ्कर्षणं प्राहुरादिः श्रुतिचिदात्मकम् ॥ ७ ॥
प्रद्युम्नः स्यान्मतिर्यस्मादनिरुद्धो मनोमयः।
सर्वं तद्वासुदेवस्य परिणामान्तरात्मकम् ॥ ८ ॥
एवं जगत्यसौ देवः क्रीडते स्वात्मके स्वयम्।
ततोऽसौ सगुणो भूत्वा मायाक्षरमथासृजत् ॥ ९ ॥

यदृच्छामृच्छया (?) सृष्ट्वा ताभ्यां सर्वं जजान सः।
माया सृष्टे जले शेते ततो देवत्रयी शुभा ॥ १० ॥
ततो वह्नित्रयी लोकत्रयी कालत्रयी ततः।
ततो जगज्जगत्यत्र त्रयो देवाः सुपूजिताः ॥ ११ ॥
तत्रापि वैष्णवी मूर्तिर्मुकुन्दस्यातिवल्लभा।
सत्त्वं सन्निहितं तस्य निर्गुणस्य परात्मनः ॥ १२ ॥
विप्रकृष्टं रजस्तस्य विप्रकृष्टं ततस्तमः।
अनादिनिर्गुणो देवस्तां मूर्तिं समुपस्थितः ॥ १३ ॥
व्याप्नोति मुकुरं भव्यं प्रभामिव प्रभाकरः।
विलुप्तस्वगुणा ह्येते मताः शुद्धाः परात्मकाः ॥ १४ ॥
सैव शास्त्रे क्वचित्प्रोक्तः सोमः परशिवो हरः।
निर्गुणोऽसौ निराकारो लिङ्गरूपी महेश्वरः ॥ १५ ॥
एवं विरिञ्चिर्वेधापि महाविष्णुः स्वयं प्रभुः।
अन्ये देवविशेषाश्च मनश्च प्रणवादयः ॥ १६ ॥
एतेषां गुणमुक्तानां संवित्तिस्तु गुणोन्मुखी।
ततोऽस्य तारतम्ये सा शास्त्रं सम्प्रतिपद्यताम् ॥ १७ ॥
निर्गुणात्सगुणः सत्त्वस्ततो जातं रजस्तमः।
ततः परशिवादीनां नैर्गुण्यं स्वगुणैर्मतम् ॥ १८ ॥
ब्रह्मैव तादृशं तस्मात्तत्तदाकारमाश्रितम्।
शिवेश्वरमहेशानामृतसोमहरादिभिः ॥ १९ ॥
शैवी मूर्तिः परा सा तु प्रोच्यते वेदवादिभिः।
एवं विरिञ्चिर्वेधा हि वेदगर्भादिनामभिः ॥ २० ॥
वैष्णवो पुरुषाध्यक्षसत्यनाम्नाच्युतोऽव्ययः।
एतेषां मूलभूता तु प्रोक्ता नारायणीश्वरा ॥ २१ ॥
निर्गुणानां त्रयाणां स्वैः सा चतुर्णां तु पञ्चमी।
प्रणवा लक्ष्यरूपा सा योगिध्येया निरञ्जना ॥ २२ ॥

अनन्तसूर्यसंकाशा नित्याऽव्यक्ता सनातनी।
यस्येच्छया स पुरुषः प्रकृत्या कार्यमीहते॥ २३॥
शैवशास्त्रे तु सा शुद्धा निष्कलापि परामृता।
शाक्ते कुण्डलिनी संवित् परा शम्भुगुणाच्छुभा॥ २४॥
वैष्णवे ह्लादिनी नित्या शान्ता नारायणीश्वरा।
यां निर्लेपां जगुः साङ्ख्याः क्लेशकर्माशयोज्झिताम्॥ २५॥
योगाचार्या जगद्धात्रीं नित्याष्टगुणकां परे।
केवलानन्दचिन्मात्रां तामौपनिषदा जगुः॥ २६॥
सा पञ्चमी तु सर्वेषामेषामात्मतया स्मृता।
ततः परस्तु यः प्रोक्तः श्रीपतिः पुरुषोत्तमः॥ २७॥
पूर्णब्रह्मसदानन्दपराकाष्ठावधिश्च सः।
यतो नास्ति परः कश्चिदधिदेवो हरिः प्रभुः॥ २८॥
गोविन्दो वेदवेदान्तवन्द्यो भक्तिमितो विभुः।
परमानन्दमात्रोऽसौ लीलामूर्तिर्निरञ्जनः॥ २९॥
आकाशाद्याः क्षरा सर्वे निजोपाधिगुणादिभिः।
प्रविशन्ति नरा यत्र सोऽक्षरः परमेश्वरः॥ ३०॥
क्षरात् क्षरमतीतो यः सम्मतः पुरुषोत्तमः।
प्राकृतत्वं क्षरत्वं वा तेषां स्वौपाधिकैरपि॥ ३१॥
अतो ह्यक्षरता नास्ति क्वचिन्नारायणादृते।
पुरुषात्स परः प्रोक्तो विष्णुरङ्गभवः पुमान्॥ ३२॥
वामजो वामदेवोऽसौ स्त्रीव्यक्तिः समुदाहृता।
तृतीया प्रकृतिर्धातुर्यदिशा ये च ते च ते ॥ ३३॥
विशुद्धसत्त्वधामास्ति विष्णुर्निःश्रेयस्कृन्नृणाम्।
सृष्टिकृद्राजसो ब्रह्मा शिवः संहारकृत्तमः॥ ३४॥
सात्त्विकेषु च शास्त्रेषु कल्पे कालेऽधिकारिणि।
संस्तुतो भगवान् विष्णू राजसेषु परे सुराः॥ ३५॥

तामसेषु शिवः प्रोक्तो मुख्योऽसौ परमेश्वरः।
यदा हि सात्विकः कल्पस्तदा ब्रह्मा हरिर्भवेत् ॥ ३६ ॥
ततो रुद्रस्ततोऽन्येऽपि प्रायश्चैवं हि सर्वदा।
राजसेषु स्वयं ब्रह्मा ततो हरिहरादयः॥ ३७ ॥
शक्त्या वा शिवतः सृष्टिर्हरिरुद्रविरिञ्चयः।
जायन्ते नामसङ्कल्पाद्धरेरेता विभूतयः॥ ३८ ॥
संकीर्णेषु च चान्येभ्यः सर्वेभ्यो दृश्यते तथा।
ब्रह्मरुद्रादिदेवेभ्यः सृष्टिरुक्ता यथायथम् ॥ ३९ ॥
स्वैः स्वैर्गुणैर्निर्गुणता तेषां निर्गुणता तु या।
सैव मुक्तिः स्मृता तत्र न चौपनिषदी तु सा ॥ ४० ॥
परमानन्दरूपान्या मुक्तिर्लीलाप्रवेशतः।
सात्त्विकेऽपि च कल्पेऽपि दुर्लभाऽनुग्रहं विना ॥ ४१ ॥
हरेरनुग्रहात्सा तु जायते नान्यथा क्वचित्।
एवं यो निर्गुणः प्रोक्तो विभूतीनां हरेरिह ॥ ४२ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तृतीयांशे प्रथमोऽध्यायः ॥ १ ॥

## ॥ अथ द्वितीयोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

तस्मात्तु वैष्णवो धर्मः श्रेष्ठः सत्त्वाधिकारिषु ।
ततो निर्गुणता ह्याशु तदाशु हरितोषणम् ॥ १ ॥
यस्य शेषा महेशा ये वशा यस्य सुरेश्वराः ।
क्लेशापायः परानन्दावाप्तिर्यस्मात्तमाश्रयेत् ॥ २ ॥
हरिरेवेदृशो देवः करुणावरुणालयः ।
तं विहाय सुधासिन्धुं कोऽन्यं वै खातकोदकम् ॥ ३ ॥
हरिं समाश्रिता देवा ऋषयश्च तपोधनाः ।
देवदेवो हृषीकेशो ब्रह्मण्यस्तेन कीर्त्यते ॥ ४ ॥
वर्णेषु ब्राह्मणैरर्च्यः परहंसैर्यथाऽऽश्रमे ।
सर्वैरेव समर्च्योऽसौ देवैर्जीवैः सुखाप्तये ॥ ५ ॥
नित्योऽसौ निगमे गीतः सृष्टिस्थित्यप्यये प्रभुः ।
जीवाः स्वाभावतो दासास्तदंशाश्चेतना इमे ॥ ६ ॥
स एव पुरुषोऽध्यक्ष आत्मभूतः सनातनः ।
पूर्वैरुपासितः सिद्धैः सर्वत्रामृतदः सताम् ॥ ७ ॥
य इच्छेदात्मनो मोक्षं संसाराल्लघुसाधनैः ।
स एकं देवदेवेशं श्रीनारायणमाश्रयेत् ॥ ८ ॥
शम्भुः शेषश्च श्रीश्चैव यं सदैव समाश्रिताः ।
मङ्गलं मङ्गलानां स ततः कोऽन्यः परो हरेः ॥ ९ ॥
यत्पादाम्भोजसम्भूतजाह्नव्या पावितो हरः ।
दक्षशापाद्विनिर्मुक्तस्ततः कोऽन्यः परो हरेः ॥ १० ॥
वेदवेदान्तसच्छास्त्रैः स्तूयते यः सनातनः ।
यश्चावतारैरवति ततः कोऽन्यः परो हरेः ॥ ११ ॥

—

त्रिपुरस्य जये येन कीर्त्तिर्दत्ता महात्मनः।
गौर्भूत्वा चामृतं पीत्वा ततः कोऽन्यः परो हरेः॥ १२॥
येन पाशुपतास्त्रं च दत्तं पुष्टं स्वतेजसा।
दक्षक्रतुविनाशाय ततः कोऽन्यः परो हरेः॥ १३॥
दत्तं येन पिनाकं च त्रिशूलं पार्वती प्रिया।
कैलासनिलयं कीर्त्तिस्ततः कोऽन्यः परो हरेः॥ १४॥
वृकबाणकपालेभ्यः पौलस्त्यात्काशिराजतः।
त्रातो येन हरो दुःखे ततः कोऽन्यः परो हरेः॥ १५॥
पार्वती येन संत्राता लिङ्गं छित्वा महेशितुः।
स्वीकृता जाम्बवत्याद्यास्ततः कोऽन्यः परो हरेः॥ १६॥
येन वै मोहनीरूपे महेशोऽपि निपातितः।
प्राप्तो निधुवनं दीनो ततः कोऽन्यः परो हरेः॥ १७॥
प्रतिगृह्य प्रियां तस्य हृदि कृत्वा गतह्रियम्।
प्रवर्तिता लिङ्गपूजा ततः कोऽन्यः परो हरेः॥ १८॥
तारकं परमं मन्त्रं दत्ता वाराणसीस्थितिः।
प्रभावश्चाधिको दत्तस्ततः कोऽन्यः परो हरेः॥ १९॥
यस्य नाम्नः प्रभावेण पीतं हालाहलं विषम्।
कपालं गलितं शम्भोस्ततः कोऽन्यः परो हरेः॥ २०॥
यस्य प्रीत्यै वितनुते तपो नित्यं महेश्वरः।
सेवते तपनो नित्यं ततः कोऽन्यः परो हरेः॥ २१॥
सहस्रभुजदण्डस्य नृसिंहस्य महोजसि।
शरभः शलभो जातस्ततः कोऽन्यः परो हरेः॥ २२॥
यस्य वृन्दावने नित्यं याति स्त्रीभावतो हरः।
प्रदीपं तत्र गृह्णाति ततः कोऽन्यः परो हरेः॥ २३॥
भिक्षुवेशधरो रुद्रो गोकुले यत्पदाम्बुजम्।
स्पर्शं ययाचे तन्मातुस्ततः कोऽन्यः परो हरेः॥ २४॥

स्त्रीवियोगविदग्धाङ्गो बाणप्राणाहमानतः।
प्रपश्ये बहुनेत्राणि ततः कोऽन्यः परो हरेः॥ २५॥
निर्णीतं ब्रह्मणा पूर्वं धनुषोऽस्य पराक्रमम्।
बाणकाशीशयोर्युद्धे ततः कोऽन्यः परो हरेः॥ २६॥
यस्य सत्त्वपरीक्षा तु भृगुणा ब्रह्मसंसदि।
सरस्वत्यास्तटे प्रोक्ता ततः कोऽन्यः परो हरेः॥ २७॥
यत्प्रसादं नो विभज्य प्राप शापं प्रियाकृतम्।
नित्यं भजति यं शम्भुस्ततः कोऽन्यः परो हरेः॥ २८॥
गजेन्द्रमोक्षणं चक्रे यश्चैकशो दयानिधिः।
यस्य वाहाश्रिता वेदास्ततः कोऽन्यः परो हरेः॥ २९॥
द्रुहिणं यो विमुह्यन्तं सर्वामरगणैः सह।
पाति निजावतारेण ततः कोऽन्यः परो हरेः॥ ३०॥
यस्य नारायण इति गोविन्द इति नामनी।
अनन्येन प्रयुज्येते ततः कोऽन्यः परो हरेः॥ ३१॥
अविद्याबन्धनिर्मुक्तैः स्वाराज्यावाप्तये नृणाम्।
अस्त्येको वैष्णवो धर्मः सज्जनस्तं समाश्रयेत्॥ ३२॥
वर्णाश्रमाचारवतां कर्तव्या नित्यमेव हि।
अन्येषामपि सर्वेषां हरिभक्तिर्विमुक्तये॥ ३३॥
हरिर्देहभृतामात्मा माता धाता पिता प्रभुः।
गुरुः प्रियो विहायैनं कृतघ्नो जायते बुधः॥ ३४॥
श्रुतिस्मृतिपुराणैश्च सद्भिर्विद्भिः पुरातनैः।
उपदिष्टो हि यो धर्मः स श्रेयान् सर्वदेहिनाम्॥ ३५॥
गौणो वर्णाश्रमाचारो देहशुद्ध्या दिवःप्रदः।
निःश्रेयान्वै वैष्णवाचारो जीवशुद्ध्यामृतप्रदः॥ ३६॥
विहाय वैष्णवं धर्मं संसारं तर्तुमिच्छति।
त्यक्त्वा नावं समुद्रस्य पारं किं याति मानवः॥ ३७॥

बहुजन्मकृतैः पुण्यैः सात्त्विकानां नृणामिह।
श्रद्धा भवति सद्धर्मे वैष्णवे मुनिभिः श्रिते॥३८॥
एतस्य समनुष्ठाने कृतकृत्यो भवेत्पुमान्।
स गुरुर्जगतां पूज्यः स्पृहणीयो दिवौकसाम्॥३९॥
एतस्माद्विमुखो यस्तु तन्मुखालोकने नृणाम्।
पातकं सुमहद् भूयात् तादृशं परिवर्जयेत्॥४०॥
यस्तु धर्ममिमं लोके ग्राहयन् स प्रवर्तते।
तमेकं गुरुमाश्रित्य प्रियो भवति शार्ङ्गिणः॥४१॥
दीक्षां वा उपदेशं वा प्रपत्तिं वापि यश्चरेत्।
सद्धर्म्मे वैष्णवे तस्मिन् स सिद्धार्थो निगद्यते॥४२॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तृतीयांशे
द्वितीयोऽध्यायः॥२॥

## ॥ अथ तृतीयोऽध्यायः ॥

अथातः श्रूयतां विष्णुप्रियाणां धारणं शुभम्।
तद्वक्ष्ये क्रमतः सर्वं श्रुतिस्मृतिगिरां मतम् ॥ १ ॥
दीक्षां वा ह्युपदेशं वा प्रपत्तिं वापि सद्गुरोः।
लब्ध्वा गुरुं हरिं नत्वा सम्पूज्योपायनैरपि ॥ २ ॥
तुलसीकाष्ठसम्भूतां सूक्ष्मां श्लक्ष्णां मनोहराम्।
आकण्ठहृदयोन्मानां सूत्रप्रोतां समर्पयेत् ॥ ३ ॥
संशोध्य मूलमन्त्रेण गुरुः कृष्णार्पितां स्रजम्।
कृत्वा निजगले दद्यात्प्रपन्नायात्मशुद्धये ॥ ४ ॥
दीक्षायां च विधिः प्रोक्तः उपदेशेऽपि सत्कृतिः।
प्रपत्तौ तु जने श्रद्धा गुरौ चैवानुकम्पने ॥ ५ ॥
सुस्नातं सन्मुखासीनं प्रणतं श्रद्धया युतम्।
मूलार्णं कृपया दत्वा गुरुर्दद्यात्स्रजं ततः ॥ ६ ॥
तुलसीकाष्ठसम्भूते माले विष्णुजनप्रिये।
बिभर्मि त्वामहं कण्ठे कुरु मां कृष्णवैभवम् ॥ ७ ॥
यथा त्वं वल्लभा विष्णोर्नित्यं विष्णुजनप्रिया।
तथा मां कुरु देवेशि नित्यं विष्णुजनप्रियम् ॥ ८ ॥
यत्कृष्णाः स्वरूपं कृत्वा प्राविशत्त्वां वनस्पते।
अतस्तर्ह्येकविंशतिधा संभरामि सुसम्मतम् ॥ ९ ॥
भृगुवाक्यं दधेद्विप्र उपदेशो महात्मनः।
अन्यः पूर्वोदितैर्मन्त्रैः सर्वो वा मूलमन्त्रतः ॥ १० ॥
नत्वा सोपायनात्मानं गुरवे स्वं समर्पयेत्।
अनुग्रहं गुरोर्लब्ध्वा ग्राह्यं पादावनेजनम् ॥ ११ ॥
अकालमृत्युहरणं सर्वव्याधिविनाशनम्।
विष्णोः पादोदकं पीत्वा सर्वपापैः प्रमुच्यते ॥ १२ ॥

परमानन्ददं दिव्यं दिव्यलीलानुभावुकम्।
श्रीगुरोश्चरणाम्भोजामृतं पेयं सदैव हि ॥१३॥
ततः पुण्ड्रं दधेद्भाले हर्यर्पितसुगन्धकैः।
द्वादशाङ्गेषु पूर्वोक्तविधिना मन्त्रपूर्वकम् ॥१४॥
ऊर्ध्वपुण्ड्रं हरेः श्रेष्ठं तत्सौभाग्यविभूषणम्।
धारितं वैष्णवैर्नित्यं धारणान्मुक्तिदो भवः ॥१५॥
शङ्खचक्रगदापाणे द्वारकानिलयाच्युत।
गोविन्द पुण्डरीकाक्ष मां पाहि शरणागतम् ॥१६॥
धारयेदूर्ध्वपुण्ड्राणि परैर्वा नामभिर्हरेः।
चक्रतीर्थजमृत्स्नाभिर्मुद्राषट्कं तु धारयेत् ॥१७॥
गोपीचन्दन पापघ्न विष्णुदेहसमुद्भव ।
चक्राङ्कित नमस्तुभ्यं धारणान्मुक्तिदो भव ॥१८॥
ततो हरेर्गुरोर्वापि प्रसादं प्राशयेत्सुखम्।
कृत्वा पाणिगतं भव्यं प्रणम्य च यथाविधि ॥१९॥
ब्रह्माद्याः सनकाद्याश्च नारदाद्या महत्तमाः।
हरिभुक्तावशिष्टानां सर्वे गृह्णन्ति वैष्णवाः ॥२०॥
वैष्णवं च ततो नाम दासान्तमवरश्चरेत्।
हरिपूजादिनियमं धारयेच्च ततः परम् ॥२१॥
न धारयति यो दीक्षां वैष्णवीं पापनाशिनीम्।
नास्ति संसारतो मुक्तिस्तस्य साधनकोटिभिः ॥२२॥
दीक्षा यथा हि सावित्र्या द्विजानां समुदाहृता।
तथैव वैष्णवी दीक्षा स्वैः साकं समुदाहृता ॥२३॥
गर्भतोऽप्युपदेशः स्याज्जन्मतो व्रततोऽपि वा।
यदा कदाप्यसौ कार्या प्रपत्तिर्वापि सद्गुरोः ॥२४॥
स्ववर्णाश्रमधर्मैस्तु कृतैस्तु बहुजन्मभिः।
सौरी भक्तिर्भवेत्पश्चाच्छाक्ती गाणपती ततः ॥२५॥

शैवी ततस्ततो ब्राह्मी ततो निष्कामशेमुषी।
ततश्चापि सदाचारो विरक्तिः शुद्धभावना ॥ २६ ॥
ततश्च सद्गुरोर्लाभो दीक्षा चाथ सुवैष्णवी।
ततो महात्मनां सङ्गस्ततो भक्तिर्दृढा हरौ ॥ २७ ॥
फलरूपा ततो भक्तिर्भवेत्सा प्रेमलक्षणा।
यदा महात्मनां मन्त्रः परमानन्दसंस्थितिः ॥ २८ ॥
स्वाराज्यसिद्धिः सा प्रोक्ता सा प्रोक्ता कृतकृत्यता।
अतो हि वैष्णवी दीक्षा ग्राह्या सर्वप्रयत्नतः ॥ २९ ॥
एतस्या धारणात्सद्यो जीवन्मुक्तो भवेन्नरः।
अन्याग्रासेन तस्यास्ति व्यवहारो नृणां कृते (?) ॥ ३० ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तृतीयांशे
तृतीयोऽध्यायः ॥ ३ ॥

## ॥ अथ चतुर्थोऽध्यायः ॥

श्रीशाण्डिल्य उवाच-

तुलसीकाष्ठमाहात्म्यं यथोक्तमृषिसत्तमैः।
तत्प्रोच्य तेन संक्षेपात्तिलकादेस्ततः परम् ॥ १ ॥
न धारयति यो मालां तस्य सत्कर्म निष्फलम्।
तस्माद्धार्या प्रयत्नेन अन्यथा पतितो भवेत् ॥ २ ॥
पापं कोटिगुणं तस्य पुण्यमेकगुणं भवेत्।
विपरीतं भवेच्चैतत् तुसलीकाष्ठवर्जने ॥ ३ ॥
न स्पृशन्ति हि पापानि तुसलीकाष्ठधारिणम्।
पुण्यानि सर्वतोऽप्येनमाश्रयन्ति स्वके तनौ ॥ ४ ॥
वर्णाश्रमाचारवता धार्या तुलसिमालिका।
शिखोपवीतवन्नित्या जगावाथर्वणश्रुतिः ॥ ५ ॥
सर्वेषामेव लोकानां भगवद्भक्तिमिच्छताम्।
कण्ठे तुलसिकाष्ठस्य माला धार्या सदैव हि ॥ ६ ॥
नातः परं परं श्रेयः साधनं श्रुतिसम्मतम्।
धारणं तुलसीकाष्ठमालाया मुनिसत्तमाः ॥ ७ ॥
श्रौते स्मार्ते च पौराणे मिश्रके तान्त्रिकेऽपि च।
धार्या तुलसीकाष्ठस्य माला परमपावनी ॥ ८ ॥
साद्गुण्यं विगुणो गच्छेत् सद्गुणो क्षम्यतामपि।
धर्मः सोऽपि हरेः प्रीत्यै स्यात्तुलस्या इति श्रुतम् ॥ ९ ॥
स्नाने दाने जपे होमे स्वाध्याये पैतृके तथा।
वैश्वदेवे च दैवे च अन्यस्मिन्नपि वैदिके ॥ १० ॥
प्रायश्चित्तेऽथ सन्ध्यासु पूर्ते दीक्षादिकर्मणि।
तुलसीमालया हीनो नाधिकारी प्रकीर्तितः ॥ ११ ॥

तुलसीमालया हीनो यत्सत्कर्म समाचरेत्।
तदा तु (न) सम्भवेदेव इत्युक्तमृषिसत्तमैः॥ १२॥
पितृस्थाने सुरस्थाने तुलसीकाष्ठधारिणम्।
भोजनं विष्णुपादीयश्राद्धस्य फलमश्नुते॥ १३॥
तुलसीमालया युक्तो यत्राश्नाति द्विजोत्तमः।
सिक्थे सिक्थेऽश्वमेधस्य यजमानोऽश्नुते फलम्॥ १४॥
देवकार्येषु सर्वेषु पितृकार्ये विशेषतः।
भोजयेद् वैष्णवान् विप्रान् निष्कामेषु विशेषतः॥ १५॥
वैष्णवेषु प्रभुक्तेषु तुलसीकाष्ठधारिषु।
सम्पूर्णं तद्भवेच्छ्राद्धं विगुणं चापि फल्गुवत्॥ १६॥
विहाय वैष्णवं योऽन्यं श्राद्धे सम्भोजयेद् द्विजम्।
न तस्य तद्भवेच्छ्राद्धं पितृणां चात्मनो मुदे॥ १७॥
दैवकार्येषु ये केचिद्ग्राह्या विप्रा न पैतृके।
वरं श्राद्धं न कर्तव्यं न वै ग्राह्यो ह्यवैष्णवः॥ १८॥
गुणवत्सु च विप्रेषु नियुक्तेषु सुकर्मसु।
वैष्णवं कल्पयेन्मुख्यं तदनर्हेऽपि साक्षिणम्॥ १९॥
वैष्णवः प्रथमः पूज्यो यथा देवो रमापतिः।
तं तिरस्कृत्य विद्वांसं सुकृतात्स्वात् स हीयते॥ २०॥
सर्वेषामेव वर्णानामाश्रमाणां मुनीश्वराः।
कार्या वै वैष्णवी भक्तिस्तुलसीकाष्ठधारणम्॥ २१॥
ब्राह्मणस्य विशेषेण संन्यस्तस्य विशेषतः।
यतो नारायणेत्येवं तस्य वाक्यमुदाहृतम्॥ २२॥
गृहिणोऽन्येषु देवेषु प्रसक्तस्योदितो विधिः।
धृतव्रतानां सर्वेषामेको ध्येयो हरिः प्रभुः॥ २३॥
देवानां तु हरेर्भक्तिः पितृणां चापि वेधसः।
मुनीनां च शिवे भक्ती रुद्रे भक्तिस्तु रक्षसाम्॥ २४॥

नृणां चैव रमाभक्तिर्यतः स्वानुगुणे रुचिः।
देवेषु सत्त्वप्रकृती राजसी पितृकेषु च॥ २५॥
दैत्येषु तामसी बुद्धिः प्रकृत्यायं विनिर्णयः।
वेदवेदान्तनिष्ठा ये निष्कामाश्च मुमुक्षवः॥ २६॥
शौचाचारपराः स्निग्धा हरिभक्ता दिवौकसः।
विपरीता नरा दैत्याः पैतृका राजसा नराः॥ २७॥
काम्ये कर्मणि युक्ताश्च लौकिकाः कामलम्पटाः।
ये भजन्ति हरिं चान्ये तेषां दैवी मतिर्भवेत्॥ २८॥
पुरुषः पुरुषैः पूज्यः स्त्रीभिः स्त्रीः षण्ढकैः स चेत्।
पुरुषो विष्णुरीशानः स्त्रीर्वेधाश्चैव षण्ढकः॥ २९॥
महापापानि पापानि अतिपापानि यान्युत।
उपपापानुपापानि प्रकीर्णैनांसि यानि च॥ ३०॥
यानि चार्द्राणि शुष्काणि स्थूलसूक्ष्माणि यान्युत।
मनोवाक्कायजातानि भूतभाविभवानि च॥ ३१॥
तेषां मूलानि नश्यन्ति तुलसीकाष्ठधारणात्।
तुलसीगात्रसंस्पर्शात्पापराशिर्विनश्यति॥ ३२॥
वृन्देति सुरसा चेति तुलसीति प्रकीर्तिता।
हरिप्रियेति नाम्नापि हन्ति पापानि सा नृणाम्॥ ३३॥
ख्याता वृन्देति गोलोके सुरसेति सुरालये।
तुलसीत्यपि भूर्लोके एवं सापि त्रिधा मता॥ ३४॥
तोषयित्वा महाविष्णुं लभते मुक्तिमच्युत।
यस्याः सम्बोधतो लोकस्ततः सा तुलसी मता॥ ३५॥
तुच्छीकरोति संसारं मुक्तिं लाति अभीप्सिताम्।
विनातिभक्तिं नृहरेस्तुलसी तेन कीर्तिता॥ ३६॥
मा तु प्रोक्ता रमा देवी अलो भूषणवाचकः।
रमा वा भूषिता यस्मात् तस्मान्मालोदिता बुधैः॥ ३७॥

सर्वैः कुसुमजातैश्च इयं विष्णोरतिप्रिया।
तुलसीधारिणो लोकाः श्रूयन्तेऽतो हरेः पदे॥ ३८॥
यदा तु वैष्णवी सृष्टिः सम्भूता सत्त्वतो हरेः।
तस्यां जाता प्रिया वृन्दा भक्तिस्तां तु समाश्रिता॥ ३९॥
वस्वक्षरो महामन्त्रैस्तस्यै श्रीहरिणार्पितः।
अतो भक्तजनैर्वन्द्या पूज्या धार्या प्रयत्नतः॥ ४०॥
तामेव देवताः सर्वाः समाश्रित्य हरेः प्रियाः।
तामेव मुनयः सर्वे समाश्रित्य हरेः प्रियाः॥ ४१॥
तामेव मानवा देवाः सनकाद्याः समाश्रिताः।
भजन्ति देवदेवेशं श्रीमुकुन्दमनामयम्॥ ४२॥
ततो धृता जनैः सर्वैः पारम्पर्यत्वमागता।
स्वस्वाम्नायानुगुणतः काले कालेऽधिकारतः॥ ४३॥
असुराणां विमोहाय त्याजिता सा यदा सुरैः।
ततः प्रभृति तस्यास्तु प्रचारो विरलोऽभवत्॥ ४४॥
तस्मान्महद्भिः संधार्या कण्ठे तुलसिमालिका।
अन्यथा सत्पथातीतो निरयं याति दारुणम्॥ ४५॥
प्राचीनैः सुमहत्पुण्यैः कृतैर्वर्णाश्रमाश्रितैः।
देवानां जायते श्रद्धा धारणे तुलसीस्रजः॥ ४६॥
अनुग्रहं विना साक्षान्महाविष्णोर्महात्मनाम्।
तुलस्या धारणे श्रद्धा जायते न कदाचन॥ ४७॥
यदैव भाविनी मुक्तिस्तज्जन्मन्येव सन्नृणाम्।
तुलसीधारणे वेदसिद्धे श्रद्धा तदा भवेत्॥ ४८॥
एतदेव हि ब्राह्मण्यमेतदेव शिरोव्रतम्।
एतच्छायाव्रतं ज्ञानं मुक्त्यै वृन्दाविधारणम्॥ ४९॥
असुराणां पुरा चीर्णैः पापैर्दुर्वासनाजुषाम्।
तुलसीधारणे विष्णोः प्रिये श्रद्धा न जायते॥ ५०॥

मुख्यं भागवतं चिह्नं तुलसीकाष्ठधारणम्।
हरेः प्रियतमं तद्धि तद्विहीनो न वैष्णवः॥ ५१ ॥
तुलसी विधृता येन हरिस्तेन धृतो भवेत्।
भक्तिरूपा हि सा देवी भक्त्यधीनो हरिर्यतः॥ ५२ ॥
एवं हि श्रुतिभिर्गीतं मुनिभिश्च महात्मभिः।
तस्माद्धार्या प्रयत्नेन तुलसीकाष्ठमालिका॥ ५३ ॥
गुरोर्हरेः प्रसादेन लब्ध्वा तु तुलसीस्रजम्।
यो वहेत्कण्ठदेशे तु स प्रीणाति हरिं गुरुम्॥ ५४ ॥
हरिणा स्वयमेवोक्तं पुरुषार्थं तु धारणम्।
क्रत्वङ्गं मुनिभिः प्रोक्तं तुलस्या वेदसम्मतम्॥ ५५ ॥
भगवद्भजनाङ्गं तु जगुर्भागवतोत्तमाः।
तत्रावश्यकता प्रोक्ता पूर्वं पूर्वं महोदयम्॥ ५६ ॥
द्विजानां सर्वदा धार्या वैष्णवानां विशेषतः।
अन्येषामपि सन्धार्या तुलसीकाष्ठमालिका॥ ५७ ॥
ऊर्ध्वपुण्ड्रं विना चक्रशङ्खमुद्रां विना हरेः।
विना श्रीतुलसीमालां कृतं पूजादिकं वृथा॥ ५८ ॥
विना मृदोर्ध्वपुण्ड्रेण वृन्दाकाष्ठस्रजं विना।
पञ्चमुद्रां विना विष्णोः पूजनं द्रोहमस्य वै॥ ५९ ॥
मालाहीनेन कण्ठेन न स्थेयं लवमप्यथ।
न संभाष्यं न चाचम्यं नाप्यर्च्यं नापि संस्वपेत्॥ ६० ॥
शैवा रुद्राक्षघटितां पद्माक्षैर्विधिपूजकाः।
शाक्तास्तु विद्रुमाकीर्णां गणेशा गजदन्तकैः॥ ६१ ॥
भास्कराः स्फटिकाक्षैस्तु तापसा कुशग्रन्थिभिः।
कौबेरा मुनयः स्वर्णैर्माभक्ताश्च यथायथम्॥ ६२ ॥
केवलं तुलसीमालां वैष्णवा भिक्षुका अपि।
विरक्तवृत्तिनश्चान्ये धारयेयुरितीरितम्॥ ६३ ॥

धारणे च जपे दाने तुलस्याश्चातुलं फलम्।
प्रभावमस्या देव्यास्तु नालं वक्तुं चतुर्मुखः॥ ६४॥
मुनीनां मञ्जरीमाला माला पत्रैर्दिवौकसाम्।
तुलसीकाष्ठमाला तु नृणां धार्या सदोदिता ॥ ६५॥
कृतेऽस्या बीजजं दाम त्रेतायां मञ्जरीभवम्।
द्वापरे दलदामास्ति काष्ठदाम कलौ स्मृतम्॥ ६६॥
शिरसो मञ्जरीदाम दलदाम गले मतम्।
गलाद्धृदयपर्यन्तं तुलसीकाष्ठमालिका॥ ६७॥
ध्याने स्यान्मञ्जरीदाम पत्राणां पूजनोत्तरम्।
काष्ठदाम सदा धार्यमाजन्म मरणावधि॥ ६८॥
एकादशीव्रतं यद्वद् गङ्गास्नानं यथा पुनः।
तथैव तुलसीमाला सर्वेषां पावनी मता॥ ६९॥
सौरे वा गाणपत्ये वा शैवे वा शाक्तिकेऽपि वा।
अन्यदेवार्चने वापि ब्राह्मे वापि च संश्रितः॥ ७०॥
श्रौतस्मार्तक्रियायां वा तीर्थस्नानादिकर्मणि।
दाने वा तपसि श्राद्धे ज्ञाने कर्मणि चापरः॥ ७१॥
स्वाध्यायाध्यापने राजासने धर्मप्रचारणे।
ब्रह्मचर्ये च गार्हे च वन्ये यायावरव्रते॥ ७२॥
पारलौकिकसत्कृत्ये यत्र कुत्रापि संस्थितः।
तुलसीमालया युक्तस्तस्यानन्तफलं भवेत्॥ ७३॥
एतच्छिरोव्रतं चीर्णमेतद्वेदव्रतं वरम्।
पारम्पर्यकृतं चैतत् सम्प्रदायो गुरोरदः॥ ७४॥
गुरुभक्तिरियं लोके देवभक्तिरथापि वा।
प्रव्रज्य तीव्रवैराग्यज्ञानं चौपनिषद्भवम्॥ ७५॥
इयं साधनसम्पत्तिरियमद्वैतवासना।
अहंब्रह्मात्मिका बुद्धिः सर्वं ब्रह्मेति या परा॥ ७६॥

दासोऽहमिति या चान्या तदीयोऽहमितीतरा ।
केवलोऽहं तथा भावो योग्य एवंविधश्च यः ॥ ७७ ॥
तारकः पावकश्चापि मन्त्रो वाराणसी तथा ।
या प्रेमलक्षणा वृत्तिः कक्षा या परमा पुनः ॥ ७८ ॥
यत्किञ्चित्कारणं मुख्यं मुक्तेः स्वाभीष्टसम्मतेः ।
श्रीशस्यानुग्रहं साक्षाद्देवानां समुपस्थितम् ॥ ७९ ॥
तद्धारणं तुलस्यास्तु श्रीगोपीचन्दनस्य च ।
ब्राह्मणः श्रोत्रियो विद्वान् षट्कर्मी शुद्धमानसः ॥ ८० ॥
क्षत्रियो दीक्षितः शुद्धो ब्रह्मण्यः सत्यसङ्गरः ।
धर्मयुद्धकरः शूरः प्रजापालनतत्परः ॥ ८१ ॥
धर्मक्रियारतः शुद्धः संस्कृतोऽपि वणिग् व्ययी ।
शूद्रः सत्सेवको हिंसाविमुक्तो गुरुमाश्रितः ॥ ८२ ॥
नारी नरो वा षण्ढो वा पशुर्वा सुद्विजोऽपि वा ।
सर्वेषामधिकारोऽस्ति तुलसीकाष्ठधारणे ॥ ८३ ॥
पापिनां नाधिकारोऽत्र पतितानां स्वजातितः ।
ऊर्ध्वपुण्ड्रं च तुलसीकाष्ठमालां च पावनीम् ॥ ८४ ॥
हरेरेकाश्रयं मुक्त्वा न गतिः कोटिसाधनैः ।
हित्वैव तुलसीमालामूर्ध्वं पुण्ड्रं हरिं गुरुम् ॥ ८५ ॥
प्रपत्तिं च हरेस्त्यक्त्वा त्यक्त्वाचारं च वैष्णवम् ।
श्रीमद्भागवतं शास्त्रं सद्गतैर्नान्यसाधनैः ॥ ८६ ॥
न धार्या तुलसीं हित्वा माला रत्नमयी ह्यपि ।
तया सह प्रशंस्यन्ते माला अन्या यथायथम् ॥ ८७ ॥
तुलसीकाष्ठजां मालां हित्वान्यस्या गतिर्न हि ।
तस्माद्वर्ज्या प्रयत्नेन मालां तुलसीजां विना । ८८ ॥
सदा धार्या सदा धार्या तुलसीकाष्ठमालिका ।
सदा वर्ज्या सदा वर्ज्या मालान्यद्गुणसम्भवा ॥ ८९ ॥

ये कुतर्कपरा दुष्टाः सदाचारवचस्तथा।
अनादृत्य वदन्तीह नेदं धर्मं सनातनम्॥ ९० ॥
वचांसि योजयन्त्यत्र अन्यथैव स्वयुक्तितः।
ऊर्ध्वपुण्ड्रं च तुलसीधारणं हरिपूजनम्॥ ९१ ॥
निषेधन्ति स्वपाण्डित्यं स्थापयन्ति स्वशिष्टताम्।
तान्पापिष्ठान्नरान्विद्यादासुरानन्त्यजोद्भवान्॥ ९२ ॥
ऊर्ध्वपुण्ड्रं च तुलसीधारणं हरिपूजनम्।
एषां निषेधे नरको यावदाभूतसंम्प्लवम्॥ ९३ ॥
एषां संत्रोटने सर्वनरकार्तिः पृथक् पृथक्।
एषां च सम्परित्यागे ब्रह्महा जायते नरः॥ ९४ ॥
मूलार्णं कोटिधावृत्य तस्मात्पापात्प्रमुच्यते।
तुलस्यास्तु परित्यागो हरेरपि गुरोरपि॥ ९५ ॥
नरकान्ते गण्डमाली जायते च मुखेभगम्।
नृपैर्हन्यो द्विजैस्त्याज्यस्तुलसीस्रग्निषेधकः॥ ९६ ॥
गङ्गास्नानरतो नित्यं हरेरपि च पूजकः।
तुलसीधारिणं निन्दन्न ज्ञेयः साधुसम्मतः॥ ९७ ॥
यः समलङ्कृतो दाम्ना हरेर्नाम्नापि वा नरः।
तत्कुलं यमनिर्मुक्तं विष्णुलोके महीयते॥ ९८ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तृतीयांशे तुलसीमाहात्म्यवर्णनं नाम चतुर्थोऽध्यायः॥ ४ ॥

## ॥ अथ पञ्चमोऽध्यायः ॥

अथास्या धारणे स्थानप्रयोजनविधिक्रमान्।
वक्ष्यामि निर्णयं तेषां पारम्पर्यक्रमागतम् ॥ १ ॥
कण्ठे शिरसि बाह्वोश्च कर्णयोः करयोर्हृदि।
तुलसी धार्यते येन स ज्ञेयो विष्णुना समः ॥ २ ॥
शिखायां ब्रह्मरूपैकमापीडे सफलायुषः।
वर्षाणां शतकं ज्ञेयं शास्त्रषट्कं च श्रोत्रयोः ॥ ३ ॥
वेदैः स्मृतिपुराणाभ्यां षड्भिस्त्रेधास्य संस्कृतिः।
आकण्ठहृदयं तस्या अह्नां सार्थकता सदा ॥ ४ ॥
यज्ञसूत्राङ्गुलभुजां देवानां तन्मितन्द्रितम् (?)।
दैहिकी मानसी शुद्धिः शेषं दोः करयोर्युगे ॥ ५ ॥
त्रिधा त्रिधा त्रिलोक्यां वै कामचाराय दृश्यते।
एवंप्रकारा विज्ञेया परेऽपि मुनिनोदिताः ॥ ६ ॥
सहस्रैकमितं चैव तुलस्या मणिका दधन्।
साक्षाद्धरिर्भवेदत्र एवं तुलसिधारणे ॥ ७ ॥
धारयेत्सर्वदा कण्ठे करेऽपि च हरिं भजेत्।
एकविंशतिधा धार्या सप्तत्रिकसुमालया ॥ ८ ॥
इत्येवं बहुधाख्यातं धारणं तुलसीस्रजः।
आकारैः श्रीपतेरस्य अस्त्रैर्वा मणिकार्जुभिः ॥ ९ ॥
मणिश्चैको मूर्ध्नः कनकजटितः शेखरगतः
शतं षट्षट्श्रोत्राभरणयुगलेऽथो निजगले।
दधन् षड्भिस्त्रेधा श्रुतिभिरुदितानां त्रिशतकं
हरिः स्याद् बृन्दाया भुजकरयुगे षट्शतमितम् ॥ १० ॥

अथैका चैकविंशत्या माला परमपावनी।
सर्वासामपि मालानां तुलसीमालिका वरा॥ ११॥
मणिकानां सहस्रैस्तु माला कार्या महीयसी।
तथा जपेद्धरेर्मन्त्रं प्रीणातु पातु जगद्गुरुम्॥ १२॥
सुवर्णमणिकाष्ठानां फलानां प्राणिनामपि।
माला पञ्चैव संक्षेपात्तासु काश्चिद्वराः स्मृताः॥ १३॥
हेम्नो माला सुवर्णेषु सर्वास्ता मणिजातिषु।
काष्ठेषु च पटीरस्य कदम्बस्य कुशस्य च॥ १४॥
पुण्यद्रुमाणां चान्येषां तीर्थजानामुदाहृता।
तुलसीकाष्ठमाला तु भक्तिरूपा न काष्ठजा॥ १५॥
यथैव जाह्नवीतोयं यथा देवो जनार्दनः।
नरा वेदविदो विप्रास्तथैव तुलसीद्रुमम्॥ १६॥
यो गृह्णाति न काष्ठेषु तुलसीं जाह्नवीं जले।
गुरुं चापि नरेष्वस्य पुण्यं कुञ्जरशौचवत्॥ १७॥
पवित्रा मालिका विष्णोः प्रिया भक्तिस्वरूपिणी।
श्रुतिस्मृतिसदाचारपरैर्धार्या सदैव सा॥ १८॥
मालायुग्मं तथा कण्टे स्निग्धं सूक्ष्मतमं वहेत्।
करमाला जपे धार्या अन्यास्ताः पुण्यकर्मणि॥ १९॥
तुलसीदलजा माला धात्री फलकृता ह्यपि।
शुचिकाले तु संधार्या पुण्यकाले विशेषतः॥ २०॥
दाने श्राद्धे च पूजायामवश्यं तुलसीदलम्।
वृथा दानं वृथा श्राद्धं वृथा पूजा च तां विना॥ २१॥
तुलस्या सहितं दत्तं तच्छ्रीकृष्णस्य तुष्टये।
तुलस्या सहितं दानं तद्दानं च सुखाप्तये॥ २२॥
सुवर्णगुम्फितां मालां मणिभिः सङ्कुलीकृताम्।
ददाति यो द्विजाग्रेभ्यः स चिरायुः सुखी भवेत्॥ २३॥

तुलसीदलसंयुक्तं दानं सर्वं प्रशस्यते।
तुलसीमालया युक्तस्ततः पात्रतमो मतः॥ २४॥
दत्तानेन मही कृत्स्ना सुवर्णमणिसंकुला।
तुलसीकाष्ठमाला हि येन दत्ता द्विजातये॥ २५॥
तुलसी तु सदाभ्यर्च्या कार्तिके तु विशेषतः।
वृन्दाया एव मासोऽसौ राधादामोदरप्रियः॥ २६॥
येन प्रमादतो मौढ्यात्स्वधर्मज्ञानतोऽपि वा।
न धारिता येन वृन्दाऽसौ द्राक् सम्प्रार्थ्य धारयेत्॥ २७॥
जीवपोतकरुद्राक्षधात्रीणां फलजा वराः।
पुत्रवित्तेषणालोकेषणानां साधकाश्च ताः॥ २८॥
प्राणिजासु च दन्तघ्ना करे करभवा तथा।
करमालैव निष्कामा वैदिकी सहजस्थिता॥ २९॥
यस्य गेहे न तुलसी शालग्रामो न गौहरिः।
शास्त्रं भक्ताश्च तद्गेहं फेरुराजगृहोपमम्॥ ३०॥
तुलसीकाष्ठमालाभिर्भूषितो वाचयेत्कथाम्।
उपदेशस्तस्य ग्राह्यो धर्ममूलं च दृश्यते॥ ३१॥
तुलसीकाष्ठमालाभिर्भूषितो व्रतमादिशेत्।
व्रतं ग्राह्यं तथा भूत्वा मखे चापि तथा विधिः॥ ३२॥
तिर्यक्पुण्ड्रं भस्मनोर्ध्वपुण्ड्रं गोपीमृदा भवेत्।
श्रीशप्रसादवृन्दामृत्पुण्ड्रं सर्वत्र कीर्तितम्॥ ३३॥
वटोर्ब्रह्मद्रुदण्डं च यतेर्वेणुभवं तथा।
सर्वेषां तुलसीदण्डं कण्ठे धार्यं करेऽपि वा॥ ३४॥
वसेद्वृन्दावने रम्ये विष्णुव्रतपरायणः।
तारयेत्सकलं विश्वं किं पुनः स्वकुलं न हि॥ ३५॥
प्रचरन्ति च यद्राष्ट्रे पुरे वा मन्दिराजिरे।
राजानं तारयन्त्येते तुलसीकाष्ठधारिणः॥ ३६॥

राज्यासनं समासाद्य वृन्दादाम दधेद्गले।
तस्यैव पापं न प्रोक्तमन्यथा नरकं ध्रुवम् ॥ ३७ ॥
यं धृत्वा द्रुहिणोऽस्राक्षील्लोकान् पुण्यमयान् सुरान्।
विमुच्यैव तु पापिष्ठानसुरान्स ससर्ज ह ॥ ३८ ॥
रुद्रस्तुलसिमाश्रित्य हरेः साम्यं समाश्रितः।
तस्याः कवचसन्नद्धः स्कन्दो जिग्ये सतारकान् ॥ ३९ ॥
तारकस्य वधार्थं तु शिवेन तनयो गुहः।
भूषितस्तुलसीकाष्ठैर्माहात्म्यं प्रकटीकृतम् ॥ ४० ॥
ये चोर्ध्वपुण्ड्रतिलकास्तुलसीकाष्ठधारिणः।
श्रीमन्नारायणपरास्ते शैवाः शिवसंस्तुताः ॥ ४१ ॥
येऽर्चन्ति परमं विष्णुं शङ्खचक्रादिचिह्निताः।
ते शैवा वैष्णवास्ते च गोपीचन्दनचर्चिताः ॥ ४२ ॥
येषु प्रसीदति हरिर्जगदात्मा सनातनः।
तेषु प्रसीदति हरो ब्रह्मेन्द्रप्रमुखैः सुरैः ॥ ४३ ॥
तुलसी त्रिविधा प्रोक्ता श्यामा श्वेता वनोद्भवा।
कृष्णा श्रीकृष्णभार्यायाः श्रीहरेः प्राणवल्लभा ॥ ४४ ॥
कृष्णा सा पार्वती भूता शुक्ला विष्णुभवा शुभा।
उभयोः सङ्गमं श्रेष्ठं कृष्णा प्रियतमा हरेः ॥ ४५ ॥
कृष्णा कृष्णैकसंधार्या नान्यकर्मणि चोदिता।
शुक्ला चारण्यसम्भूता सर्वकर्मणि सा शुभा ॥ ४६ ॥
माभवा मालती प्रोक्ता गौरी भूततमी मता।
धात्रीजामलकीपुण्यास्तिस्रो विष्णोः प्रिया इमाः ॥ ४७ ॥
ये निन्दन्ति जना एतास्ते पापाः पापनिष्ठया।
न तेषां मुखमालोक्यं न श्रद्धेयं वचस्तथा ॥ ४८ ॥
आराधिता पुरा गौर्या ददौ बीजं स्वकं तदा।
ततो भूमितले प्राप्ता गौरी भूततमी मता ॥ ४९ ॥

श्वेतामृतरसैः सिक्ता पार्वत्या ह्यतिपावनी।
दत्ता या हरिणा पूर्वं पार्वत्यै प्रयतात्मना॥ ५०॥
वनोद्भवा तु देवेभ्यो या दत्ता सिन्धुमन्थने।
हालाहलविषज्वालां यतः सेहे महेश्वरः॥ ५१॥
शिरसो धारणान्मोक्षः कीर्तिर्लोके तु कर्णयोः।
कण्ठे धृत्वा हरेर्लोकं हृदि बाह्वोः स्ववाञ्छितम्॥ ५२॥
यस्या संधारणात्सद्यः क्षीणतां याति पातकम्।
पूतं भवति तद्गात्रं पात्रतामपि गच्छति॥ ५३॥
त्रुटितां मलसन्दिग्धां लिप्तां वाशुचिवस्तुभिः।
विमलीकृत्य संधार्या तदन्या वापि तत्क्षणे॥ ५४॥
शावशुद्धौ रजःशुद्धौ प्रायश्चित्तं ह्युपक्रमेत्।
उपरागादिशुद्धौ च शुद्धां वापि परा दधेत्॥ ५५॥
मृत्युकाले तु सावश्यं धार्या मृत्युः पदे पदे।
तस्मात्सदैव संधार्या तुलसीकाष्ठमालिका॥ ५६॥
कारागारे निरुद्धोऽपि आघाते वा नियोजितः।
अभक्ष्यभक्षणे चापि गवादिपशुहिंसने॥ ५७॥
म्लेच्छैर्दास्ये नियुक्तो वा व्याधैर्वापि विपाटितः।
न जह्यात्तुलसीमालां प्राणैरपि गरीयसीम्॥ ५८॥
विघ्नभूतानि चात्यर्थं कामतो वा सुरां पिबन्।
अगम्यागमनं कुर्वन् न लिप्येत्सुरसाश्रितः॥ ५९॥
मूत्रोत्सर्गे मलोत्सर्गे कुर्याद्रागविषार्तिगः।
कर्णे वापि दधेद्वामे ऋतौ पृष्ठावलम्बिनीम्॥ ६०॥
कदापि च कथञ्चिद्वै न संत्याज्या महात्मभिः।
तां त्यजन् दीयते धर्माद् गुरुद्रोही भवेद् ध्रुवम्॥ ६१॥
सुरसाऽरण्यसम्भूता परमा पावनी मता।
यस्याः प्रसङ्गमात्रेण पुण्डरीकोऽप्यगाद्दिवम्॥ ६२॥

पुण्डरीकाभिधो व्याधस्तुलसीवनमाश्रितः।
चकार मृगयां नित्यं लुब्धो हिंसाविहारवान् ॥ ६३ ॥
एकदा जलपानार्थं तत्र व्याघ्रः समागतः।
जघान तं स बाणेन तं जघान स सङ्गतः ॥ ६४ ॥
यमदूतान्निवार्यैव विष्णुदूतैः समुद्धृतः।
मांसानां भक्षको हिंसाविहारोऽप्यशुचिः कुधीः ॥ ६५ ॥
तुलसीकाष्ठसङ्गेन व्याधः प्राप्तो हरेः पदम्।
किं पुनः श्रद्धया वृन्दां धारयेद्यः सदा नरः ॥ ६६ ॥
गर्भे प्रसूतौ विधृता वैष्णवं जनयेत्सुतम्।
मृत्युकाले धृता चैव वैष्णवं नयते पदम् ॥ ६७ ॥
रक्षार्थं सर्वलोकानामियं देवेन निर्मिता।
एतस्या धारणादत्र अपमृत्युर्न जायते ॥ ६८ ॥
महारोगा विनश्यन्ति पुत्रवित्तादिकं लभेत्।
भूतप्रेतगृहादिभ्यो बालानां रक्षणं भवेत् ॥ ६९ ॥
नराणां चैव नारीणां कृत्यादिभयहृत्परम्।
सर्वसद्गुणमाहात्म्यं तुलसीकाष्ठधारणे ॥ ७० ॥
यथैव पूजनं विष्णोः यथैवातिथिपूजनम्।
तथैव तुलसीकाष्ठधारणं पुण्यकारणम् ॥ ७१ ॥
यो दद्यात्तुलसीकाष्ठं विप्राय हरिसेविने।
ब्रह्माण्डशतकोटीनां दानस्य फलमश्नुते ॥ ७२ ॥
तुलसीकाष्ठमालां यो दद्याद्धेम्नापि संयुताम्।
लक्ष्मीनारायणं देवं स करोति वशं ध्रुवम् ॥ ७३ ॥
यथा सुवर्णं पद्माया रुद्राक्षो वा महेशितुः।
तथैव तुलसीकाष्ठं हरेर्विश्वात्मनः प्रियम् ॥ ७४ ॥
गौरीभूः तुलसी प्रोक्ता हिरण्यं हरवीर्यजम्।
तयोस्तु सङ्गमं यत्र तत्र मुक्तिपदं स्वयम् ॥ ७५ ॥

तुलस्यां वसते विष्णुः कनके तु रमेश्वरी।
तस्मात्सुवर्णसंयुक्ता मालिका सर्वकामदा॥ ७६॥
पुत्रदा वित्तदा चापि आयुरारोग्यदा सदा।
सुवर्णग्रथिता माला योषित्सौभाग्यदायिनी॥ ७७॥
सुवर्णमणिभूषाभिः तुलसीमालिका शुभा।
साम्राज्यकामो विभृयात्तथा सौभाग्यकामुका॥ ७८॥
हरगौरीमयी ह्येषा तौ यथा श्रीहरेः प्रियौ।
तथैव वल्लभा विष्णोर्धार्या वै वशमिच्छुभिः॥ ७९॥
द्वादशैः सप्तविंशत्या चतुर्भिश्च शतार्द्धकैः।
अष्टोत्तरशतैर्माला मणिकैर्विजये मता॥ ८०॥
तुलसीमालया जप्तं तज्जप्तं हरिसन्निधौ।
हरेस्तु सन्निधौ जप्तं तदनन्तफलप्रदम्॥ ८१॥
सर्वासामेव मालानां रुद्राक्षादिभुवामियम्।
तुलसीमालिका श्रेष्ठा निर्गुणा मोक्षदायिका॥ ८२॥
शेषः सहस्रवदनैर्यस्या माहात्म्यमीरयन्।
स पश्यति नो पारं वेदे वृन्दा हरेः प्रिया॥ ८३॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तृतीयांशे तुलसीमालामाहात्म्यवर्णनं नाम पञ्चमोऽध्यायः॥ ५॥

## ॥ अथ षष्ठोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

अथ वैष्णवमुद्राणां धारणस्य च गौरवम् ।
श्रुतिस्मृतिपुराणैश्च आगमैरुक्तमुच्यते ॥ १ ॥
शङ्खचक्रगदापद्मनाममुद्रेति पञ्चकम् ।
नाममुद्रा द्विधा तत्र तदा षट्कं प्रकीर्तितम् ॥ २ ॥
मुद्रास्तत्र द्विधा शीतला तथा तापिताग्निना ।
शीतला ह्युपदेशादौ तप्ता दीक्षासु कथ्यते ॥ ३ ॥
तथापि श्रौतनिष्ठस्य वैष्णवस्य तु शीतला ।
श्रौततन्त्रप्रसक्तस्य द्विजातेरपि तापिता ॥ ४ ॥
शीतला द्विविधा तत्र चक्रतीर्थमृदादिना ।
तथा तीर्थमृदा चान्या मृदैवेति च तां विदुः ॥ ५ ॥
गोपीचन्दनमृत्स्ना तु न मृत्स्ना चन्दनात्मिका ।
तथा तीर्थमृदा चान्या मृदैवेति च तां विदुः (?) ॥ ६ ॥
गोपीचन्दनमृत्स्ना तु न मृत्स्ना चन्दनात्मिका (?) ।
तीर्थमृत्स्ना तथा ज्ञेया विष्णुपादाब्जसंयुता ॥ ७ ॥
तुलसीमूलभूश्चैका गङ्गातीरसमुद्भवा ।
माथुरे मण्डले मृत्स्ना सा मृत्स्ना ब्रह्मरूपिणी ॥ ८ ॥
तीर्थाभावे तु सा सेव्या सर्वदोषापनुत्तये ।
याऽङ्गलग्ना पुनात्येव स्वयं च स्पृष्टिनं ह्यपि ॥ ९ ॥
प्राणेन नयनेनापि मुखेनापि च रोमभिः ।
प्रविष्टा कर्णरन्ध्रेण ददाति परमां गतिम् ॥ १० ॥
तीर्थाभिषिक्ता या मृत्स्ना सापि ज्ञेया तथाविधा ।
तापोऽपि द्विविधस्तत्र शास्त्रप्रोक्तः स भूसुरैः ॥ ११ ॥

स्थानप्रोक्तस्तथान्येषां ज्ञेयश्चावरजन्मनाम्।
दैवे च पैतृके चापि येषां नास्त्यधिकारिता॥१२॥
तेषां तापस्तत्र ज्ञेय इति सद्भिर्विनिश्चितम्।
सर्वस्तापसस्तत्प्राङ्कैर्दीक्षयैव महात्मनाम्॥१३॥
शङ्खचक्रे मृदा यस्तु कुर्यात्तप्तायसेन वा।
स शूद्रवद्बहिष्कार्यो ह्यनर्हः श्रौतकर्मणि॥१४॥
एवंविधानां वचसां वैधं विषयं भवेत्।
मृत्केवला निषिद्धा स्यान्न तु सच्चक्रतीर्थमृत्॥१५॥
हर्यात्मनां न वै तापो दूषितः पाञ्चरात्रिकः।
अन्यद्विजन्मनां नार्ह इति सर्वत्र सिद्ध्यति॥१६॥
शङ्खचक्राङ्किताः शुद्धा हरेः पूजादिकर्मणि।
ते वैष्णवाः सदा मान्याः पूजातीर्थेषु भूसुराः॥१७॥
गोपीचन्दनमृत्स्नाभिर्दधेत् कृष्णायुधानि यः।
कृष्णायुधैर्विना दध्याद् भूषणानि सुवर्णकैः॥१८॥
स पूजाफलमाप्नोति पूजयन्वाप्यपूजयन्।
बालानां चैव दाराणां धार्याण्याह पराशरः॥१९॥
यो धारयति कृष्णस्य प्रसादं वायुधं नरः।
न तं स्पृशन्ति पापानि पद्मपत्रं जलं यथा॥२०॥
श्रीकृष्णनाममुद्राभिर्लाञ्छितो यस्य विग्रहः।
संयुक्तः पुण्यमालाभिः स मुक्तो यमशासनात्॥२१॥
सौभाग्यचिह्नं नारीणां दासानां दासचिह्नवत्।
भृत्यानां च तथा राजचिह्नं स्वं वाश्रमे यथा॥२२॥
वैष्णवानां तथा धार्यं पुण्यचिह्नं मधुद्विषः।
अन्येषामपि तद्भक्तस्तत्तच्चिह्नं निजेशितुः॥२३॥
गृहोपकरणं सर्वं पशुदासादिकं तथा।
मुद्रयेच्छङ्खचक्राभ्यां कुर्वन्नाम च वैष्णवम्॥२४॥

न मुद्रयेदासनानि शयनानि महीतलम् ।
क्षेत्रादिमध्ये संस्थाप्या शिला चक्रादिलाञ्छिता ॥ २५ ॥
यत्किञ्चित्स्वोपकरणं हरेः संस्मारकं भवेत् ।
यथा विधेयं सर्वत्र इत्येवं परमार्थता ॥ २६ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तृतीयांशे वैष्णवमुद्राधारणगौरवं नाम षष्ठोऽध्यायः ॥६॥

## ॥ अथ सप्तमोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

अथ पुण्ड्रस्य माहात्म्यं वैष्णवस्य निबोधत।
धार्यं शिरसि सर्वेषामिति प्राह श्रुतिस्मृतिः॥ १ ॥
अन्येषामपि पुण्ड्राणां महिमोपाधितः स्मृतः।
ऊर्ध्वपुण्ड्रस्य माहात्म्यं सर्वेषां निरुपाधिकम्॥ २ ॥
तैत्तिरीया जगुश्चोर्ध्वपुण्ड्रं वै श्रौतभस्मना।
व्रताङ्गं च मुखाङ्गं च वटोश्च गृहिणस्तथा॥ ३ ॥
कृत्वैकं मस्तके पुण्ड्रं सर्वं सत्कर्म चाचरेत्।
तदभावे वृथा कर्म पातकं चापि विन्दति॥ ४ ॥
श्रौतस्मार्तक्रियाङ्गं तु ऊर्ध्वपुण्ड्रं प्रकीर्तितम्।
तान्त्रिके निजदैवत्यं यथाकार्यं च तत्र वै॥ ५ ॥
ब्राह्मणस्योर्ध्वपुण्ड्रं तु वैष्णवस्य विशेषतः।
निर्गुणोपासनेष्वत्र शैवशाक्तादिकेष्वपि॥ ६ ॥
पञ्चवर्षं समारभ्य अथवा गर्भसंस्कृतैः।
यावज्जीवं देहभावेऽप्यूर्ध्वपुण्ड्रं विधीयते॥ ७ ॥
पितृस्थानं गतानां तु ब्राह्मणानामुदाहृतम्।
पराशरेण तत्प्रोक्तं व्यासेन ब्रह्मणापि च॥ ८ ॥
ऊर्ध्वपुण्ड्रं सदा धार्यं सर्वज्ञानामियं श्रुतिः।
प्राह ऋक् तैत्तिरीयाश्च प्राहुराथर्वयाजुषाः॥ ९ ॥
सामगाश्चापि यं प्राहुः कोर्ध्वपुण्ड्रं न शंसति।
श्रुतिस्मृतिपुराणेभ्यः सदाचारान्महात्मनाम्॥ १० ॥
प्राप्तं सदैवोर्ध्वपुण्ड्रं त्यजन्नरकमेति सः।
ऊर्ध्वपुण्ड्रं स्रजं मुद्रां गोविन्दं यः परित्यजेत्॥ ११ ॥

तं राजा राष्ट्रतो बाह्यं कुर्याद्विदद्रुहं खलम्।
निर्गुणं सात्त्विकं चापि ऊर्ध्वपुण्ड्रं श्रुतिर्जगौ॥ १२॥
राजसं तिलकं चान्यं भस्म तिर्यक् तु तामसम्।
ऊर्ध्वपुण्ड्रधरं नत्वा गङ्गास्नानफलं लभेत्॥ १३॥
ऊर्ध्वपुण्ड्रधरं दृष्ट्वा विष्णुदर्शनजं फलम्।
दत्त्वा तस्मै धान्यमात्रं मेरुकोटिफलं लभेत्॥ १४॥
उपकृत्य महात्मानमूर्ध्वं पुण्ड्रधरं जनम्।
सर्वपापविनिर्मुक्तः सुखमत्यन्तमश्नुते॥ १५॥
ये खलाश्च सुरा दुष्टास्ते विनिन्द्योर्ध्वपुण्ड्रकम्।
पुण्ड्रान्तराणि कुर्वन्ति ततो यान्त्यधमां गतिम्॥ १६॥
एकतः सर्वपुण्ड्राणि ऊर्ध्वपुण्ड्रं तथैकतः।
तस्मात्सदैव संधायमूर्ध्वपुण्ड्रं हरेः प्रियम्॥ १७॥
एकलं चोर्ध्वपुण्ड्रं वै पुनाति दधतो जनान्।
परेण सहितः हन्ति दशपूर्वान् दशापरान्॥ १८॥
पुण्ड्रान्तरेण सहितं धारयेन्न तु सर्वथा।
पुण्ड्रान्तरेण दुष्टं स्याद्गङ्गाम्भः सुरया यथा॥ १९॥
ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा न सहैव तथा चरेत्।
यस्योपपत्तिं गायन्ती नारी सद्यो विनश्यति॥ २०॥
स्वाभाविकं चोर्ध्वपुण्ड्रं सतामत्र प्रकीर्तितम्।
विहाय चापरं पुण्ड्रं कुर्वन् विन्दति कश्मलम्॥ २१॥
ऊर्ध्वपुण्ड्रे त्रिपुण्ड्रं च त्रिपुण्ड्रे चोर्ध्वपुण्ड्रकम्।
न चैवोभयथा शस्तं वैष्णवानां द्विजन्मनाम्॥ २२॥
एको देवः सदा ध्येयः केशवो वा शिवोऽपि वा।
एकं पुण्ड्रं सदा कार्यम् ऊर्ध्वं वापि त्रिपुण्ड्रकम्॥ २३॥

ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं च शस्तं स्याद् धार्यभूषणे।
ऊर्ध्वपुण्ड्रं भ्रुवोर्मध्ये त्रिपुण्ड्रं पार्श्वयोस्तयोः॥ २४॥
पुण्ड्ररेखा इति प्रोक्तं तिर्यक्तत्रापि दूषितम्।
शैवे शाक्ते च तच्छस्तं वैष्णवे वैदिके न वै॥ २५॥
वैष्णवे वैदिकेऽन्यत्र सामान्ये पुण्यकर्मणि।
अवश्यमूर्ध्वपुण्ड्रं स्यान्निष्कामे सर्वदैव तु॥ २६॥
ऊर्ध्वपुण्ड्रस्य माहात्म्ये श्रद्धा नास्ति दुरात्मनाम्।
ऊर्ध्वपुण्ड्रस्य माहात्म्ये देवानां जायते मतिः॥ २७॥
किमत्र बहुनोक्तेन धार्यं धार्यं प्रयत्नतः।
ऊर्ध्वपुण्ड्रं सदा शुद्धं दैवे पित्र्ये विशेषतः॥ २८॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तृतीयांशेऊर्ध्वपुण्ड्रविधिमाहात्म्यवर्णनं नाम सप्तमोऽध्यायः॥ ७॥

## ॥ अथाष्टमोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

पादोदकं हरेः पेयं पूजान्तेऽपि दिने दिने।
सर्वतीर्थसमं तद्धि प्राह बौधायनश्रुतिः॥ १ ॥
तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत्।
सप्तकोट्यो महामन्त्राः शिवेन परिभाषिताः॥ २ ॥
त्रयस्त्रिंशत्कोटयश्च सुराणां याजुषोदिताः।
पुण्यकालस्तथा चान्ये पुण्यौषधिलता द्रुमाः॥ ३ ॥
पुण्याक्षराणि वेदानां दानानां पुण्यपङ्क्तयः।
गोब्राह्मणेषु वर्णेषु यज्ञेषु स्वाश्रमेषु च॥ ४ ॥
महात्मसु महेशेषु सुयोगीशेषु यत्क्वचित्।
सुकृतं तच्च सकलं श्रीमत्पादोदकं हरेः॥ ५ ॥
हरिपादाब्जसम्भूतवारिणा शुचयो जनाः।
हरिपादाब्जसम्भूतजाह्नव्या पावितं जगत्॥ ६ ॥
शिवोऽपि शिवतां यातस्ततः किमपरं शुचिः।
बहवः पाविता यस्माद्दक्षशापसमुद्भवे॥ ७ ॥
उदकं चन्दनं चक्रं शङ्खं च तुलसीजलम्।
घण्टा-ऋचाशिलाताम्रं नवभिश्चरणोदकम्॥ ८ ॥
मूर्त्या वा शिलया वापि भवेत्केवलयापि तत्।
विधिनार्चितया वाप्यविधिनार्चितयापि वा॥ ९ ॥
पात्रेणैव पिबेत्तीर्थं भूमौ तन्नैव पातयेत्।
अशुचिर्वा शुचिर्वापि पीत्वा शिरसि वन्दयेत्॥ १० ॥
हरिपादाब्जतीर्थेन सर्वं ग्राह्यं च संस्कृतम्।
तद्विशुध्यति वै शीघ्रं नान्यथा वस्तुशोधनम्॥ ११ ॥

यः कश्चिन्महिमा सिद्धो गङ्गाम्भसि जगुर्गिरः।
स सर्वं श्रीमुरभिदश्चरणाब्जभवः स्मृतः॥ १२ ॥
हरेः पादयुगं ब्रह्म ब्रह्माक्षरमयं जलम्।
जाह्नव्या जगदीशस्य तद्धि पादोदकं स्मृतम्॥ १३ ॥
उरुक्रमस्य पादाब्जपाथो यो न पिबेन्नरः।
विष्णोर्लोकं स न वसेदिति ऋक् शाश्वती श्रुता॥ १४ ॥
सर्वज्ञानां श्रुतिः शास्त्रे पेयं पादोदकं हरेः।
यः पिबन्न पुनःस्तन्यं मातुः स पिबति क्वचित्॥ १५ ॥
तदनादरणात्सद्यो जायते पतितोऽधमः।
तस्मात्सदैव सम्पेयं सर्वरोगनिवारणम्॥ १६ ॥
हरेः पादोदकलाभे न भोक्तव्यं कथञ्चन।
हरेः पादोदकलाभे क्रीडितव्यं गतत्रपैः॥ १७ ॥
तुलसीदलमिश्रं च पीत्वा पादोदकं हरेः।
अद्य नो लभ्यते कस्मात्किं मेऽघमिति चिन्तयेत्॥ १८ ॥
नित्यं समर्चनीयोऽसौ श्रीहरिर्द्विजसत्तमैः।
ततः पादोदकं पेयम् इत्येषा वैदिकी श्रुतिः॥ १९ ॥
विधवाभिर्व्रतस्थैश्च संन्यस्तैर्वैष्णवैरपि।
पेयं पादोदकं नित्यमित्येषा वैदिकी श्रुतिः॥ २० ॥
यत्पानाच्छुद्धिमाप्नोति बुद्धिः पापान्निवर्तते।
अविद्या क्षीयते तस्मात् पेयं पादोदकं हरेः॥ २१ ॥
ब्रह्महत्यादिपापानि कुर्वन्नपि च मानवः।
हरेः पादोदकं पीत्वा लिप्यते नेति निश्चितम्॥ २२ ॥
गङ्गावारि मनोहारि पापहारि मधुद्विषः।
चरणाम्बुभवं तीर्थं सर्वतीर्थवरं मतम्॥ २३ ॥
जगदानन्दकन्दस्य गोविन्दस्य पदाम्बुजम्।
निसृतं जाह्नवीतोयं सर्वेषां पावनं हितम्॥ २४ ॥

श्राद्धेषु शुद्धिकार्येषु प्रायश्चित्तेषु निश्चयात्।
पादोदकं प्रयोक्तव्यं नान्यथा शुद्धिरुत्तमा ॥ २५ ॥
पादोदकस्य सम्पर्कात् पुण्यं कोटिगुणं भवेत्।
पापमूलानि नश्यन्ति इत्येषा परमा स्थितिः ॥ २६ ॥
अलाभे विष्णुतीर्थस्य तीर्थमृत्स्ना प्रशस्यते।
विष्णुतीर्थाम्बुसक्तैव ग्राह्या मृदात्मशुद्धये ॥ २७ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तृतीयांशे हरिचरणोदकमाहात्म्यवर्णनं नामाष्टमोऽध्यायः ॥ ८ ॥

# ॥ अथ नवमोऽध्यायः ॥

अथ श्रीशप्रसादस्य माहात्म्यं श्रुतिसम्मतम्।
निरूप्यते मुनिश्रेष्ठा यमश्नन्ति महेश्वराः॥ १ ॥
हरेर्भुक्तं प्रसादं स्यान्नैवेद्यं देवतान्तरैः।
रुद्रभुक्तं तु निर्माल्यमित्येवं श्रुतिनिर्णयः॥ २ ॥
सम्पूज्य देवदेवेशं पाकं सम्यक् निवेद्य च।
विधाय मण्डपं स्तुत्वा दत्त्वाचमनमुद्धरेत्॥ ३ ॥
पूजाशेषं समाप्यैव रुद्रादिभ्यो विभज्य च।
कृत्वा सन्ध्याह्निकं ग्राह्यं प्रसादं जगदीशितुः॥४॥
विभज्यैव तु नैवेद्यं ग्राह्यं तदधिकारिषु।
अन्यथा रौरवं याति यथा स्तेनस्तथैव सः॥५॥
भक्तेभ्यो नार्पितं यावद्देवस्वं तावदेव तत्।
अग्राह्यं च ततो दत्त्वा दत्त्वा भक्ते महत्फलम्॥६॥
प्रसादं जगदीशस्य सदा शुद्धं प्रकीर्तितम्।
तुलसीदलसम्मिश्रं नियुञ्जीत नेतरत्॥७॥
इतरद्भुञ्जतां पापं प्राहैवं यजुषां श्रुतिः।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यचिद्धनम्॥ ८ ॥
प्रसादो जगदीशस्य न दुष्यति कथञ्चन।
शुना भुक्तोऽपि संग्राह्यो देवानामपि दुर्लभः॥ ९ ॥
यं शिवाद्याः समश्नन्ति विहायान्यं सुसद्गुणम्।
समर्पितं स्वभक्तैर्हि वैष्णवानां गृहे गृहे॥ १० ॥
पुरुषोत्तमसत्क्षेत्रे महिमास्य महत्तरः।
अन्यत्र तादृग् विज्ञेयो यदि भक्तिः सुपुष्कला॥ ११ ॥
न ज्ञातिव्यवहारोऽत्र न कार्यश्च व्रताग्रहः।
पथ्यापथ्यकथा त्याज्या भक्ष्ये नास्ति विधिक्रमः॥ १२ ॥

स्वाद्वस्वादुकथा हेया शौचाशौचकथा तथा।
ग्राह्याग्राह्यकथां मुक्त्वा देयादेयकथां हरेत् ॥ १३ ॥
शुद्धं स्वादु परं दिव्यं पुण्यं ब्रह्मादिदुर्लभम्।
गोविन्दभुक्तशेषं मे भाग्याल्लब्धं कुतोऽधुना ॥ १४ ॥
इत्युत्सवे समानीय हृदये चातिमोदतः।
भूयः प्रणम्य गोविन्दं तं प्रयुञ्जीत नित्यशः ॥ १५ ॥
ये न भुञ्जन्ति गोविन्दं भुक्तशेषं दुराग्रहाः।
तेषां संसारविच्छित्तिर्नैव दृष्टा मुनीश्वराः ॥ १६ ॥
संसारसर्पदष्टानामेतद्भैषज्यमुत्तमम्।
गोविन्दभुक्तिसंभुक्तिः पेयं पीत्वावशेषकम् ॥ १७ ॥
महापापोपपापानां नाशनं मुक्तिदायकम्।
दिव्यलीलाशरीरस्य हेतुभूतं सुधामयम् ॥ १८ ॥
देवाः सर्वे समश्नन्ति ध्रुवं भुक्तं हरेरिह।
शिवस्तत्र विशेषेण तस्मै देयं ततो ध्रुवम् ॥ १९ ॥
यज्ञो विष्णुरिति ख्यातो यज्ञोच्छिष्टं शिवोऽग्रहीत्।
देवास्तमुपजीवन्ति ब्राह्मणाश्च तपोधनाः ॥ २० ॥
सर्वज्ञानां श्रुतिः प्राह विष्णुभक्तं हि भुञ्जताम्।
विष्णुघ्रातं हि जिघ्रन्तु पिबन्तु विष्णुपीतकम् ॥ २१ ॥
विष्णुभुक्तं वैष्णवानां वैदिकानां द्विजन्मनाम्।
अन्यदेवस्य भुक्तं हि स्वभक्तानां क्वचित्स्मृतम् ॥ २२ ॥
पुरा मन्नामकः कश्चिद्विप्रो माहात्म्यमस्य वै।
अनुभूय व्रतं चक्रे नान्यद्भुञ्जे कदाचन ॥ २३ ॥
अवैदिकानां देवानां मद्यमांसभुजां स्फुटम्।
मद्यमांससमं ज्ञेयं यच्चैतेभ्यो निवेदितम् ॥ २४ ॥
स्पृष्ट्वान्यदेवनिर्माल्यं सवासाः स्नानमाचरेत्।
भुक्त्वा चान्द्रायणं कृच्छ्रं कामात्तु द्विगुणं चरेत् ॥ २५ ॥

विष्णोरनर्पितं भुक्त्वा कृच्छ्रं कुर्यादनापदि ।
संन्यस्तैर्विधवाभिश्च कार्यं चान्द्रायणत्रयम् ॥ २६ ॥
चान्द्रायणसहस्रस्य विष्णोर्नैवेद्यभक्षणे ।
फलं भवति पापघ्नमविद्याग्रन्थिनाशनम् ॥ २७ ॥
यो देवानपि भूदेवान् पितॄन् संन्यासिनो वटून् ।
भोजयेद्धरिभुक्तेन तस्य पुण्यमनन्तकम् ॥ २८ ॥
हरिभुक्तप्रसादेन श्राद्धं पिण्डांश्च यश्चरेत् ।
गयाश्राद्धफलं तस्य पितॄणां मुक्तिरुत्तमा ॥ २९ ॥
श्राद्धे यज्ञे तथा सत्रे दाने माने सुरार्चने ।
हरेः प्रसादं यद्द्रव्यं सर्वकर्मसु योजयेत् ॥ ३० ॥
भोज्यं पेयं तथा धार्यं गोविन्दोच्छिष्टमेव हि ।
दासव्रतमिदं विष्णोरविद्याग्रन्थिभेदनम् ॥ ३१ ॥
संसारं तर्तुमिच्छा चेद् भोज्यं गोविन्दभोजितम् ।
नित्ये नैमित्तिके काम्ये हरिभुक्तं द्विजन्मनाम् ॥ ३२ ॥
विभज्य सर्वैः सङ्ग्राह्यं प्रसादं सम्भवे हरेः ।
अविभज्य जुषन्यस्माच्छापमाप हरस्त्रियः ॥ ३३ ॥
प्रमाणं नारदः प्राह यत्र स्वानुभवं ततः ।
श्रुतिस्मृतिपुराणाद्यैर्निश्चित्योक्तं द्विजन्मनाम् ॥ ३४ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तृतीयांशे प्रसादमहिमावर्णनं नाम नवमोऽध्यायः ॥ ९ ॥

## ॥ अथ दशमोऽध्यायः ॥

श्रीशाण्डिल्य उवाच—

अथ द्वादशधा शुद्धिः पञ्चधापि निगद्यते।
अपराधस्तथा विष्णोर्येन सिद्ध्यन्ति सत्वरम् ॥ १ ॥
आत्मनो हि विहारार्थं पूर्णकामोऽपि सृष्टवान्।
ततो हिता तस्य सेवा जनैः कार्या सदैव हि ॥ २ ॥
यस्य मायाकृतावद्या जीवानामास संसृतिः।
तस्यामभावान्मुच्येत तं भजेत्तं वदेदपि ॥ ३ ॥
गुरोः सन्निधिमासाद्य तदुक्ताचारसारवित्।
विद्या प्राप्ता भवेज्जन्म कृपयास्य विशुद्ध्यति ॥ ४ ॥
शेषेण शेषतां याति क्लेशान्मुच्येत्समर्चनात्।
अभ्यसन्नागमं विज्ञो भावयन् स्निह्यतेतराम् ॥ ५ ॥
पञ्चधैवं प्रपन्नस्य भवेत्सर्वात्मभावना।
सर्वेन्द्रियाणां संयुक्तिर्विमुक्तिश्चापि मान्यतः ॥ ६ ॥
क्षेत्रोपसर्पणैर्विष्णोर्दर्शनत्वरयापि च।
महतामनुयानैश्च पादशुद्धिः प्रदक्षिणैः ॥ ७ ॥
हरेः समर्हणार्थं च द्रव्योत्तमसमाहृतिः।
पादसंवाहनाच्छुद्धिः करयोर्भजतां नृणाम् ॥ ८ ॥
विसर्गादिन्द्रियसंशुद्धिर्हर्षादुत्पुलकाङ्गता।
गुणानां श्रवणे विष्णोर्भक्तानां वा समागमे ॥ ९ ॥
रतिर्विशुध्यते दास्ये तथा चात्मनि संयमे।
स्तुतिभावेन विहरात्केषाञ्चिन्नन्दनन्दने ॥ १० ॥
वाचां तदागमाभ्यासादथवा नामकीर्तनात्।
भक्तैस्तस्य प्रियालापैः शुद्धिर्दीनोपकारतः ॥ ११ ॥

प्रसादाघ्राणहर्षाद्यैः स्वस्य घ्राणं विशुध्यति।
भजतः शिरसो घ्राणाद्बालानामेव लालने ॥ १२ ॥
निरीक्षणादुत्सवानामङ्गप्रत्यङ्गयोरपि ।
भक्तानामपि शास्त्राणां नेत्रयोः शुद्धिरुत्तमा ॥ १३ ॥
तत्कथाश्रवणैर्नामश्रुतिभिः श्रीहरेर्गुरोः।
श्रोत्रयोरुत्तमा शुद्धिर्भक्तानां गुणसङ्ग्रहैः॥ १४ ॥
हरेः सपरिवारस्य चिन्तनैः प्रेमसंप्लवैः।
चेतसश्चिन्तनाच्छुद्धिस्तच्छास्त्राणां च धारणैः॥ १५ ॥
सेवयैव वचः शुद्धिः सैव स्यात्सार्वदेहिकी।
भुक्तोपभोगैर्भक्तानां संस्पर्शैस्तीर्थसेवया॥ १६ ॥
प्रणामैः श्रीपतेः प्रेम्णा शुद्धिर्धर्मतनोरिह।
सेवयैव हरेर्बाह्या भावनाभिस्तथान्तरा॥ १७ ॥
आत्मोपकारिका सेयं सर्वदा साक्षिगोचरे।
साक्षिणि प्रेक्षिता तासां भावनानां भवान्तरे॥ १८ ॥
तदर्थार्थतया चेह यथा देहो निरुध्यते।
तथा प्रसार्यते तद्वद्विसर्गैर्लघुतामितः॥ १९ ॥
न साक्षादुपयोगोऽस्ति केषाञ्चिदपि साक्षिणि।
करावपि कृतिद्वारा चोपकुर्वन्ति किं पुनः॥ २० ॥
कश्चोपयोगश्श्रोत्रादेरिन्द्रियस्य परात्मनः।
निजोपकारिता तेन स्वोपयोगेन चिन्त्यताम् ॥ २१ ॥
लीलात्मविग्रहाणां तु सा भवेत्तु भवान्तरे।
अर्चावतारे देवस्य स्वोपयुक्ता क्षणान्तरे॥ २२ ॥
अथापराधा देवानां सन्ति वैकुण्ठवासिनाम्।
यत्पादुकाभिर्यानैर्वा प्रवेशं स्वार्थमालये॥ २३ ॥
स्वहैतुकक्रियारम्भः शयनाशयनोदितैः।
निग्रहोऽनुग्रहो वापि कामक्रोधस्मरोद्भवैः॥ २४ ॥

गोमध्यदूषणोत्पादे स्वान्तवैष्णवहानिषु ।
अपमानं चातिमानं दर्शने प्रतिरोधनम् ॥ २५ ॥
स्वकीयैश्च कुपुत्रैश्चाविनीतैश्च प्रवेशनम् ।
आलस्योदासीनते च प्रमदाभावदर्शने ॥ २६ ॥
याचनं वापि शुश्रूषा भृतकार्जनमेव च ।
दीनेषु निर्दयत्वं च युक्त्यादीनामबोधनम् ॥ २७ ॥
परनिन्दा निजस्तोत्रं देवानामपि हेलनम् ।
शाकपाकजलादीनामशुद्धिकरणं तथा ॥ २८ ॥
नीचकार्यसमारम्भो देवगुप्तिप्रकाशनम् ।
प्रदर्शनमनर्हत्सु पाकपूजादिसाधने ॥ २९ ॥
अश्लीलभाषणारोपभावनानां त्रिधा कृतिः ।
दूषणं समयादीनामुत्तमासनसंस्थितिः ॥ ३० ॥
आरोहणं देवशिरो देशे पात्रावमाननम् ।
भक्तानामपराधश्च प्रसादस्य तिरस्क्रिया ॥ ३१ ॥
भज्यचिह्नपरित्यागश्चान्यदेवाङ्कधारणम् ।
परदेवाश्रयश्चापि दूषणं श्रीगुरोरपि ॥ ३२ ॥
दम्भार्थता क्रियारम्भो प्रौढाहङ्कारमात्मनः ।
तूष्णीम्भावोऽपि सामर्थ्येऽपमृतौ श्रीहरेः क्षमा ॥ ३३ ॥
अत्यर्थं हरिकार्येषु त्वरात्यागोऽपि लाघवे ।
हरेर्निजव्रतत्यागो निजवर्णाश्रमोचितैः ॥ ३४ ॥
कालादिप्रातिकूल्येन सपर्याणां समर्पणम् ।
अन्यायादुपलब्धेन अनर्हेण समर्हणम् ॥ ३५ ॥
शास्त्रतो लोकतश्चापि दूषितस्य नियोजनम् ।
मार्जारमूषकादीनामुच्छिष्टस्य निवेदनम् ॥ ३६ ॥
अस्पृष्टप्राणिसंदृष्टस्पृष्टस्य संपरिष्कृतिः ।
विभवेभ्योऽवहाराणां हरेः संकोचनं तथा ॥ ३७ ॥

आतिथ्यस्य परित्यागो भोगे लम्पटतात्मनः।
गोविप्रातिथिदीनानां यतीनां भैक्ष्यलोपनम्॥ ३८॥
गुरुमानाभिलाषाच्च द्रव्यादानं हरेर्गुरोः।
भक्तेषु समबुद्धिश्च प्रक्वाणे देवभावना॥ ३९॥
निजाचारविलोपश्च पराचारसमाश्रयः।
अकाले दर्शनं विष्णोरप्रणामार्पणं तथा॥ ४०॥
साष्टाङ्गैकप्रणामेन भ्रमणं तच्च दूषितम्।
आत्मच्छायाभिघातश्च प्रजल्पः स्वाङ्गदर्शनम्॥ ४१॥
पादप्रसारणं चाग्रे नीचाङ्गस्पर्शनं पुरः।
नीचकार्यप्रवृत्तिश्च व्यावृतिर्निजकर्मणः॥ ४२॥
गुरोरग्रेऽननुज्ञातो दम्भाद्वा कार्यसत्कृतिः।
समयोल्लङ्घनं कार्येऽनाज्ञाया ज्ञापनं तथा॥ ४३॥
परार्थं देवदेवस्य समयादिकृतिस्तथा।
देशकालर्तूत्सवानां प्रातिकृत्येन तर्पणम्॥ ४४॥
देशकालभवानां च फलादीनामनर्पणम्।
नित्यनूत्नसमर्हाणामर्हणानामकल्पनम्॥ ४५॥
स्वसामर्थ्यातिशयिनां कार्याणां चैव संभृतिः।
देवस्य वृत्तिहरणं अलङ्कारादिसंहृतिः॥ ४६॥
तस्यैव वित्तहरणं तन्नाम्ना याचनं तथा।
हरणं शरणापन्नजनस्य भयशालिनः॥ ४७॥
शरणागतसंत्यागो दुष्टानामभिरक्षणम्।
प्रसादे दूषणं चापि मर्यादायाश्च भञ्जनम्॥ ४८॥
ग्रामारामधरादीनां तस्योद्वेजनमप्युत।
तत्सेवकानां संरोध अपमानं च धर्षणम्॥ ४९॥
छेदनं चोपकाराणां विजयाङ्काभिमर्दनम्।
यात्रावरोधो देवस्य घटादौ शुष्कसंग्रहः॥ ५०॥

व्यवहारेऽन्यसाम्यं च रिक्तहस्तेन दर्शनम् ।
विलम्बो दर्शने काले प्रसादेऽनादरस्तथा ॥ ५१ ॥
इत्येवमादयो ज्ञेया लोकशास्त्रानुयुक्तिभिः ।
महादोषानितो वक्ष्ये यैः स्यादासुरता नृणाम् ॥ ५२ ॥
असाधुसङ्गमः साधोर्गुरोश्चापि न संश्रयः ।
प्रपत्तीनां परित्यागः कृतिश्चापि गुरुं विना ॥ ५३ ॥
सच्छास्त्रोल्लङ्घनं वापि कुतर्कपरिपाटवैः ।
वैष्णवव्रतसंत्यागो द्वादश्याश्च विशेषतः ॥ ५४ ॥
ऊर्ध्वपुण्ड्रादिसंत्यागः परिचर्यापराहतिः ।
प्रसादतीर्थग्रहणाद्भोजनादिरुचिस्तथा ॥ ५५ ॥
उत्सवानामकरणं तत्क्षेत्रादिष्वसर्पणम् ।
शपथाचरणं तस्य निजधर्मस्य विक्रयः ॥ ५६ ॥
प्रसादविक्रयश्चापि भक्तद्रोहो ह्यनादरः ।
तत्कथायाः परित्यागो गुरुदेवधनग्रहः ॥ ५७ ॥
गुरूणां संपरित्यागो मर्यादाभञ्जनं हरेः ।
गुरुश्रीष्वनुरागश्च देवगोपुरभञ्जनम् ॥ ५८ ॥
एवमादिर्नृदोषा वै महादोषो विनश्यति ।
नास्तिक्यबुद्धिः सर्वत्र गुरौ चापि मनुष्यधीः ॥ ५९ ॥
शिलाधीश्च हरेर्मूर्तौ जलधीश्चरणामृते ।
सामान्यधीः सत्सु सदा परद्रोहाभिचिन्तनम् ॥ ६० ॥
अनिग्रहश्चेन्द्रियाणामहङ्कारस्य संभृतिः ।
स्वधर्मस्य परित्यागो हिंसाधर्मरुचिस्तथा ॥ ६१ ॥
अशक्यधर्माचरणं शक्यधर्मे तथालसः ।
गौणता भगवद्धर्मे संत्यागश्चोपजीविनाम् ॥ ६२ ॥
भगवच्छास्त्रगूढार्थविदां सङ्गस्य वञ्चनम् ।
नित्यनामजपादीनां नियमादिविलोपनम् ॥ ६३ ॥

परनिन्दारतिश्चापि सर्वतोऽथात्मदैन्यता।
वृथाग्रहः क्लिष्टकार्ये परदारधनादरः॥६४॥
आत्मोत्कर्षाभिसंख्यानं भोगलम्पटता तनौ।
अनभ्यासश्च शास्त्राणां तथा मूढाग्रहः स्वतः॥६५॥
अविश्वासो महद्वाक्ये लोकानामप्रिया कृतिः।
नोत्सवो हरिकार्येषु न तस्मिन्प्रेमशीलनम्॥६६॥
देवानां च तथा द्रोहः पाषण्डानां प्रवर्तनम्।
मद्यमांसादिसंभुक्तिः प्रतिमादेश्च भञ्जनम्॥६७॥
सतां च हिंसनं चापि महापातकिसम्भृतिः।
भक्तधर्मोच्छेदनं च गुरुद्रोहस्तथोल्बणः॥६८॥
मर्मप्रकाशनं चैषां कपटाचरणं हरौ।
वृत्तेर्विलोपनं चैषां वाक्पारुष्याव्रतादिकम्॥६९॥
महादोषगणं प्राहुर्दूरतस्तं परिवर्जयेत्।
सकृदासक्त एतेषु कुर्यात्प्रतिकृतिं तथा॥७०॥
येन येन हरिस्तुष्येद् गुरुर्हरिजनोऽपि वा।
आत्मा बिभेति तत्कार्ये शरणं भावयेद्धरिम्॥७१॥
यद्यत्रापि भवेद्भीतिः शरणं न भवेद्धरिः।
जलेऽपि वह्नौ संजाते कस्तृषां शमयिष्यति॥७२॥
तस्माद्धरिं समाश्रित्य यतेत मुनिवर्त्मना।
सिद्ध्यतीति न सन्देहो निरालम्बः पतत्यधः॥७३॥
हरिर्नामजपध्यानैः पुनाति श्वपचोऽपि हि।
किं पुनः शरणापन्नान् वेद्मि तां शाश्वतीं मतिम्॥७४॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तृतीयांशे शुद्ध्यपराधवर्णनं नाम दशमोऽध्यायः॥१०॥

## ॥ अथैकादशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

अथातः श्रूयतां विप्राः केशवस्य प्रसादनम्।
चेतसा वचसा चापि वपुषा च यथायथम् ॥ १ ॥
स्वधर्माचरणाच्छक्त्या विधर्मपरिवर्जनात्।
गुरोराज्ञाभिसन्धानात् परितुष्यति केशवः ॥ २ ॥
वैदिकैरपि संस्कारैः क्षेत्रस्यास्य विशोधनात्।
क्षेत्रज्ञसंयमाच्चापि परितुष्यति केशवः ॥ ३ ॥
दीक्षाया ग्रहणाच्चापि श्रीमद्भागवतागमे।
तदाचारप्रसक्त्या च परितुष्यति केशवः ॥ ४ ॥
यत्किञ्चिच्च क्वचिच्चापि सम्भवे तुष्टिमान्यतः।
तस्य तस्यार्पणात्सद्यः परितुष्यति केशवः ॥ ५ ॥
बाल्यपौगण्डकैशोरतारुण्यादिषु यः पुमान्।
प्रबुध्य भजते देवं तस्य तुष्यति केशवः ॥ ६ ॥
अन्तेऽपि जर्जरीभूतः श्रद्धया यः स्मरेद्धरिम्।
प्रपन्नः पादयोर्विष्णोः तस्य तुष्यति केशवः ॥ ७ ॥
अहिंस्रं नानुरागं यः स्वधर्ममनुतिष्ठति।
उदासीनवदासीनस्तस्य तुष्यति केशवः ॥ ८ ॥
वैष्णवं धर्ममाश्रित्य योऽन्यधर्मं न विन्दति।
सर्वत्र समबुद्धिश्च तस्य तुष्यति केशवः ॥ ९ ॥
विष्णोरन्यस्य देवस्य यः स्वयं नाश्रयं चरेत्।
हरितोऽपि न कामार्थी तस्य तुष्यति केशवः ॥ १० ॥
प्राणात्ययेऽपि सम्प्राप्ते यो हरेः शपथं न वै।
करोति सत्यमनृतं तस्य तुष्यति केशवः ॥ ११ ॥

हरेरनर्पितं वस्तु यो न स्वीकुरुते क्वचित्।
हितं मितं हरौ धत्ते तस्य तुष्यति केशवः॥ १२ ॥
योऽन्यदेवार्पितं भक्तो निर्माल्यादि न संदधेत्।
पराश्रयं न कुरुते तस्य तुष्यति केशवः॥ १३ ॥
पातिव्रत्यव्रतं यस्तु हरेः समनुतिष्ठति।
तदर्थमखिलारम्भी तस्य तुष्यति केशवः॥ १४ ॥
शुक्लां कृष्णां द्वादशीं यः समभावेन सेवते।
जयन्तिव्रतकृच्चापि तस्य तुष्यति केशवः॥ १५ ॥
पूजाप्रवाहसिद्ध्यर्थं ग्रामारामादि योऽर्पयेत्।
उपकार्यां तथा काञ्चित् तस्य तुष्यति केशवः॥ १६ ॥
असाध्येषु च कार्येषु भक्तानां वा हरेरपि।
यः पुरःसरतामेति तस्य तुष्यति केशवः॥ १७ ॥
तुल्यातुल्यसपर्यायां पर्यायं यः प्रवर्तयेत्।
देशकालानुरूपं च तस्य तुष्यति केशवः॥ १८ ॥
अर्वाचीनेषु कार्येषु भगवद्भक्तयोरपि।
यो न ग्लायति नोदास्ते तस्य तुष्यति केशवः॥ १९ ॥
प्रत्यहं वा प्रतिलवं प्रेम्णा परिचरन्नपि।
विश्रान्तिं लिप्सते नैव तस्य तुष्यति केशवः॥ २० ॥
सर्वाधिकं हरिं वेत्ति तस्मादप्यधिकं गुरुम्।
ततोऽपि च तयोर्भक्तं तस्य तुष्यति केशवः॥ २१ ॥
न निष्ठुरं प्रवदति प्रभौ सुप्रतिकूलके।
स्वात्मानं चाधीनतया तस्य तुष्यति केशवः॥ २२ ॥
दुष्कृतं दुष्कृतं स्वीयं सुकृतं सुकृतं प्रभोः।
यः सदैवमभिध्यायेत्तस्य तुष्यति केशवः॥ २३ ॥
येन केनाप्युपायेन हरौ संयोजयन् धियम्।
गुरोरनुग्रहं लब्ध्वा तस्य तुष्यति केशवः॥ २४ ॥

हरौ गुरौ महामन्त्रे भक्ते भागवतागमे।
सर्वत्र समधीर्योऽसौ तस्य तुष्यति केशवः॥ २५॥
भगवत्परिचर्यायां तत्कथाश्रवणेऽपि वा।
यस्य यान्ति च यामाः षट् तस्य तुष्यति केशवः॥ २६॥
भगवच्छास्त्रमभ्यस्य स्वप्रबन्धानि संदधेत्।
पाठयेत् गुरुभक्तेभ्यस्तस्य तुष्यति केशवः॥ २७॥
गद्यैः पद्यैर्निबन्धैश्च नृत्यगीतैर्मनोहरैः।
यः प्रीणयति गोविन्दं तस्य तुष्यति केशवः॥ २८॥
मालोर्ध्वपुण्ड्रमुद्रादिभक्तिचिह्नैरलङ्कृतः।
तत्प्रसादैकसम्भोगी तस्य तुष्यति केशवः॥ २९॥
हरेरनर्पितं वस्त्रभूषामाल्यान्नपानकम्।
मरणेऽपि न चादत्ते तस्य तुष्यति केशवः॥ ३०॥
दाता दापयताध्येता मैत्रः कारुणिको रुजुः।
विरक्तः सर्वभोगेभ्यस्तस्य तुष्यति केशवः॥ ३१॥
कुटुम्बं दयया बिभ्रन् भक्तान् हरिधियार्चयन्।
अतिथीन् स्वीयबुद्ध्या च तस्य तुष्यति केशवः॥ ३२॥
लोकाचारं परित्यज्य सदा भावं समाश्रितः।
प्रेमप्रसरविक्षिप्तस्तस्य तुष्यति केशवः॥ ३३॥
नृत्यति गायति क्वापि वन्दते वदते हरिम्।
लोकलज्जां परित्यज्य तस्य तुष्यति केशवः॥ ३४॥
हरिं गुरुं महामन्त्रं भक्तं भक्तसुलक्षणम्।
कदापि यो न त्यजति तस्य तुष्यति केशवः॥ ३५॥
निर्ममो निरहङ्कारः सदाचारो जितेन्द्रियः।
सर्वक्रियार्पणकरस्तस्य तुष्यति केशवः॥ ३६॥
मद्यमांसादिवस्तूनि नियुक्तोऽपि न यः स्पृशेत्।
न च हिंसारुचिर्यस्य तस्य तुष्यति केशवः॥ ३७॥

परदारासु चाक्षुब्धः परवित्तेषु निःस्पृहः।
परद्रोहे पराभूतस्तस्य तुष्यति केशवः॥ ३८ ॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षसहः शान्तस्तस्य तुष्यति केशवः॥ ३९ ॥
न त्यजेच्छरणापन्नं विपन्नं यो न संत्यजेत्।
प्रतिपन्नं त्यजेद्यो नो तस्य तुष्यति केशवः॥ ४० ॥
अन्नदो जलदस्त्राता भैषज्येनोपकारकृत्।
विद्याविवेकदश्चापि तस्य तुष्यति केशवः॥ ४१ ॥
वेदान् रहस्यार्थयुतान् लक्षणागमकैः सह।
यः पठेत्पाठयेद्वापि तस्य तुष्यति केशवः॥ ४२ ॥
पदक्रमपदावृत्तिजटादण्डघनादिभिः।
एकामृचं त्वभ्यसति तस्य तुष्यति केशवः॥ ४३ ॥
पुराणं चेतिहासं च काम्यं भगवतश्च यः।
सूत्रवृत्तिं वृत्तिभाष्यं तस्य तुष्यति केशवः॥ ४४ ॥
रामस्य चरितं दिव्यं कृष्णस्य जगदीशितुः।
श्रद्धया धारयेद् यस्तु तस्य तुष्यति केशवः॥ ४५ ॥
अहिंस्रं हरिनिष्ठं च सदाचारं सुमङ्गलम्।
सात्त्विकं तत्पठेच्छास्त्रं तस्य तुष्यति केशवः॥ ४६ ॥
मन्वादिधर्मशास्त्राणि एवमर्थेऽवधार्य यः।
तदुक्तस्वाश्रमाचारस्तस्य तुष्यति केशवः॥ ४७ ॥
शालग्रामशिलाचक्रं वृन्दा गौर्गोपिचन्दनम्।
यस्य भागवतं गेहे तस्य तुष्यति केशवः॥ ४८ ॥
त्रैविध्यनास्तिक्यवृते विनाशे गुरुदेवयोः।
उपवासपरो यस्तु तस्य तुष्यति केशवः॥ ४९ ॥
गालिकायाः प्रदाने वा श्रवणे गुरुदेवयोः।
प्रायश्चित्तपरो यस्तु तस्य तुष्यति केशवः॥ ५० ॥

अतिधर्मं चरेद्यस्तु अतिपापं च वर्जयेत्।
देशकालरहस्यज्ञस्तस्य तुष्यति केशवः॥५१॥
देहाचारं स्वपूर्वेषामात्माचारं यथारुचि।
कुर्यात्तद्वच्चैकनिष्ठस्तस्य तुष्यति केशवः॥५२॥
साङ्ख्यं योगस्तथा न्यास आत्माचार इदं त्रयम्।
तेषु यो भक्तिमान् कृष्णे तस्य तुष्यति केशवः॥५३॥
गुरौ श्रद्धा हरौ भक्तिस्तथा तीर्थार्हणं हरेः।
मत्वावमर्षस्सर्वेषां हरेः सन्तोषकारणम्॥५४॥
वपुषा सेवनं तस्य वचनाद्गुणवर्णनम्।
चेतसा चिन्तनं विष्णोस्तस्य सन्तोषकारणम्॥५५॥
नवधा भक्तिकृन्नित्यं नित्यं तत्तीर्थसेवकः।
महामन्त्रपरो नित्यं स प्रीणाति हरिं परम्॥५६॥
कार्तिके मार्गशीर्षे च माघे वा माधवेऽपि च।
प्रातःस्नायी सदा यस्तु स प्रीणाति हरिं परम्॥५७॥
वृन्दादलैर्महामोदैः शुभैर्लेपैः शुभाम्बरैः।
शुद्धै रस्यैः सुपाकैश्च तर्पयन्तोषयेद्धरिम्॥५८॥
आत्मनो भावतः शुद्धो दीक्षया देहतः शुचिः।
महामन्त्रेण वचसा स प्रीणाति हरिं परम्॥५९॥
धर्मार्थकाममोक्षाख्यैर्भक्तेश्चाङ्गैरलङ्कृतः।
योऽभ्यसेत्संहितामेतां त प्रीणाति हरिं परम्॥६०॥
अस्यां धर्मा मया प्रोक्ताः पावनाः सुकरा नृणाम्।
विशोधयति तैर्देहं स प्रीणाति हरिं परम्॥६१॥
स्वरूपावस्थितिज्ञानाज्जायते ज्ञानसंहतौ।
नानाप्रकारैस्तां कुर्यात्स प्रीणाति हरिं परम्॥६२॥
तोषणं जगदीशस्य भक्तेः सर्वस्वमुच्यते।
तदाचारपरो यस्तु स प्रीणाति हरिं परम्॥६३॥

अभ्यस्य संहितामेतां भवेन्निःसंशयो द्विजः।
वाञ्छितार्थप्रदः पुंसामिति सत्यं गिरोऽस्तु वः॥ ६४॥
तीर्थे यज्ञे तथा श्राद्धे श्रावयेद्योऽत्र संहिताम्।
तस्य षाड्गुण्यता भूयादात्मनः श्रेयसां पदम्॥ ६५॥
अस्मिन्समस्तनिगमागमसारभूते
शास्त्रे मुरारिपदपङ्कजभक्तिरम्ये।
सर्वार्थसार्थनिवहे निपुणं यथार्थात्
सर्वं समुक्तमपरं न हि वर्णनीयम्॥ ६६॥
शास्त्रं प्रपूज्य भगवन्मयमादिमूर्तिं
श्रीकृष्णमस्य गदितारमथो द्विजेन्द्रम्।
भक्त्या सदैव शृणुयात्परिकीर्तयेद्वा
तत्रोदितं विदधते च भवेत्कृतार्थः॥ ६७॥
यन्नामधेयमखिलाघचयं निहन्ति
लोके कथञ्चिदपि संस्मरणे प्रयुक्तम्।
तेनैव वेदवपुषा पुरुषेण भूम्ना
मह्यं हृदा निगदितं किल शास्त्रमेतत्॥ ६८॥
वेदैर्यत्प्रमितं सतां सुचरितैर्मन्वादिगीर्भिर्भृतं
नानाख्यानपुराणसाररसितं विश्वोपकारात्मकम्।
विष्णोस्तस्य प्रसादनैकपरमं शास्त्रं ममैतद्द्विजाः
किं किं वाच्छितमातनोति न नृणां कल्पद्रुकल्पं सताम्॥ ६९॥
येषां स एव भगवान् दययेदनन्त-
स्तेषां रुचिर्भवति चात्र न चेतरेषाम्।
यस्यां हरेरपि गुरोर्महिमाभिगीतः
संसारपारकरणः परिकीर्तितो हि॥ ७०॥

सदाभ्यस्यं सदाभ्यस्यं शास्त्रं भागवतं त्विदम्।
सदा ध्येयं सदा ध्येयं रूपं भगवतो द्विजाः॥७१॥
निरूपितसदाचारः समयाचार एव च।
भक्तेर्निःश्रेयस्करः किं भूयः श्रोतुमिच्छथ॥७२॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तृतीयांशे केशवसन्तोषवर्णनं नाम एकादशोऽध्यायः॥११॥

॥ समाप्तश्च तृतीयांशः॥

## ॥ अथ चतुर्थोऽशः ॥

### ॥ प्रथमोऽध्यायः ॥

ऋषय ऊचुः –

ब्रह्मर्षे भवता सर्वे पुरुषार्था निरूपिताः।
भक्तियोगश्च कथितः परमः पुरुषोत्तमे ॥ १ ॥
यस्य सम्पर्कमात्रेण विरक्तिर्भवसागरे।
विज्ञानसन्ततिः शुद्धा सम्प्राप्तिः परमात्मनः ॥ २ ॥
आहारशुद्ध्या चित्तस्य शुद्धिराम्नायबोधिता।
ध्रुवा स्मृतिस्सैव भक्तिस्ततः प्राप्तिः परात्मनः ॥ ३ ॥
ततो विवेको वैराग्यं योगो भक्तिश्च केशवे।
श्रवणं मननं निष्ठा यतोऽष्टाङ्गैर्विमुच्यते ॥ ४ ॥
सा भक्तिः श्रीहरेर्यस्य चरणाम्भोजसेवया।
तस्याचार्यस्य सद्भक्तिं कृपया वद नः प्रभो ॥ ५ ॥
आचार्येण विना धर्मशास्त्रज्ञानं न दृश्यते।
आत्मज्ञानं हरेर्भक्तिर्नार्थः कोऽप्युपलभ्यते ॥ ६ ॥
परमात्मा द्विधा जातो भेदाच्छब्दार्थयोः स्वयम्।
आदेशिकः शब्दमूर्त्तिरर्थमूर्तिः स्वयं प्रभुः ॥ ७ ॥
यस्यार्चा कथिता पूर्वं हरेरपि तदर्चनम्।
स्वातन्त्र्यादपि साकल्यात्कथयस्व महामुने ॥ ८ ॥

श्रीशाण्डिल्य उवाच –

लोके धन्यतमा यूयमुत्तमश्लोकलालसाः।
सर्वसाधनसम्पन्नाः सर्वज्ञा दीनवत्सलाः ॥ ९ ॥

कृतश्चैवंविधः प्रश्नो लोकानामनुकम्पया।
परोपकारनिरता भवन्ति सुजनाः सदा॥ १०॥
आसीदात्मा यदा चैको न सन्नासत्तमो महः।
स्वानन्दे स्वप्रकाशे च रममाणो निजात्मनि॥ ११॥
निर्गुणो निष्क्रियो नित्यो निरबन्धो निरञ्जनः।
निरुपायो निराकारो निरीहो निरुपद्रवः॥ १२॥
अमेयो देशकालाभ्यामपरिच्छेद्य एव सः।
अखण्डश्चाद्वयोऽनन्तो निष्प्रपञ्चोऽच्युतः स्वयम्॥ १३॥
सर्वाधारः सर्वशक्तिः सर्वाकारोऽखिलात्मकः।
सर्वप्रकारोऽप्यपकृतस्सर्वस्सर्वादिरीश्वरः॥ १४॥
प्रत्यग्धामा स्वयंज्योतिः परिपूर्णः परात्परः।
विराजमानः स्वैर्धर्मैस्स्वाभिन्नैरतिशोभनैः॥ १५॥
कदाचिन्निजशक्त्याद्धा परयानन्तरूपया।
ज्ञानक्रियेच्छाभागैः स्वै रन्तुं भागानथारभत्॥ १६॥
आनन्दाकारमात्रैकं सदानन्द इतीरितम्।
प्रादुष्कृतं प्रथमतः प्रकटीकृतवान् प्रभुः॥ १७॥
पुरुषोत्तमसंज्ञस्य प्राक्तनस्य स्वधामनि।
रतये रममाणस्य लीलासृष्टिरजायत॥ १८॥
तस्य धाम्नोऽक्षरस्यास्य ब्रह्मणः परमात्मनः।
छाया मायास्वरूपेण प्रथमं प्रकटीकृता॥ १९॥
कालकर्मस्वभावाश्च प्रधानं पुरुषस्तथा।
इच्छा यदृच्छा संव्यक्ता यैर्विश्वं प्रकटीकृतम्॥ २०॥
क्षोभकः कर्मणां कालः कर्माण्यारम्भकानि च।
स्वभावः सर्वभावानां नियामकतया स्थितः॥ २१॥
प्रधानं जडसंघातः पुरुषाश्चेतना अमी।
सदसद्भ्यां जगज्जातं प्रधानात्पुरुषादपि॥ २२॥

कार्यप्रयोजकैवेच्छा पुरुषस्य निजात्मिका।
यदृच्छा हेतुरहिता कार्यस्यापि प्रयोजिका॥ २३॥
प्रधानान्महदुत्पत्तिर्महतोऽहङ्कृतिस्त्रिधा।
वैकारिकाद् देवसर्ग इन्द्रियाणाञ्च तैजसात्॥ २४॥
भूतादेर्भूतसर्गश्च आकांशादिक्रमादभूत्।
आकाशो देशरूपेण कालेन सह तिष्ठति॥ २५॥
सर्वं स्याद् देशकालाभ्यां स च शब्दगुणो महान्।
वायुः स्पर्शगुणस्तस्मात्तेजो रूपगुणं ततः॥ २६॥
जलं रसगुणं तस्मान्मही गन्धगुणा ततः।
श्रोत्रं त्वक् दृग् च रसना घ्राणमिन्द्रियपञ्चकम्॥ २७॥
शब्दादिभ्यस्ततः शब्दादीनां ग्राहकमुच्यते।
वाक्करौ चरणौ मेढ्रं पायुः कर्मेन्द्रियाणि च॥ २८॥
स्थूलांशैरेव भूतानामेवासन्नु ह्यनुक्रमात्।
श्रवणादिविसर्गान्ता अमीषां विषयाः पृथक्॥ २९॥
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः।
इन्द्रियाणामिमे देवा मनसश्चन्द्रमाश्च यः॥ ३०॥
भूताभिमानिभिर्देवैरेषामेव तपोबलात्।
हरेः शक्त्या संहतैः स्वैर्ब्रह्माण्डं निर्मितं तदा॥ ३१॥
पञ्चाशत्कोटिविस्तीर्णमष्टावरणसंयुतम्।
अकुण्ठैर्देववैकुण्ठैः कुण्ठितैर्भुवनान्तरे॥ ३२॥
विराजः पुरुषस्यैतत्कार्यभूतमतीन्द्रियम्।
सहस्रमुखबद्धस्य श्रोत्रनेत्रादिसंयुतम्॥ ३३॥
सृज्यन्ते सृज्यमाणाश्च सृष्टाश्च शतकोटिशः।
हीयन्ते हीयमाणाश्च हृताश्च शतकोटिशः॥ ३४॥
दह्यन्ते दह्यमानाश्च दग्धा वा भस्मतां गताः।
अपवर्गेण निर्बन्धाः सम्प्राप्ते प्रति सञ्चरे॥ ३५॥

अनादयः प्रवाहेण सादयः स्वात्मना हरेः।
अनन्तलीलया विष्णोः कोटिशोऽत्राण्डराशयः ॥ ३६ ॥
पाताले शेषवैकुण्ठः श्वेतद्वीपश्च भूतले।
ध्रुवस्य नाकलोकानां रमायाश्च ततः परम् ॥ ३७ ॥
वेधसो मुकुटे विष्णोर्लोकेशानां महस्ततः।
अष्टमावरणादूर्ध्वं विरजायाः प्रकीर्त्तितम् ॥ ३८ ॥
विष्णोः शिवस्य धातुश्च तस्याधो भुवनानि च।
पुराणि चावताराणां शुद्धमस्मात्परन्तु तत् ॥ ३९ ॥
परतो व्यापिवैकुण्ठं लीलाधाम हरेर्मतम्।
केवलानन्दचिन्मूर्त्तिः सर्वत्रैव च सन्ततम् ॥ ४० ॥
एवं लोकान्तरमपि सर्वं सर्वत्र विद्यते।
अमीषां देवदेवा ये परं जानन्ति नोत्तरम् ॥ ४१ ॥
देवाश्च मानवा जीवा दानवा बहुशो भवात्।
ते सर्वे श्रेयसः प्राप्त्यै तपोयोगं समाश्रिताः ॥ ४२ ॥
तेषां तपःप्रभावेण ब्रह्मविष्णुमहेश्वराः।
कम्पिताश्चापरे देवा वरं दातुं समागताः ॥ ४३ ॥
दानवा वरतः शम्भोः मानवा वेधसो वरात्।
देवाः केचन सन्तुष्टाः जाता विष्णोर्वरादपि ॥ ४४ ॥
परमेश्वरलीलया जीवा ये येऽत्राधिकारिणः।
न जगृहुर्वरं तेभ्यः कामयन्तोऽस्य दर्शनम् ॥ ४५ ॥
निर्गुणेन स्वरूपेण परमेभ्यः परात्मना।
दत्वैव दर्शनं तेभ्यः सोररीकृतवान् विभुः ॥ ४६ ॥
परमानन्दसन्मूर्त्तिर्देवः श्रीपुरुषोत्तमः।
निजैकशरणानाञ्च दर्शनञ्च वरं ददौ ॥ ४७ ॥
सर्वेषामुपकारार्थं श्रेयसः प्राप्तये हरिः।
आचार्यरूपं जगृहे कृपया भक्तवत्सलः ॥ ४८ ॥

आचार्यो बहुधा जातोऽनुगृह्णन् सुबहून् जनान्।
पुरारिं च रमां देवीं सनकादीनुपादिशत्॥ ४९ ॥
वृत्तये मुक्तिमार्गस्य हरेर्भक्तिप्रवृत्तये।
प्रवृत्त्यर्थं वसिष्ठादीन् कर्ममार्गेऽधिकारिणम्॥ ५० ॥
आचार्यश्चादेशिकश्च तीर्थरूपो गुरुस्तथा।
चतुर्धा मूर्त्तिभेदेन कार्यभेदादभूद्धरिः॥ ५१ ॥
आचार्यो मन्त्रदो मन्त्रव्याख्याता तत्त्वविद्घृणी।
सदाचारो हरेर्भक्तस्तपोनिष्ठः प्रतापवान्॥ ५२ ॥
आदेशको मन्त्रदाता पण्डितो भक्तिमान् हरेः।
स्वमार्गरक्षणे दक्षो निर्दोषः सर्वसद्गुणः॥ ५३ ॥
तीर्थः पुण्यात्मको मान्यः शरणागतपावनः।
सन्मार्गशिक्षणे दक्षः शान्तो दान्तो दृढव्रतः॥ ५४ ॥
गुरुः स्यान्मन्त्रदः शिक्षाकरो रक्षाकरः परः।
हितकृत्पाठकः स्तोता याजकोऽर्च्यः सुरार्चकः॥ ५५ ॥
इत्थं विनिर्णयः प्रोक्तो गुरूणामृषिभिः पुरा।
एषामेकतमं भक्त्या चाश्रितः सिद्धिभाग्भवेत्॥ ५६ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तुरीयांशे गुरुप्रभवनिरूपणं नाम प्रथमोऽध्यायः॥१॥

## ॥ अथ द्वितीयोऽध्यायः ॥

आचारस्तु पुरैवोक्तस्सतां धर्मनिरूपणे।
साम्प्रदायिक आचारो मयात्रैव निरूपितः॥ १ ॥
गुरुभक्त्यात्मकाचारः पादुकाचार उच्यते।
सदाचाराद्विशुद्धात्मा योग्यः स्यात्साम्प्रदायिके॥ २ ॥
शुद्धोऽमात्पादुकाचारेऽधिकारी गुरुपूजने।
गर्भाधानादिसंस्कारैर्देह्यात्मास्य विशुद्ध्यति॥ ३ ॥
आह्निकाचरणादस्य शुद्ध्यतीन्द्रियसंशयः।
इष्टापूर्त्तैश्चेतसोऽस्य विशुद्धिः समुदीरिता॥ ४ ॥
आत्मनोऽष्टगुणैरात्मा विज्ञानेन विशुद्ध्यति।
हरेर्भक्त्या गुरोर्भक्त्या सद्यः शुद्धिर्विधीयते॥ ५ ॥
देहेन्द्रियान्तःकरणात्मनां नैतां विना क्वचित्।
विज्ञानं च विरक्तिश्च विशुद्धिस्तां समाश्रिता॥ ६ ॥
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते यथा।
तप्तायोबिन्दुवद्भक्तिर्विनाशयति सर्वशः॥ ७ ॥
हरिभक्तिः पुरैवोक्ता गुरुभक्त्यधुनोच्यते।
दीक्षा ह्यनन्तरं कार्या सा चतुर्धा पृथक् पृथक्॥ ८ ॥
दीक्षोपदेशः शरणागतिरस्याप्यनुग्रहः।
अनुशासनमित्येवं चतुर्धा समुदीरितम्॥ ९ ॥
दीक्षा बहुविधा प्रोक्ता चतुर्धा सा समासतः।
भोगयोगार्णविज्ञानैरभिषेकादिकर्मभिः॥ १० ॥
हरिभावनया भक्तिस्तदन्तर्यादिभावनैः।
देवर्षिभावनैस्तस्य हितकृत्पितृभावनैः॥ ११ ॥

सर्वत्र समधीर्विष्णुर्गुरुरूप्यनुकम्पनः ।
विज्ञानेश्वरभक्त्या च चोदकः शुभकर्मणाम् ॥ १२ ॥
अन्तर्यामितया तस्य कर्ममूलं निकृन्तति ।
प्रयच्छति शुभां वृत्तिं यया चामृतमश्नुते ॥ १३ ॥
देवभावनया सत्त्वबुद्धिं दत्त्वात्मदर्शनम् ।
ददाति चर्षिभावेन ज्ञानं य(म)ज्ञादि(न)नाशनम् ॥ १४ ॥
हितकृद्भावना तस्य हितानां कारणं परम् ।
पितृभावनया चेष्टं कुरुतेऽनिष्टवारणम् ॥ १५ ॥
आचरेद्यः स्वयं धर्मं परानाचारयत्यपि ।
हरिप्रभावसम्पन्न आचार्यः साम्प्रदायिकः ॥ १६ ॥
आचार्यवंशसम्भूत आचारेण तथाविधः ।
सोऽन्तर्यामितया पूज्यः पादुकाचारमाश्रितैः ॥ १७ ॥
नानालौकिकसंशुद्धिर्योगसिद्धिरमुष्य च ।
स भवेद्दैवताचार्य ऋष्याचार्यः सुविद्यया ॥ १८ ॥
हितकृत् पितृरूपी च हितकृत्पितृवद्घृणी ।
स लौकिको गुरुः प्रोक्तः कर्मतन्त्रे प्रशस्यते ॥ १९ ॥
बहुधा गुरवश्चैवं महीपालोऽन्नदोऽवनः ।
मातापिता मातृस्वसृपितृभ्रातृपितामहाः ॥ २० ॥
मातामहश्चाग्रजन्मा श्वशुरो विद्ययाधिकाः ।
सम्बन्धिनश्च गुरवो जातिवर्णाधिकाश्च ये ॥ २१ ॥
तत्रादौ हरिवत्पूज्यौ अपरौ देववत्तथा ।
आदेशिकस्तथा तीर्थः पूजनीयौ महर्षिवत् ॥ २२ ॥
गुरवः पितृवत्पूज्या यतो मुख्यो गुरुः पिता ।
जन्मदोऽभयदश्चैव संस्कर्त्ता मन्त्रदो यथा ॥ २३ ॥
पतिरेव गुरुः स्त्रीणां मिता सर्वनृणामिह ।
पुरोधा धर्मकर्तृणां पाठकः पठतामपि ॥ २४ ॥

एकाक्षरप्रदातारं यो गुरुं नैव मन्यते।
स भवेत्पातकी लोके किं पुनर्ग्रन्थपाठकम् ॥ २५ ॥
धर्मकृद्धर्मशीलश्च दयालुर्धर्मचारकः।
पातिव्रत्ये पतिर्योग्यो गुरुर्विज्ञानतो यदि ॥ २६ ॥
एतादृशः पिता पूज्यो गुरवोऽन्ये तथाविधाः।
दूरेणैव विरुद्धानां नैषामहितमाचरेत् ॥ २७ ॥
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ २८ ॥
शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि।
द्वेषादिभिर्नैव तयोर्विधेर्यागो विधीयते ॥ २९ ॥
मनसा वपुषा वाचा ये भवन्ति गुरुद्रुहः।
कृतैर्धर्मसहस्रैश्च नैव तेषां शुभा गतिः ॥ ३० ॥
सर्वसाधनहीनानां गुरुभक्तिमतां नृणाम्।
इह लोके परत्रापि शुभैव गतिरिष्यते ॥ ३१ ॥
हरेर्भक्तिर्गुरोर्भक्तिर्गङ्गास्नानादिकन्तु यत्।
सर्वाघनाशनं सद्यो न चैवारब्धकर्मणाम् ॥ ३२ ॥
गुरोर्भक्त्या क्वचिल्लोके प्रारब्धमपि नश्यति।
प्रह्लादस्यासुरो भावो नारदानुग्रहाद्यथा ॥ ३३ ॥
परम्परागतो धर्मस्तेषां तदुपदिश्यते।
गुरुभिर्व्यवहाराय आत्मधर्मस्तदिच्छतः ॥ ३४ ॥
कर्मण्युपासनायाञ्च यस्य श्रद्धा त्ववेक्ष्यते।
स तत्रैवाधिकारी स्यात्पारम्पर्यं न कारणम् ॥ ३५ ॥
हरौ हरे विरञ्चौ च मिहिरे च सुरान्तरे।
यस्य श्रद्धा भवेद्यत्र पारम्पर्य्यं न वारकम् ॥ ३६ ॥
धर्मश्रद्धा भवेदादौ सुकृतैः पूर्वसञ्चितैः।
ततो हुताशने भक्तिर्भक्तिर्वा स्यात् सुरान्तरे ॥ ३७ ॥

ततश्च मिहिरे भक्तिर्विरञ्चौ च ततः परम् ।
हरे भक्तिस्ततस्तिष्ठेत्तस्मिन् भक्तिर्हरौ भवेत् ॥ ३८ ॥
हरो गुरुर्हरिः पूज्यो देवानां पुरुषोत्तमः ।
सम्प्रदायगुरुश्चायं हरिरूप्यपरो गुरुः ॥ ३९ ॥
नारायणपराः सर्वे भक्तिमार्गाश्च तद्धिया ।
तन्मूलं निखिलं विश्वं तन्निष्ठा निखिलागमाः ॥ ४० ॥
सहस्रेषु मनुष्याणां पुण्यानां निजकर्मभिः ।
अन्यत्र दृश्यते भक्तिर्नैषा मुख्यफलप्रदा ॥ ४१ ॥
अथवा यस्य यत्किञ्चिद्रोचते तस्य तत्फलम् ।
क्रमेलकादेर्निम्बादि शास्त्रं तैः किं न लिप्स्यते ॥ ४२ ॥

॥ इति श्रीशाण्डिल्यसंहितायां भक्तिखण्डे तुरीयांशे गुरुविशेषनिरूपणं
नाम द्वितीयोऽध्यायः ॥ २ ॥

## ॥ अथ तृतीयोऽध्यायः ॥

दीक्षां वाप्युपदेशं वा प्रपत्तिं वाप्यनुग्रहम्।
लब्ध्वा गुरोर्गुरोर्भक्तिराचार्यदिर्विधीयते ॥ १ ॥
आचार्यो देशिकश्चापि यथा सेव्यतमोच्यते।
ब्राह्मणः सम्प्रदायी च हरिभक्तः स उच्यते ॥ २ ॥
आचार्यो ब्रह्मणो मूर्तिर्विधेरादेशिकः स्मृतः।
तीर्थं पुरारेर्गुरवो महर्षीणाञ्च मूर्त्तयः ॥ ३ ॥
विष्णोर्विना न भूपालः शूरश्चापि सुरासुरात्।
अनर्षिग्रन्थकृद्भक्ता दाता स्वर्गादनागतः (?) ॥ ४ ॥
ब्राह्मणो ब्रह्मविद्भक्तो हरेर्वेदान्तपारगः।
अग्रजन्मा यदि भवेद्गुरुरेषोऽत्र वर्णनम् ॥ ५ ॥
विधिवन्न्यस्तकर्मा च सदाचारी जितेन्द्रियः।
आचार्यो देशिकश्चासौ योगयुक्तो विरक्तधीः ॥ ६ ॥
दृष्ट्वाचार्यं बद्धपाणिर्दूरादेव तंमनुव्रजेत्।
दिग्धस्ते पञ्चहस्ते वा दण्डवत् प्रणमेद्भुवि ॥ ७ ॥
पञ्च षट् सप्त वा चाष्टौ एकं द्वावपि शक्तितः।
साष्टाङ्गं प्रणमेद्भक्त्या श्रीगुरोर्दृष्टिगोचरे ॥ ८ ॥
प्रपदाभ्याञ्च जानुभ्यां जठरेण तथोरसा।
कराभ्यां शिरसा चापि प्रणामोऽष्टाङ्ग ईरितः ॥ ९ ॥
दासोऽस्मि वन्देऽनुग्राह्यो मनसा वचसा प्रभो।
नम आचार्य्यचरणेभ्यश्चैवं बीजपूर्वकम् ॥ १० ॥

ॐकारं ब्राह्मणो ब्रूयाद्ध्रीकारन्तु द्विजो वदेत्।
भगोऽन्यवर्णो ह्रीं वापि नमोऽन्तेऽभिदधेदयम् ॥ ११ ॥
जयनाथ कृपासिन्धो दीनबन्धो निजाश्रय।
शरण्य वत्सल प्रभो विश्वोद्धरण मङ्गल ॥ १२ ॥
दीनभावनयेत्येवं प्रणमेद्वा यथारुचि।
पुनरुत्थाय शिरसा जानुभ्याञ्च कृताञ्जलिः ॥ १३ ॥
वारं वारञ्च हस्ताभ्यां शिरसा प्रणमेद् गुरुम्।
केवलाभ्यां यदेताभ्यां कार्यकालानुसारतः ॥ १४ ॥
देवानाञ्च गुरूणाञ्च देशभेदादनेकधा।
शास्त्रभेदात्प्रणामः स्यान्नार्होऽनर्हं नमेन्नरः ॥ १५ ॥
न प्रणम्यो गुरुरपि देवतासन्निधौ स्थितः।
देवान् पितॄन्यजन्गच्छन्मलमूत्रं त्यजन्स्वपन् ॥ १६ ॥
पूजायां कर्मकालेऽपि आगतं गुरुमर्चयेत्।
तदज्ञानाद्गतो जन्तुं इन्द्रद्युम्नो नृपोत्तमः ॥ १७ ॥
नाप्रच्छन्नमुखो ब्रूयान्न नाज्ञप्तो विशेदपि।
न चोत्तमासने स्थाने नातिदूरेऽन्तिचाविशेत् ॥ १८ ॥
गच्छन्तमनुगच्छेत सङ्कटे चाग्रतो व्रजेत्।
आगच्छन्तञ्चाभिमुखं कदापि स्यान्न पृष्ठदः ॥ १९ ॥
वदेज्जयजयेत्येवं शृणुयाच्च तथेरितम्।
प्रमाणं सदसत्कुर्यात्कुर्यात्तत्परिवर्त्य सत् ॥ २० ॥
सत्यं ब्रूयात्प्रियं ब्रूयाच्छ्रीशब्देनाखिलं वदेत्।
चरणान्तैर्लिखेन्नाम वदेच्च बहुवाचकैः ॥ २१ ॥
ऋणदानं तथाऽऽदानं वस्तूनां क्रयविक्रयम्।
गुरुणा न समं कुर्याद्विवादं कलहं तथा ॥ २२ ॥
न दारेषु धने वापि कार्ये वाधिकृतो भवेत्।
हिते प्रिये चोपकारे कैङ्कर्येऽधिकृतो भवेत् ॥ २३ ॥

न देवे पातयेच्छायां गुरावपि न पातयेत्।
वस्त्रशय्यासनोपानदन्यच्चाप्यस्य नावहेत् ॥ २४ ॥
नाज्ञां विना विशेद् गेहे प्रौढपादो न संविशेत्।
नौत्कटासनगो भूयान्न च पादौ प्रदर्शयेत् ॥ २५ ॥
तथा नोल्बणवेशोऽपि शस्त्रधारी न संविशेत्।
नाशुचिर्नापि चाभ्यक्तोऽप्यूर्ध्वपुण्ड्रादिवर्जितः ॥ २६ ॥
न चाबद्धशिखो भूयान्न कच्छत्रयवर्जितः।
नैकवासा नार्द्रनीलीवासा यायाद् गुरुं प्रति ॥ २७ ॥
गुरोर्हरेस्सेवने च पुण्यकार्ये महानसे।
पञ्चकच्छः पुमानुक्तश्चतुःकच्छाङ्गना मता ॥ २८ ॥
अन्यदा जातिकुलयोर्दैशिकं वेषमाचरेत्।
आचारश्च गुरोर्ग्राह्यः पारम्पर्य्यादविच्युतः ॥ २९ ॥
प्रलपेन्न हसेन्नर्म कुर्यान्न कुकृतिञ्चरेत्।
पादौ प्रसारयेन्नैव न खादेन्न स्वपेत्पुरः ॥ ३० ॥
न गृह्णीयाद्गुरोर्वित्तमुपभुक्तन्तु धारयेत्।
शिरसा भक्तितो लोभान्न किञ्चित्तस्य चाहरेत् ॥ ३१ ॥
समक्षे वा परोक्षे वा गुरोराज्ञां न लङ्घयेत्।
अनुशासनमायान्तं धृत्वा शिरसि चाचरेत् ॥ ३२ ॥
गुरोर्जन्मदिने मूलगुरोर्जन्मदिने तथा।
उत्सवेषु च सर्वेषु गुरोरुत्सवमाचरेत् ॥ ३३ ॥
संस्कारेषु गुरोः पूजां गुरुहस्तेन तत्क्रियाम्।
पुण्यकार्याण्यपि तथा कुर्याद्वापि तदाज्ञया ॥ ३४ ॥
वासन्तैः शारदैश्चैव ग्रीष्मवर्षासमुद्भवैः।
हरेर्जन्मोत्सवैरन्यैर्हरिवद्गुरुमर्चयेत् ॥ ३५ ॥
निजगृहे समाने यो बहुमानपुरःसरम्।
तौर्य्यत्रिकेण महता आप्तैर्मित्रैः स्वबन्धुभिः ॥ ३६ ॥

पूजयेद्विधिना भक्त्या निजवित्तार्पणेन च।
कारयेच्च तथा स्वीयैस्तद्भक्तानपि पूजयेत् ॥ ३७ ॥
गायेत्तस्य गुणान्नित्यं मनसा कर्मणा गिरा।
तदेकतत्परो भूयाद्दोषं ह्यस्य नानयेत् ॥ ३८ ॥
गुर्वाज्ञया विभक्तेन कार्य्यं नास्य यशस्करम्।
सम्प्रदायविरुद्धश्च सद्यः सर्वस्वनाशकम् ॥ ३९ ॥
प्रातः सायञ्च मध्याह्ने समर्च्योऽसौ गृहे स्थितः।
भिन्नगृहे चैकवारं योजनान्ते च पक्षयोः ॥ ४० ॥
द्वादशे योजने मासे वर्षे देशान्तरे स्थितः।
द्वादशाब्दादुपरि तु ह्यवश्यं दर्शनं चरेत् ॥ ४१ ॥
उत्तमानि च वस्तूनि आचार्यार्थं निवेदयेत्।
प्राणैरप्युपकुर्वीत किं पुनर्द्रविणादिभिः ॥ ४२ ॥
पुत्रो भवति सच्छिष्यः पुत्रीभवति चाङ्गना।
पूजायां भक्तवर्य्योऽसौ यदि स्याद्धरिभावना ॥ ४३ ॥
दम्पत्योरेकगुरुता लोके यद्यपि गर्हिता।
शास्त्रतो न विरुद्धैषा यतो जायार्द्धदेहगा ॥ ४४ ॥
दम्पत्योर्धर्मकार्येषु सहैवाधिकृतिर्यतः।
प्रतिज्ञावचनं पाणिग्रहे नार्य्यस्तथाकृतम् ॥ ४५ ॥
कचेनोदरवासेन देवयानी निराकृता।
दत्ता सुता च मुनिना शिष्याय चन्द्रशर्मणे ॥ ४६ ॥
पूर्तपुण्येषु सर्वत्र ग्रन्थिबन्धनपूर्वकम्।
दम्पत्योरेकगुरुता शास्त्रे लोके च दृश्यते ॥ ४७ ॥
तीर्थस्नाने तथा कन्यादानादौ तु सुरालये।
प्रतिष्ठायां मखेऽन्यत्र तयोरेको गुरुर्भवेत् ॥ ४८ ॥

याजकः पालको राजा वृत्तिदो रक्षको गुरुः ।
कन्याप्रदः पिता प्रोक्त एक एव तयोरयम् ॥ ४९ ॥
मन्त्रे ज्ञाने धर्मकार्ये उपदेशे महात्मनाम् ।
दम्पत्योरेकगुरुता श्रेष्ठा नैव विदूषिता ॥ ५० ॥

॥ इति श्रीशाण्डिल्यसंहितायां भक्तिखण्डे तुरीयांशे गुरुसामान्यभक्तिनिरूपणो नाम तृतीयोऽध्यायः ॥ ३ ॥

## ॥ अथ चतुर्थोऽध्यायः ॥

यथैव नवधा भक्तिर्देवदेवस्य कीर्त्तिता।
तथैव नवधा भक्तिराचार्यस्यापि दृश्यते ॥ १ ॥
श्रवणं तद्गुणानाञ्च श्रोत्राभ्यां प्रीतिपूर्वकम्।
अर्थानुसन्धिसहितं सन्माहात्म्यं तदुच्यते ॥ २ ॥
नाम्नां वापि गुणानां वा शब्दार्थज्ञानपूर्वकम्।
प्रीत्या प्रभावज्ञप्त्या च वागुक्त्या कीर्तनं मतम् ॥ ३ ॥
स्वोक्तस्य स्वरूपस्य ध्यानञ्च प्रतिमादिभिः।
माहात्म्यज्ञानतः प्रीत्या स्मरणं तत्प्रकीर्त्तितम् ॥ ४ ॥
न तस्य प्रतिमा लोके रूपं तस्य न सदृशे।
इत्येवं श्रूयते वेदे प्रतिमा का निराकृता ॥ ५ ॥
बहुधा प्रतिमा तस्य तेनैव बहुधोच्यते।
अलौकिकस्य प्रतिमातुल्यः कोऽपि न चेर्यते ॥ ६ ॥
दिव्यो ह्यमूर्त्तः पुरुषः पुरुषोऽलौकिकाकृतिः।
विश्वतश्चक्षुरित्यादिराकृतिस्तस्य कल्प्यते ॥ ७ ॥
शब्दो गुणो निर्गुणोऽसौ निष्क्रियश्च निराकृतिः।
यथासंकलिताकारैर्बुध्यते लौकिकैरपि ॥ ८ ॥
एवं ब्रह्म व्यापकोऽसौ मन्त्रैर्भावनयापि वा।
बुध्यते लौकिकाकारैः शास्त्रेण प्रतिपादितैः ॥ ९ ॥
अनुग्रहाल्लौकिकानां तथारूपमदर्शयत्।
रामकृष्णादिरूपेण वस्तुतोऽसावलौकिकः ॥ १० ॥
सच्चिदानन्दमात्रस्य आनन्दाकार उच्यते।
उत्तमाधमभावेन सर्वाकारः सदैव हि ॥ ११ ॥

राजदेवविभूत्या यश्चरणार्चनतोऽपि वा।
क्रियते पादसेवायास्तन्मतं पादसेवनम् ॥ १२ ॥
मन्त्रैर्भावनया प्रेम्णा अर्चनं पूजनं मतम्।
प्रणामो वन्दनं प्रोक्तं साष्टाङ्गमतिभक्तितः॥ १३ ॥
उपभुक्तस्य गन्धादेरुपभोगोऽतिमोदतः।
प्रीत्या केवलया सेवा दास्यं वा पादुकार्चनम् ॥ १४ ॥
सख्यमुत्तमवस्तूनामर्पणञ्च हितक्रिया।
स्वात्मना सेवनं प्रीत्या महिलावद्यथा तथा ॥ १५ ॥
अहन्तां ममतां त्यक्त्वा तत्सर्वस्वं निवेद्य च।
सेवनं प्रत्यहं प्रीत्या तत्परत्वं निवेदनम् ॥ १६ ॥
सङ्कल्पितं यथा श्राद्धे सत्रे च क्रमशोऽर्प्यते।
तथा निवेदितमपि दासेन क्रमशोऽर्प्यते ॥ १७ ॥
दासः स्याच्छरणापन्नो दास्ये च शरणागतिः।
निवेदनन्तु दास्यत्वमर्पणार्थेऽर्थरक्षणम् ॥ १८ ॥
नोपायान्तरतः सिद्धिस्तथा मन्त्रेण वै यथा।
मन्त्रद्वयं ततो देयं याभ्यां संस्कृतिरात्मनः॥ १९ ॥
विशुद्धाय प्रपन्नाय श्रीकृष्णः शरणं मम।
आचार्य्यः प्रथमं दद्यान्मूलमन्त्रं जितात्मने ॥ २० ॥
सत्यधा भक्तिसिद्धिः स्याद्दत्ते चास्मिन्महामनौ।
नार्पणं शरणापत्तौ तदीयत्वं प्रसिद्ध्यति ॥ २१ ॥
तेन साम्यप्रसिद्ध्यर्थं पत्न्याः स्वप्रतिमां यथा।
दद्यात्तस्मै महामन्त्रं दानवाक्यं समुच्चरन् ॥ २२ ॥
सहस्रपदमाभाष्य वदेच्च परिवत्सरम्।
मितकालपदं चोक्त्वा जातकृष्णपदं वदेत् ॥ २३ ॥
वियोगजनितस्यान्ते तापक्लेशमुदाहरेत्।
आनन्दपदमुच्चार्य्य तिरोभावोऽहमुच्चरेत् ॥ २४ ॥

ततो भगवते प्रोक्तं कृष्णायेति पदं वदेत्।
देहेन्द्रियान्तःकरणानि तद्धर्मांश्च संवदेत्॥ २५॥
दारागारपदं चोक्त्वा पुत्राप्तपदमुच्चरेत्।
वित्तेहपदमाभाष्याथो परेणात्मनेति च॥ २६॥
आभाषयेत्सह समर्पयामिति वचस्ततः।
सङ्कल्प्य चैवं वचसा मनसापि मनुं वदेत्॥ २७॥
दासोऽहमीति कृष्णं तु तवास्मीति वदेत्स्मरेत्।
निवेदितात्मा भवति संस्कृतः स्याच्छुचिर्जपन्॥ २८॥
एवं हि नवधा भक्तिः कथिता चक्रपाणिना।
विशेषः किञ्चिदाचार्यभक्तौ तदुपदिश्यते॥ २९॥
आचार्यभक्तिः कर्त्तव्या शिष्यैरात्महितेच्छुभिः।
दीक्षादिनान्तान्नियम उपदेशाद्यहोऽपि हि॥ ३०॥
भक्त्यास्य मन्त्रसिद्धिः स्याद्दीक्षादि सफलं भवेत्।
भवेत्कृतञ्च सुकृतं दुष्कृतञ्च निवर्तते॥ ३१॥
ब्राह्मणक्षत्रियविशां शूद्राणां योषितामपि।
कन्यकानां कुमाराणां विधेयं गुरुसेवनम्॥ ३२॥
अवश्यवृत्तिना तत्र स्नातकेन विशेषतः।
गृहस्थेन वनस्थेन कार्यैषा यतिनापि हि॥ ३३॥
सुभगाभिः सतीभिश्च स्वैरिण्याद्यैश्च षण्ढकैः।
पुण्यकृद्भिः पापकृद्भिः सङ्करैरन्त्यजैरपि॥ ३४॥
म्लेच्छैर्बौद्धैर्जिनैर्बाह्यैरास्तिकैर्नास्तिकैरपि।
गुरुभक्तिः प्रकर्त्तव्या सर्वेषाञ्च यथायथम्॥ ३५॥
यो यस्य यद्धर्मशिक्षाकरः स गुरुरुच्यते।
पापशिक्षाकरो नैव पापकृच्छिष्यवित्तमुट्॥ ३६॥
यथाकथञ्चित्स्वीकारो निजधर्मे प्रवर्त्तते।
गुरुर्गुरोः सकुल्योऽपि माननीयो मनीषिभिः॥ ३७॥

सर्वाधिकश्च सम्मान्यो राजा शास्त्रानुगो हरिः।
पूजकोऽतिथिमान्यानां पालकश्चार्त्तिवारकः॥ ३८ ॥
वैष्णवो विष्णुमूर्त्तिः स पालकोऽतिदयार्द्रधीः।
शङ्करो वाप्युदासीनो दाता भोक्ता प्रसादकृत्॥ ३९ ॥
विधिः प्रजावर्द्धकश्च इन्द्रस्तासां प्रपोषकः।
अग्निर्दुर्विषहो राजा यमो दुष्टैकदण्डदः॥ ४० ॥
निर्ऋतिर्दुष्टसत्त्वघ्नो गुप्तार्थाजीव्यदोऽम्बुपः।
सञ्चारी हितकृद्वायुः पूर्णार्थो धनदोऽर्थदः॥ ४१ ॥
शेषः सर्वसहो राजा रविः सर्वप्रकाशकः।
एवं गुरुरपि ज्ञेयः क्रोधनो नृहरिः स्वयम्॥ ४२ ॥
लुब्धस्त्रिविक्रमो ज्ञेयो दोग्धा परशुभृत्स्वयम्।
ज्ञानदो व्यास एवासौ सत्यसन्धस्तु राघवः॥ ४३ ॥
विज्ञानदः कृष्ण एव नानालीलाकरः प्रभुः।
भक्तिदो नारदः साक्षात्तपोनिष्ठो महामुनिः॥ ४४ ॥
इत्येवं भावना तस्य शिष्यैः कार्य्या यथायथम्।
छत्रधारी च सामन्तः पुरोधा राजवन्मतः॥ ४५ ॥
श्रोत्रियश्च ततः श्रेष्ठोऽनूचानो दीक्षितस्ततः।
पुराणज्ञः शास्त्रवेत्ता गुरुस्तीर्थं ततः परः॥ ४६ ॥
आदेशिकस्तथाचार्यः पूज्यानां परमो हि सः।
देवानां परमश्चासौ तीर्थानां परमो ह्ययम्॥ ४७ ॥
पुण्यानां परमः पुण्यो गुरोः परतरो न हि।
गुरुभक्तिरताः सन्तो दृश्यन्ते सर्व एव हि॥ ४८ ॥
को नाम तद्विरोधीह वैदिकोऽवैदिकोऽपि वा।
गुरुभक्तिरता लोका भाग्यवन्तो यशस्विनः॥ ४९ ॥
तेषां वै सकला विद्या नेतरेषां गुरुद्रुहाम्।
गुरुद्रोहाद्रौरवाप्तिर्मूको गद्गदवाग् भवेत्॥ ५० ॥

वधिरो वा भवेदन्धो नीचो नीचार्थकृत्खलः।
गुरोरग्रे च कपटं मिथ्यावाग्दूषणं वृथा॥५१॥
करोति निन्दां हास्यञ्च अन्धे तमसि मज्जति।
गुरुं हुंकृत्य तुंकृत्य नादृत्य च विनिन्द्य च॥५२॥
दण्डं वा पादुकोद्यम्य सद्यो भवति व्रह्महा।
गुरूणां गालिकादानं स्त्रीषु पापेक्षणं तथा॥५३॥
वृत्त्यर्थोच्छेदनं स्तेयं महापापाय जायते।
गुरुसेवा हरेः सेवा दानञ्च हरयेऽर्पणम्॥५४॥
मानं तस्यैव सन्मानं तद्रूपी स यतो मतः।
गुरुर्दाता हरिर्देयस्तस्मादस्त्यधिको गुरुः॥५५॥
हरेरपि हरिर्योसावन्तर्यामितया स्थितः।
हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन॥५६॥
तस्मात्सर्वप्रयत्नेन गुरुमेव प्रसादयेत्।
गुरुं विना वृथा मन्त्रस्सुकृतञ्च वृथा कृतम्॥५७॥
हरेर्नामापि यद्धीनं पुनः कर्मान्तरन्न किम्।
सम्प्रदायं विना मन्त्रस्सम्प्रदायं विना गुरुः॥५८॥
सम्प्रदायं विना नाम सर्वं भवति निष्फलम्।
सिद्धमन्त्रास्तथा विद्याः सिद्धाश्च गुरवः सुराः॥५९॥
न्यासध्यानादिरहिताः केवला अपि सत्फलाः।
तीर्थे काले तीर्थदिशे सत्तीर्थे मनवोऽर्पिताः॥६०॥
स्वप्नैर्देवैर्नरैः स्त्रीभिर्दत्तास्ते सफलाः सदा।
याः स्त्रियो भगवन्निष्ठाः सधवा विधवापि वा॥६१॥
पूजने मन्त्रदानेऽधिकृतास्ता साम्प्रदायिकाः।
नराणामधिकारोऽस्ति दाने च ग्रहणे मनोः॥६२॥
सुरार्चने न च स्त्रीणां भक्तितन्त्रेण तन्मतम्।
बालो वाऽनुपनीतो वा नारी नं च नरेतरः॥६३॥

पश्वादिर्योग्य एवास्ति दानादाने हरेर्मनोः।
ज्ञानरूपो हरेर्मन्त्रो ह्यज्ञानतिमिरापहा ॥ ६४ ॥
अतो मन्त्रसमो नास्ति बन्धुः संसारतारकः।
ब्रह्मयोगोऽस्य कृपया हरेरपि गुरोः सताम् ॥ ६५ ॥
मन्त्रेण ज्ञानतः शास्त्रात् क्रमादत्रावरो वरः।
नास्ति येषां गुरुर्नृणां नारीणां वापि मन्त्रदः ॥ ६६ ॥
न चैषां वदनं वीक्ष्यं गतिश्चैषां न विद्यते।
आनुलोम्येन वर्णानां सम्मता गुरुशिष्यता ॥ ६७ ॥
प्रातिलोम्येन नो शस्ता दाम्पत्यमपि भृत्यता।
श्रवणं कीर्तनं मानं पादसेवा च संस्तवः।
अर्चनं वन्दनं दास्यञ्चार्पणं नवधा गुरोः ॥ ६८ ॥

॥ इति श्रीशाण्डिल्यसंहितायां भक्तिखण्डे चतुर्थांशे नवधागुरुभक्त्युपक्रमो नाम चतुर्थोऽध्यायः ॥ ४ ॥

## ॥ अथ पञ्चमोऽध्यायः ॥

श्रवणं तद्गुणानाञ्च प्रीत्या श्रोत्रेण धारणम्।
कीर्त्तनं यशसां वाचा प्रेम्णा व्याहरणं गुरोः॥ १॥
मानं समादरस्तस्य वपुषा वचसा धिया।
पादुकार्चापादसेवापादसंवाहनादिकम्॥ २॥
आलोको संस्तवो गद्यैर्वेत्रच्छत्रादिधारणैः।
अर्चनं विधिना पूजा निगमागमभक्तितः॥ ३॥
प्रणामो वन्दनं प्रोक्तं स्तुतिर्जापपुरस्सरा।
पादुकाधारणं दास्यमभ्यङ्गस्नापनादिकम्॥ ४॥
उपभुक्तोपभोगश्च तदेकपरता तथा।
सर्वार्पणं स्वार्पणं तत्कामितार्थप्रियार्पणम्॥ ५॥
आचार्यभक्तिभेदानां लक्षणं नवधेरितम्।
प्रत्येकं बहुधा चैषा भक्तानां कृतिभेदतः॥ ६॥
पूजापदानि वक्ष्येऽहं आचार्यस्य च षोडश।
येषु सम्पूज्यमानोऽसौ पुण्यदोऽसौ तदा भवेत्॥ ७॥
आचार्य एव पूज्योऽद्धा न पूज्योऽस्य सुरेश्वरः।
आचार्यमाश्रिता देवा ऋषयश्च सुरेश्वराः॥ ८॥
आचार्यदर्शिता मन्त्रा मूर्तयस्तेन चार्चिताः।
आगमास्तेन व्याख्याता मान्याश्च फलदाश्च ते॥ ९॥
मनसैव मृदा मूर्तिं कृत्वाचार्यस्य संश्रितः।
एकलव्यः स्वयंसिद्धः किं पुनर्विधिना यजन्॥ १०॥
आचार्यस्तनयस्तस्य पत्नी च दुहितानुजः।
मूर्त्तिस्तत्पादुकायुग्मं चित्रं लेखस्तदागमम्॥ ११॥
पीठे च वाहनं स्थानं शय्याशिष्यस्तदासनम्।
भद्रपूजापदानि स्युस्तेषां भेदास्त्वनेकशः॥ १२॥

दीक्षाकाले स्थितो यादृग् ध्याने वा पूजने स्थितः।
कथायामुपदेशे च ध्येयोऽसौ हृदयाम्बुजे॥ १३॥
श्वेतवासाः पीतवासाः स्रक्पुण्ड्रादिविभूषितः।
सहस्रारे मूर्ध्नि कञ्जे ध्येयो योगिजनैर्गुरुः॥ १४॥
प्रभाते पूजनं कुर्यात्स्नातस्य कृतकर्मणः।
स्वयं स्नातश्चरेत्पूजां ततश्चाह्निकमाचरेत्॥ १५॥
एवं स्वकर्मलोपः स्यादतः पूज्येऽस्य पादुके।
पादुकापूजने प्रीतिराचार्यस्य गरीयसी॥ १६॥
केवलं गुरुभक्तो यः कार्यं यस्य न चापरम्।
स समाप्य गुरोः सेवां यत्किञ्चित्कर्म चाचरेत्॥ १७॥
गुरुभक्तिपराः सन्तो मुख्यास्ते हरिसेवकाः।
त एव धन्याः पुण्याश्च पूज्या मान्या हरिर्यथा॥ १८॥
गुरुभक्तिं विना नैव हरिभक्तिः फलप्रदा।
हरिभक्तिं विनाप्येषा गुरुभक्तिः फलप्रदा॥ १९॥
पादाङ्कितं पटं चित्रं हेमादिपदकं तथा।
सर्वं तत्पादुकारूपं चरणाङ्कैर्विभूषितम्॥ २०॥
गृहिणश्शयनं पत्नी दुहिता तनयोऽनुजाः।
भ्राता कुलगुरोः पूज्यः शिष्याश्चैवोर्ध्वरेतसः॥ २१॥
राजपीठं देवपीठं यन्त्रपीठं महोत्तमम्।
मन्त्रपीठं चतुर्धैवं पीठा आदेशिकप्रभोः॥ २२॥
छत्रचामरसंयुक्तं भूषितं राजभूतिभिः।
सिंहाकारश्च हेमादेः राजपीठं गुरोरिदम्॥ २३॥
यत्रानुशास्यते शास्त्रं नृपादिभ्यो यथोचितम्।
हिताय सर्वजगतां सद्धर्मस्य प्रवृत्तये॥ २४॥
शास्त्रास्त्रदुर्गसैन्यादेश्चतुर्धा नयकर्मणः।
यत्रोपदिश्यते रक्षा राजपीठं विशां मतम्॥ २५॥

राजापि गुरुर्लोकानां धर्मज्ञो नीतिवत्सलः।
परोपकारनिरतो गुरुभक्तो हरिः स्वयम्॥ २६॥
राजदेवविभूत्या यो भूषितः कमलाकृतिः।
सर्वदेवमयं चिह्नैर्देवपीठं तदुच्यते॥ २७॥
स्थित्वात्र देवताध्यानं देवार्चास्थापनादिकम्।
करोति चोपदिशति देवरूपेण दैशिकः॥ २८॥
यन्त्रमन्त्रात्मकं पीठं यन्त्रपीठं तदुच्यते।
स्वेच्छाकारं चतुष्कोणं मन्त्रसिद्धिप्रदायकम्॥ २९॥
मन्त्रानुपदिशेदत्र मन्त्रान् संसाधयेदपि।
देववत्पूजयेच्चैनं सायं प्रातः समाहितः॥ ३०॥
यस्यायं पूजितः पीठो गृहे तिष्ठति नित्यदा।
तत्राभयं महालक्ष्मीर्विजयो जायते ध्रुवम्॥ ३१॥
पारम्पर्यगतं पीठं तद्बुद्ध्यावापि कल्पितम्।
संस्कृतं मुनिभिः सम्यक् मन्त्रपीठं तदुच्यते॥ ३२॥
आचार्यो मन्त्रपीठस्थो योग्यः कर्मसु स स्वयम्।
मन्त्रव्याख्याकरो व्याख्याकरो धर्मोपदेशकः॥ ३३॥
आचार्यो निजपीठस्थः सर्वेषां पूज्यतां व्रजेत्।
न चास्य पूज्यः कोऽप्यस्ति सम्प्राप्तं स्वगुरुं विना॥ ३४॥
आचार्यवंशप्रभवा गुरवः स्वागमस्य ये।
राजानो माननीया ये तेऽपि मान्या यथोचितम्॥ ३५॥
समागतस्तं प्रणमेद् बद्धाञ्जलिपुटः स्थितः।
नोपायेद्रिक्तपाणिस्तु प्रथमं चाज्ञया विशेत्॥ ३६॥
कम्बलाजिनदर्भाद्यैरासनं योगिनां भवेत्।
पट्टोत्तमांशुकैस्तद्धि भोगिनां तूलिकादिकम्॥ ३७॥
येष्वयं सुखमासीनः पूजितः पूजयेच्च तत्।
स्वदारैः शयनं पूज्यं दासैश्चावरजन्मभिः॥ ३८॥

मूर्त्तिचित्रादिभिः सर्वैर्वाहनं यानमेव च।
लेखो जपवटिश्चापि विदा पूज्यं तथागमम् ॥ ३९ ॥
शिष्यो गुरूणां सम्पूज्यः प्रथमश्चोर्ध्वरेतसाम्।
अनुकूलगुणैर्युक्तस्तदभावे सतीर्थकः ॥ ४० ॥
सम्प्रदायस्य विद्वेषो प्रतिकूलोऽर्थधर्महा।
शिष्यः सतीर्थो नैवार्च्यो नायं तत्पदमर्हति ॥ ४१ ॥
गृहिणां क्वचिदेवायमर्च्यः स्यात्सहधर्मणि।
पुत्रः स्वदुहिता बन्धुः साधवोऽर्च्या ह्यनुक्रमात् ॥ ४२ ॥
यत्र स्थितश्च गुरुभिर्नीयते पुण्यकर्मसु।
स्थानं तदेव सम्पूज्यं पितुर्वै पादुकासनम् ॥ ४३ ॥
यत्किञ्चित्तस्य सम्बन्धि प्रियं पुण्यं सुशोभनम्।
तत्सर्वं पूजयेच्छिष्यो दासीदासभृतादयः ॥ ४४ ॥
ब्राह्मणः सर्ववर्णानां पूज्यो भवति सद्गुरुः।
राजन्याद्याश्चानुलोमैः प्रातिलोम्येन शिष्यता ॥ ४५ ॥
मन्त्रार्थे वैदिके मन्त्रे विप्राणामेव सा मता।
मोक्षे भागवते धर्मे ह्यन्यस्यापि महात्मनः ॥ ४६ ॥
साङ्ख्ययोग्यादिभिः प्रोक्तं मोक्षशास्त्राद्यनुत्तमम्।
एवं भागवतं शास्त्रं नारदाद्यैर्महर्षिभिः ॥ ४७ ॥

॥ इति श्रीशाण्डिल्यसंहितायां भक्तिखण्डे चतुर्थांशे गुरुपूजापदनिरूपणं नाम पञ्चमोऽध्यायः ॥ ५ ॥

## ॥ अथ षष्ठोऽध्यायः ॥

गुरुरूपी स भगवान् सर्वत्र गुरुमूर्त्तिषु।
विराजते समुद्धर्त्तुमेकोऽनेकस्वरूपधृक् ॥ १ ॥
एष एव निजं कार्य्यमुद्धारं भजतां नृणाम्।
कृत्वा निवर्त्तते तस्मादर्चाभ्यश्च यथा हरिः ॥ २ ॥
तेषां स्वकर्मभिस्तैस्तैः फलं तादृक् प्रयच्छति।
तद्भक्तानां स्वश्रद्धाया अनुरूपं प्रयच्छति ॥ ३ ॥
गुरुमूर्त्तिप्रतिकृतिस्तथा तत्पादुकायुगम्।
गुरुरूपी हरिः साक्षात्पूजने विशति स्वयम् ॥ ४ ॥
गुरुवद्गुरुपत्नीषु पादुकासु सुतेषु च।
आसने वेदिकास्थाने तदीयेष्वर्चनं चरेत् ॥ ५ ॥
गुरूणां पादुके पूज्ये विप्राणां चरणद्वयम्।
ऋषीणां निलयं पूज्यं पितॄणां पिण्डमेव च ॥ ६ ॥
सिंहासनं नरेन्द्राणां महतामनुशासनम्।
देवानां मूर्त्तयः पूज्याः सर्वेषां वा यथायथम् ॥ ७ ॥
न चासम्पूज्य भुञ्जीत गुरुं वा गुरुपादुके।
महात्मनां तद्भक्तानां व्रतमेवं निरूपितम् ॥ ८ ॥
दक्षिणे जलजं वज्रं चापं कौमोदकी तथा।
व्रततिस्तोरणं केतुः श्रीगुरोश्चरणे मतम् ॥ ९ ॥
वामे मीनाङ्कुशे चक्रं सरोजं च यवो ध्वजः।
कलशो राजते नूनं भक्तानां सुखहेतवे ॥ १० ॥
श्रीगुरोश्चरणौ पूज्यौ पादुके वापि भक्तितः।
नियमो वा सदा धार्य्यो लब्धमन्त्रैश्च दीक्षितैः ॥ ११ ॥

समक्षे वा परोक्षे वा गुरोराज्ञानुरोधतः।
पूजयेत्पादुकायुग्मं पटं वापि तदङ्कितम् ॥ १२ ॥
गुरुमूर्त्तिः परं ब्रह्म पादुकायां व्यवस्थितम्।
तस्मात्तत्पादुके पूज्ये तद्भक्तैर्नित्यदार्चने ॥ १३ ॥
गुरुभक्तिरतास्सन्तो दृश्यन्ते सर्व एव हि।
को नाम तद्विरोधीह वैदिकोऽवैदिकोऽपि वा ॥ १४ ॥
गुरुभक्तिरता लोका भाग्यवन्तो यशस्विनः।
तेषां वै सफला विद्या नेतरेषां गुरुद्रुहाम् ॥ १५ ॥
भृतकाध्यापने चैव भृतकाध्ययने तथा।
गुरुता शिष्यता नैव पुण्यं न नियतेऽकृते ॥ १६ ॥
गुरोराजीव्यमापाद्य योऽधीते गुरुभक्तितः।
पुण्यं शतगुणं तस्य गुरोरध्यापने तथा ॥ १७ ॥
याज्ञवल्क्येन रैभ्येण विद्या दक्षिणयार्पिता।
उपहारं ततो ग्राह्यं विद्याया पूजनं हि तत् ॥ १८ ॥
देवस्य दक्षिणे पार्श्वे पूजयेद् गुरुपादुकाम्।
निवेश्य फलकेऽभ्यर्च्य यथालब्धोपचारकैः ॥ १९ ॥
गुरोः समक्षे तस्याग्रे यजेत्पीठेऽस्य पादुके।
पादाङ्कितं पटं चापि मूर्त्तिस्थानान्तरे यजेत् ॥ २० ॥
आत्मपात्रं गुरोः पात्रं भगवत्पात्रमेव च।
न तत्र सङ्करं कार्यं पाद्यार्घ्याचमनेष्वपि ॥ २१ ॥
चित्रं काचावलम्बेन लेखं कोशावलम्बतः।
पुस्तकं पट्टकालम्बात्पूज्यमन्यद्यथायथम् ॥ २२ ॥
गुरुपत्नीं स्वसारञ्च तनयां युवतीं स्नुषाम्।
प्रणामैः पूजयेद्दूरात्पूजाद्रव्यसमर्पणैः ॥ २३ ॥

वृद्धायाश्चरणौ पूज्यौ बालायाश्च तथा गुरोः।
सदा ज्ञातः समक्षेऽर्च्यः परोक्षे तु स्वतोऽखिलाः॥ २४॥
पुत्रोऽनुजोऽस्य शिष्यो वा पूज्यास्तदनुवर्त्तिनः।
सेवकाश्च प्रिया मान्या नित्यं वै तीर्थमासनम्॥ २५॥
वाहनं मस्तकेऽभ्यर्च्यं यानं तदुपवेशने।
वेदिकायां पदौ पूज्यौ एवमन्यद्यथोदितम्॥ २६॥
तीर्थकाले तीर्थदिशे विशेषार्चनमाचरेत्।
पूर्णायां गुरुवारे च गुरुचारे गुरोः स्थितौ॥ २७॥
गुरोर्जन्मदिने चैव तथा मूलगुरोर्गुरोः।
सम्प्रदायगुरोश्चापि निजजन्मदिने तथा॥ २८॥
संस्कारे चोत्सवे दीक्षादिने पर्वदिनेष्वपि।
आषाढे गुरुपूर्णायां मैत्रश्रवणयोस्तथा॥ २९॥
द्वादश्यां श्रावणे शुक्ले भाद्रे सोमदिने तथा।
आश्विने श्राद्धदिवसे द्वादश्याञ्च विशेषतः॥ ३०॥
कार्त्तिकेऽमादिनेऽभ्यर्च्यो मार्गशीर्षेऽखिले तथा।
माघकृष्णचतुर्दश्यां त्रिपुरारिमहोत्सवे॥ ३१॥
देवर्षेर्ऋषिपञ्चम्यां पञ्चम्याञ्चास्वपे हरेः।
चैत्रामादिवसे जन्मोत्सवे नारायणप्रभोः॥ ३२॥
विशेषार्चा प्रकर्तव्या आचार्यस्य महात्मनः।
कृते शतगुणं पुण्यं दुःखहान्यै सुखाय च॥ ३३॥
विप्राणां ज्ञानवृद्धिः स्यात्क्षत्रियाणां जयो भवेत्।
वैश्यानां धनवृद्धिः स्याच्छूद्राणां स्यादनामयम्॥ ३४॥
पुंसां पौरुषसंसिद्धिः स्त्रीणां सौभाग्यमुत्तमम्।
पुत्रवित्तैषणा लोकैषणा सिद्ध्यन्ति सर्वशः॥ ३५॥

कामिनो कामसंसिद्धिर्निष्कामानां स्वतोऽखिलम् ।
रोगार्त्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात् ॥ ३६ ॥
भयाद्विमुच्यते भीत आपद्भ्यः प्राप्त आपदः ।
वन्ध्यापि लभते पुत्रं गुर्विणी जनयेत्सुतम् ॥ ३७ ॥
दुर्भगा सुभगा भूयात्कन्या विन्दति सत्पतिम् ।
विद्यार्थी लभते विद्यां मुमुक्षुर्ज्ञानमाप्नुयात् ॥ ३८ ॥
भक्तिधीर्लभते भक्तिं विरक्तिं च विरक्तिधीः ।
पापेभ्यो मुच्यते पापी वर्द्धते पुण्यसञ्चयः ॥ ३९ ॥
सर्वापराधैर्मुच्येत कृतैरपि हरेर्गुरोः ।
गुरुपूजाफलं नालं वक्तुं देवो महीधरः ॥ ४० ॥
इतः परं न किमपि श्रेयसां श्रेय उत्तमम् ।
गुरुपूजा प्रकर्त्तव्या साक्षाद्भक्तैर्द्विजन्मभिः ॥ ४१ ॥
गुरुः परगुरुश्चैव परात्परगुरुस्तथा ।
विलोमेन तु सम्पूज्या अनुलोमात्पृथक्स्थितौ ॥ ४२ ॥
मन्तारं त्रायते मन्त्रो गुरुणा कृपयार्पितः ।
ऋष्यादिनियमो नास्ति सिद्धे मन्त्रेऽस्य नामभिः ॥ ४३ ॥
विद्या रहस्यविज्ञानपरमात्मप्रकाशिका ।
देया च विधिना ग्राह्या सम्प्रदायागतां जपेत् ॥ ४४ ॥
मनुर्मननतः सिद्धिं ऋष्यादिनियमैर्युतः ।
पुरश्चर्य्यादिभिः सिद्धिं साधयेत्कृपया गुरोः ॥ ४५ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे पूजादेरुपदेशनं नाम षष्ठोऽध्यायः ॥ ६ ॥

## ॥ अथ सप्तमोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

चत्वारो जन्मदिवसाश्चतुर्विंशतिवासराः।
हरेर्गुरोर्जन्मदिनं पूजारम्भस्ततश्चरेत् ॥ १ ॥
तत्रादौ मण्डलं कार्यं सपीठमपि शोभयनम्।
पात्रन्यासं तत्र कुर्याद् द्रव्यन्यासं विशोधितम् ॥ २ ॥
नमस्कृत्य गुरुं देवं विष्वक्सेनं समर्च्य च।
सङ्कल्पं चापराधानां मुक्तये सिद्धये चरेत् ॥ ३ ॥
गुरुर्मूलगुरुश्चापि सम्प्रदायगुरुस्तथा।
शाखाभेदो गुरुर्मान्यो गुरवः पञ्चधा स्मृताः ॥ ४ ॥
गुरुर्मन्त्रप्रदो मूलगुरुराम्नायमूलकृत्।
सम्प्रदायगुरुः प्रोक्तस्तदाम्नायप्रचारकः ॥ ५ ॥
शाखाभेदगुरुस्तत्र विशेषार्थप्रदर्शकः।
विद्यातपो वृत्तवृद्धो मान्यश्चाम्नायतत्परः ॥ ६ ॥
सर्वे वाम्नायगुरवो नमस्या निजनामतः।
ततः श्रीगुरुपादौ वा पूजयेत्पादुकायुगम् ॥ ७ ॥
वेदैर्वेदार्थमन्त्रैर्वा पौराणैरागमैरपि।
नाममन्त्रैश्च सम्पूज्ये तथा लब्धोपचारकैः ॥ ८ ॥
यो ब्रह्माणं महामन्त्रं मदो यद्दारुरित्यपि।
नमो ब्रह्मण इत्येतद्गुरुं मन्त्रैस्त्रिभिर्यजेत् ॥ ९ ॥
ब्रह्माणं ब्राह्मणं कृत्वा योग्यं वै दीक्षया मनोः।
तस्मै ददाति सद्विद्यां व्रजामि शरणञ्च तम् ॥ १० ॥

संसारसिन्धोः पारे यत्प्लवते प्लावयत्यमुम् ।
अपौरुषञ्च तद्दारु एनोहङ्गन्तृ तद्युगम् ॥ ११ ॥
ब्रह्मरूपश्चाग्निरूपः पृथिव्याः पादुकात्मना ।
औषधीनाञ्चोपदेशैर्वाचो मन्त्रस्वरूपतः ॥ १२ ॥
वाचस्पतिर्मन्त्रदाता विष्णुः सत्त्वगुणोदयः ।
सर्वप्रकारतः सर्वैर्महानाचार्य उच्यते ॥ १३ ॥
एवं मन्त्रत्रयार्थेन ज्ञातेन गुरुपादुके ।
अभ्यर्च्यतेऽतिफलदे तथैव निजमन्त्रतः ॥ १४ ॥
नमो भगवते तस्मै गुरवे बुद्धिदायिने ।
शरणागतप्रोद्धर्त्रे पुरुषोत्तमरूपिणे ॥ १५ ॥

ॐनमो भगवद्भ्यां शरणागतसमुद्धारकाभ्यां निःशेषदोषनिर्मुक्ताशेषगुणालङ्कृतभजनानन्दनिमग्नभागवताचार्यचरणपादुकाभ्याम् ॥ १६ ॥

मन्त्रेण चामुनाभ्यर्च्य श्रीगुरोः पादुके शुभे ।
विशेषार्चास्वष्टशतनामभिः पादुके यजेत् ॥ १७ ॥
गन्धपुष्पे धूपदीपे नैवद्यं पञ्चधार्चने ।
पाद्यार्घ्याचमस्नानानि तैः साकं नवधार्चने ॥ १८ ॥
ताम्बूलमारार्तिकञ्च पुष्पार्चा चैकधार्चने ।
नतिस्तुतिभ्रान्तिबलिर्ववित्षोडशधार्चने (?) ॥ १९ ॥
आवाहनञ्चासनञ्च पाद्यमर्घ्यं तथाचमम् ।
स्नानं वस्त्रोपवीते च भूषागन्धाक्षतैस्तथा ॥ २० ॥
पुष्पाणि पुष्पमाला च धूपदीपार्पणक्रिया ।
नैवेद्यं चैव पानीयं ताम्बूलं चापि दक्षिणा ॥ २१ ॥
नीराजनञ्च कुसुमाञ्जलिर्नतिप्रदक्षिणे ।
स्तुतिबलिश्चोपचारैः पूर्णां पूजामहोत्तमाम् ॥ २२ ॥

छत्रचामरपिच्छाद्यैस्तथा तौर्य्यत्रिकेण च।
शङ्खघण्टादिवादित्रैरभ्यङ्गमर्द्दनादिभिः॥२३॥
उपचारविशेषैश्च चतुःषष्ट्यवधिश्च सा।
महोत्तमा महापूजा भक्तवर्य्यैर्विधीयते॥२४॥
आवाहनं तथा स्नानं गन्धाक्षतसमर्पणम्।
पुष्पं धूपञ्च दीपञ्च नैवेद्यं साङ्गमेव च॥२५॥
ताम्बूलमारार्त्तिकञ्च पुष्पाञ्जलिसमर्पणम्।
प्रदक्षिणा प्रणामानि पूजा नित्या प्रकीर्त्तिता॥२६॥
तिष्ठन् पूजादर्शनञ्च साष्टाङ्गप्रणतिस्ततः।
प्रदक्षिणाश्चतस्रश्च तत्तीर्थग्रहणं त्रिधा॥२७॥
चरणस्पर्शनं चैव नैवेद्यग्रहणं ततः।
उत्तीर्णगन्धमाल्यादिधारणं मूर्ध्नि मोदतः॥२८॥
एवं कृते कृता पूजा जायते प्रेक्षतामपि।
अनयापि फलं तादृगशक्तानां नृणामिह॥२९॥
एकधा स्यात्प्रणामेन सा प्रदक्षिणया द्विधा।
त्रिधा वादित्रनादेन चामरव्यजनार्चनैः॥३०॥
उपढौकितदानेन चतुर्थी सा प्रकीर्त्तिता।
तत्तीर्थग्रहणेनैव पञ्चधा सा प्रदृश्यते॥३१॥
प्रतिपत्तिः पञ्चधैवं पूजने दर्शने चरेत्।
एवं पूजाविधिः प्रोक्तः समासेन द्विजोत्तमाः॥३२॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तुरीयांशे पूजापटलं नाम सप्तमोऽध्यायः॥७॥

# ॥ अथाष्टमोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

सम्राट्सिंहासनस्थस्तु भूषितो राजभूतिभिः।
सन्नद्धोऽसौ भवेद्राजा मान्यो धृष्योऽतिधर्षणः ॥ १ ॥
प्रविशन्ति च दिक्पालास्तस्य देहे हरिः स्वयम्।
तस्यानुशासनं लोका मन्यन्ते दण्डधारिणः ॥ २ ॥
न सुखायाभिमानेन राज्ञः सिंहासने स्थितिः।
प्रजानां रक्षणार्थाय धर्मस्य च प्रवृत्तये ॥ ३ ॥
आक्रुष्टो दिक्कृते राजा मध्याह्ने वा महानिशि।
याति दुःखविमोक्षाय सुखं क्व सहते क्षणम् ॥ ४ ॥
एवमाचार्यः सम्राजित्स्थितसिंहासने गुरुः।
राजदेवविभूत्याढ्या भूषितोऽर्च्यो नृणां भवेत् ॥ ५ ॥
भवेत् प्रभावसम्पन्नो विशते पुरुषोत्तमः।
वर्त्तते शासनं तस्य अनुल्लङ्घ्यं मनोरिव ॥ ६ ॥
मनसा कर्मणा वाचा धर्मं यः कुरुते गुरुः।
तस्यानुशासनं धर्म्यं स्वीकुर्वन्ति मृगा अपि ॥ ७ ॥
न सुखायाभिमानाय गुरुभिर्गृह्यते पदम्।
उपकाराय लोकानां श्रेयसेऽत्र परत्र च ॥ ८ ॥
सिंहासने सामारूढः कृच्छ्राद्धर्मं प्रसाधयेत्।
पूर्वेषामासनं धर्मकृते दत्तं विभावयेत् ॥ ९ ॥
मातृपितृकलत्रार्थं वृत्तिदो ना भृतस्य च।
पञ्चधा कुलतः सिद्धः संस्कृत्या च पदेऽर्हति ॥ १० ॥

शान्तो दान्तो मृदुर्धीरो गम्भीरोऽमृतवाक् शुचिः।
विद्याविनयवित्ताढ्य आम्नायस्थः पदेऽर्हति ॥ ११ ॥
सम्पन्नो विद्यया भक्त्या विरक्त्या च विवेकतः।
ज्ञानविज्ञानसम्पन्नः सुशीलः पदमर्हति ॥ १२ ॥
अमानी मानदो दक्षो मैत्रः करुण आत्मवान्।
जितेन्द्रियमनाः शक्तो निगर्वः पदमर्हति ॥ १३ ॥
भक्तिमान्भगवत्यद्धा जपकृच्च स्वधर्मकृत्।
सन्मार्गस्योपदेष्टा च व्याख्याता पदमर्हति ॥ १४ ॥
शिष्योपदेशे कुशलः शिष्याणां हितकृद्घृणी।
सर्वदोषविनिर्मुक्तो गुणाढ्यः पदमर्हति ॥ १५ ॥
कामः क्रोधो मदो लोभो दम्भाहङ्कृतिशाठ्यते।
पैशुन्यं परनिन्दा च प्रमादो मोह एव च ॥ १६ ॥
परद्रोहश्चातितृष्णा ईर्ष्यासूया घृणा क्षमा।
जिह्वोपस्थजयो लौल्यं परनिन्दात्मसंस्तुतिः ॥ १७ ॥
एवमादिमहादोषो यस्य न स्पृशते धियम्।
सम्प्रदायागतो भव्य आचार्यपदमर्हति ॥ १८ ॥
वेदमूर्त्तिर्भवेत्पीठं यन्त्राढ्यं मन्त्रशोधितम्।
तत्त्वयोगासनं भव्यमासनं संविदात्मकम् ॥ १९ ॥
छत्रं तत्कर्ममीमांसां साङ्ख्ययोगौ च चामरे।
भक्तिज्ञानांशुकश्चायं वेदान्ताङ्गैरलङ्कृतः ॥ २० ॥
तर्कागमप्रतीहारः काव्यैः संस्तूयते गुरुः।
शङ्खघण्टादिनिनदैर्धर्मः संपोष्यते सुरैः ॥ २१ ॥
पताकया ध्वजेनापि शरण्यानां समाह्वयः।
शङ्खचक्राद्यायुधानि नृणामभयदानि च ॥ २२ ॥

तालवृन्ते च पिच्छे च षडङ्गानि च दर्पणे।
ब्रह्मज्योतिः पराज्योतिर्घृततैलप्रदीपके ॥ २३ ॥
भक्तिज्ञानात्मकाम्नायौ आचार्यस्य च पादुके।
तदागमं नामरूपमर्थरूपः स्वयं गुरुः ॥ २४ ॥
विद्यापरिकरैर्युक्तोऽविद्यामाक्रम्य तिष्ठति।
शब्दब्रह्मपरब्रह्मनिष्णातो देशिको मतः ॥ २५ ॥
तपो विवेको वैराग्यं योगो भक्तिश्च पञ्चमी।
इयं विद्या पञ्चपर्वा शिखासूत्रस्रगादिगा ॥ २६ ॥
चार्वाकास्सुगता जैना बाह्या म्लेच्छमुखास्तथा।
पञ्चमः पञ्चमास्ते तु मौढ्यविद्याऽध्वरूपिणः ॥ २७ ॥
निषिद्धार्थेषु वेदार्थं पाखण्डा योजयन्ति ये।
तानि पापस्य खण्डानिं कापालाद्यागमानि च ॥ २८ ॥
पाशब्देन त्रयो वेदास्तेषां ये मूलखण्डकाः।
पाखण्डास्तेन बौद्धाद्या नास्तिको न्यैकसोऽपि धृक् (?) ॥ २९ ॥
धर्मिष्ठं सुचरित्रं च विप्रं धर्मप्रवर्त्तकम्।
आचार्य्यं मानयेद्राजा धर्मार्थमभियोजयेत् ॥ ३० ॥
सम्प्रदायागतानार्यान् लोके धर्मप्रवर्त्तकान्।
सत्कृत्य दानमानैस्तान् राजा धर्मेऽधियोजयेत् ॥ ३१ ॥
लोकवेदबहिर्भूतं चारयन्ति च ये मतम्।
नूतनञ्चोपजीव्यार्थं तान्पाषण्डान्निवारयेत् ॥ ३२ ॥
आचार्यो वेदवत्पूज्यः प्रणामैर्दण्डवत्कृतैः।
सदाज्ञापालने राज्ञा पादसंवाहनादिभिः ॥ ३३ ॥
आचार्यस्य गुणाः प्रेक्ष्याः शिष्यस्यापि च ते तथा।
अलक्षणः कृतघ्नश्च शिष्यः कार्यो न देशिकैः ॥ ३४ ॥

दोषाणां छादनाच्छात्रो. गुणानां सम्प्रकाशनात्।
शिष्योऽनुशासनान्मन्त्रैरन्तेवास्यपि सेवया ॥ ३५ ॥
दासवत्सेवते चान्तेवासी विद्यैकसंग्रहः।
स्वकुटुम्बः कुटुम्बेन सहितो हितमाचरेत् ॥ ३६ ॥
एवं शिष्यस्तथा छात्रः पुत्रवन्मित्रवद्भवेत्।
देववत्पूजयेदेनं मनसा कर्मणा गिरा ॥ ३७ ॥
प्रातर्ध्यानं प्रकुर्वीत मध्याह्ने च निशामुखे।
पतिव्रतेव सेवेत त्यक्त्वा धर्मान्तरं निजम् ॥ ३८ ॥
एककालं द्विकालं वा त्रिकालं वा समर्चयेत्।
धर्मार्थकामनिष्ठेऽस्मिन् पादुकामस्य पूजयेत् ॥ ३९ ॥
अभावे तनयं पत्नीशिष्यादीन्पूजयेद् गुरोः।
आह्निकात्प्रथमं भक्त्या आह्निकान्तेऽपि वा यजेत् ॥ ४० ॥
अधरारणिः शिष्यः स्यादाचार्यश्चोत्तरारणिः।
मन्थानदण्डो मन्त्रः स्याद्विचारो मन्थदामिका ॥ ४१ ॥
विद्यासमुदयश्चाग्निर्मखमभ्यसनं स्मृतम्।
सध्रीचीनं प्रतीचीनं गन्तव्यं तेन कर्मणा ॥ ४२ ॥
उपनीतो वाधिकारी स्याद्दीक्षायामुपदेशके।
नोपनीतोऽपि गर्भस्थः प्रह्लादोऽनुग्रहे यथा ॥ ४३ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तुरीयांशे परिकरस्वरूपनिरूपणं नामाष्टमोऽध्यायः ॥ ८ ॥

## ॥ अथ नवमोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

बहुपौरुषतोऽतीतसंस्काराणां द्विजन्मनाम्।
आचार्य आचरेत्पूर्वं संस्कृतिं तां वदाम्यहम् ॥ १ ॥
स वित्तार्द्धेन पादेन तदर्द्धेनातिशक्तितः।
प्रायश्चित्तं कारयेद्वै वपनादिपुरःसरम् ॥ २ ॥
कुमारस्योपनयनं गर्भाधानादिभिश्चरेत्।
उपदेशश्च गायत्र्यास्तस्य चैवाश्रमान्तरम् ॥ ३ ॥
प्रायश्चित्तन्तु लुप्तानां संस्काराणां क्रिया ततः।
पटगर्भपिधानाद्वा प्रायश्चित्तिश्च केवला ॥ ४ ॥
सङ्कल्पं प्रथमं कुर्यात्ततः पुण्याहवाचनम्।
विष्वक्सेनं समर्च्यैव गणेशादिप्रपूजनम् ॥ ५ ॥
गृहशान्तिस्ततः कुर्यात्तन्त्रनान्ध्यर्चनं भवेत्।
कुलदेवार्चनं तत्र मण्डपादि यथोदयम् ॥ ६ ॥
यो हि त्रयोदशमखो वटोः क्षौराभिषेचनम्।
तथोपवीतं सूत्रोक्तं कारयेद्वै द्विजन्मनाम् ॥ ७ ॥
विप्राय देया गायत्री त्रिष्टुब्वै बाहुजन्मने।
वैश्याय जगती देया इति प्राह पराशरः ॥ ८ ॥
सर्वेषामेव गायत्री प्राह पारस्करः पुरा।
अतीतसंस्कृतीनां वै नैतन्मम मतं भवेत् ॥ ९ ॥
युगान्तरे तु सा चेष्टा पारम्पर्यादपि क्वचित्।
अलाभे तु प्रकर्त्तव्या स्वेष्टार्णैस्तत्पदत्रया ॥ १० ॥

गृहिणो वैदिकी नैषा वर्णित्वं स्याद्विलोमतः।
पतितः स्यात्तया चायं देया तं वाऽऽगमोदिता ॥ ११ ॥
विप्रस्य ब्रह्मगायत्री क्षत्रियस्य विवस्वतः।
वैश्यस्य वैष्णवी योग्या रौद्री सा कुण्डगोलयोः ॥ १२ ॥
सर्वेषामेव वर्णानां गायत्री पौरुषोत्तमी।
अतीतसंक्रियाणां सा योग्या वर्णाश्रमार्थदा ॥ १३ ॥
द्विजोऽनया संस्कृतः स्यात्स्मार्त्ते धर्मेऽर्चने हरेः।
श्राद्धे दाने प्रतिष्ठायां तीर्थे पौराणिकेऽर्हितः ॥ १४ ॥
मन्त्रैर्वेदार्थमन्त्रैश्च पोराणै रागमोदितैः।
स्नानसन्ध्यादिषट्कर्म तेषां कार्यं स्मृतं बुधैः ॥ १५ ॥
संस्कारा ब्राह्मणद्वारा धर्माः श्राद्धादयः परे।
कारयेद्वा स्वयं कुर्यान्मन्त्रांस्तत्र गुरुः पठेत् ॥ १६ ॥
विष्वक्सेनं प्रपूज्यैव गणेशाद्यर्चनं चरेत्।
विष्णुं गृहेशं कालिन्दीं मातृकां क्षत्रपं गिरिम् ॥ १७ ॥
अधिदेवं वासुदेवं कुम्भे सङ्कर्षणं यजेत्।
प्रद्युम्नो मण्डले पूज्योऽनुरुद्धस्तथाऽनले ॥ १८ ॥
प्रजापति-ऋषिस्तस्य गायत्री छन्द इष्यते।
एतस्य मन्त्रराजस्य देवता पुरुषोत्तमः ॥ १९ ॥
पिण्डबीजं भवेद्बीजं लक्ष्मीतारः स्मरस्तथा।
नमः स्वाहा च वा शक्तिर्नियोगो द्विजताप्तये ॥ २० ॥
दत्तोपवीतं मन्त्रेण गुरुरेनं मनुं ददेत्।
दक्षिणे श्रवणेऽर्भस्य स चाप्योपायनं चरेत् ॥ २१ ॥
गोपालो मा च गोविन्दः कृष्णश्चेति पदत्रयम्।
विद्महे धीमहि प्रचोदयादन्तैर्मनुर्भवेत् ॥ २२ ॥
ऋष्यादि च कराद्यङ्गन्यासो मन्त्रपदार्णयोः।
स कुर्याद् गुरुणा प्रोक्तो ध्यानञ्चैवार्थचोदितम् ॥ २३ ॥

पूजयेद् देवदेवेशं गृह्णीयादाशिषं गुरोः।
स्वसर्वस्वेन शक्त्या वा आचार्य्यं तोषयेद्धनैः॥ २४॥
विप्राश्च दानमानाभ्यां दीनानन्यांश्च तोषयेत्।
इत्थं कृते द्विजातिः स्याद्वल्लभः श्रीपतेरपि॥ २५॥
गुरोरनुग्रहाच्छिष्यो भुक्तिं मुक्तिञ्च विन्दति।
समर्चनीयः सर्वेषां विजयी हरिभक्तिमान्॥ २६॥
मन्त्रराजस्य दीक्षैव प्रायश्चित्तपुरःसरा।
गृहाश्रमेऽधिप्राप्तानां व्रतेन रहितात्मनाम्॥ २७॥
तावताप्यधिकारी स्याच्छ्राद्धे दानादिकर्मणि।
हरिभक्तौ च वेदान्तभावार्थस्य परिग्रहे॥ २८॥
धारयेदुपवीतं त कुर्यात्पौराणिकीं कथाम्।
गुरोर्भक्त्या हरेर्भक्त्या द्वितीया जातिरिष्यते॥ २९॥
पञ्चमादुद्वादशाब्दान्तं कन्यकाया वटोरपि।
कालशुद्धिप्रतीक्षा स्यात्परत्रावश्यकी न सा॥ ३०॥
गुरौ मूढे सिते मूढे दूषिते समयान्तरे।
अलभ्यगुरुलाभे तु न दोषोऽर्णपरिग्रहे॥ ३१॥
ग्रहणे भास्करस्यापि तीर्थे पुण्ये महोत्सवे।
मन्त्रराजो गृहीतव्यो न तत्र विधिविस्तरः॥ ३२॥
अनन्यगतिकः शिष्योऽनुग्राह्यो गुरुणा सदा।
न तत्र नियमः कश्चिद्विधेर्वा देशकालयोः॥ ३३॥
प्राशचित्तापवादाभ्यां ग्राह्योऽर्णः समयं विना।
अनन्यगतिके शिष्ये गुरौ चैष विधिः स्मृतः॥ ३४॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तुरीयांशे उपनीतोपदेशनं नाम नवमोऽध्यायः॥ ९॥

## ॥ अथ दशमोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

मन्त्रे गुरौ तथा देवे अधिभूताधिवस्तुनि।
एकताभावना युक्ता तदैव सकलर्द्धयः॥ १ ॥
प्रतिपाद्यो भवेद्देवो मन्त्रश्च प्रतिपादकः।
तयोरैक्यं द्वयो रूपं गुरुर्धत्ते करोति च॥ २ ॥
भेदो न वास्तवं वस्तुपार्थक्ये पार्थ एव सः।
अर्थरूपो न वा धर्मस्तस्माद्ब्रह्मैव केवलम्॥ ३ ॥
ब्रह्मातिरिक्तो नैवास्ति किञ्चिद्वै ब्रह्मदर्शने।
सर्वं खल्विदं ब्रह्म इति तत्त्वनिदर्शनम्॥ ४ ॥
नात्र बाधो भवेद् बाध्यबाधको बोधकश्च कः।
सर्वं ब्रह्मात्मकं वस्तु निर्भ्रान्तं भाति भास्यति॥ ५ ॥
विकाराश्च प्रकाराश्च निराकारास्तथा कृतिः।
ज्ञानमेव पराचीनं पृथग्भूतं निजेच्छया॥ ६ ॥
अभाववति यो भावो प्रतीतः स मृषोच्यते।
सर्वभावात्मके तस्मिन्नभावः कस्य सम्भवेत्॥ ७ ॥
सुवर्णं लौकिकं यस्मात्कटकादिश्च तन्मयः।
प्रकाराश्च विकाराश्च पार्थक्येन विभान्ति ते॥ ८ ॥
सच्चिदानन्दमात्रेऽस्मिन्नामरूपात्मके भवे।
प्रकाराश्च विकाराश्च ब्रह्मरूपा न ते पृथक्॥ ९ ॥
युक्तितो निर्मितं नित्यं नियतश्च न वा भ्रमः।
आकस्मिकश्चापतितो भ्रमो भावोऽप्यभाविनि॥ १० ॥

आकाशे नीलिमा नित्या नियता च प्रतिध्वनिः।
कृतो रागोंऽशुके चाब्जं युक्तितः किं भ्रमात्मकम्॥ ११॥
पीतिमाब्जे दोषजन्या सितायां कटुता तथा।
दोषजन्यापि न मृषा तथा मरुमरीचिका॥ १२॥
केनचित्स्वगुणेनैव सूक्ष्मैरवयवैरपि।
यश्च यद्विद्यते वस्तु तस्य तत्र भ्रमो भवेत्॥ १३॥
सादृश्यात्स्थौल्यदीर्घेण गुणेऽस्ति च फणी स्वयम्।
शुक्तौ मरीचिकायाञ्च रजतांशास्तथाब्लवाः॥ १४॥
कार्यक्षमं प्रतीतं च स्वल्पस्थाय्यतिसूक्ष्मकम्।
मृषेति प्रोच्यते वस्तु तैश्चासदिहोच्यते॥ १५॥
सत्यं चैवानृतं चैव श्रुतौ ब्रह्मेति तद्द्रुतम्।
सत्यं पुनश्च तत्प्रोक्तं सत्ये सत्यं ततोऽखिलम्॥ १६॥
ईश्वरः सत्यसङ्कल्पस्तस्य सङ्कल्पतां जगत्।
सत्यमेवेति तन्नाम रूपं सत्यं च मुण्डके॥ १७॥
तवास्मीति महामन्त्रो मूलमन्त्रेण संयुतः।
दासभावनया सख्यं तादात्म्यञ्च प्रयच्छति॥ १८॥
श्रुते च ब्रह्म मे दासाः कितवा इति (?) कीर्त्तितम्।
सुराश्च तत्परा दासाः कितवाचारिणोऽसुराः॥ १९॥
अष्टाक्षरो महामन्त्रः कृतार्थस्तेन संस्कृतः।
प्रपन्नं शरणं विष्णोः संस्मृतिं यात्यसौ कथम्॥ २०॥
मन्त्रराजस्य सिद्धस्य हरेर्नामात्मकस्य च।
ऋष्यादिनियमो नास्ति पुरश्चर्याऽध्वरादि(षु)कम्॥ २१॥
सिद्धौषधं यथा लोके नानुपानमपेयते।
विश्वासार्थं गुरुर्वन्द्यस्तथाङ्गानि महामनुः॥ २२॥

गोपालस्य महामन्त्रो लघुमन्त्रो दशाक्षरः।
अन्येऽपि तस्य मनवो मुक्तिं भुक्तिं ददन्ति ते॥ २३ ॥
प्रजापतिर्ऋषिश्चाद्ये गायत्रं छन्द ईर्यते।
देवताऽसौ स्वयं देवो बीजं मातरमन्मथौ॥ २४ ॥
स्वाहा नमस्तथा शक्तिर्विनियोगः स्ववाञ्छिते।
पदैः पादैर्भवेन्न्यासो वर्णैर्वापि सबीजकैः॥ २५ ॥
आचक्राद्यैः पृथङ्मन्त्रैः षडङ्गेनापि पूर्णता।
ध्यानञ्चाभिमतं कुर्यात्कार्यानुमत एव वा॥ २६ ॥
अस्य जापेन संसिद्धो निग्रहानुग्रहः क्षमः।
हरिं वशयति क्षिप्रमाचार्यत्वं च गच्छति॥ २७ ॥
अस्य वंशे प्रसूयन्ते आचार्यास्ते भवन्ति हि।
हरेर्भक्ता गुरोर्भक्ता ब्राह्मणा मन्त्रधारिणः॥ २८ ॥
एवं दशाक्षरे मन्त्रे नारदः पङ्क्तिरेव च।
मन्त्राभ्यां संस्कृतो वन्द्यः सर्वेषां नास्य कोऽपि हि॥ २९ ॥
विद्यागुरुर्मन्त्रगुरुः पीठेशाचार्य एव च।
पीठस्थश्चापि ते वन्द्या आसनाद्यैर्यथोचितैः॥ ३० ॥
विद्वांसो ब्राह्मणा मान्या वैष्णवा यतयोऽन्यदा।
यौनविद्यादिसम्बन्धैर्माननना शास्त्रसम्मता॥ ३१ ॥
न चात्र हिंसालेशोऽपि कामक्रोधसमुद्भवः।
श्रवणं कीर्त्तनं विष्णोः श्रवणादि प्रसिद्ध्यति॥ ३२ ॥
अयञ्च ब्राह्मणैर्जप्यो द्विजैर्वा संस्कृतैरपि।
नमोऽन्तोऽयं चैकजातैर्योषिद्भिरपि जप्यते॥ ३३ ॥
गाणेशेभ्यश्च सौरेभ्यः शाक्तेभ्योऽपि विशेषतः।
शैवेभ्यो वैष्णवेभ्यश्च मन्त्रराजो विशिष्यते॥ ३४ ॥

मन्त्रराजात्परो मन्त्रो महाविष्णोरयं मतः।
अस्मात्परो नास्ति मन्त्रो देवः श्रीपुरुषोत्तमः॥ ३५॥
नमोमुखश्च वेदोक्तो नमोऽन्तश्चागमोदितः।
हिरण्यगर्भो गायत्रं तारश्चैव नमस्तथा॥ ३६॥
विनियोगः षडङ्गानि वर्णैर्न्यासो यथायथम्।
ध्यायेद्‌देवं महाविष्णुं पुरुषं विश्वतोमुखम्॥ ३७॥
जप्तव्यः केवलो वापि सिद्धे न्यासादिकं वृथा।
विश्वासाय च मूढानां तदर्थायार्चिनामपि॥ ३८॥
नारायणो महामन्त्रः साध्यो नारायण ऋषिः।
शेषं यथोक्तमेवास्य ध्यानं भुजगशायिनः॥ ३९॥
द्वादशार्णो महामन्त्रो नारदो हि ऋषिः स्मृतः।
तारो नमो बीजशक्तिः षडङ्गन्यासकल्पना॥ ४०॥
ध्यायेदभिमताकारं वासुदेवं चतुर्भुजम्।
सिंहासने समासीनं मुक्तिभुक्तिप्रदायकम्॥ ४१॥
नारसिंहो महामन्त्रो मन्त्रराजः प्रकीर्त्तितः।
प्रजापति ऋषिस्तस्य छन्दोऽनुष्टुप्प्रदृश्यते॥ ४२॥
स्वाहैव शक्तिः क्ष्रौं बीजं देवताऽभयदो हरिः।
ध्यायेदभिमताकारं लक्ष्म्या सौम्यञ्च (भूषित) भीषणम्॥ ४३॥
मन्त्रपादैः पदैर्वार्णैरङ्गैर्वा न्यासकल्पना।
अस्य जापेन संसिद्धोऽप्रधर्ष्यः स्यात्सुरैरपि॥ ४४॥
उद्गिरन् प्रणवोद्गीथं हयग्रीवो महामनुः।
स्त्रौंबीजेन सम्पन्नः स्वाहाशक्तिसमन्वितः॥ ४५॥
प्रजापतिऋषिस्तस्य छन्दोऽनुष्टुप्समीरितः।
विनियोगस्तु बोधार्थे विद्याकामेन जप्यते॥ ४६॥

पादैः पदैस्तथा वर्णैर्न्यासः कार्यो यथोदितः।
न्यासानां पुष्कलत्वे तु फलानां भूरितोदिता ॥ ४७ ॥
ध्यायेच्छ्वेताम्बुजे श्वेतं हयचक्रं चतुर्भुजम् ।
वराभयकरं देवं पुस्तकाक्षवटीधरम् ॥ ४८ ॥
रामतारकमुख्याश्च मनवो ये हरिप्रियाः।
तेऽपि जप्या यथाकार्यमाचार्येण महात्मना ॥ ४९ ॥
जपात्सिद्धिर्जपात्सिद्धिर्जपात्सिद्धिर्न संशयः।
जपयज्ञो हि यज्ञानां विष्णुरेवोत्तमश्च सः ॥ ५० ॥
न चात्र हिंसालेशोऽपि कामक्रोधसमुद्भवः।
स्मरणं कीर्त्तनं विष्णोः श्रवणादि प्रसिद्ध्यति ॥ ५१ ॥
तदीयस्य जपः प्रोक्तः सा स्यात्स्वात्मसमर्पणा।
तस्मात्समर्पणं कार्यं पुत्रदारधनादिकम् ॥ ५२ ॥
कथं स्याद्देहनिर्वाहो देवस्वानुपजीविने।
देवस्वमुपजीवस्तु भासः काकोऽपि जायते ॥ ५३ ॥
यद्दत्तं सुरसं नीरैः सङ्कल्प्य हरये स्वयम् ।
तस्योपभोगो दुष्टोऽस्ति लोके वेदेऽपि गीयते ॥ ५४ ॥
इति चेन्न तथा लोके दत्ता कन्या पितुर्गृहे।
कुरुते सर्वकार्याणि पिता किं तेन दुष्यति ॥ ५५ ॥
श्राद्धे सङ्कल्पितं पूर्वं क्रमशो विनियुज्यते।
भुज्यते चावशिष्टान्नं यजमानैस्तदाज्ञया ॥ ५६ ॥
सत्रे मखे च तीर्थे च इष्टापूर्त्तादिकर्मणि।
नियुज्यते च क्रमशो वित्तं चैवोपभुज्यते ॥ ५७ ॥
ब्रह्मचारी च गुरवे भिक्षान्नं सम्प्रयच्छति।
दत्तान्नं गृह्यते तेन निर्वाहाय निजात्मनः ॥ ५८ ॥

सर्वमेधे च सर्वस्वदाने चात्मोपजीवनम् ।
क्रियते यजमानेन ततः किं तेन दूषणम् ॥ ५९ ॥
शरणागतधर्मोऽयं यथा वै शरणागतः ।
पालकाय निवेद्य स्वं तदंशेनैव जीवति ॥ ६० ॥
वचनेनैव दोषः स्याद्गुणः स्याद्वचनेन च ।
अर्पयेन्निजसर्वस्वं जीवेत्तेनैव दासवत् ॥ ६१ ॥
यत्करोषि यदश्नासि तत्कुरुष्व मदर्पणम् ।
इत्याह भगवान्साक्षात्तेन जीवन्न दुष्यति ॥ ६२ ॥
निर्वाहो यावदर्थेन तत्स्वं प्राणवतां स्वयम् ।
धर्मः प्राणधृतौ देवाराधनं तेन सिद्ध्यति ॥ ६३ ॥
नैवेद्यं चैव (दुग्)धादेः पाद्यादेः प्रतिपत्तये ।
उपभोगो यथा शास्त्रे तथा तस्यार्पितस्य च ॥ ६४ ॥
अहन्तां ममतां त्यक्त्वा सर्वस्वेन हरिं यजेत् ।
जीवेत्तदुपभुक्तेन अर्पितात्मा तु वैष्णवान् ॥ ६५ ॥
अयं प्रकारो मुख्योऽस्ति गौणपक्षात्परो मतः ।
अम्बरीषादिवद्भक्तः सिद्धो बल्ल्यादिवद्भवेत् ॥ ६६ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तुरीयांशे मन्त्रोपदेशो नाम दशमोऽध्यायः ॥ १० ॥

## ॥ अथैकादशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

आम्नायाभिगतानां च स्वाचार्याणां महात्मनाम्।
स्तोत्रावलिं प्रवक्ष्यामि श्रेयसे भक्तये गुरोः ॥ १ ॥
निरञ्जनं नित्यमनन्तमाद्यं यन्नेति नेति श्रुतिसम्मतं च।
तद्धाम दैवं परमं परेभ्यो वन्दे मुकुन्दं पुरुषोत्तमं तम् ॥ २ ॥
अणोरणीयान्महतो महीयान् दूरेऽप्यदूरे बहिरन्तरं च।
विरुद्धधर्माश्रयमाप्तकामं वन्दे मुकुन्दं पुरुषोत्तमं तम् ॥ ३ ॥
परास्य शक्तिः सहजाः स्वभावाः छाया च मायाद्भुतकार्यकर्त्री।
यद्विश्वमानन्दरसात्मरूपं वन्दे मुकुन्दं पुरुषोत्तमं तम् ॥ ४ ॥
रिरंसया यः परिपूर्णकामो निजात्मरूपामकरोत्स्वलीलाम्।
नित्यामखण्डामगुणां गुणाढ्यां वन्दे मुकुन्दं पुरुषोत्तमं तम् ॥ ५ ॥
यो निर्गुणः प्राकृतसद्गुणश्च निजात्मकामोऽपि सदाप्तकामः।
कामं द्विधासीद्बहुधा रमामि वन्दे मुकुन्दं पुरुषोत्तमं तम् ॥ ६ ॥
ऋषिस्वरूपैर्विविधैः स्वरूपैस्तपःप्रसिद्धैर्व्रजभृद्वधूनाम्।
यूथैरसङ्ख्यै रमते स्वसिद्धैर्वन्दे मुकुन्दं पुरुषोत्तमं तम् ॥ ७ ॥
अकारणं कार्यकरी यदृच्छा विधाय तां दोषगुणैर्विमुक्तः।
सृष्टिं विचित्रामवलोकते यो वन्दे मुकुन्दं पुरुषोत्तमं तम् ॥ ८ ॥
शुद्धं तथाद्वैतमनन्तरूपं जगत्स्वरूपेण च विद्धमेकम्।
न चान्ययोगोऽत्र न सम्प्रयोगो वन्दे मुकुन्दं पुरुषोत्तमं तम् ॥ ९ ॥
स्तोत्रं यदेतत्पुरुषोत्तमस्य निरूपितं यद्धरणीधरेण।
दधाति वाचि प्रशृणोति वा यः स याति देवं पुरुषोत्तमं तम् ॥ १० ॥

॥ इति श्रीपुरुषोत्तमस्तोत्रम् ॥

नारायणो यो नरभूजलायो नारायणोऽज्ञाननिवर्तनेन।
नारायणोऽन्तर्यमनेन पुंसां तमादिनारायणदेवमीडे॥ ११॥
पुराणवर्णाः पुरुषोत्तमस्य पुराणमन्त्रः पुरुषः पुराणः।
दधार योऽसौ परिपूर्णरूपस्तमादिनारायणदेवमीडे॥ १२॥
मन्त्रात्मको मन्त्रगुणैस्सुतो यो यस्सर्वमन्त्रान्प्रददौ मुनिभ्यः।
मन्त्राधिदेवोऽखिलमन्त्रगम्यतस्मादिनारायणदेवमीडे॥ १३॥
निश्वासभूता निगमालिरस्य प्रश्वासरूपागमपङ्क्तिरिद्धा।
समस्तशास्त्राणि च यस्य वाचस्तमादिनारायणदेवमीडे॥ १४॥
यस्याष्टवर्णं मनुराजमेकं समाश्रितस्संसृतिपारमेति।
विधेर्विधानं न ह्यत्र किञ्चित् तमादिनारायणदेवमीडे॥ १५॥
यो वासुदेवः खलु वामदेवो यो देवदेवः प्रथमं ततोऽभूत्।
पार्श्वद्वयादस्य च वक्षसश्च तमादिनारायणदेवमीडे॥ १६॥
शेषाय देवाय विशेषभर्त्रे अशेषमन्त्रान्प्रददौ सशेषान्।
निःशेषतः क्लेशनिवृत्तयेऽसौ तमादिनारायणदेवमीडे॥ १७॥
गुरुर्गुरूणामृषभो ऋषीणां यो देवदेवः खलु देवतानाम्॥
यश्चेश्वराणां परमेश्वरोऽसौ तमादिनारायणदेवमीडे॥ १८॥
इति नारायणस्तोत्रं भणितं त्रिपुरारिणा।
पठनाच्छ्रवणात्सद्यो ह्यां शुद्धिं प्रयच्छति॥ १९॥

॥ इति नारायणस्तोत्रम्॥

रसात्मा परात्मा पुरुषोत्तमो यो
निजोत्तारणायैव नारायणाय।
महामन्त्रराजं प्रपेदे यतोऽयं
तमीशं फणीशं गुरुं शेषमीडे॥ २०॥

सहस्राननैर्वाक्सहस्रद्वयेन
सदा कीर्तयन्तं हरेः कीर्तिमेव।
गृणन्तं श्रुतिभ्यो मतं भक्तिकाण्डं
तमीशं फणीशं गुरुं शेषमीडे॥२१॥

विरिञ्चेः कुमारान्प्रति प्राह पूर्वं
नृपं चित्रकेतुं प्रति प्रीतिपूर्वम्।
हरेर्भक्तिशास्त्रं मनुर्यश्च मह्यं
तमीशं फणीशं गुरुं शेषमीडे॥२२॥

सदा योगिनो भोगिनो यं भजन्ते
यथायोगमेषां ददात्यर्थसिद्धिम्।
समृद्धिं करोति प्रियस्यैव विष्णो-
स्तमीशं फणीशं गुरुं शेषमीडे॥२३॥

त्रयीयोगवाग्यो गवां चाप्रकाशो
हरेर्भक्तियोगस्य वक्ता गुणानाम्।
समस्तैर्नुतो योगिभिर्योगगम्य-
स्तमीशं फणीशं गुरुं शेषमीडे॥२४॥

अनन्तो हरेर्वल्लभामुत्तमाङ्गे
अनन्ताङ्घ्रिजामापगां यश्च धत्ते।
अनन्तस्ततोऽनन्तदेवाश्रयो य-
स्तमीशं फणीशं गुरुं शेषमीडे॥२५॥

अशेषे विलीने लये शिष्यते यः
सुपर्यङ्कतां याति संवर्तसिन्धौ।
मुरारेः प्रियाणामुपज्ञं गुरूणां
तमीशं फणीशं गुरुं शेषमीडे॥२६॥

यतो वासुदेवेऽभिप्रद्युम्नमन्तः

समाकर्षयच्चानिरुद्धं निरोद्धुम्।

ततश्चाख्यया याति संकर्षणो य-

स्तमीशं फणीशं गुरुं शेषमीडे॥२७॥

भुजङ्गाङ्गिनो गीर्गिरीशेन गीता

भुजङ्गाङ्गपर्यङ्कभाजः प्रियस्य।

भुजङ्गप्रियस्य प्रियायैव भूयाद्

भुजङ्गप्रयाता भुजङ्गप्रयातैः॥२८॥

॥ इति श्रीशेषस्तोत्रम्॥

नमामोऽसुरारेस्सुरारेर्गणाग्र्यं

नमामोऽन्धकारिं मखारिं निजारेः(रिम्)।

शिरो गाङ्गवारिप्रचारक्षमोऽस्य

नमामः पुरारिं मुरारेः प्रियं तम्॥२९॥

मुखैः पञ्चभिः पञ्चभिः पञ्च षष्ठं

त्रयीसाङ्ख्ययोगाङ्गमारण्यकानि।

जगौ भक्तिकाण्डं हरेस्सौख्यभाण्डं

नमामः पुरारिं मुरारेः प्रियं तम्॥३०॥

हरेरङ्घ्रितो गाङ्गवारि प्रसूतं

कपर्दे कपर्दे कपर्दीचकार।

अखर्वं च गर्वं हरन् जह्नुजाया

नमामः पुरारिं मुरारेः प्रियं तम्॥३१॥

गुरूणां गुरुर्यो मतो नारदेन

उपज्ञोऽपि शिष्यः परः पूरुषस्य।

तृतीयं गुणं यो नियन्तुं नियन्ता।

नमामः पुरारिं मुरारेः प्रियं तम् ॥ ३२ ॥

समस्तागमा मूलमन्त्राश्च सर्वे

यतः संप्रसूता यतः सिद्धिमन्त्राः॥

पुराणार्णमाद्यं दशार्णं जपन्ते

नमामः पुरारिं मुरारेः प्रियं तम् ॥ ३३ ॥

सदाम्नायमाद्यं जगौ नारदाय

विकुण्ठाधिनाथादवाप्यैव पूर्वम्।

ततः शेषतः शेषधर्मं दधार

नमामः पुरारिं मुरारेः प्रियं तम् ॥ ३४ ॥

कृपातो गतो व्यापिवैकुण्ठभाजां

समीपे ददर्श व्रजेशं रसेशम्।

ततोऽनुगृहीतोऽखिलैर्भक्तिवर्यैः

नमामः पुरारिं मुरारेः प्रियं तम् ॥ ३५ ॥

स्थितो यो निदेशाय सिंहासने स्वे

मणिव्रातकीर्णे मुनिव्रातमध्ये।

उपज्ञो गुरुर्ज्ञानदानाय लोके

नमामः पुरारिं मुरारेः प्रियं तम् ॥ ३६ ॥

व्यासेन कथितं पुण्यं त्रिपुरारेर्महास्तवम्।

कीर्तयेच्छृणुयाद्यस्तु स मुरारेः प्रियो भवेत् ॥ ३७ ॥

॥ इति श्रीत्रिपुरारिस्तोत्रम् ॥

यो वेदगर्भस्य च गर्भजातो न गर्भजातः खलु वेदगर्भः।
देवर्षिवर्यं हरिदासवर्यम् आदेशिकानां प्रवरं तमीडे ॥ ३८ ॥
गुरोः पुरारेश्चरणाब्जसेवया अवाप यो मन्त्रवरं मुरारेः।
कृष्णाय योऽनुग्रहतो ददौ तम् आदेशिकानां प्रवरं तमीडे ॥ ३९ ॥
नारं तमो यो द्यति नारदोऽतो देवर्षिवर्योऽभिमतः सुराणाम्।
राजर्षिविप्रर्षिमहर्षिवन्द्यः आदेशिकनां प्रवरं तमीडे ॥ ४० ॥
नारायणो येन प्रसादितोऽद्धा पारायणं कर्तुमना जनानाम्।
जगौ निजं नारदपञ्चरात्रम् आदेशिकानां प्रवरं तमीडे ॥ ४१ ॥
शेषादिशेषं हरेर्भक्तिकाण्डं लेभे तमाराध्यपदं प्रसाद्य।
प्रकाशयामास हिताय लोके आदेशिकानां प्रवरं तमीडे ॥ ४२ ॥
हरेर्मनोमूर्तिरसौ मुनीनां मनोनियन्ताखिलमूर्तिभाजाम्।
मच्चेतसो यो मुदमातनोति आदेशिकानां प्रवरं तमीडे ॥ ४३ ॥
सनत्कुमारैरुपशिक्षितो यो योऽशिक्षयद्दक्षकुमारमुख्यान्।
समुद्धृता दैत्यपतेः कुमारा आदेशिकानां प्रवरं तमीडे ॥ ४४॥
समागतः पीठवरे निवेशितो व्यासाय यो भागवतागमं ददौ।
जहार यस्तत्खिलतां मनोगताम् आदेशिकानां प्रवरं तमीडे ॥ ४५॥
इतीदं ब्रह्मरातेन सुरर्षेः कीर्तितं स्तवम्।
अधीयानो धारयन्वा निःश्रेयसमवाप्नुयात् ॥ ४६॥

॥ इति श्रीनारदस्तोत्रम् ॥

वेदव्यासमहं वन्दे वेदव्यासकरं हरिम्।
पराशरसुतं सत्यवतीपुत्रं महामुनिम् ॥ ४७॥

प्राचीनगर्भं प्रवदन्ति यं वै ज्ञानावतारं प्रथमं मुरारेः।

आचार्यसिंहासनमाश्रितो यो वेदान्तसूत्राण्यवदच्च मन्त्रान् ॥४८॥

अपान्तरतमा मुनिर्निगमादेशिकश्चादिमः

वदन्ति परमर्षयोऽपरविधिं च षष्ठं विधेः।

चतुर्मुखमुखोदितं निगदितं च यत्पञ्चमं

जगद्धितकृते निजहितस्य वेदं नुमः॥४९॥

व्यासाम्भोधि(धौ)ज्ञानविज्ञानलीनं

तस्मिन् जातं भारताम्भोजपुष्पम्।

हंसाहंसा मोदिता यस्य मोदात्

त्यक्त्वासारां संस्मृतिं यान्ति पारम्॥५०॥

मानं यस्य वचः सुरासुरगणैः सद्भिर्नरैर्मन्यते

ज्ञानं येन च भण्यते भ्रमहरं शान्तिप्रदं चामृतम्।

यद्वाच्यार्थचतुष्टयन्तदृषयः प्राहुर्नृणां तुष्टये

यस्मिन्नास्ति न चास्य तत्क्वचिदपि व्यासं तमेनं भजे॥५१॥

भारतस्य मिषतो निगमार्थो

भारते प्रकटितः परमार्थः।

येन संसृतिविहीनजनानां

संस्कृतिर्भवति चामृतहेतुः॥५२॥

भक्तिविरक्त्यनुभूतिप्रधानं

केशवकीर्त्यमृतैकनिधानम्।

येन मुदे निखिलस्य पुराणं

व्यासमहं प्रणमामि पुराणम्॥५३॥

कृष्णद्वैपायनं वन्दे व्यासं तमरणीपतिम् ।
शुको यन्मुखतो जातो यन्मुखात्परमागमम् ॥ ५४ ॥
इत्युग्रश्रवसा गीतं जनिना रोमहर्षणेः ।
पठेद्वा शृणुयात्स्तोत्रं स प्रसादं गुरोर्भजेत् ॥ ५५ ॥

॥ इति श्रीव्यासस्तोत्रम् ॥

देवा देवेश्वराद्याश्च ऋषयो ऋषिसत्तमाः ।
पृथगेवोपदेष्टारस्तेषां पीठं पृथक् पृथक् ॥ ५६ ॥
मनुष्येश्वरावतारा ये आचार्या मुरवैरिणः ।
पारम्पर्यागतं तेषां पीठमेकं विशिष्यते ॥ ५७ ॥
यथा महीभृतां पीठं जगतां पालनाय वै ।
तथैवादेशिकानां च पीठं धर्मप्रवृत्तये ॥ ५८ ॥
पीठस्थ एव भूपालो यथा न्यायप्रवर्तकः ।
तथा पीठस्थिताचार्यो योग्यो धर्मप्रवृत्तये ॥ ५९ ॥
पीठस्थितो यथा राजा मान्यो देवैर्नरैरपि ।
तथा पीठस्थिताचार्यः पूज्यः स्यान्न विना च तम् ॥ ६० ॥
यदा विलुप्यते पीठं पारम्पर्यक्रमागतम् ।
देशकालप्रमादाद्यैस्तदा नूत्नं विधीयते ॥ ६१ ॥
देवर्षीणां च पूर्वेषां मन्त्रं वा नाममन्त्रकम् ।
संयोज्य पीठमन्त्रेण पीठं संस्थापयेत्सुधीः ॥ ६२ ॥
राजपीठाङ्गवद्राजपीठाङ्गैः पीठमर्चयेत् ।
अथवा भावनामात्रैः पूर्वोक्तं वा यथेप्सितम् ॥ ६३ ॥

अथवा सप्तदशभिर्यन्त्रैर्मन्त्रैर्निरूपितम्।
सम्राडाचार्यपीठं स्यात्समर्च्यं नित्यमेव तत्॥६४॥
तस्य दक्षिणपार्श्वे तु कुर्याद्यन्त्रचतुष्टयम्।
तत्त्वतत्त्वेशर्षिदेवैरुपदेवैस्तदिष्यते ॥६५॥
वामे पार्श्वे चतुर्यन्त्री कुर्यात्साधकसत्तमः।
स्वरैर्वर्णैर्मन्त्रबीजैः पदैर्मानस्य सम्भवात्॥६६॥
पुरतः पदके तत्र पुनर्यन्त्रचतुष्टयम्।
गायत्र्या निगमानां च तथा वै शास्त्रमन्त्रयोः॥६७॥
मध्ये सिद्धिनिधीयन्त्रमासनं तत्र कल्पयेत्।
गोपालयन्त्रराजं च पृष्ठे तस्याग्रतो भवेत्॥६८॥
सङ्ख्यायन्त्रं चाङ्कयन्त्रं पृष्ठे पीठस्य पृष्ठतः।
अधर्मचक्रं चक्रस्याधस्थं मूर्ध्नि गुरुर्विशेत्॥६९॥
गोपालोपासकानां च एतत्सिंहासनं मतम्।
सौवर्णं राजतं ताम्रं काष्ठमाश्मं च मृन्मयम्॥७०॥
असम्भवे भावनैव मन्त्रादीनां विधीयते।
उत्सेधः परिणाहश्च शास्त्रतो वाप्यभीप्सितः॥७१॥
आचार्यकुलसम्भूत आचार्यगुणसंश्रयः।
स्थित्वैव तत्त्वमाचार्या योग्यो व्याख्योपदेशयोः॥७२॥
समृद्धयोऽस्य वर्द्धन्ते प्रतापोऽस्य यतो महान्।
आचार्यतो हरेर्भक्तिर्विरक्तिरपि जायते॥७३॥
एतत्सिंहासनं दिव्यं राज्ञा शिष्यैश्च सम्मतैः।
पूजितं मननीयं स्यादाचार्यः साम्प्रदायिकः॥७४॥

व्याससिंहासनं चान्यद्दीयते ऋषिभिर्द्विजैः।
रोमहर्षणये यद्वच्छास्त्रव्याख्याकृतेऽर्पितम् ॥ ७५॥
संश्रयेद् ब्राह्मणो विद्वान्सूतो नैव विलोमजः।
मन्त्रयोः प्रातिलोम्येन मखे जातस्तथोच्यते ॥ ७६॥
विनन्दन्निजकाण्डार्थं पाञ्चरात्रं सदागमम्।
वदन् स्वसंहितां गर्वाज्जज्ञे संकर्षणश्च तम् ॥ ७७॥
आचार्यं मानयेद्धीमान्मनसा कर्मणा गिरा।
पञ्चाक्षरी महामन्त्रयन्त्रं स्थित्वा स्वयं हरिः ॥ ७८॥
इत्थं पीठस्य माहात्म्यं ज्ञात्वा पीठं समाश्रितम्।
राधिकायै ददौ पूर्वं ललितायै च सा ददौ ॥ ७९॥
सा मह्यमददाद् देवी वागीशाय सदस्पतिः।
सङ्कल्पमस्य सङ्कल्प्य चरितं च महात्मनाम् ॥ ८०॥
पञ्चाक्षरं चाष्टवर्णं तथैवाष्टादशाक्षरम्।
नारायणाय शेषाय स ददौ त्रिपुरारये ॥ ८१॥
दशार्णेन च संयुक्तान्सोऽदान्मन्त्रान्सुरर्षये।
द्वादशार्णेन संयुक्तान्तान् व्यासाय ददावसौ ॥ ८२॥
नमः पीठाय महते आचार्याय नमो नमः।
उपदेशाय मन्त्रेभ्यः शिष्येभ्यश्च नमो नमः ॥ ८३ ॥
छत्रायामृतवर्षाय वारणायातपस्य च।
नमश्चामरयुग्माय शङ्खयुग्माय वै नमः ॥ ८४ ॥
वादित्रेभ्यो नमस्तस्य दरारिभ्यां नमो नमः।
ज्योतिर्युग्मायान्धकारमर्दनाय नमो नमः ॥ ८५ ॥

मायूरहस्तकद्वन्द्वस्वर्णवित्रयुगं नमः।
रूप्यं वेत्रयुगं भव्यं हरिवक्त्रचतुष्टयम् ॥ ८६ ॥
आर्यसिंहासनं वन्दे केतुध्वजविराजितम्।
नीराजमानं यः पश्येत्प्रणमेत्स हरिं व्रजेत् ॥८७ ॥

॥ इति पीठस्तोत्रम् ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तुरीयांशे साम्प्रदायिकस्तोत्रनिरूपणं नामैकादशोऽध्यायः ॥ ११ ॥

# ॥ अथ द्वादशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

अथाभिषेकं वक्ष्यामि आचार्यस्य महात्मनः।
नृपाभिषेकरीत्यैव एतन्मन्त्राङ्गसम्भवैः ॥ १ ॥
अथवा वैष्णवेनैवासिञ्चेत्पूर्णाऽभिषेचकैः।
विधानेन महामन्त्रैर्मूलभूतैश्च पावनैः ॥ २ ॥
गोपालाष्टादशार्णेन दशार्णेन च वा पुनः।
पूर्वोक्तन्यासयुक्तेन संस्कुर्यात्कलशं बुधः ॥ ३ ॥
एवं पञ्चाक्षरेणापि वैष्णवेन च वैष्णवैः।
केशवाद्यैर्मातृकार्णैरन्यैः कुम्भं प्रपूजयेत् ॥ ४ ॥
अष्टवर्णेन साङ्गेन न्यासजालयुतानि च।
पूजयेन्मध्यमं कुम्भं कुम्भानन्यांस्तदङ्गकैः ॥ ५ ॥
वासुदेवस्य मन्त्रेण द्वादशार्णेन देशिकः।
तदङ्गैस्तस्य च न्यासैरधिकुम्भं प्रपूजयेत् ॥ ६ ॥
मुकुन्दमनुना चापि तदङ्गैर्मध्यमं घटम्।
प्रत्यङ्गैः कलशानन्यान् पूजयेच्च यथोचितम् ॥ ७ ॥
अष्टपत्रं लिखेत्पद्मं नवकुम्भानिह न्यसेत्।
प्राच्यामपाच्यां च प्रतीच्यामुदीच्यां तथा पुनः ॥ ८ ॥
शोभने समये देशे पुण्ये वोपेयते गृहे।
देवालये महाराजालये वापि निजालये ॥ ९ ॥
राजा वास्य पुरोधा वाप्याचार्याश्च सुमेधसः।
पूर्वाचारस्य ये शिष्यास्ते दायादाधिकारिणः ॥ १० ॥

आचार्यस्याभिषेके हि तत्राचार्यं परं परम्।
आचार्यकुलसम्भूतमभिषिञ्चेत्सलक्षणम्॥११॥
मण्डपं तत्र कुर्वीत एकविंशतिहस्ततः।
अधिकन्न ततो न्यूनं पीतकौशेयमण्डितम्॥१२॥
गोपाले वैष्णवेऽन्यत्र श्वेतमेव मनोहरम्।
मध्यवेद्यान्ततश्चक्रारविन्दं शोभनं लिखेत्॥१३॥
मुख्यकुम्भान्न्यसेत्तत्र ईशानार्यः प्रपूजयेत्।
अन्यान् पूर्वादिकुण्डायां विष्णून् मध्यासनस्थितान्॥१४॥
निजेष्टदेवं तत्रैव सौवर्णं स्वर्णकुम्भके।
यजेद्विष्णुं च वाचान्यं देवं पूर्वोक्तपञ्चके॥१५॥
वेदिकाग्रे न्यसेत्कुम्भान् प्रत्येकं नवसङ्ख्यकान्।
चतुरस्रेषु वेद्यां वाक्षतपुञ्जे सुशोभने॥१६॥
तदग्रे पश्चिमे कुण्डं पञ्चकुण्डीविधानतः।
पञ्चघस्रैस्त्रिघस्रैर्वा घस्रेणाप्यतिसङ्कटे॥१७॥
यागं वै सर्वदेवानां पायसाब्जसुमैश्चरेत्।
घृतप्लुतैर्यथालब्धैर्ब्राह्मणैर्मन्त्रवित्तमैः॥१८॥
आचार्यस्तत्र चाचार्यो ब्रह्मा स्यात्सर्वतन्त्रवित्।
सेच्यस्तु प्रतिमाभूतोऽभिषेच्यः कलशोदकैः॥१९॥
सुवर्णकलशैः स्वर्णपुष्पैः स्वर्णमनूत्तमैः।
स्वर्णतीर्थाम्बुभिः स्वर्णपट्टे स्वर्णाभिषेचनम्॥२०॥
नवभिर्नवभिः कुम्भैराचार्यैः पञ्चकुण्डगैः।
समर्च्यो मूलदेवोऽत्र कुण्डाचार्यैः पृथक् पृथक्॥२१॥
ततोऽभिषेच्यो हि गुरुराचार्यः स्नानमण्डपे।
चतुर्भिरादावाचार्यैः स्वस्वकुम्भाम्बुभिः क्रमात्॥२२॥

मूलकुम्भात्समुत्तार्य देवसिंहासनं न्यसेत्।
मध्यवेद्यां ततो मध्यकुम्भ आचार्य आददे ॥ २३ ॥
ऋत्विजः कलशानन्यान् ततो न्यासांश्चरन्त्विमे।
वैष्णवः प्रथमं न्यासः पूर्वाचार्यो विधाय वै ॥ २४ ॥
अभिषिञ्चेन्निजैः कुम्भैः पुण्ड्रान्नीराजनं चरेत्।
चरेन्नारायणं न्यासं दक्षिणादेशिकस्ततः ॥ २५ ॥
पश्चिमादेशिकश्चैवं वासुदेवमनुं न्यसेत्।
एवमेवोत्तराचार्यो मुकुन्दस्य मनुं न्यसेत् ॥ २६ ॥
ईशानाशादेशिकस्तु गोपालस्य मनुं न्यसेत्।
अवशेष्यैव कलशं मध्यमं शेषकुम्भकैः ॥ २७ ॥
समाने यस्ततस्तस्मादाचार्यो नूतनाम्बरः।
पूर्वतः स्थापिते सिंहासने मन्त्रादिसंस्कृते ॥ २८ ॥
दत्त्वैवान्तःपटं पूर्वं गोपीशस्य शुभोदये।
दर्शनं कारयेत्तस्मै मार्जयेन्मूलकुम्भतः ॥ २९ ॥
स्वसाम्प्रदायिकाचार्यस्तिलकं प्रथमं चरेत्।
ततः सर्वेऽपि तिलकमाचार्यपूजनं तथा ॥ ३० ॥
नीराजनं चोपहारं चरेयुः कुसुमाञ्जलिम्।
राजापि ताननु पुनः शिष्या विज्ञाः परे जनाः ॥ ३१ ॥
एवं चैवाभिषिक्तोऽयं श्रीगोपालस्य पूजनम्।
कृत्वैव कृत्वा विष्ण्वादेः पूजनं च यथोचितम् ॥ ३२ ॥
ततः पूर्णाहुतिं वह्नेर्यजमानाभिषेचनम्।
यज्ञस्यास्य समृद्ध्यर्थं गुरुविप्रादितोषणम् ॥ ३३ ॥
दानानि बहुशस्तत्र आर्तानामार्त्तिमोचनम्।
राजा तस्य पदं दद्याद्यशोविद्यामहोदयम् ॥ ३४ ॥

प्रणमेयुः पुनः सर्वे आचार्यमुपढौकितैः।
महायानेन नेतव्यस्तौर्यत्रिकपुरःसरम् ॥ ३५ ॥
सदने प्रापणीयोऽसौ भोक्तव्यं च महोत्सवे।
रात्रौ जागरणं कुर्याद्यामे यामेऽर्चनं चरेत् ॥ ३६ ॥
अथवा नवभिः कुम्भैर्गोपीशस्य मखोत्तरम्।
आचार्यं हेमपट्टस्थं स्नापयेयुर्द्विजोत्तमाः ॥ ३७ ॥
नूत्नपीताम्बरधरमुपवेश्य वरासने।
समर्च्य तिलकं कृत्वा कुर्युर्नीराजनं ततः ॥ ३८ ॥
आचार्यान्पुरतः कृत्वा राजा वा तस्य सेवकाः।
एवमाचार्यतावाप्तिर्भवेद्दिग्जयिनो गुरोः ॥ ३९ ॥
आचार्यकुलसम्भूतः संस्कृते च वरासने।
स्थितस्सम्पूजितः शिष्यैराचार्यः सोऽपि जायते ॥ ४० ॥
तस्योपदेशश्चादेशो महदर्थकरो नृणाम्।
दर्शनं पूजनं तस्य भक्तिर्यज्ञाख्यमीरितम् ॥ ४१ ॥
भक्तिभाजां विरक्तानां सतां चैव महात्मनाम्।
निर्दोषाणां निरीहाणां यस्मिन् सन्ति महागुणाः ॥ ४२ ॥
स आचार्यो हरिः साक्षाच्छिष्यस्तत्सेवनं चरेत्।
तत्सेवया विशुद्धिः स्याद्धृदयस्य वचोऽमृतैः ॥ ४३ ॥
शिष्यो वाप्यथवाशिष्यो य इच्छेद्धितमात्मनः।
पीठस्थं वापि भूमिस्थं संश्रयेत्तादृशं गुरुम् ॥ ४४ ॥
देवालयमथारामान्नादिसत्रजलाशयान्।
पुरं ग्रामं धरां धाम गुरवेऽस्मै समर्पयेत् ॥ ४५ ॥
विरक्ता योगिनः शान्ता यतयो वर्णिनस्तथा।
तपस्विनो ब्रह्मनिष्ठास्तेभ्यो देयमपेक्षितम् ॥ ४६ ॥

एवं मुख्यास्तु गुरवो ब्रह्मज्ञानोपदेशकाः।
भक्तिज्ञानोपदेष्टारो विरक्ताश्चोर्ध्वरेतसः ॥ ४७ ॥
काषायाम्बरदण्डादिर्विष्णुलिङ्गं महात्मनाम्।
प्रशस्य ये द्विजाग्र्याणां त एवार्च्या हरिर्यथा ॥ ४८ ॥
अन्येषां वीतरागाणां गृहत्यागो विधीयते।
स्नानसन्ध्यासुरार्चा च कर्मैषां भजनं हरेः ॥ ४९ ॥
हरिरूपतया विश्वं प्रणमेयुः पुनः पुनः।
गुणानेव हि चान्येषां कीर्तयन्ति मुदा हृदा ॥ ५० ॥
भजनानन्दमग्नानां बाह्याभ्यन्तरलक्षणम्।
दृश्यते विविधावस्थमपरोक्षतया हरेः ॥ ५१ ॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तुरीयांशे आचार्याभिषेकनिरूपणं नाम द्वादशोऽध्यायः ॥ १२ ॥

## ॥ अथ त्रयोदशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

भविष्यानथ वक्ष्यामि आचार्यान् लोकविश्रुतान्।
धर्मरक्षाकृते येषामवतारा हरेर्मताः ॥ १ ॥
सिद्धं यत्सच्चिदानन्दं ब्रह्मैव रमणेच्छया।
बभूव जगदाकार आत्मकामोऽपि लोकवत् ॥ २ ॥
अनन्तानन्तमहिमा अचिन्त्यैश्वर्यशक्तयः।
धर्मरूपाः स्वरूपाश्च कार्यं कुर्वन्त्यलौकिकम् ॥ ३ ॥
साकल्येन तदज्ञातं वेदैर्देवैर्मुनीश्वरैः।
तदद्भुतं महच्चित्रं वाङ्मनोऽगोचरं परम् ॥ ४ ॥
सर्वाकारमनाकारं सर्वाधारमसभृतम्।
अकर्त्तारं च कर्तारं चिदानन्दैकविग्रहम् ॥ ५ ॥
सदा चैकरसं शुद्धमात्मानं चात्मनामपि।
प्रत्यग्धामा स्वयंज्योतिः श्रुत्या गम्यं न युक्तिभिः ॥ ६ ॥
सच्चिदानन्दमात्रस्य कथं चासज्जडादिकम्।
दुःखात्मकं च घटते परिणामो जगन्मयम् ॥ ७ ॥
समसत्ताक एव स्यात्परिणामो हिमाम्बुवत्।
विकारमन्तरा नैतन्निर्विकारे कथं च तत् ॥ ८ ॥
नैतद्युक्ततरं वाक्यं व्यासेनैव विखण्डितम्।
मन्तव्यं श्रुतिवाक्यैस्तच्छ्रुतिवाक्यैर्निरूपितम् ॥ ९ ॥
विकृतोऽविकृतश्चैव परिणामो द्विधा मतः।
आद्यो विनिमयस्तत्र द्वितीयश्चानवस्थितः ॥ १० ॥

गुणाधिकस्तु तत्राद्यो व्योमादीनां नलादिवत्।
हेम्नश्च हेमखण्डस्य कटकादेः परो मतः॥ ११ ॥
विकारः समसत्ताको भूत्यादिरेधसो यथा।
लौकिकेषु पदार्थेषु एतौ सत्येषु प्रायशः॥ १२ ॥
विवर्त्तो तात्त्विको ज्ञेयः स्वरूपेषु भ्रमेषु च।
यथा सिन्धुतरङ्गाणां भुजङ्गादेर्गुणादिषु॥ १३ ॥
जडादेव न भिन्नाः स्युः सच्चिदानन्दगोचराः।
नामरूपादिकं तत्र तदपि ब्रह्म शाश्वतम्॥ १४ ॥
सृष्टिर्विचित्रा लीलार्थं कृता साचिन्त्यशक्तिना।
न तत्र दोषलेशोऽस्ति चिन्ता रत्नादिगापि (?) सा॥ १५ ॥
सृष्ट्वादौ ब्रह्मणो जन्म विसर्गस्तत्र सर्गजः।
समयो द्विपरार्द्धोऽस्य शतवर्षात्मकश्च सः॥ १६ ॥
नामानि तेषां प्रत्येकं कल्प्यन्ते नामभिर्विधेः।
तस्य द्वादश मासाः स्युरवतारैर्हरेः पृथक्॥ १७ ॥
वराहो वामनो विष्णुर्मत्स्यः कच्छो हयाननः।
हंसः सुपर्णो यज्ञश्च वैकुण्ठो विश्वजिद्धरिः॥ १८ ॥
एतैर्द्वादशभिर्मासैर्मासस्त्रिंशद्दिनात्मकः।
दिनः कल्पाभिधोऽन्यत्र ऋषिभिर्विनिरूपितः॥ १९ ॥
महायुगं चतुर्युग्याः सहस्रद्वितयेन वै।
ताभ्यां दिवा च रात्रिश्च ब्रह्मणः परमेष्ठिनः॥ २० ॥
प्रवर्तते दिवा सृष्टिर्या त्रिलोक्यां व्यवस्थिता।
निवर्तते निशायां सा तूष्णींभावात्स्वयम्भुवः॥ २१ ॥
वर्षकल्पेषु चासत्याल्लोककल्पो निवर्तते।
प्रविश्य नाभौ यद्विष्णोर्ब्रह्मा शेते निजैः सह॥ २२ ॥

चतुर्विंशतिरह्नां वै तल्लीलायां विलीयते।
ततस्सत्यं समभ्येत्य वेधाः सृजति पूर्ववत् ॥ २३ ॥
महकल्पास्त्रयश्चात्र ब्रह्मणोऽर्द्धायुषो मताः।
वर्षैश्च सप्तदशभिर्ब्राह्मपाद्मवराहकाः ॥ २४ ॥
यदादौ ब्राह्मकल्पः स्यात्सृष्टेरादौ तदा जगत्।
शब्दसृष्ट्या भवेदत्र तत्सर्वं स्यादलौकिकम् ॥ २५ ॥
पाद्मकल्पो यदा चादौ सृष्टिः पद्मात्मिका तदा।
वाराहकल्पे वाराहसृष्टिं चानयति स्वयम् ॥ २६ ॥
हायनाश्चैकपञ्चाशद्व्यतीताः परमेष्ठिनः।
द्वितीयहायनस्यादौ श्वेतः कल्पः प्रवर्तते ॥ २७ ॥
सात्त्विका राजसाश्चैव तामसाश्च प्रकीर्णकाः।
न ते सङ्कलिता नैव क्रमशः स्युः प्रकीर्णकाः ॥ २८ ॥
प्रकीर्णः प्रथमः क्वापि सगुणत्रितयात्मकः।
पितृणां चैव भारत्या पुष्टिस्तत्र दिवौकसाम् ॥ २९ ॥
ततश्च सात्त्विकः कल्पो राजसस्तामसोऽपि वा।
गुणभेदात्सृष्टिभेदः स्वभावेन यदृच्छया ॥ ३० ॥
तत्र सात्त्विककल्पेषु विष्टरश्रवसः श्रवः।
यत्रैव योगसंसिद्धा भक्तास्तस्यामृतञ्जुषः ॥ ३१ ॥
राजसेषु च कल्पेषु माहात्म्यं ब्राह्मणोऽधिकम्।
प्रायशः कर्मसंसिद्धिर्योगसिद्धिः क्वचित् क्वचित् ॥ ३२ ॥
तामसेषु च कल्पेषु महेशमहिमाधिकः।
अग्नेश्च क्षुद्रदेवानां प्रायशः स्वगतिर्नृणाम् ॥ ३३ ॥
चत्वारस्सात्त्विकाः कल्पा राजसास्तामसास्तथा।
पुनरेवं च संकीर्णा आद्यन्ताभ्यां च षण्मताः ॥ ३४ ॥

प्रत्येकमपि कल्पेषु गुणानां परिवर्तनम्।
मनूनामवताराणां मुनीनां भेदतो भवेत्॥ ३५॥
मनुर्मनुसुता भूपा देवा देवेश्वरास्तथा।
ऋषयोंऽशावताराश्च ते स्युर्मन्वन्तरे पृथक्॥ ३६॥
आदिसृष्टौ कृतयुगे जना लक्षसमायुषः।
एकविंशतिहस्ताश्च स्वदैर्घ्येण महौजसः॥ ३७॥
सुवर्णवाससः कान्ता रत्नाभरणभूषिताः।
अस्थिप्राणाः स्वर्णपात्रा गव्यशुष्कफलाशिनः॥ ३८॥
एकपुत्रैककन्याश्च प्रायशो नियतायुषः।
विष्णोर्भक्ता ज्ञाननिष्ठा विप्राः कर्मादिनाऽधिकाः॥ ३९॥
अपरेषु कृतेष्वत्र चतुःशतसमायुषः।
दैर्घ्येण सप्तहस्ताः फलगव्यान्नभोजनाः॥ ४०॥
अस्थिप्राणा महाप्राणाः क्षौमवल्कलवाससः।
तत्रास मानवो धर्मः शान्ता दान्तास्तपस्विनः॥ ४१॥
स्वर्णपर्णादिपात्राश्च सर्वे यज्ञसमाश्रिताः।
धर्मश्चतुष्पात्तत्रासीत्स्वल्पापत्याः सुवर्चसः॥ ४२॥
सर्वाः पतिव्रता नार्यस्सुन्दर्यः सुभगाश्शुभाः।
गुरुभक्ताः पितृभक्ता विप्राश्च यतयोऽधिकाः॥ ४३॥
एवं त्रेतायुगे पूर्वे चतुर्दशकरा नराः।
वर्षायुतायुषः सर्वे त्रयीधर्मपरायणाः॥ ४४॥
कौशेयवाससो दान्ता हेमभूषणभूषिताः।
मांसप्राणा रूप्यपात्राः फलगव्यान्नभोजिनः॥ ४५॥
चतुःपुत्राः पवित्राश्च यज्ञेश्वरसमाश्रिताः।
प्रायशो भिक्षवो विप्राः शोणवर्णास्सुवर्चसः॥ ४६॥

अपरेषु युगेष्वत्र तृतीये त्रिशतायुषः।
नवहस्तमिता दैर्घ्याद् गौतमं धर्ममाश्रिताः॥ ४७॥
मांसप्राणा महाप्राणाः सुरूपाश्शाणवाससः।
वनेचराः क्षत्रियाश्च विप्राश्च योगिनोऽधिकाः॥ ४८॥
प्रथमे द्वापरे चाथ दैर्घ्ये सप्तकरा नराः।
तेषां सहस्राब्दमायुर्वासुदेवपराश्च ते॥ ४९॥
आश्रिताः शङ्खलिखितप्रोक्तं धर्मं सनातनम्।
दानधर्मरतास्सर्वे द्विपाद्धर्मः प्रवर्तते॥ ५०॥
महार्हवस्त्राः पीताभाः ताम्रपात्रा महर्द्धयः।
कृतान्नभोजिनस्सर्वे पवित्रा बहिरन्तरम्॥ ५१॥
बह्वपत्या महासत्त्वा असृक्प्राणास्सुपेशलाः।
अधिका गृहिणो वैश्यास्तथागमश्रुतिप्रियाः॥ ५२॥
अन्येष्वेषु युगेष्वत्र पञ्चहस्तमिता नराः।
द्विशताब्दायुषः सर्वे सर्वधर्मपरायणाः॥ ५३॥
भक्ता हरेर्हरस्यापि तूलरोमादिवाससः।
तथा पित्तलपात्राश्च स्वर्णपात्रा गृहाश्रमाः॥ ५४॥
स्वर्णरूपविभूषाश्च वीर्यवन्तो यशस्विनः।
मानार्थिनो मानदाश्च अनुलोमाङ्गनोद्वहाः॥ ५५॥
तिष्ये च प्रथमे सृष्टेर्जनाः सर्वे शतायुषः।
दैर्घ्येण पञ्चहस्ताश्च चतुर्हस्ताङ्गना नराः॥ ५६॥
अन्नाभावान्मांसभुजो वस्त्राभावाच्छदांशुकाः।
पात्राभावात्पर्णपात्रा मृत्पात्राश्च विशेषतः॥ ५७॥
सर्वत्रगामिनो दुष्टा उद्वाहादिक्रियोज्झिताः।
स्वल्पसंस्कारधर्माश्च आगमैकपरायणाः॥ ५८॥

सर्वदोषाकराश्चैव गुणैः सर्वैर्विवर्जिताः।
एवंभूतकलावाद्ये नार्यः सर्वा हतव्रताः॥५९॥
अपरेषु च तिष्येषु नराः स्वल्पायुषो मताः।
स्वल्पकायाः स्वल्पधना मन्दभाग्याश्च रोगिणः॥६०॥
निगमागमधर्मेषु येषां नैव दृढा मतिः।
परपाकभुजः सर्वे पशुमांसभुजः खलाः॥६१॥
मद्यमांसाङ्गनाद्यूतपराः स्थलपरास्तथा।
वर्णाश्रमाऽभिमानाश्च तत्तत्कर्मविवर्जिताः॥६२॥
धनिनो निर्धनाः पूर्वैः संकीर्णा युगधर्मतः।
शिश्नोपस्थपराः सर्वे कदपत्याः कदङ्गनाः॥६३॥
एवं सामान्यतः प्रोक्तं युगानां रूपमीदृशम्।
आदिकल्पे च सत्याद्याः प्रभवन्ति क्रमं विना॥६४॥
कदाचित्तिष्य एवादौ एवं सत्यादयोऽप्यमी।
ततः क्रमेण वर्तन्ते सत्यत्रेतादयो युगाः॥६५॥
अयं कलिः संप्रवृत्तो मघासु च महर्षिषु।
तदा परीक्षितो राजा धर्मरक्षाकृतेऽजनि॥६६॥
कृष्णयोर्जननादूर्ध्वं पञ्चत्रिंशच्छरद्यभूत्।
भारतं नाम तद्युद्धमौत्तरेयस्ततोऽभवत्॥६७॥
इतः परं च षट्त्रिंशत्समासु च गतास्वपि।
अभूद्यादवसंहारो हरिर्यातस्ततो दिवम्॥६८॥
ज्ञानं दत्त्वोद्धवायैव ज्ञानं दातुं निजात्मनाम्।
याचितः पादुके तस्मै ददौ पूजयितुं हरिः॥६९॥
सम्पूज्य शिरसा चक्रे स्थित्वाऽसौ विरहातुरः।
कलापं यातुमाज्ञप्तोऽनुगृह्य विदुरादिकान्॥७०॥

ततः कलिः सम्प्रवृत्तस्त्रयोदश्यां भृगोर्दिने।
धर्मं सम्पीडयामास निगृहीतः परीक्षिता ॥७१॥
कृता च वर्षमर्यादा दत्त्वा स्थानानि पञ्च वै।
गां च धर्मवृषं राजा सुखिनौ चाकरोदिह ॥७२॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तुरीयांशे पूर्वयुगव्यवस्थावर्णनं नाम त्रयोदशोऽध्यायः ॥१३॥

## ॥ अथ चतुर्दशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

अभिमन्युसुतो राजा राजर्षिरमितद्युतिः।
कलिं विजित्य जगृहे वर्षाणामयुतं बलिम् ॥ १ ॥
कलौ दशसहस्राणि वर्षाणि भगवान् हरिः।
नाम्ना धाम्ना महेशेन किञ्चिद्धर्मेण स्थास्यति ॥ २ ॥
सहस्रं पञ्चकं पूर्वं जह्नुजा सुप्रभावतः।
भविष्यत्यर्चिता लोकैः सामान्येव ततः परम् ॥ ३ ॥
रजकाश्चर्मकाराश्च नीचाः श्रेष्ठा द्विजादयः।
सर्वेषामस्थिपातोऽत्र यात्रात्र महिमात्रिका ॥ ४ ॥
बदर्यादिमहातीर्थे दुरापे चापि दुर्गमे।
नटा विटा द्विजाश्चापि यास्यन्ति महिमात्र कः ॥ ५ ॥
ग्रामदेवोपदेवाश्च स्थास्यन्ति निजमूर्त्तिषु।
दास्यन्ति प्रत्ययं लोके द्विसहस्रं तदर्द्धकम् ॥ ६ ॥
भूताः प्रेतास्ततश्चोर्ध्वं प्रवेक्ष्यन्ति च तत्तनूम्।
शास्त्रोक्तासु तथान्यासु देवा अपि क्वचित्क्वचित् ॥ ७ ॥
देवानां दर्शनं साक्षान्मुनीनां योगिनामपि।
औषधीनाञ्च मन्त्राणां मणीनां महिमोदितः ॥ ८ ॥
ततः पूर्वं कलियुगे भविष्यति क्वचित्क्वचित्।
महात्मनाञ्च निकटे सिद्धिरूर्ध्वमपि क्वचित् ॥ ९ ॥
कृष्णे गते भगवति वैकुण्ठमसुराः सुराः।
वेदमार्गमिषेणैव भविष्यन्ति च हिंसकाः ॥ १० ॥

यास्यन्ति सर्वं दास्यन्ति दुःखं देवकुलस्य च।
अवतारं तदा विष्णुः सुरान् त्रातुं करिष्यति॥ ११॥
नाम्ना बुद्धो जिनसुतो भूत्वा देवर्षिभिः सह।
महाबुद्धिर्महातेजा महामहिमसद्गतिः॥ १२॥
हिंसाप्रायं वेदधर्मं मखानपि सुनिर्दयान्।
मुष्टिघातैर्मुखं रुद्ध्वा हन्यन्ते यत्र वर्कराः॥ १३॥
तादृक्स्वरूपं यज्ञानां प्रदृश्यैवासुरान्सुरान्।
प्रच्यावयिष्यति ततो निजधर्मे प्रवर्त्तयन्॥ १४॥
न यत्र जातिभेदोऽस्ति शुद्धिर्नात्र मृदम्बुजा।
दया नैवात्मनो यत्र इष्टापूर्त्तं मनाङ् न हि॥ १५॥
निजबुद्धिकृतैः शास्त्रैर्दुर्जेयैस्तर्कविभ्रमैः।
वाचालैः शिष्यवर्गैश्च बौद्धा जेष्यन्ति वैदिकान्॥ १६॥
विलुप्ते वैदिके धर्मे बौद्धैर्देवर्षयः पुनः।
प्रार्थयिष्यन्ति विष्णुं तं ततः सोऽवतरिष्यति॥ १७॥
विप्रर्षिवंशे कावेर्यास्तटे विष्णोश्च सन्निधौ।
विष्णुस्वामीति विख्यातो बाल एव महामतिः॥ १८॥
व्रती हरेः समो ज्ञाता कृत्वा व्यासं गुरुं मुनिम्।
तत्त्वं तत्त्वागमं चैव प्राप्स्यति प्राङ् मनूत्तमम्॥ १९॥
सच्चिदानन्दमात्रैको लीलां कर्त्तुं निजेच्छया।
जातोऽसौ जगदाकारः निर्विकारः स्वशक्तितः॥ २०॥
जडा जीवाश्च जगति तद्रूपाः सागराम्बुवत्।
विलक्षणाद् विनिमयात्परिणामाः सलक्षणाः॥ २१॥
उत्पन्नास्त्रिविधा जीवा देवदानवमानवाः।
वैदिकोऽवैदिको मिश्रो धर्मस्तेषां कृतेऽभवत्॥ २२॥

तत्र वैदिकधर्मस्य रक्षार्थं गुरवो मताः।
तिष्येऽत्र प्रथमाचार्यो विष्णुस्वामी भविष्यति॥ २३ ॥
स वैदिकं पुरा धर्मं स्थापयित्वा ततः परम्।
भक्तिधर्मञ्च देवानामधिकारभिदा पुनः॥ २४ ॥
स्वयञ्चैव हरेर्भक्तिं कुर्वन् शिष्यजनानपि।
कारयिष्यन्महातेजा लोके तां चारयिष्यति॥ २५ ॥
वारयिष्यति बौद्धानामुपधर्मं प्रवर्त्तितम्।
करिष्यत्यद्भुतां वृत्तिं सम्प्रदायं हरेरपि॥ २६ ॥
जन्मेजयस्य यज्ञान्ते समेतैर्मुनिभिस्तदा।
कर्त्तव्यश्च कलौ धर्मो हातव्योऽन्यो निरूपितः॥ २७ ॥
श्रौतः स्मार्त्तः स्वसूत्रोक्तो विधेयः शक्तितो यथा।
संस्कारश्चाह्निको वापि यथाशक्ति परोऽपि वा॥ २८ ॥
केशवस्य शिवस्यापि यस्य कस्य दिवौकसः।
एकं भजनं धर्मं वै स्वीयं कार्य्यं हितेच्छुभिः॥ २९ ॥
पञ्च यज्ञाः सकृन्नित्या मखाश्चाहिंसकाः परे।
कोटिसत्रादयः कार्या भक्तिज्ञानविरक्तयः॥ ३० ॥
अथ वर्ज्यं पापमिश्रं यावत्कर्म च वैदिकम्।
अनित्यं नित्यमपि च मुनिभिः परिकीर्त्तितम्॥ ३१ ॥
गवाश्वनरमेधाश्च आत्ममेधस्तथैव च।
भृग्वग्निहिमपातश्च तथा प्रायोपवेशनम्॥ ३२ ॥
सहानुगमनञ्चैव असवर्णासतिस्त्रियोः।
बालापत्या दुःखिता तद्वस्त्राद्यनुगमक्रिया॥ ३३ ॥
ऊढायाः पुनरुद्वाह ऊर्ध्वं सप्तपदीविधेः।
अन्त्यजादेरम्बुपानं रेते प्राप्ते च सङ्ग्रहः॥ ३४ ॥

असवर्णासमुद्वाहो विधवाया नियोजनम्।
समुद्रयात्रास्वीकारो विषमांशविभाजनम् ॥ ३५ ॥
कामार्त्तायां निरोधश्च जारयोश्च निषूदनम्।
निषूदनञ्च चोरस्य अतिदुष्टस्य मोचनम् ॥३६॥
कारागारगृहीतानां साङ्कर्यं चातिपीडनम्।
तेषाञ्च सङ्ग्रहः प्रोक्तो महापातकनिष्कृतिः॥ ३७ ॥
शरणागतबालस्त्रीहिंसकानां परिग्रहः।
घटस्फोटं विना पापसङ्क्रमस्तस्य सङ्ग्रहः(?)॥ ३८ ॥
योगक्षेमप्रचाराणां पीठस्य च विभाजनम्।
राज्यस्य चैव दाराणामधिकारपदस्य च ॥ ३९ ॥
देवपित्रग्निकार्याणि राजदेवविभूतयः।
सिहासनं गुरोरेव देयं वा गुणिनः क्वचित् ॥ ४० ॥
परशय्यासनं वस्त्रं पादुकोपानहौ तथा।
नादेयानि न देयानि स्वात्मनः कम्बलं विना ॥ ४१ ॥
सगोत्रायाः समुद्वाहे दत्त्वा गोत्रान्तरे च ताम्।
कृत्वा शुद्धिञ्चोपयमं धर्मे कामे न तां त्यजेत् ॥ ४२ ॥
दिवौकसां मद्यभुजां पलादीनां निवेदितम्।
आविध्य मन्त्रैर्विप्रैश्च पूजितानां न संस्पृशेत् ॥ ४३ ॥
नैवेद्यं च हरेर्ग्राह्यं न चान्येषां दिवौकसाम्।
देवालये न तद्ग्राह्यं प्रमादेन हि दुष्यति ॥ ४४ ॥
स्वयं व्यक्ते निजाचार्यस्थापिते साम्प्रदायिके।
भोज्यं दिवौकसां स्वेषां परेषां मानमाचरेत् ॥ ४५ ॥
शूद्रोऽपि भगवद्भक्तः पापकर्मबहिष्कृतः।
दीक्षितो विप्रसेवी च स च मान्यो द्विजो यथा ॥ ४६ ॥

वैदिका विधिवद्वन्द्या अन्ये ते हरिनामभिः।
अवन्द्याः पापिनो मूढाः कनिष्ठाः कर्मतत्पराः ॥ ४७ ॥
कलौ गङ्गा धनुस्तीर्थं महातीर्थानि दूरतः।
पापघ्नानि व्रतान्येव मूढानां दुर्बलात्मनाम् ॥ ४८ ॥
सदाचारप्रधानोऽत्र लौकिकाचार एव च।
सन्तो महान्तो लोकाश्च देवग्रामकुलस्थिताः ॥ ४९ ॥
त्यक्त्वैव साधनं सर्वं षट्शुद्ध्या च विवर्जितैः।
निर्धनैर्निर्विधै रुग्णैर्भजनीयो हरिः सदा ॥ ५० ॥
त्यजन्ति कर्म ये शक्त्या ज्ञानवैराग्यदर्पतः।
कष्टं न सिद्धिं ते यान्ति बहवः प्रच्यवन्ति हि ॥ ५१ ॥
देशे देशगतः कार्यः स्वानां वै साप्तपूरुषः।
सदाचारः प्रमाणोऽत्र परपाकादिवर्जने ॥ ५२ ॥
कचसन्दर्शनं स्त्रीणां चतुःकच्छाद्यवस्थितिः।
दैवपैत्र्यादृतं योग्यं वहेच्चाच्छादनं शुचिम् ॥ ५३ ॥
यज्ञे तीर्थे तथा शौच आश्रमान्तरधारिणे।
प्रायश्चित्तेषु चोक्तेषु वपनं ऋषिसम्मतम् ॥ ५४ ॥
वपनं केशजातानां कक्षोपस्थविवर्जितम्।
शिखयापि विना क्वचिन्मुण्डनं च शिखां विना ॥ ५५ ॥
वदने संस्थिताः केशाः श्मश्रवोऽन्ये कचास्त्वमी।
उत्तरोष्ठगताः केशा न छेद्याः कारणं विना ॥ ५६ ॥
पञ्चकच्छो भवेद्विप्रश्चतुःकच्छश्च बाहुजः।
वैश्यस्त्रिकच्छो विज्ञेयः शूद्रोऽकच्छोऽङ्गना मता ॥ ५७ ॥
पुण्ड्रैर्द्वादशभिर्विप्रो नवपुण्ड्रैश्च बाहुजः।
षड्भिः पुण्ड्रैर्भवेद्वैश्यो बिन्दुर्वैकोऽङ्घ्रिजस्त्रियोः ॥ ५८ ॥

गायत्रीमात्रग्रहणाद् द्विजोऽर्च्यः स्याद् गुणाधिकैः।
दानवाक्येन नारी स्यान्नरतः स्यात्प्रेममात्रतः॥ ५९॥
कुटीचको भवेदादौ ततो भूयाद् बहूदकः।
ततो हंसो भवेदेषां शिखासूत्रादिधारणम्॥ ६०॥
त्यक्त्वा त्रिदण्डसूत्रादिर्देहाध्यासे निवर्त्तते।
न भवेत्परहंसोऽयं हरिभक्तस्तु लौकिकैः॥ ६१॥
ब्राह्मणस्यैव संन्यासः शिखासूत्रादिवर्जितः।
काषायादिधृतिश्चार्या नान्यवर्णस्य कस्यचित्॥ ६२॥
ब्राह्मणस्यैव संन्यासे गायत्रीग्रहणे तथा।
भिक्षाटने वेदपाठेऽधिकारो नेतरस्य च॥ ६३॥
पारम्पर्याद्व्रतं येषां द्विजानां सम्प्रवर्त्तते।
तेषान्तु वैदिका देया मनवो नेतरस्य च॥ ६४॥
ब्रह्मचर्या चतुर्वर्षादब्दतः परतो न हि।
पञ्चाशदब्दतः पूर्वं कलौ न्यासो न शस्यते॥ ६५॥
बालायाश्चाक्षतायाश्च चतुर्विंशादब्दतः पुरा।
सहानुगमनं शस्तं न च वैधव्यपालनम्॥ ६६॥
एवं वर्ज्यमवर्ज्यं च समेतैर्ऋषिभिः कृतम्।
प्रचारयिष्यन्ति ततो निजशिष्यैः प्रशिष्यकैः॥ ६७॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तुरीयांशे कलिवर्ज्यावर्ज्यधर्मनिरूपणं नाम चतुर्दशोऽध्यायः॥ १४॥

## ॥ अथ पञ्चदशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

इमं धर्मं प्रवर्त्यैव बौद्धधर्मं निवर्त्य च।
शिष्येभ्यो भक्तिमार्गं दत्वा गन्ता हरेः पदम् ॥ १ ॥
इक्ष्वाकुवंशे सञ्जातः शाक्यः शुद्धोदनस्ततः।
मायां देव्यां ततो जातः शाक्यसिंहो महीपतिः ॥ २ ॥
स बाल एव भिक्षूणां बौद्धानामुपदेशतः।
भिक्षुधर्मे प्रवृत्तो हि महाबुद्धः प्रकीर्त्तितः ॥ ३ ॥
श्रावास्त्यां विचरन् क्वापि भिक्षुलक्षैरुपासितः।
महाप्रभवो सिद्धात्मा देवेशैर्भावितोऽर्चितः ॥ ४ ॥
यस्य प्रभावात्तन्मार्गे भविष्यन्ति प्रजा नृपाः।
अस्तं यास्यन्ति वेदा वै प्रभाते तारका इव ॥ ५ ॥
निजधर्मः प्रचलितो महांमल्लप्रचारितः।
चतुर्दशातिशायी यो दीर्घायुर्दीर्घदर्शनः ॥ ६ ॥
वीतरागस्तादृगन्यो नेदृक्कोऽपि जितेन्द्रियः।
प्रवर्त्तयिष्यति निजं धर्मं कष्टंतपोमयम् ॥ ७ ॥
तस्य शिष्यैः प्रशिष्यैश्च वेदधर्मो निराकृतः।
विरलो भविता क्वापि सिंहत्रस्तो यथा मृगः ॥ ८ ॥
अशोकश्च महीपालस्तथागतमतानुगः।
भविता तत्प्रभावेण स च द्वीपान्तरेश्वरः ॥ ९ ॥
तस्यानुशासनात्सर्वा भविता तन्मते प्रजा।
एवं जिननृपाणाञ्च जिनानां महिमा कलौ ॥ १० ॥

एतेषां भयतो विप्रादयो देवानुपाश्रिताः।
वने वसन्तो सुचिराज्जाताः पाषण्डिनो जनाः॥११॥
कलौ प्रवृत्ते तन्मार्गे वेदाध्वा भविता क्वचित्।
व्यासशिष्यः शुकस्वामी गौड आद्यः प्रतापवान्॥१२॥
सर्वदर्शनविज्ञाता व्यासदर्शनतत्परः।
इध्मबाहुश्च तच्छिष्यो महायोगी महातपाः॥१३॥
तस्य शिष्यप्रशिष्याणां पारम्पर्ये भविष्यति।
सत्यव्रतो व्रतैः पूर्णस्ततो देवव्रतो मुनिः॥१४॥
गोविन्दश्च ततो व्याडिर्वासुदेवो महीधरः।
शितिकण्ठश्च विख्यातो भगवान्नीललोहितः॥१५॥
भागलिश्चाहिराजश्च सर्वयोगी भविष्यति।
न्कुलीशो महायोगी सिद्धो बुद्धो महातपाः॥१६॥
भवितारश्च तच्छिष्याश्चत्वारो देवदर्शनाः।
कुणिर्गर्गो मित्रकश्च रुरुरित्येव ते मताः॥१७॥
एतैश्चतुर्भिराचार्यैः स्वातन्त्र्येण निजागमाः।
प्रवर्त्तिता भविष्यन्ति योगिभिर्योगमार्गतः॥१८॥
पातञ्जलेन साङ्ख्येन तथा माहेश्वरेण च।
सिद्धान्तेन (च) संमिश्रं कृतं वेदान्तदर्शनम्॥१९॥
रुरुशिष्यान्वये भाव्या आचार्याः शतशस्ततः।
तै रक्षितो वेदमार्गो कलौ भविष्यति क्वचित्॥२०॥
गौडपादो महायोगी सर्वदर्शनपारगः।
गोविन्दो योगिराजश्च वक्ताऽसौ व्यासदर्शनम्॥२१॥
विष्णोः शिष्या महाभागा प्रथमो देवदर्शनः।
श्रीकण्ठश्च सहस्रार्चिः शतधृतिरनन्तधीः॥२२॥
कुमारपात्पराभूतिप्रमुखा हरिवल्लभाः।
वेदान्तदर्शनाभिज्ञाश्चारयिष्यन्ति तन्मतम्॥२३॥

देवदर्शनशिष्याणां प्रशिष्याणां महात्मनाम्।
शिष्यान्वयेऽथ भविता राजस्वामी महातपाः॥ २४॥
निर्जित्य सुगतान्सर्वान् नृपैर्निष्कासयिष्यति।
छलेनागत्य ते दुष्टाः प्रवेक्ष्यन्ति पुनर्धराम्॥ २५॥
अवतीर्य कुमारोऽथ देवैरन्यैर्मुनीश्वराः।
स्थापयिष्यति सन्मार्गं बौद्धादीन्वारयिष्यति॥ २६॥
त्रिसहस्रैः (स्रेषु) षट्शताब्दाधिकेषु गतेषु च।
पराभवः समारब्धः शाक्यानां भविता ततः॥ २७॥
शङ्करो वासुदेवांशसम्मतः शङ्करः स्वयम्।
हरिभक्तिं विरक्तिञ्च पाषण्डानाञ्च संविदम्॥ २८॥
निर्गुणब्रह्मवादञ्च मिथ्यावादं विनात्मनः।
स्थापयिष्यति बौद्धानां जेतुं पाषण्डिनामपि॥ २९॥
तेन विद्राविता बौद्धा विद्यया च बलेन च।
पाषण्डिनो परेऽप्येवं भविष्यन्ति दिगन्तरे॥ ३०॥
स्थापिते वैदिके मार्गे वैदिकानितरानपि।
करिष्यत्यागमे सक्ताञ्छम्भोर्भक्तान्विशेषतः॥ ३१॥
तेनापि हरिभक्तानां दुःखं भूरि भविष्यति।
तद्वारणाय भविता भूम्यां विष्णुर्महामुनिः॥ ३२॥
स विजित्यागमे सक्तान्भक्तान्पञ्चार्चने रतान्।
विशुद्धां वैष्णवीं भक्तिं चारयिष्यति भूतले॥ ३३॥
बौद्धान्विजित्य शान्तात्मा गन्तागस्त्यञ्च तद्व्रुजा।
स्वशिष्येभ्यो निजाम्नायं दत्त्वा निजपदं तथा॥ ३४॥
रमायाः सनकादीनां विधेरपि पुरद्विषः।
सम्प्रदायाश्च गुरवः पूर्वमेव निरूपिताः॥ ३५॥
अवशिष्टा इह प्रोक्ताः समयक्रमदर्शने।
श्रौतस्मार्त्तादिधर्माणां विशुद्धागमवर्त्मनाम्॥ ३६॥

देवांशा मुनिरूपाश्च भविष्यन्ति सहस्रशः।
रक्षितैस्तैस्तथाप्येष कलिना भविता हतः॥ ३७॥
आचार्या धर्मवक्तारोऽन्तर(रश्चान्तो)धर्मेण वर्जिताः।
दाम्भिकाश्च जनाश्चान्ये कथं धर्मः कथं गतिः॥ ३८॥
बाह्यवेषा वञ्चकाश्च भविष्यन्ति यदा भुवि।
पाषण्डिनो महाचार्याः कर्त्तारः कलिवर्द्धनम्॥ ३९॥
एकं धर्मं प्रदर्श्यैव सर्वधर्मविनाशकाः।
दाम्भिका निन्दका लुब्धा धूर्त्ता जेष्यन्ति वैदिकान्॥ ४०॥
जाह्नव्यान्तस्य सविधे पूर्वञ्च शतवत्सरात्।
स्वेच्छाचारा भविष्यन्ति आचार्या मोहितुं जगत्॥ ४१॥
हरिर्गङ्गा हरिर्गङ्गा हरेर्भक्तिर्हरेर्जनाः।
विना कलौ गतिर्नास्ति निजाचार्याश्रमं विना॥ ४२॥
कलौ भागवती सृष्टिर्भविष्यति परा क्वचित्।
तदा श्रीवल्लभाचार्यः सम्प्रदायप्रवर्त्तकः॥ ४३॥
तद्भक्ताः शतशस्तत्र भविष्यन्ति तदन्वये।
येषां चरितं विमलं तिष्यं दूरीकरिष्यति॥ ४४॥
यत्राद्भुतं भक्तिरसं स्वयं नित्यं करिष्यति।
दक्षिणे गुर्जरे गौडे व्रजे दिव्यस्थलेषु च॥ ४५॥
तेषां समाश्रयाद्भक्ता यास्यन्ति परमां गतिम्।
पामरा अपि किञ्चिज्ज्ञा ये च धर्मान्तरे स्थिताः॥ ४६॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तुरीयांशे भविष्यदाचार्यनिरूपणं नाम पञ्चदशोऽध्यायः॥ १५॥

# ॥ अथ षोडशोऽध्यायः ॥

श्रीशाण्डिल्य उवाच –

इति वः कथिता विप्रा गुरुभक्तिः समासतः।
धर्मार्थकाममोक्षाश्च सिद्ध्यन्ति मनवो यया ॥ १ ॥
हरेर्भक्तिः पुरैवोक्ता द्विविधा विविधा अपि।
यत्राधिकारः सर्वेषां विशेषाद् गुरुसेविनाम् ॥ २ ॥
यस्य संसेवने चान्यत्कर्त्तव्यं नैव दृश्यते।
तथापि व्यवहारार्थं स्वधर्मश्चानुयोज्यते ॥ ३ ॥
शुद्धकायेन भोक्तव्यं यथामृतमहौषधम्।
न तस्य तदपेक्षास्ति अस्ति व्यवहृतिस्तथा ॥ ४ ॥
हरेरनुगृहीता ये संशयाच्छिन्नमानसाः।
तेषां व्यवहृतेर्भीतिर्न मनागुघरिसेवने (विनाम्) ॥ ५ ॥
चतुर्वर्ग्गसमृद्ध्यर्थं ब्रह्मादेर्वैभवस्य च।
प्राप्तुं न चलते चेतो लवार्द्धं हरिपद्युगात् ॥ ६ ॥
ते वैष्णवा महात्मान उत्तमाधमजातयः।
देवानां पूजनीयास्ते मुनीनां न नृणां किमु ॥ ७ ॥
तिलकादिबहिर्ल्लिङ्गैः सा संज्ञा प्राकृतात्मनाम्।
अप्राकृतानां हृच्छुद्ध्या संज्ञा सा वीतरागिणाम् ॥ ८ ॥
वने गृहे स्थितः क्वापि प्रेमप्रसरविह्वलः।
नेमं जानाति न परं हरिं पश्यति सर्वतः ॥ ९ ॥
यदृच्छयानुग्रहेण हरेरपि गुरोरपि।
लभ्यते तादृशीं भक्तिं नान्यसाधनसञ्चयैः ॥ १० ॥
निजात्मनि तथा प्रेम परात्मनि तथा न हि।
ज्ञायते चात्मनश्चात्मा हरौ प्रेम तदा भवेत् ॥ ११ ॥

शुद्धेऽद्वैते महावाक्यैः प्रोच्यते आत्मतां हरेः।
ततो भेदं विमुच्यैव स्वात्मप्रेमा भवेदयम् ॥ १२ ॥
ज्ञानिनो हरिभक्तस्य गतिरेषा प्रदर्शिता।
अज्ञानिनो निजात्मैव भाति सन्मात्र एव सः ॥ १३ ॥
चिदानन्दात्मनाभासो भवेन्मोहापनुत्तये।
निरालम्बे महामार्गे निरालम्बः कथं तरेत् ॥ १४ ॥
तरेद्वा न तरेद्वापि ततश्चालम्बनं वरम्।
आलम्बनं हरेः पादौ गुरोः पादौ प्रकीर्त्तितौ ॥ १५ ॥
धर्मार्थकाममोक्षाश्च भक्तियोगश्च कीर्त्तिताः।
महर्षयः संहितेयं नारदर्षेर्मुखाच्च्युता ॥ १६ ॥
इतः परं किं श्रोतव्यं पुनः कथयत द्विजाः।
इत्युक्ता मुनिना तेन तेऽब्रुवन् बद्धपाणयः ॥ १७ ॥

ऋषय ऊचुः —

धन्येन हरिभक्तेन वेदवेदान्तवेदिना।
दयालुना दयां कृत्वा उद्धृता भवसागरात् ॥ १८ ॥
दर्शितस्तमसः पारः सारभूतः परो हरिः।
किञ्चिज्ज्ञेयमितश्चान्यत्पेयं पीतेऽमृते किमु ॥ १९ ॥
अभयं सर्वदानानामुत्तमं परिकीर्त्तितम्।
तद्दत्तं येन गुरुणा तन्नमामो मुहुर्मुहुः ॥ २० ॥
एवं प्रोक्तः स मुनिभिर्मुनिराह पुनश्च तान्।
ब्रह्मशृङ्गं प्रयास्येऽहं यूयं तिष्ठत गच्छत ॥ २१ ॥
कौण्डिन्योऽयं स्थितश्चात्र पृष्टं वः कथयिष्यति।
इत्युक्त्वा स समुत्थाय पीठाद्यातो महामुनिः ॥ २२ ॥
सर्वे प्रणामं साष्टाङ्गं तस्मै चक्रुर्महर्षयः।
तेभ्यः स चाशिषं दत्त्वा गुप्तो यातः परात्मताम् ॥ २३ ॥
कौण्डिन्याय ततः सर्वे पीठं दत्त्वाऽब्रुवन् द्विजाः।
प्रसन्ना ऋषयस्तस्मै उपकाराय ते नृणाम् ॥ २४ ॥

**ऋषय ऊचुः —**

संहितायाश्च माहात्म्यं पाठस्य च विधिक्रमः।
संहिताया प्रभेदाश्च मुनेरस्य वदाधुना ॥ २५ ॥

**श्रीकौण्डिन्य उवाच —**

आद्योऽसौ ब्रह्मशाण्डिल्यो विद्या यस्यास्ति सामसु।
स च मन्त्रात्मको ज्ञेयोऽभिमानी देवता यथा ॥ २६ ॥
द्वित्तीयो वेदशाण्ड़िल्यो वंशाध्याये निरूपितः।
येनाधीता त्रयी विद्या भक्तिविद्या ह्यनुत्तमा ॥ २७ ॥
तृतीयो गार्धभिः प्रोक्तो वीरवैष्णवशासनम्।
येन प्रोक्तं तामसानां सर्वेषां मुक्तयेऽपि च ॥ २८ ॥
विष्णोः समाश्रयं कृत्वा त्याज्यमन्याश्रयं ततः।
शिखासूत्रादिभिः किं स्यात्किं स्याद्वर्णाश्रमाश्रमैः ॥ २९ ॥
त्यक्त्वा विधिनिषेधञ्च हरिमेकं दृढाश्रितः।
संसारपारमभ्येति इति तस्यानुशासनम् ॥ ३० ॥
धिक्कृतः स च देवेन पातितो निरये शुचौ।
पुनः समुद्धृतः सद्यो भक्तोऽयमिति विष्णुना ॥ ३१ ॥
स च विप्रकुले जातो हरिभक्तिसमाश्रितः।
इन्द्रद्युम्नं पुनः प्राप्तो वर्णाश्रमपरायणः ॥ ३२ ॥
जगदीशप्रसादान्नं साधु मेने न चाशितुम्।
पुनश्च धिक्कृतस्तत्र माहात्म्यानवबोधकः ॥ ३३ ॥
श्रुत्वैव तस्य माहात्म्यं कृत्वात्यन्तं समादरम्।
प्रसादान्नं वै जग्राह वैदिको वैष्णवोऽभवत् ॥ ३४ ॥
अयं महर्षिः शाण्डिल्य आचार्यः साम्प्रतं किल।
यात्यसौ हरिलीलायां नन्दादीनां गुरुः स्वयम् ॥ ३५ ॥
~~शिष्यः श्रीललितादेव्या~~ व्यासस्य च महात्मनः।
संहिता कथिता तेन सारभूताऽऽगमाम्बुधेः ॥ ३६ ॥

पञ्चरात्रान्तरगता नारदेनापि कीर्त्तिता ।
साम्नामृचाञ्च यजुषां सारभूतर्षिणोद्धृता ॥ ३७ ॥
भक्तिधर्मपरा या च सारभूता निरूपिता ।
समाधिसहिता या च सात्वता या महामुनेः ॥ ३८ ॥
वेदशास्त्रानुकल्पेन भक्तिधर्मः प्रकीर्त्तितः ।
धर्मोऽत्र त्रिविधः प्रोक्तस्तुरीयश्च प्रकीर्णकः ॥ ३९ ॥
अर्थश्चतुर्विधस्तत्र नीतिभेदादनेकधा ।
शुक्रस्य च गुरोश्चैव विदुरस्य महामतेः ॥ ४० ॥
नीतिश्च शकुनेश्चापि केवलार्थप्रसाधिका ।
अधर्मबहुला चैषा रक्षसां हितकारिणी ॥ ४१ ॥
कामखण्डश्च कथितस्तत्र कामा निरूपिताः ।
लौकिका वैदिकाश्चापि ऋषीणां मतभेदतः ॥ ४२ ॥
ज्ञानकाण्डानुसारेण भक्तिकाण्डानुरोधतः ।
मोक्षकाण्डश्चतुर्थोऽत्र साङ्ख्याद्यैर्मिश्रितो रुतः ॥ ४३ ॥
सगुणा निर्गुणा चापि भक्तिरत्र प्रकीर्त्तिता ।
भक्तिखण्डे प्रकरणैश्च चतुर्भिः सा निरूपिता ॥ ४४ ॥
चतुर्वेदसमा चेयमधिकापि हरेर्मता ।
संहिता प्रीतये सद्यः समस्तार्थप्रदर्शिका ॥ ४५ ॥
गङ्गेयं यमुना चेयमियं साक्षात्सरस्वती ।
निष्णाता मनुजा ह्यस्यां यान्ति ब्रह्म सनातनम् ॥ ४६ ॥
समादरेण श्रोतव्या पीठस्थस्य गुरोर्मुखात् ।
पूजा सम्यक् प्रकर्त्तव्या वैष्णवस्य च वैष्णवैः ॥ ४७ ॥
सिंहासनस्थितेनैव आम्नायानुगतेन च ।
वाचनीया संहितेयं श्रोतव्या भक्तितत्परैः ॥ ४८ ॥
ते स्नाताः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षिताः ।
तैर्दत्ता धरणी कृत्स्ना संहिता यैः श्रुता नरैः ॥ ४९ ॥

भक्तो भक्तिं समाप्नोति कामी कामान् मनोगतान्।
आप्नोति यस्य गेहेऽपि पुस्तकं पूजितं भवेत्॥ ५०॥

निखिलव्यजनहारी गोत्रधारी मुरारिः
श्रुतिगणललनानां यो विहारी समूहे।
अवतुमिभवरं यश्चक्रधारी गतो द्राग्
निजजनहितकारी नक्रवक्त्रप्रहारी॥ ५१॥

जयतु जयतु देवः सच्चिदानन्दमूर्त्ति-
र्निगमनिचयगीर्यः (तः) सर्वविश्वात्ममूर्त्तिः।
निखिलशुभगुणानां सिन्धुरिन्दुप्रपूर्त्तिः
परिचरणपरैः स्वैर्नित्यदा गीतकीर्त्तिः॥ ५२॥

निगमागमपीयूषसिन्धोरेषा समुद्धृता।
स्वादुसुधारसघटी पीयतां पीयतां मुहुः॥ ५३॥

दिवौकसां यथा विष्णुः सरितां सागरो यथा।
नक्षत्राणां यथा चन्द्रः संहितानामियं तथा॥ ५४॥

महामोहान्धकारस्य वारणायारुणद्युतिः।
सद्धृदम्बुजमोदाय संहितेयं विराजते॥ ५५॥

महर्षये नमस्तस्मै शाण्डिल्याय दयालवे।
योऽस्माकं गुरुरस्माकं जगद्गुरुमदर्शयत्॥ ५६॥

श्रुत्वैवं संहितां सर्वे कृत्वा जयजयध्वनिम्।
शाण्डिल्यं संस्तवन्तश्च मुनयोऽगुर्यथागतम्॥ ५७॥

॥ इति श्रीशाण्डिल्यसंहितायां पञ्चमे भक्तिखण्डे तुरीयांशे संहितामाहात्म्यनिरूपणं नाम षोडशोऽध्यायः॥

*॥ समाप्तोऽयं हरिभक्तिखण्डः॥*

# प्रथमं परिशिष्टम्

## श्रीशाण्डिल्यसंहितान्तर्गतक्षेत्रादीनां नामानि


| नाम | पृष्ठाङ्काः |
|---|---|
| कलापम् | १०, ३२४ |
| विशाला | १० |
| सालङ्कायनीवृत्तिः | १० |
| इन्द्रद्युम्नम् | १०,३३८ |
| उत्कलाः | १० |
| कूर्मक्षेत्रम् | १० |
| कावेरी | १०, २३, ३२७ |
| द्राविडः | १०,२३ |
| पद्मनाभम् | १०,२३ |
| * वैङ्कटम् | १०, १६३ |
| कुशस्थली | १० |
| द्वारका | १०, १६३ |
| शङ्खोद्धारम् | १० |
| प्रभासकम् | १० |
| माथुरम् | १० |
| गोकुलम् | १०, २६ |
| वृन्दावनम् | १०, २५ |
| * गोवर्धनगिरिः | १० |
| गण्डकी | १२ |
| गोमती | १२ |
| वाराणसी | १२, १६३ |
| कुरुक्षेत्रम् | १९ |
| मधुविद्या | १९ |
| कर्णाटकम् | १९ |
| आन्ध्रम् | १९ |

| नाम | पृष्ठाङ्काः |
|---|---|
| सौराष्ट्रम् | १९ |
| * उत्कलम् | १९ |
| शूरसेनम् | १९ |
| व्यासराज्यम् | १९ |
| उडुपम् | १९ |
| कमलावनम् | १९ |
| हरिस्थानम् | १९ |
| महानागम् | १९ |
| कुलाद्रिः | १९ |
| वरसिन्धुकम् | १९ |
| वेदः | २० |
| पञ्चरात्राणि | २० |
| श्वेतद्वीपम् | २०, २६२ |
| क्षीरसागरः | २० |
| ऋक् | २० |
| यजुः | २० |
| सामवेदः | २० |
| आङ्गिरः | २० |
| साङ्ख्यम् | २० |
| योगः | २० |
| सर्वोपनिषदः | २० |
| शैवम् | २२ |
| वेदारण्ये | २२ |
| पाण्ड्यविषयः | २३ |
| सह्यसानु | २३ |

| | |
|---|---|
| आहोबलम् | २३ |
| * व्यङ्कटम् | २३ |
| श्रीरङ्गम् | २३, १६३ |
| मलयाचलम् | २३ |
| काञ्ची | २३, १६३ |
| कूर्माचलः | २३ |
| त्रिविक्रमम् | २३ |
| † कृतम् | २४ |
| नारायणी (भक्तिः) | २४ |
| ब्राह्मी (भक्तिः) | २४ |
| शाङ्करी (भक्तिः) | २४ |
| † त्रेतायुगम् | २४ |
| † द्वापरम् | २४ |
| दक्षिणदेशः | २४ |
| मध्यदेशः | २४ |
| कलिः | २६ |
| कलिन्दगिरिः | १४४ |
| सहस्रनामस्तोत्रेऽनेकनामानि सन्ति | १४७ |
| सितासिततीर्थम् | १६३ |
| * मथुरा | १६३ |
| नैमिषम् | १६३ |
| अयोध्या | १६३ |
| व्रजम् | १६३ |
| * गोवर्धनम् | १६३ |
| गया | १६३ |
| पुरुषोत्तमम् | १६३, २४३ |
| पातालम् | २६२ |
| शेषवैकुण्ठः | २६२ |
| ध्रुवः | २६२ |
| नाकलोकाः | २६२ |
| व्यापिवैकुण्ठम् | २६२ |
| मुण्डकम् | २९८ |
| वेदान्तसूत्राणि | ३०९ |
| भारतम् | ३०९ |
| † मघानक्षत्रम् | ३२४ |
| महर्षयः | ३२४ |
| भारतं युद्धम् | ३२४ |
| † त्रयोदशी तिथिः | ३२५ |
| † भृगुवारः | ३२५ |
| जह्नुजा | ३२६ |
| बदरीतीर्थम् | ३२६ |
| विष्णुमन्दिरम् | ३२७ |
| गङ्गा | ३३० |
| धनुस्तीर्थम् | ३३० |
| श्रावस्ती नगरी | ३३२ |
| शुद्धाद्वैतम् | ३३७ |
| ब्रह्मशृङ्गम्[1] | ३३७ |

॥ इति प्रथमं परिशिष्टम् ॥

---

* अस्य शब्दस्यान्यत्र विभिन्नरूपेणोपलब्धेः पार्थक्येनात्र संस्थापनं कृतम्।

† अत्र निर्दिष्टस्थलतोऽन्यत्राप्युल्लेखोऽस्य कालबोधकान्यस्य चागतः।

१. पूजनीयदेवतारूपेणात्र स्थितानां पदार्थानां बहुत्वादत्रोल्लेखो न कृतः।

# द्वितीयं परिशिष्टम्

## श्रीशाण्डिल्यसंहितान्तर्गतदेवादीनां नामानि


| नाम | पृष्ठाङ्काः |
|---|---|
| सनकः | २, २४ |
| * शुकः | २ |
| वामदेवः | १७ |
| महादेवः | १७ |
| वासुदेवः | १७ |
| वसिष्ठः | १८ |
| शक्तिः | १९ |
| * पराशरः | १९, २९४ |
| * व्यासः | १९ |
| मधुनामा प्रभञ्जनः | १९ |
| दधीचिः | १९ |
| सनकादिः | २० |
| आदित्यः | २० |
| हरिः | २० |
| उपरिचरः | २१ |
| नारदः | २१, २६, २८२ |
| भीष्मः | २१ |
| कर्दमः | २१ |
| कपिलः | २१ |
| देवहूतिः | २१ |
| अनुसूया | २१ |
| * कमला | २१, २३ |
| विष्वक्सेनः | २३ |
| अगस्त्यः | २३ |
| इन्द्रप्रमितिः | २३ |
| जैगीषव्यः | २३ |
| पराभूतिः | २३ |
| महाभूतिः | २३ |
| नन्दः | २३ |
| विमलः | २३ |
| प्रह्लादः | २३ |
| विवस्वान् | २३ |
| पुण्डरीकः | २३ |
| * शङ्करः | २४ |
| देवरातः | २४ |
| पराशरिः | २४ |
| * ब्रह्मा | २४ |
| नारायणः | २६, १६३ |
| शेषः | २६, ३०४ |
| ब्रह्मरातः | २६ |
| कौण्डिन्यः | २६, ३३७ |
| गर्गः | २६ |
| * ललिता | ३३, ९२, ३१२ |
| श्रीराधा | ९१ |
| श्रीचन्द्रावली | ९२ |
| सूर्यतनया | ९२ |
| ललितास्तोत्रेऽनेकानि नामानि | १३४ |
| सहस्रनामस्तोत्रेऽनेकानि नामानि सन्ति | १४७ |
| शाण्डिल्यो ब्राह्मणः | ३४० |
| वसिष्ठादयः | २६३ |
| इन्द्रद्युम्नो नृपः | २६९ |
| कचः | २७१ |
| देवयानी | २७१ |
| चन्द्रशर्मा | २७१ |
| एकलव्यः | २७९ |
| याज्ञवल्क्यः | २८४ |
| रैभ्यः | २८४ |
| प्रह्लादः | २९३ |
| पारस्करः | २९४ |
| भगवान् | ३०२ |
| अम्बरीषः | ३०२ |
| बली | ३०२ |
| मुकुन्दः | ३०३ |

| | |
|---|---|
| आदिनारायणः | ३०४ |
| पुरारिः | ३०७ |
| * कृष्णः | ३०८ |
| दक्षकुमारादयः | ३०८ |
| सत्यवती- (पुत्रः) | ३०८ |
| अपान्तरतमाः | ३०९ |
| उग्रश्रवाः | ३१० |
| रौमहर्षणिः | ३१० |
| सङ्कर्षणः | ३१२ |
| राधिका | ३१२ |
| वागीशः | ३१२ |
| परीक्षित् | ३२४ |
| कृष्णद्वयम् | ३२४ |
| हरिः | ३२४ |
| उद्धवः | ३२४ |
| विदुरः | ३२४ |
| अभिमन्यु- (सुतः) | ३२६ |
| बुद्धः | ३२७ |
| विष्णुस्वामी | ३२७ |
| जनमेजयः | ३२८ |
| शाक्यः | ३३२ |
| शुद्धोदनः | ३३२ |
| शाक्यसिंहः | ३३२ |
| मायादेवी | ३३२ |
| महामल्लः | ३३२ |
| अशोकः | ३३२ |
| जिननृपाः | ३३२ |
| शुकस्वामी | ३३३ |
| आद्यो गौडः | ३३३ |
| इध्मबाहुः | ३३३ |
| सत्यव्रतः | ३३३ |
| देवव्रतः | ३३३ |
| गोविन्दः | ३३३ |
| व्याडिः | ३३३ |
| वासुदेवः | ३३३ |
| महीधरः | ३३३ |
| शितिकण्ठः | ३३३ |
| नीललोहितः | ३३३ |
| भागलिः | ३३३ |
| अहिराजः | ३३३ |
| सर्वयोगी | ३३३ |
| नकुलीशः | ३३३ |
| बुद्धः | ३३३ |
| कुणिः | ३३३ |
| गर्गः | ३३३ |
| मित्रकः | ३३३ |
| रुरुः | ३३३ |
| गौडपादः | ३३३ |
| गोविन्दः | ३३३ |
| देवदर्शनः | ३३३ |
| श्रीकण्ठः | ३३३ |
| सहस्रार्चिः | ३३३ |
| शतधृतिः | ३३३ |
| कुमारपात् | ३३३ |
| पराभूतिः | ३३३ |
| राजस्वामी | ३३४ |
| कुमारः | ३३४ |
| शङ्करः (आचार्यः) | ३३४ |
| महामुनिर्विष्णुः | ३३४ |
| वल्लभाचार्यः | ३३५ |
| नन्दादयः[1] | ३३८ |


॥ इति द्वितीयं परिशिष्टम् ॥


* अस्यात्रोल्लिखितस्थलतोऽन्यत्राप्यनेकवारं ग्रन्थ उल्लेख उपलभ्यते ।

१. पूजनीयदेवतारूपेण स्थितानां पदार्थानां बहुत्वादत्र परिशिष्ट उल्लेखो न कृतः ।

# तृतीयं परिशिष्टम्

## श्रीशाण्डिल्यसंहितान्तर्गतभक्तिपरम्परादिबोधकम्

### [ १ ]





---

१. शां० सं०, प्रथमांशे चतुर्थाध्याये श्लोकाः – २३, ३२, ४४।


२. अस्माज्ज्ञानवैराग्यवेदवेदान्तसम्मिता भक्तेः सरणिः प्रवृत्ता ॥ (तत्रैव –१।४।३८)

३. मधुनाम्ना प्रभञ्जनेन प्रवृत्ततया अस्या मधुविद्येति नाम। अस्या भक्तेर्विस्तार-स्थलानि – कर्णाटक-द्राविड-आन्ध्र-सौराष्ट्र-उत्कल-शूरसेन-माथुर-व्यासराज्य-उडुप-कमलावन-हरिस्थान-महानाग-कुलाद्रिं-वरसिन्धुकानि। अस्या मुख्याः सिद्धान्ताः – विष्णुरेव प्रभुरीश्वरः, ब्रह्माद्या देवताः, भक्ताः, जीवाः, स्वाभाविका दासा इत्यादयः।

[ २]




[ ३]





---

१. ऊर्ध्वरेतसोऽनेकप्रकारेणैतां व्यस्य माथुरे स्थापितवन्तः। अस्या भक्तेराचरणकर्तारो जितेन्द्रियाः कामभोगेभ्यो विरक्ता गोविन्दचरणदासा वयमिति मन्यमानाः सन्ति। (शा० सं० १।४। ४५-५२)


२. एतत्सम्प्रदायस्थशास्त्रमृग्वेदादितुल्यं साङ्ख्यादिसर्वशास्त्ररहस्यभूतं पाञ्चरात्रसंज्ञकमस्ति। एतत् श्वेतद्वीपे विष्णुनोपदिष्टम्। (तत्रैव – १।४।५३-५८)

३. अस्माद् ग्रन्थादयं मुनिशिष्य इति ज्ञायते, कस्य मुनेरिति तु न ज्ञायते ; परन्तु भारतादिसहायेन बृहस्पतिमुनिशिष्य इति निर्णीयते।

[ ४ ]




[ ५ ]




---


१. शां० सं०, प्रथमांशे, चतुर्थाध्याये, श्लो० ५९-६१,७२-७४ ।

२. तत्रैव, श्लो० ६१-७१ ।


३. अनया हरितो मन्त्रोपदेशं प्राप्य विरजातटे मन्त्रो जप्तः ।अस्या भक्तेः प्रचारस्थलानि–द्राविड-पाण्ड्य-कावेरी-सह्यसानु-आहोबल-व्यङ्कट-श्रीरङ्ग-मलयाचल-काञ्ची-कूर्माचल-पद्मनाभ-त्रिविक्रमादीनि । (तत्रैव – १।४।८१-८८)

४. अस्या भक्तेर्विशेषस्तत्त्वविचारोऽत्र शेषशेषिविभागेनात्मना स्वीकृतः ।ज्ञानकर्मसहायेन नारायणात्मिका प्रयतिरुपास्यते, सा नवधार्चाप्रकारेण यज्ञदानतपोनिष्ठै-र्मुनिभिरुपास्यते । शमादियुक्ता उपासकाः सर्वदा विष्णुं हृदयाम्भोजेऽभिन्नरूपेण ध्यायन्तोऽन्ते वैकुण्ठपुरवासिनो भवन्ति । (तत्रैव – १।४।८९-९६)

[ ६]




[ ७]




---

१. शां० सं०, प्रथमांशे, चतुर्थाध्याये, श्लोकः ९७ तथा पञ्चमाध्याये ९, १४, ९७ श्लोकाः।

२. अनेन वृन्दावने गोकुलमण्डले व्रजस्त्रीगणसेवितं श्रीकृष्णं सामगानात्सन्तोष्य भक्तिर्लब्धा।

३. लुप्तप्रायाया अप्यस्या भक्तेः प्रचारस्थलानि—माथुरमण्डल-गोकुल-गिरि- (गोवर्धन)-प्रभृतीनि।

४. शां० सं०, प्रथमांशे पञ्चमषष्ठाध्याययोस्तथा चतुर्थांशे षोडशाध्याये च द्रष्टव्यम्।

५. अयं शाण्डिल्योपविष्टे पीठे ऋषिभिः स्थापितः। (तत्रैव, चतुर्थांशे षोडशोध्याये)

॥ समाप्तं तृतीयं परिशिष्टम् ॥

Scanned

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय